Digitized by Madhuban Trust, Delhi

RSVP Series No:112

वैखानसागमकोशः
VAIKHĀNASA ĀGAMA KOŚA

Volume IV

RASHTRIYA SANSKRIT VIDYAPEETHA
(Deemed University)
TIRUPATI
2005

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

igitized by Madhuban Trust, Del

वैखानसागमकोशः

VAIKHĀNASA ĀGAMA KOŚA

Volume IV

ipin Kumar Col. Deoband. In Pu

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैखानसागमकोशः

चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम्

प्रथमो भागः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-सङ्ख्या-११२

वैखानसागमकोशः

चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम्

प्रथमो भागः

सम्पादकौ

आचार्यः लक्ष्मीनरसिंहभट्टः

आचार्यः हयवदनपुराणिकः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः

२००५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमं संस्करणम्
प्रकाशनवत्सरः २००५
सर्वेऽधिकाराः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन स्वायत्तीकृताः

प्रतयः १०००

मूल्यम् -

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन
(मानितविश्वविद्यालयेन)
प्रकाशितः

मुद्रापकः स्टूडेण्टस् आफ्सेट् , तिरुपति.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

RASHTRIYA SANSKRIT VIDYAPEETHA, TIRUPATI SERIES NO.112

VAIKHĀNASA ĀGAMA KOŚA

Volume IV

5. Pratistha Prakaranam

Part - I

Editors

PROF. LAKSHMINARASIMHA BHATTA

PROF. K. HAYAVADANA PURANIK

RASHTRIYA SANSKRIT VIDYAPEETHA

(Deemed University)

TIRUPATI

2005

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

First Edition 2005
Copy Rights Reserved

No. of Copies 1000

Price Rs :

Published by

RASHTRIYA SANSKRIT VIDYAPEETHA
(Deemed University)
TIRUPATI - 517 507 A.P. (INDIA)

PRINTED AT : **STUDENTS OFFSET, TIRUPATI.**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Dr. V.R. Panchamukhi
Chancellor

Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati- 517 507

Foreword

It gives me great pleasure in writing a foreword to this fourth Volume of Vaikhanasa Agama Kosha. Rashtriya Sanskrit Vidyapeetha (Deemed University), Tirupati had launched this unique research programme of preparing comprehensive Agama Koshas, some years ago. After the publication of the first volume in 1993 this project had remained dormant for quite some time. I am very happy to find that the project has now been revived and this volume has been brought out after sustained effort and intensive study. I do hope that the remaining volumes of this project would also be brought out in due course of time.

This Volume covers many interesting subjects such as:

ध्रुवबेरप्रतिष्ठाकालः, अङ्कुरार्पणविधानम्, ध्रुवबेरप्रतिष्ठायां यागशालाकल्पनम्, ध्रुवबेरदीनामक्ष्युन्मोचनम् , ध्रुवबेराद्यधिवासः, कुम्भपूजा, शयनाधिवासः, प्रतिष्ठाविधानम्

A Kosha is a useful document for understanding the specific meanings of and varieties of interpretations of the different concepts introduced in a subject. We have many *'Koshas'* pertaining to different disciplines of the Sanskrit literature. We have *'Nyaya Kosha'* of Pandit Jhalakikar, Bhimacharya, prepared after several decades of study of the

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Nyaya sastra and the different commentaries and texts on the subjects. We have also Koshas on various shastras, such as Vishishtadwaita Kosha, Mimamsa Kosha, Srautha Kosha etc. I am pleased to learn that our Rashtriya Sanskrit Vidyapeetha, Tirupati is engaged in the task of preparing Dwaita Kosha also. I hope this Kosha would also be compleated and published soon.

Agamas constitute an important component of Vedic literature. We have among others *Vaikhanasa Agama, Pancharatra Agama* and *Shiva Agama*. This present Kosha is pertaining to *Vaikhanasa Agama* and it has provided very useful insight into the various terms and concepts prevailing in the literature on *Vaikhanasa Agama*.

I would like to compliment with a feeling of profound appreciation and admiration, the editors of this Volume, viz Prof. L.N. Bhat and Prof. Hayavadana Puranik, for their painstaking effort in preparing this Volume. I would also like to record my appreciation of the contributions made by the other members of the research team working on this project.

The intellectual stature of the Vidyapeetha (Deemed University) would be elevated only when it brings out scholarly publications like this from time to time. Our Rashtriya Sanskrit Vidyapeetha has earned many laurels as a result of the scholarly work of its dedicated teaching and research faculty and also as a result of many innovative programmes such as Sanskrit-Science Exhibition, SANSK-NET Project, Palaeography Gallery projecting the evolution of Devanagiri script, Shastra-Varidhi Courses, Refresher Courses in shastras Training Campus on Research

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Methodology, Manuscriptology and many Shastraratha Goshtis. It is indeed commendable that Rashtriya Sanskrit Vidyapeetha, Tirupati has also the unique distinction of earning A+ grade from the *National Assessment Accredition Council* (NAAC) and has been recognized by the UGC as a *Centre of Excellence* in the Shastras. The teaching & research faculty as also the administrative staff of the Vidyapeetha deserve our special words of greetings.

I am sure that the Vidyapeetha would make further contributions to the scholarly literature in Sanskrit, by bringing out many more basic studies of great intellectual value.

I offer my prayers at the feet of Lord Srinivasa that Rashtriya Sanskrit Vidyapeetha, Tirupati may achieve all greater heights in the pursuit of excellence in the service of Sanskrit and our heritage.

I hope that the scholarly world would find this volume useful and rewarding.

V. R. Panchamukhi

(Dr. V.R. Panchamukhi)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Methodology, Manuscriptology and many Shastrartha Courses. It is indeed commendable that Rashtriya Sanskrit Vidyapeetha, Tirupati has also the unique distinction of earning A+ grade from the National Assessment Accreditation Council (NAAC) and has been recognized by the UGC as a Centre of Excellence in the Shastras. The teaching & research faculty as also the administrative staff of the Vidyapeetha deserve my special words of greetings.

I am sure that the Vidyapeetha would make further contributions to the scholarly literature in Sanskrit by bringing out many more best studies of great intellectual value.

I offer my prayers at the feet of Lord Srinivasa that Rashtriya Sanskrit Vidyapeetha, Tirupati may achieve all greater heights in the pursuit of excellence in the service of Sanskrit and our heritage.

I hope that the scholarly world would find this volume useful and rewarding.

(Dr. V.R. Panchamukhi)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रो.के.इ. गोविन्दन्
कुलपतिः (प्रभारी)

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपति - ५१७ ५०७(आ.प्र)

पुरोवाक्

अमन्दानन्दसंदोहस्य स्थानं यत् वैखानसागमकोशस्य चतुर्थसंपुटप्रथमभागरूपं प्रतिष्ठाप्रकरणं राष्ट्रियसंस्कृतविद्यापीठेन प्रकाश्य विद्वत्करकमलयोः समर्प्यत इति।

संस्कृतायोगप्रस्तावानुसारं १९६२ हूणहायने प्रतिष्ठापितस्य विद्यापीठस्यास्य कार्यकलापेषु अन्यतमं मुख्यतमं कृत्यं वैखानस-पाञ्चरात्र-शैवागमकोशसंपादनम् । तत्र वैखानसागमकोशे प्रथम-संपुटं १९९३ वर्षे प्रकाशितम् । यत्र अर्चनवास्तुविधानालयनिर्माणविषयाः विवेचिताः। तदनु २००४ वर्षे द्वितीय-तृतीयसंपुटे बेरनिर्माणविषयसंवलिते प्रकाशिते। संप्रति चतुर्थसंपुटं (प्रतिष्ठाप्रकरणं) प्रकाश्यते।

संपुटेऽस्मिन् प्रतिष्ठाशब्दनिर्वचनादारभ्य प्रतिष्ठाविधानान्ताः तदङ्गभूताश्चानेके विषयाः वैखानसागमग्रन्थेभ्यः समुद्धृत्य पाठकानां विमर्शकानाम् , अनुसन्धित्सूनां सौकर्याय प्रकाशिताः।

कार्येऽस्मिन् महति महामहोपाध्यायरामानुजताताचार्यप्रभृतयो भूयांसो विद्वांसः व्यापृताः आसन् । अधुना आगमालङ्कारादिशास्त्रेषु कृतबहुपरिचयाः आचार्यलक्ष्मीनरसिंहभट्टमहोदयाः, न्यायवेदान्तादिशास्त्रविदः आचार्यहयवदनपुराणिकाश्च बहु परिश्रम्य संपुटमिदं समपादयन् इति सहर्षं विनिवेद्य विरमति।

तिरुपति

(प्रो.के.इ. गोविन्दन्)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Rashtriya Sanskrit Vidyapeetha; Tirupati (A.P)

(Deemed University)

आगमकोशपरियोजना

Āgama Kośa Project

उपोद्घातः

संविदितमेवेदं समवगतसर्वशास्त्राणां सङ्ख्यावतां समेषां यदत्र निसर्गकरुणावरुणालयस्य प्रार्थितार्थपरिदानदीक्षितस्य च भगवतः श्रीनिवासस्य राजधान्यां तिरुपतौ संस्कृतसंस्कृतिं प्रतिष्ठापयितुं केन्द्रसर्वकारेण संस्थापितमिदं राष्ट्रियसंस्कृतविद्यापीठमासंस्थापनान्निगमागमशास्त्रसंरक्षणदीक्षम् अभिनवप्रयोगशीलं संस्कृतमातरं संसेवमानं भारते स्थेयसीं प्रतिष्ठामध्यास्त इति।

अध्यात्मचिन्तनप्रधानेऽस्मिन् भारतवर्षे सकललोकोज्जीवनाय प्रवृत्तानां तन्त्रापराभिधानानामागमानां निरन्तरप्रचारः अनादेः कालात्प्रवर्तते । अविच्छिन्नगुरुशिष्यपरम्परया आगतो ग्रन्थसन्दर्भ आगमपदेनाभिधीयते। यद्यप्याचार्यमुखादधीत्य वेदानधिगच्छन्ति शिष्या इति वेदा अप्यागमशब्देन व्यवह्रियन्ते तथापि चिरादस्मत्पूर्वजाः वेदान् निगमशब्देन विग्रहाराधनप्रतिपादकानि तन्त्राण्यागमशब्देन च व्याजह्रुः।

भारतीयसंस्कृतिनिधेः वेदस्योपबृंहणाय प्रवृत्ताः शिवविष्ण्वादीनामाराध्यदेवानां पारम्यं प्रतिपादयन्तश्चागमाः शैवशाक्तवैष्णवभेदेन त्रेधा भिद्यन्ते। तत्र शैवागमाः कापालकालामुखपाशुपतशैवभेदेन चतुर्धा भवन्ति। तत्र शैवभेदः पुनः वाम-दक्षिण-सिद्धान्तभेदेन त्रिधा। दक्षिणभेदे अन्तर्भूतानां काश्मीरागमानामुत्तरदेशेष्वेव प्रचुरः प्रचारः, शैवसिद्धान्तागमानां तु दक्षिणदेशेष्वेव प्रचारः। शैवागमाः शिवपारम्यं शिवपूजादिकं च प्राधान्येन प्रतिपादयन्ति। शाक्तागमाः दक्षिणाचारवामाचारभेदेन द्विविधा भवन्ति। दक्षिणाचारः प्रायेण वैदिकमार्गानुसारी। वामाचारस्तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैदिकमार्गपरिभ्रष्ट इति वदन्ति। उभयेऽपीमे शक्तिपारम्यं शक्तिपूजादिकं च विशेषतः प्रतिपादयन्ति। वैष्णवागमाश्च वैखानसपाञ्चरात्रभेदेन द्विविधा भवन्ति। उभयेऽपीमे विष्णुपारम्यं विष्णुपूजादिकं च प्राधान्येन प्रतिपादयन्ति।

पाञ्चरात्रागमाः पुनर्भगवता नारायणेन स्वयमुपदिष्टाः दिव्याः। मुनिभाषिता आप्तोक्ता अदिव्या इति द्विविधाः।

भगवता विखनसा भृग्वत्रिमरीचिकाश्यपेभ्यश्चतुर्भ्यः उपदिष्टः तैश्च प्रचारं नीतः वैखानसागमः।

शैव-वैष्णवाद्यागमानां विषयप्रधानाः आगमकोशग्रन्थाः समेषामागमतत्त्वावबोध-कुतूहलिनां महते उपकाराय कल्पन्त इति विद्यापीठसंस्थापकनिदेशकानां डा. बि. आर्. शर्ममहोदयानामभिसन्धिमनुरुध्य तदानीन्तनेन तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघेन (Kendriya Sanskrit Vidyapeetha Tirupati Society) विमर्शनिपुणानामन्ताराष्ट्रियख्यातिभृतां विद्यापीठसंघाध्यक्षाणां डा. वि. राघवन् महोदयानामाध्यक्ष्ये संशोधनप्रकाशनसमितिः व्यवास्थाप्यत यस्यां संशोधनप्रकाशनमर्मज्ञाः डा. एस्. एम्. कत्रे, डा. पि. एल्. वैद्य, डा. आर्येन्द्रशर्मा, डा.बि. आर्. शर्मा इत्येवं विश्वविख्याताः विद्वांसः सदस्या आसन्। तेषां मार्गदर्शनमनुरुध्य विद्यापीठस्य अनुसन्धानप्रकाशनविभागस्य विद्वद्भिः क्रिस्तूत्तरचतुः षष्ट्यधिकनवशतोत्तरैकसहस्रतमवत्सरतः क्रिस्तूत्तरषडशीत्यधिकनवशतोत्तरैकसहस्रतमवत्सरं यावत् (1964 -1986 A.D) उपलभ्यमानेभ्यः वैखानसपाञ्चरात्रागमग्रन्थेभ्यः, कतिपयेभ्यः शैवागमग्रन्थेभ्यश्च आगमकोशोपयोगिनो विषयाः सङ्कलिताः संशोधिताश्च।

तैर्विद्वद्भिः सङ्कलिताः संशोधिताः अपेक्षिताश्च वैखानसागमग्रन्थभागाः वैखानसागमकोशसम्पुटेषु समावेश्यन्त समावेशयिष्यन्ते चेत्येतदत्राविस्मरणीयमास्ते।

समापितविषयसङ्कलनेभ्यो वैखानसागमग्रन्थेभ्य उद्धृतं वैखानसागमकोशस्य प्रथमं सम्पुटं त्रिनवत्यधिकनवशतोत्तरैकसहस्रतमे (1993) क्रैस्तवीयसंवत्सरे विद्यापीठेन प्रकाशितम्। निरवरोधं पुनरागमकोशकार्यस्य निर्वर्तनाय विद्यापीठे आगमकोशपरियोजना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानवसंसाधनविकासमन्त्रालयेन द्व्यधिकद्विसहस्रतमे क्रिस्तुवत्सरे (2002) भूयः प्रकल्पिता। विद्यापीठकुलाधिपतयः डा. वि. आर् . पञ्चमुखिमहोदयाः, कुलपतिचराः आचार्याः डि.प्रह्लादाचार्यश्च अस्मिन् विषये प्रशंसार्हाः। एते धन्यवादशतैः सभाज्यन्ते।

वैखानसागमकोशस्य द्वितीयं तृतीयं च सम्पुटं बेरनिर्माणप्रकरणाभिधानं चतुरधिकद्विसहस्रतमे (2004) क्रैस्तवीयसंवत्सरे विद्यापीठेन प्रकाशितम् । तत्र द्वितीये सम्पुटे भगवतः पञ्चरूपाणि, तालमानविभागः, शिलासङ्ग्रहणम्, दारुसङ्ग्रहणम्, ध्रुवबेरकल्पनम्, मत्स्यादिध्रुवबेरकल्पनम् इति , तृतीये च सम्पुटे ध्रुवबेरोत्सेधः शिलाशूलस्थापनम्, कौतुकादिबेरकल्पनम् , परिषद्देवबेरकल्पनम् , भक्तबेरकल्पनं चेत्येवमादयोऽशाः समाविष्टाः।

वैखानसागमकोशस्य चतुर्थं सम्पुटमद्य सज्जं जिज्ञासूनां पुरत उपस्थाप्यते। अत्र प्रतिष्ठाशब्दनिर्वचनमारभ्य प्रतिष्ठाविधानपर्यन्तम् अष्टादशशीर्षकेषु विषयविशेषाः समाविष्टाः।

किञ्च आगमशास्त्रानुरागिणां विदुषां सुखावबोधाय विविधशीर्षकगतविषयविशेषाणां सारः सम्पुटेऽस्मिन् पृथक् संयोजितः। अधिगताङ्ग्लभाषाणां जिज्ञासूनां कोशगतसारभागस्य सुबोधार्थम् डा.राणि सदाशिवमूर्तिमहोदयैः आङ्ग्लभाषयाऽनूदितः सारभागोऽपि अत्र सन्निवेशितो विराजते। ततः श्रीमद्भ्य डा. सदाशिवमूर्तिभ्यः धन्यवादा वितीर्यन्ते। एतत्कोशनिर्माणप्रकारविषये तथा क्लिष्टाया आगमशास्त्रीयभाषायाश्च विषये प्रथमसम्पुटे एव विस्तृततयोक्तमेवेति नात्र पुनः प्रतन्यते।

वैखानसागमकोशस्य निर्माणकार्ये उपकृतवद्भ्यः विद्यापीठस्य अनुसन्धानप्रकाशन-विभागस्य तदनीन्तनसूरिभ्यः श्रीमद्भ्यः डा. एम् . डि. बालसुब्रह्मण्यम् , डा. मुरलीधरपाण्डेय, डा. आर् . महादेवन् , डा. वि. स्वामिनाथन् , डा. पि. पि. आप्टे, डा. यु. शङ्करभट्ट , डा. राघवप्रसाद चौधरी, लक्ष्मीनरसिंहभट्ट, ए. श्रीनिवास अय्यंगार् , पं. के. शठकोपाचार्य, डा. एन् . एस् . रामानुजताताचार्य, के. ए. बालसुब्रह्मण्यम् , डा. उमारमणझा, यशपालखजूरिया, जयप्रसादबलोधी, डा. टि. जि. अनन्तसुब्रह्मण्यम् , एम् . ए. भट्ट, के. रघुनाथन् , श्रीराममिश्र, डा. के. हैमवतीशम् , डा. के. ई. गोविन्दन् ,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एम् . सायिरामसुब्रह्मण्यशर्मा, सि हेच् . पि. सत्यनारायण, एस् . सुब्बय्य संज्ञकेभ्यः शतशो धन्यवादान् वितरावः।

बहूनामज्ञातरहस्यार्थानामुद्घाटनद्वारा आगमसम्प्रदायविदां विविधनिबन्धदर्शनसमुत्सुकानां दर्शनदर्शनव्यसनिनां चोपादेयतां मनसिकृत्य भूयः आगमकोशपरियोजनां प्रवर्तितवद्भ्यः मानवसंसाधनविकासमन्त्रालयाधिकारिभ्यः भूयांसि नमांसि तन्वहे ।

प्रकाशनीयत्वेन सङ्कल्पितस्य वैखानसागमकोशस्य संस्करणे नौ नियोजितवद्भ्यः विद्यापीठस्यास्य कुलाधिपतिभ्यः डा. वि. आर् . पञ्चमुखिमहोदयेभ्यः स्वाधमर्ण्यमावेदयावः।

वैखानसागमकोशस्य चतुर्थसम्पुटस्य प्रकाशने उपकृतवद्भ्यः न्यायविशिष्टाद्वैतवेदान्तादिकुशलेभ्यः प्रभारिकुलपतिभ्यः आचार्येभ्यः के. ई. गोविन्दन् महोदयेभ्यः, अनुपमवैयाकरणेभ्यः प्रभारि कुलसचिवेभ्यः आचार्येभ्यः एस् . एस् . मूर्तिमहोदयेभ्यश्च आधमर्ण्यं प्रकटयावः।

ईक्ष्य (प्रूफ) संशोधने सहायकः डा. रामचन्द्रजोयिस् महोदयः साधुवादेन स्मर्यते सादरम् ।

वैखानसकोशग्रन्थस्यास्य टङ्कनकर्मणि सहकृतवन्तौ श्री एन् . वेङ्कटरमणप्रसाद्, श्रीमती जि.वसुन्धरा चेत्येतौ आशीर्भिः योजयावः। मुद्रणकर्म सुष्ठु कृतवतां स्टूडेण्ट्स् आफ्सेट अधिकारिणां कार्तज्ञ्यं विनिवेद्यते।

जगज्जीवातोः श्रीनिवासस्य कृपया वैखानसागमकोशस्य चतुर्थं सम्पुटमिदं व्युत्पित्सूनाम् आगमतत्त्वकौतुकिजनानां विदुषां च बहूपकाराय स्यादिति मन्वहे।

दिनाङ्कः १३.७.२००५ — आचार्यः लक्ष्मीनरसिंहभट्टः

तिरुपतिः — आचार्यः हयवदनपुराणिकः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूचीपत्रम्

१. FOREWORD	...	VII - IX
२. पुरोवाक्	...	XI
३. उपोद्धातः	...	XIII - XVI
४. सूचीपत्रम्	...	XVII
५. विशिष्टविषयसूची	...	XVIII - XXVI
६. प्रतिष्ठाप्रकरणे प्रथमभागगतविषयविशेषाणां सारः	...	1 - 28
७. SUMMARIES	...	29 - 80
८. वैखानसकोशे परामृष्टानां ग्रन्थानां सङ्केताः	...	81 - 82
९. प्रतिष्ठाप्रकरणम् प्रथमो भागः	...	**1 - 367**
१. प्रतिष्ठाशब्दनिर्वचनादि	...	1 - 6
२. ध्रुवकौतुकयोरर्चनाभेदः	...	7 - 8
३. ध्रुवबेरप्रतिष्ठाकालः	...	9 - 13
४. आचार्यादिवरणम्	...	14 - 18
५. अङ्कुरार्पणविधानम्	...	19 - 57
६. ध्रुवबेरप्रतिष्ठायामाचार्यादीनां नियमाः	...	58 - 61
७. ध्रुवबेरप्रतिष्ठार्थं सम्भारसङ्ग्रहणम्	...	62 - 81
८. ध्रुवबेरप्रतिष्ठायां यागशालाकल्पनम्	...	82 - 126
९. ध्रुवबेरादीनामक्ष्युन्मोचनम्	...	127 - 151
१०. ध्रुवबेराद्यधिवासः	...	152 - 170
११. वास्तुहोमः	...	171 - 180
१२. आघारहोमः	...	181 - 188
१३. होमेषु साधारणा अंशाः	...	189 - 197
१४. कुम्भपूजा	...	198 - 227
१५. ध्रुवबेरादीनां कलशस्नापनम्	...	228 - 238
१६. शयनाधिवासः	...	239 - 264
१७. प्रतिष्ठाङ्गहोमाः	...	265 - 313
१८. प्रतिष्ठाविधानम्	...	314 - 367

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशिष्टविषयसूची

पृ

१. प्रतिष्ठाशब्दनिर्वचनादि

प्रतिष्ठाशब्दनिर्वचनम् 3
प्रतिष्ठाया उद्देशः 3
प्रतिष्ठा द्विविधा 4
प्रतिष्ठा पञ्चविधा 4
पञ्चविधप्रतिष्ठायां कालमार्गः 4
पञ्चविधप्रतिष्ठायां सामृतक्रमः 5
पञ्चविधप्रतिष्ठायां हारकक्रमः 5
सामृतहारकयोः मुख्यगौणविवेकः 6
प्रतिष्ठा पञ्चविंशत्यंशात्मिका 6

२. ध्रुवकौतुकयोरर्चनाभेदः

ध्रुवकौतुकयोः अचलचलभगवद्रूपबिम्बत्वम् 7
अचलचलयोः संज्ञाभेदः 8
निरालम्बसालम्बाराधनयोरधिकारिभेदः 8

३. ध्रुवबेरप्रतिष्ठाकालः

विष्णुध्रुवबेरप्रतिष्ठाकालः 9

४.आचार्यादिवरणम्

ध्रुवबेरप्रतिष्ठायाम् आचार्यादिवरणम् 14
वर्णानुरूपमाचार्यवरणम् 14
आचार्यलक्षणम् 14
आचार्यत्वानर्हाः 15
स्थापकादिवरणम् 16

पृ

ऋत्विगादिवरणम् 17
अङ्कुरार्पणमारभ्य प्रतिष्ठापर्यन्तम्
आचार्यादीनामाशौचाभावः 18
आचार्येण यजमानस्य शिष्यत्वेन स्वीकारः 18

५.अङ्कुरार्पणविधानम्

अङ्कुरार्पणकालः 19
अङ्कुरार्पणमण्डपकल्पनम् 20
अङ्कुरार्पणपात्राणां गौणकल्पः 22
अङ्कुरार्पणपात्राणामुपादानद्रव्येषु तारतम्यम् 22
अङ्कुरार्पणपात्रसङ्ख्या, यजमानवर्णानुरोधेन 22
अङ्कुरार्पणपात्राणां सङ्ख्यानुरोधेन त्रैविध्यम् 23
पालिकायाः लक्षणम् 23
कुम्भस्य लक्षणम् 25
शरावस्य लक्षणम् 26
अङ्कुरार्पणे वर्ज्यानि पात्राणि 27
अङ्कुरार्पणपात्राणामधिदैवतम् 28
अङ्कुरार्पणे तोये धान्यनिक्षेपः 28
अङ्कुरार्पणे यजमानप्रार्थना 29
आचार्यसङ्कल्पः 30
आचार्येण भगवदनुज्ञायाचनम् 30
अङ्कुरार्पणे मण्डपस्तम्भाधिदेवतार्चनम् 30
अङ्कुरार्पणे पददेवतार्चनम् 30
अङ्कुरार्पणे पीठदेवतार्चनम् 43

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
अङ्कुरार्पणे मृत्सङ्ग्रहणम्	46
अङ्कुरार्पणे सोमकुम्भार्चनम्	46
अङ्कुरार्पणे बीजावापप्रकारः	47
स्त्रीशूद्राणां यजमानत्वे विशेषः	53
अङ्कुराणामधिदेवता	53
अङ्कुरार्पणे वर्जनीया अङ्कुराः	54
अङ्कुराणां वर्णादिकमपेक्ष्य फलम्	54
अङ्कुरपात्रार्चनम् उत्तमम्	54
अङ्कुरपात्रार्चनम् मध्यमम्	54
अङ्कुरपात्रार्चनम् अधमम्	55
सद्योऽङ्कुरार्पणम्	55
प्रतिष्ठादिकर्मान्ते अङ्कुरविनियोगः	57
अङ्कुरार्पणे दीपदानम्	57
अङ्कुरार्पणस्यावर्जनीयता	57
६. ध्रुवबेरप्रतिष्ठायामाचार्यादीनां नियमाः	
आचार्यनियमः	58
ऋत्विङ्नियमः	59
पदार्थिनियमः	61
यजमाननियमः	61
७. ध्रुवबेरप्रतिष्ठार्थं सम्भारसङ्ग्रहणम्	
आचार्येण सम्भारसङ्ग्रणम्	62
द्रव्यसङ्ग्रहणे नियमः	62
यागोपकरणानां स्रुवादीनामुपादानवृक्षाः	62
स्रुवमानम्	63

	पृ
स्रुचो मानम्	64
जुहूमानम्	64
उपजुहूमानम्	66
दर्वीमानम्	67
दर्व्या उपादानवृक्षाः	68
उपभृतो मानम्	68
अग्निहोत्रहवण्याः मानम्	70
अरण्यादिनिर्माणविधिः	70
अरण्योरुपादानद्रव्यम्	70
अरण्योर्मानम्	71
मन्थदण्डमानम्	71
मन्थनरज्जुनिर्माणविधिः	73
यज्ञार्थवस्त्रोपादानद्रव्यम्	73
यज्ञे ग्राह्यं वस्त्रम्	73
यज्ञे ग्राह्यं घृतम्	74
यज्ञेऽग्राह्यं घृतम्	74
यज्ञे ग्राह्यं पयः	74
यज्ञे ग्राह्याः समिधः	75
समिद्ग्रहणे दिङ्नियमः	75
सभ्यादौ समिद्विशेषः	75
समिद्ग्रहणे देशनियमः	75
समिदिध्मनोः मानम्	75
समिधां सङ्ख्या	76
समिधां दोषास्तत्फलानि च	76
समिधां प्रतिनिधिः	77

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
इध्मनां प्रमाणम्	77
होमसाधनानां परिमाणम्	78
परिस्तरणकूर्चस्वरूपम्	78
दर्भविशेषाहरणम्	78
प्रोक्षणकूर्चमानम्	78
पवित्रमानम्	79
परिधिमानम्	79
प्रतिष्ठाहोमद्रव्यम्	79
प्रणिधिमानम्	79
घृतस्थालीपरिमाणम्	79
प्रोक्षणीपात्रपरिमाणम्	80
चरुपात्रपरिमाणम्	80
पाकस्थालीपरिमाणम्	80
वैखानससूत्रोक्तविधिना समिधाद्याहरणम्	80
प्रतिष्ठायां द्रव्यहीनायामनिष्टफलम्	81
प्रतिष्ठायां क्रियाहीनायामनिष्टफलम्	81
प्रतिष्ठायां श्रद्धाभक्तिहीनायामनिष्टफलम्	81
प्रतिष्ठायां मन्त्रहीनायामनिष्टफलम्	81
८. ध्रुवबेरप्रतिष्ठायां यागशालाकल्पनम्	
ध्रुवबेरप्रतिष्ठायां यागशालास्थानम्	82
यागशालास्वरूपम्	82
यागशालानिर्माणक्रमः	84
यागशालाद्वारेषु कल्पनीयस्य तोरणस्य स्वरूपम्	85
यागशालाद्वारेषु तोरणस्थापनम्	88
यागशालायां लम्बनीयायाः दर्भमालायाः स्वरूपम्	88
यागशालायाः अलङ्करणप्रकारः	89
स्नपनवेद्याः स्थानम्	91
यागशालायां बिम्बस्नपनार्थं श्वभ्रकल्पनम्	91
यागशालायां शय्यावेदिस्थानम्	93
शय्यावेद्याः मानम्	93
शय्यावेदिकल्पनम्	94
यागशालायाम् अलङ्कारवेदिस्वरूपम्	95
यागशालायां संभारवेदिस्वरूपम्	95
यागशालायां देवतास्थानम्	96
यागशालायां सर्वदेवार्चनस्थानम्	96
अष्टमङ्गलानां निर्माणप्रकारः	96
पञ्चायुधानां निर्माणप्रकारः	97
अष्टमङ्गलान्यतमस्य आवर्तस्य लक्षणम्	97
आहवनीयादीनां यागाग्नीनां सृष्टिः	98
पञ्चाग्नीनां कल्पने निदानम्	99
यागाग्नीनाम् आश्रमिव्यवस्था	99
पञ्चाग्नीनामधिदेवाः	100
यागशालायां कल्पनीयानामग्निकुण्डानां सङ्ख्या	100
अग्निकुण्डसङ्ख्या उत्तमा	100
अग्निकुण्डसङ्ख्या मध्यमा	100
अग्निकुण्डसङ्ख्या अधमा	101
अग्निहोत्रशब्दनिर्वचनम्	101
यागशालायां सभ्याद्यग्निकुण्डानां कल्पनम्	101
अग्निकुण्डस्य उपादानद्रव्यम्	103
गार्हपत्यशब्दनिर्वचनम्	103

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
गार्हपत्याग्निकुण्डस्य परिमाणम्	103
गार्हपत्याग्निकुण्डस्य आकारे उपपत्तिः	104
अन्वाहार्य-दक्षिणाग्निशब्दनिर्वचनम्	104
अन्वाहार्याग्निकुण्डस्याकारे उपपत्तिः	105
अन्वाहार्याग्निकुण्डलक्षणम्	105
आहवनीयशब्दस्य निर्वचनम्	106
आहवनीयाग्निकुण्डस्य आकारे उपपत्तिः	106
आहवनीयाग्निकुण्डस्य स्थानम्	107
आहवनीयाग्निकुण्डस्य परिमाणम्	107
आवसथ्यशब्दनिर्वचनम्	108
आवसथ्याग्निकुण्डस्य आकारे उपपत्तिः	109
आवसथ्याग्निकुण्डस्य लक्षणम्	109
आवसथ्याग्निकुण्डस्य परिमाणम्	110
सभ्यशब्दनिर्वचनम्	110
सभ्याग्निकुण्डस्य स्थानम्	111
सभ्याग्निकुण्डस्याकारः	111
सभ्याग्निकुण्डस्याकारे उपपत्तिः	111
सभ्याग्निकुण्डस्य लक्षणम्	111
पौण्डरीकशब्दनिर्वचनम्	112
पौण्डरीकाग्नेः लोकाः	113
पौण्डरीकाग्नेः अधिदेवता	113
पौण्डरीकाग्नेरुपयोगः	113
पौण्डरीकाग्निकुण्डस्य स्थानम्	113
पौण्डरीकाग्निकुण्डस्य लक्षणम्	113
पौण्डरीकाग्निकुण्डस्याकारे उपपत्तिः	114
पौण्डरीकाग्निकुण्डपरिमाणम्	115
पौण्डरीकाग्निमहिमा	116
श्रामणकशब्दस्य निर्वचनम्	117
श्रामणकाग्नेः अधिकारी	118
श्रामणकाग्निकुण्डस्य स्थानम्	118
श्रामणकाग्निकुण्डस्य आकारः	118
श्रामणकाग्निकुण्डस्य परिमाणम्	118
औपासनशब्दस्य निर्वचनम्	120
औपासनाग्निकुण्डस्य आकारः	120
औपासनाग्निकुण्डस्य स्थानम्	120
औपासनाग्निकुण्डस्य परिमाणम्	121
सभ्याद्यग्निकुण्डानां मेखलासङ्ख्या	122
अन्वाहार्याग्निकुण्डानां वेदिसङ्ख्या वेदिस्वरूपं च	122
अग्निकुण्डवेदिपरिमाणम्	122
दिग्देवतानामग्निकुण्डस्थानम्	124
परिवारदेवानामग्निकुण्डकल्पनम्	124
९. ध्रुवबेरादीनामक्ष्युन्मोचनम्	
शिल्पिकर्तृकध्रुवबेरस्याक्ष्युन्मोचनकालः	127
अक्ष्युन्मोचनकालस्य उत्तमादित्रैविध्यम्	127
आचार्यकर्तृकध्रुवबेराक्ष्युन्मोचनस्य कालः	128
वर्णयुक्तध्रुवबेरस्याक्ष्युन्मोचनकालः	129
कौतुकादिबेराणामक्ष्युन्मोचनकालः	129
अक्ष्युन्मोचनार्थं यागशालाप्रकल्पनम्	129
अक्ष्युन्मोचनार्थं कौतुकादिबेराणां रत्नन्यासपूर्वकं पीठे संयोजनम्	130

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
अक्ष्युन्मोचनोपकरणानामुपादानद्रव्यम्	133
ध्रुवबेरस्य अमन्त्रकमक्ष्युन्मोचनं शिल्पिकर्तृकम्	133
शिल्पिकर्तृकाक्ष्युन्मोचनानन्तरं ध्रुवबेरशोधनम्	134
वर्णयुक्तयोः केवलयोश्च ध्रुवकौतुकयोः शोधनप्रकारः	136
अक्ष्युन्मोचनोत्तरं दर्शनीयानां द्रव्याणां स्थापनम्	136
ध्रुवबेराक्ष्युन्मोचने होमः	139
वर्णयुक्तध्रुवबेरस्याक्ष्युन्मोचनप्रकारः	142
वर्णरहितानां ध्रुवबेरादीनामक्ष्युन्मोचनप्रकारः	145
ध्रुवार्चाबेराक्ष्युन्मोचने विशेषः	146
श्रीदेव्यादिबेराणामक्ष्युन्मोचनम्	146
बलिबेरादीनामक्ष्युन्मोचनम्	146
अक्ष्युन्मोचनोत्तरं दर्शनीयद्रव्याणां प्रदर्शनम्	147
अक्ष्युन्मोचनानन्तरं ध्रुवबेरशोधनम्	149

१०. ध्रुवबेराद्यधिवासः

ध्रुवबेराद्यधिवासस्यावश्यकता	152
ध्रुवबेराद्यधिवासफलम्	152
ध्रुवादिबेराणामधिवासकालः	152
ध्रुवबेराद्यधिवासत्रैविध्यं पञ्चगव्य-क्षीर-जलाधिवासभेदेन	153
ध्रुवबेराद्यधिवासस्य त्रैविध्यं जल-पञ्चगव्य-कुशोदाधिवासभेदेन	153
ध्रुवबेराद्यधिवासस्य कालव्याप्तिः	153
ध्रुवबेराधिवासकालावधिः अशक्तविषयः	154
पञ्चगव्याद्यधिवासस्य व्याप्तिकालनुरोधेन नवविधत्वम्	154
पञ्चगव्याद्यधिवासस्य निर्दिष्टकालालाभे कर्तव्यक्रमः	155

	पृ
देव्यादिबेराणामधिवासस्य कालव्याप्तिः	155
अधिवासाद्यर्थं मण्डपस्य कल्पनम्	156
अधिवासार्थं पञ्चगव्यमेलनक्रमः	156
पञ्चगव्यस्य ग्राह्याग्राह्यविवेकः	158
ध्रुवबेरस्य पञ्चगव्याधिवासनम्	159
ध्रुवबेरस्य क्षीराधिवासनम्	160
जलाधिवासस्य कालव्याप्तिः	161
मन्त्रोदकप्रोक्षणपूर्वकं ध्रुवबेरस्य जलाधिवासनम्	161
अधिवासगतध्रुवबेरानयनम्	167
बृहद्ध्रुवबेराद्यधिवासने विशेषः	168
कौतुकादिबेराधिवासे विशेषः	170
अन्यदेवबेराधिवासनम्	170
रामकृष्णध्रुवबेराधिवासनम्	170

११. वास्तुहोमः

आचार्येण पञ्चगव्यप्राशनम्	171
गोब्राह्मणैः विमानशोधनम्	171
प्रतिष्ठाङ्गभूतहोमाय अग्निमथनम्	173
मथिताग्न्यलाभे ग्राह्योऽग्निः	174
वास्तुहोमाचरणस्य कालः	175
वास्तुपुरुषद्ध्यस्वरूपम्	175
वास्तुहोमे कुण्डप्रकल्पनम्	176
वास्तुहोमप्रकारः	177

१२.आघारहोमः

ऋत्विङ्नियोजनम्	181
आघारहोमार्थमग्निप्रणयनम्	181

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
गार्हपत्यादिपञ्चाग्निष्वाघारहोमः	183
एकाध्वर्युपक्षे अन्तरा गमने निषेधः	188
१३. होमेषु साधारणा अंशाः	
होमद्रव्यपरिमाणम्	189
समिदादीनां होमक्रमः	189
हविःप्रक्षेपप्रकारः	190
समिदादिहोमद्रव्याणां देवताः	191
अग्नेः कर्णाद्यवयवस्थानानि	191
अग्नेः सप्तजिह्वाः	192
अग्निजिह्वायां होमनियमः	192
अग्निजिह्वाभेदेन होमद्रव्यभेदः	193
ज्वलितेऽग्नौ होमः प्रशस्तः	193
मन्त्रेण होमक्रमः	194
होमविशेषेषु अग्नेरवस्थानभेदाः	194
स्वाहाध्यानम्	194
स्वधाध्यानम्	195
अग्निध्यानम्	195
अग्निमध्ये भगवद्ध्यानम्	197
अग्निजिह्वायां विहितस्यानुच्छिष्टत्वम्	197
१४. कुम्भपूजा	
कुम्भपूजोपक्रमः	198
कुम्भपूजायां कुम्भलक्षणम्	198
कुम्भसंस्कारः	199
कुम्भपूजार्थं जलाहरणम्	200
कुम्भे जलपूरणम्	201

	पृ
कुम्भे रत्नादिपूरणम्	202
कुम्भे रत्नादिपूरणस्यावश्यकता	204
कुम्भालङ्करणम्	204
कुम्भाधारस्य धान्यस्य परिमाणम्	205
कुम्भस्थापनस्थानम्	206
कुम्भपूजायां कुम्भाभिमन्त्रणम्	207
ध्यानाङ्गभूतस्य स्वस्तिकासनस्य विधानम्	210
कुम्भपूजायां ध्यानाङ्गप्राणायामस्वरूपम्	211
प्राणायामफलम्	212
द्वासप्ततिसहस्रनाडीनां दशवायूनां च स्वरूपम्	214
प्राणायामे वायुरोधनक्रमः	215
कुम्भे ध्यानस्यावश्यकता	217
कुम्भजले ध्यानावाहने	219
कुम्भे भगवदावाहनक्रमः	224
पुनः प्रतिष्ठायां कुम्भे आवाहनक्रमः	224
आवाहनशब्दार्थः	225
बालालयेऽर्चिताद् बेराद् कुम्भजले आवाहनक्रमः	226
बहुभूमिविमानप्रतिष्ठायां कुम्भसङ्ख्या	227
१५. ध्रुवबेरादीनां कलशस्नपनम्	
कुम्भपूजानन्तरं ध्रुवबेरादीनां सप्तभिः कलशैः स्नपनम्	228
द्वादशभिः कलशैः ध्रुवबेरादीनां स्नापनम्	234
देवबिम्बस्य यागशालानयनसमये-ग्रामसन्धिषु प्रभूतबलिनिर्वापः	237
१६.शयनाधिवासः	
शयनाधिवासे प्रतिसरबन्धः	239
शयनाधिवासविधिः	242
शयनाधिवासनिमित्तम्	252
यागशालां परितः सर्वदेवार्चनम्	252
बिम्बाच्छादनम्	263

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	पृ
अधिवासनाङ्गं वेदाध्ययनम्	263
१७. प्रतिष्ठाङ्गहोमाः	
होमप्रतिष्ठयोर्निषिद्धः कालः	265
हौत्रशंसनम्	265
सर्वदेवतावाहनपूर्वकहोमः	268
सर्वदेवावाहनपूर्वकहोमफलम्	277
सर्वदेवार्चनम्	278
सहस्राहुतिहोमः	278
आहवनीयादिषु होमाः	282
पारमात्मिकहोमः	287
सर्वदैवत्यहोमः	290
अष्टाशीतिहोमः	298
महाशान्तिहोमः	300
परिवारहोमः	302
परिवारहोमस्य उत्तमादिभेदेन त्रैविध्यम्	303
अन्तहोमः	303
वसोर्धाराहोमः	304
दक्षिणादानम्	304
ऋत्विगादीनां दक्षिणाविभागप्रकारः	307
दक्षिणादानमशक्तानां नवविधम्	310
पूर्णाहुतिः	310
नित्यहोमार्थम् अग्निसंरक्षणम्	311
१८. प्रतिष्ठाविधानम्	
ध्रुवबेरपीठे रत्नादिन्यासः	314
सद्मप्रदक्षिणपूर्वकं कौतुकादिबेराणां पीठे संयोजनम्	328
ध्रुवबेरस्य दृष्टिपाते शुभाशुभविवेकः	335
महाबेरस्थापनम्	335
अष्टबन्धद्रव्याणि	336
पञ्चबन्धद्रव्याणि	336
त्रिबन्धद्रव्याणि	337
अष्टबन्धद्रव्याणामधिदेवाः	337
अष्टबन्धद्रव्यमानम्	337
अष्टबन्धद्रव्यावघातः	338
अष्टबन्धकल्पनप्रकारः	339
अष्टबन्धद्रव्यनिषेधः	339
अष्टबन्धयोजनप्रदेशः	339
अष्टबन्धहानौ दोषः	340
प्रतिष्ठाङ्गसूक्तादिजपः	340
बेरे व्याहृतिन्यासः	341
बेरे मातृकान्यासः	342
बेरे मन्त्रन्यासः	344
देव्योः परिवाराणां च बीजाक्षरन्यासः	345
कुम्भस्थदेवस्य ध्रुवबिम्बे आवाहनम्	346
प्रादुर्भावादिध्रुवबेराणामावाहनम्	353
बालालयबिम्बविनियोगः	353
प्रतिष्ठानन्तरार्चनक्रमः	355
प्रतिष्ठान्ते उत्सवः	356
यागोपयुक्तद्रव्यविनियोगः	357
कुम्भस्थजलस्नानादेः फलम्	358
प्रतिष्ठाफलश्रुतिः	359
प्रतिष्ठाविध्युल्लङ्घने दोषः	360
मूर्तिभेदेन प्रतिष्ठामन्त्रभेदः	360
प्रतिष्ठादिने यजमानकृत्यम्	361
प्रतिष्ठा अशक्तविषयिका	361
प्रतिष्ठानन्तरम् अविच्छेदेन नित्यार्चनविधिः	362
आलयपूजाया अविच्छित्तिसम्पादनम्	362
दत्तग्रामादेः अपहारस्य निषेधः	367

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैखानसागमकोशस्य चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम् [प्रथमो भागः]

प्रतिष्ठाप्रकरणगतविषयविशेषाणां सारः

१.प्रतिष्ठाशब्दनिर्वचनादि

प्रतिष्ठाशब्दः प्रतिपूर्वकस्थाधातुनिष्पन्नः। सर्वकर्मभिः पूज्यस्य देवस्य सकलीकृतस्य प्रतिबुध्या स्थापनार्थकः। तेन इदं ज्ञायते यत् सर्वव्याप्याकाशोपमो निष्कलः परमात्मा भक्त्या सकलीकृतः भक्तस्य हृदये सन्निहितो भवति। स एव मन्त्रैः बिम्बे प्रतिष्ठापितः तत्र सन्निहितो भवति। वैष्णवपदप्राप्तिफलकं विष्णोरर्चनं बिम्बे तत्प्रतिष्ठामूलकम्। अतः प्रतिष्ठा कर्तव्या। सा च द्विविधा। सह प्रतिष्ठा पृथक् प्रतिष्ठा चेति। किञ्च प्रतिष्ठा पञ्चविधा। इष्टकानां विन्यासः, गर्भप्रक्षेपणं, मूर्धेष्टकान्यासः, ध्रुवसंस्थापनं, महाप्रतिष्ठा चेति। पञ्चप्रतिष्ठासु एतासु पञ्चाग्नीन् जुहुयात्। प्रतिष्ठा पञ्चविंशत्यंशात्मिका। तद्याथा - प्रथममङ्कुरार्पणम्। द्वितीयं सम्भारहरणं तृतीयमक्ष्युन्मोचनम् इत्यादि।

२.ध्रुवकौतुकयोरर्चनाभेदः

ध्रुवम् अचलमिति कौतुकं चलमिति च उच्यते। यतः अचलं चलमिति भगवतो रूपं द्विविधम्। तत्र आकाशवत् सर्वव्याप्तं ब्रह्माद्यैरपि अज्ञेयं निष्कलं भगवद्रूपम् अचलम्। अतस्तदाराधनमपि निरालम्बं तत्स्थानीयत्वेन ध्रुवबेरस्यापि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अचलत्वम्। यत् अचलरूपाद्भिन्नं मत्स्याद्यंशजनकं सकलं तत् चलं तदाराधनं सालम्बम् । तत्स्थानीयत्वेन कौतुकमपि चलम्। ध्रुवबेरे दोषे सत्यपि कौतुके लक्षणसम्पत्या दोषपरिहारः शक्यः। अतः ध्रुवबेरार्चनं पुष्पन्यासमात्रे पर्यवस्यति। कौतुके तु पूजा सर्वापि क्रियते। ध्रुवार्चनं निरालम्बम्। अतः स्नानगन्धाद्युपचारः अशक्यात्वात् तत्र न क्रियते। तथापि ध्रुवबेरे यदि पूजनमिष्टं तर्हि स्नानप्लोतौ विना सर्वैरुपचारैः पूजयेदिति केचन अभिप्रयन्ति। तत्र ध्रुवबेरार्चने रविमण्डलमध्यस्थं, चन्द्रमण्डलमध्यस्थं तथा अग्निमण्डलमध्यस्थं च देवं शङ्खचक्रधरम् अभयमुद्रायुतदक्षिणपाणिं तथा कट्यवलम्बितवामपाणिं च चिन्तयित्वा अर्चयेत्। तत्र निष्कलं भगवद्रूपं परञ्ज्योतिरिति नारायण इति च कीर्त्यते। सकलं तु विष्णुरिति। निरालम्बाराधनं यतीनां विहितम्। सालम्बं तु गृहस्थानाम्। सर्वैरपि भक्त्या परिचर्या कर्तव्या। सलक्षणं परमपुरुषरूपं कृत्वा श्रिया सहैव संस्थाप्यार्चयेत्।

३. ध्रुवबेरप्रतिष्ठाकालः

फाल्गुनचैत्रवैशाखपुष्यज्येष्ठेषु मासेषु उत्तरायणे ध्रुवबेराणां प्रतिष्ठा उत्तमा। श्रावणाश्वयुजकार्तिकेषु दक्षिणायने मध्यमा। भाद्रपदाषाढयोः अधमा। मार्गशीर्षमाघौ विवर्जयेत्। नक्षत्रेषु उत्तरारोहिणीश्रवणपुष्यपुनर्वसुस्वातीहस्तचित्रानूराधाश्विन्यः उत्तमाः। शुक्लपक्षे रिक्ततिथयः वर्ज्याः। कृष्णपक्षे प्रथमाद्वितीयापञ्चम्यः ग्राह्याः। सोमगुरुसौम्यकाव्यवासराः ग्राह्याः। करणेषु ध्रुवेषु चरेषु विष्टिरष्टविधा वर्ज्या। राशिषु चरराशयः वर्ज्याः। आर्द्राश्लेषमूलनक्षत्राणि कृष्णाष्टम्युल्कापाताशनिपातदिग्दाह-पांसुलोहितोपलवर्षव्यतीपातभूकम्पातिमारुतराजमरणचन्द्रसूर्योपरागयुक्तानि नक्षत्राणि रात्रिकालश्च परिवर्जनीयाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४. आचार्यादिवरणम्

प्रतिष्ठार्थं यजमानः गुरून् स्थापकाद्यान् अध्वर्यूंश्च वरयेत्। यजमानः द्विजातिश्चेत् स्वयमाचार्यं वरयेत्। शूद्रोऽनुलोमो वा यजमानश्चेत् राजानं यजमानं सङ्कल्प्यैव गुरुं वरयेत्। हौत्रशंसनकाले तु राजवत् प्रवरं वदेत्। आचार्यश्च वैखानससूत्रोक्तविधानेन निषेकादिसंस्कारक्रियायुक्तः मन्त्रकल्पज्ञः नित्यस्वाध्यायपरः अर्चनादिसर्वप्रयोगज्ञः वैखानसागमवेत्ता साग्निः श्रुतवृत्तशीलसम्पन्नः भवेत्। आस्तिक्ययुक्तः प्रसन्नमानसः नारायणपरायणश्च भवेत्। पत्यपत्यरहितः, दुर्वृत्तः, नास्तिकः, कुब्जवामनाति-दीर्घहीनाङ्गादिशारीरदोषदुष्टः क्षयकुष्ठादिपापरोगपीडितः वेददूषकः पाषण्डः अन्यकर्मपरः अन्यदेवताभक्तश्च न स्यात्। अतिवृद्धः अतिबालः अर्थलुब्धः, अस्तमितोदितशयनश्च न स्यात्। उक्तलक्षणसम्पन्नाः षोडश ऋत्विजः। अक्ष्युन्मोचनार्थमेकः, वास्तुहोमार्थमेकः, पञ्चाग्नीनां पञ्च, अब्जहोमार्थमेकः ब्रह्मसामऋत्विजौ द्वौ, होता चैकः, स्नानार्थमेकः, सर्वदेवार्चनार्थं द्वौ, स्थापनार्थं द्वौ चेति।

आचार्यस्य ऋत्विजां यजमानस्य च अङ्कुरार्पणमारभ्य कर्मावसानपर्यन्तं द्विविधमपि आशौचं नास्ति। आचार्यः यजमानं शिष्यं सङ्कल्प्य स यजमानः द्विजातिश्चेत् अणोरणीयान् इत्यनुवाकेन तं प्रोक्षयेत्। शूद्रोऽनुलोमो वा चेत् अमन्त्रकमभ्युक्ष्य राजानं यजमानं कल्पयेत्। सूतादि प्रतिलोमः किमपि दैविकं कर्म कर्तुं कारयितुं वा देवार्थं द्रव्यं दातुं वा नार्हत्येव।

५. अङ्कुरार्पणविधानम्

प्रतिष्ठाकर्मारम्भदिनात् पूर्वं नवमे सप्तमे पञ्चमे तृतीये वा दिने सद्यो वा रात्रावेव अङ्कुरार्पणं कर्तव्यम्। लग्नादिषु गुणाधिक्यं यदि भवेत् तर्हि अह्नि वा समाचरेत्। आलयाभिमुखे ऐशान्ये उत्तरे वा अङ्कुरार्पणमण्डपं कूटं वा प्रपां वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधिवत् कारयित्वा, गोमयालेपनं कृत्वा, श्वेततण्डुलचूर्णैः सुधाचूर्णैर्वा मध्ये चक्रं कृत्वा दर्भमालादिनालङ्करणं कारयेत्। अङ्कुरार्पणपात्राणि सुवर्णरजत-ताम्रकांस्यमृण्मयानि स्युः। ब्राह्मणो यजमानश्चेत् षोडश, क्षत्रियश्चेत् द्वादश, वैश्यश्चेदष्टौ, शूद्रश्चेच्चत्वारः, सर्वेषां चत्वारो वा पालिकाकुम्भशरावाः ग्राह्याः। द्वादशसङ्ख्यानि उत्तमानि, अष्टकं मध्यमम्, चतुष्टयमधममित्यप्येके। सद्यःप्राप्तानि पात्राणि, न चेत् उपयुक्तान्यपि तानि जलेन प्रक्षाल्य, पर्यग्नीनि कृत्वा ग्राह्याणि। ताम्रात् राजतं श्रेष्ठम्। राजतात् हैमम्, अशक्तौ तु मृण्मयम्। पालिकादीनां ब्रह्मविष्णुमहेश्वराः अधिदेवताः। अङ्कुरार्पणे प्रशस्तानि धान्यानि शालिव्रीहियवमुद्गमाषप्रियङ्गुगोधूमसर्षपचण-कतिलतिल्वकमसूराणि। एतेषामलाभे यथालाभं धान्यान्याहृत्य संशोष्य सारं सङ्गृह्य तस्मिन् दिने पूर्वाह्णे तोये निक्षिपेत्।

यजमानः आचार्यं सम्यगभ्यर्च्य नमस्कृत्य अङ्कुरार्पणकार्यं कुरुष्वेति याचेत। सर्वं भारमाचार्यपादयोः समर्पयेत्। आचार्योऽपि तत्कर्म करिष्यामीति सङ्कल्प्य रात्रिपूजावसाने देवस्य विशेषपूजां कृत्वा देवदेवं प्रणम्य कार्यमावेद्य अनुमान्य कार्यमारभेत।

मण्डपस्तम्भाधिदेवताः धर्मज्ञानवैराग्यैश्वर्यचतुष्टयरूपाः चतुष्कोणे बहिर्द्वादशादित्यान् विधिवत् अर्चयित्वा मण्डपमध्ये ब्रह्माणं परितः ईशपर्जन्यजयन्तादि चतुर्विंशतिदेवान् जयन्ते शेषस्य, आदित्ये वक्रतुण्डस्य, गृहक्षते गरुडस्य गन्धर्वे चक्रस्य सुग्रीवे पङ्क्तीशस्य असुरे भूतेशस्य मुख्ये शङ्खस्य सोमे अङ्कुराधिपस्य अर्गले शान्तस्य च पीठानि कुर्यात्। मध्ये पदे ब्रह्माणं शेषादींश्च अर्चयित्वा ब्रह्माणं परितः अष्टासु दिक्षु जया - विजया - विन्दा - नन्दाद्यष्टावप्सरसः अभ्यर्च्य मृदमाहृत्य कांस्यपात्रे न्यस्य यजमानशिरसि ग्रामप्रदक्षिणम् आलयप्रदक्षिणं वा कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमस्याभिमुखे धान्यपीठे नवकुम्भं जलपूर्णं वस्त्रेण वेष्टितं ससुवर्णं निक्षिप्य अङ्कुराधिपं सोमं तस्मिन् आवाह्य अभ्यर्च्य हविर्निवेद्य पालिकादीन् मृदा वालुकाभिर्वा सकरीषाभिरापूर्य वस्त्रेणावेष्ट्य विष्णुगायत्र्या संस्थाप्य पालिकासु मेदिनीं, छिद्रकुम्भेषु राकां, शरावेषु सिनीवालीं समभ्यर्च्य हविर्निवेदयेत्। कांस्यपात्रे बीजानि निक्षिप्य क्षीरेणाभिषिच्य सोमस्याभिमुखं तेषु सोममभ्यर्च्य पुण्याहवाचनपूर्वकं तूर्यघोषयुक्तं विष्णुसूक्तजपपूर्वकं बीजानि आवपेत्। वारुणैर्मन्त्रैर्जलसेकं च कुर्यात्। स्त्रीशूद्रौ यदि अङ्कुरार्पणं कारयेतां तर्हि ताभ्यां वापं न कारयेत्। आचार्य एव वापं कुर्यात्।

अङ्कुराणां चन्द्रः अधिदेवता। श्यामला, रक्ताः, तिर्यग्गताः अप्ररूढाः, अङ्कुराः वर्जनीयाः। क्रमेण द्रव्यनाशकलहरोगमरणफलदत्वात्। पीताः शुक्लाः ऋजवः, ऊर्ध्वगताः शुभावहाः। नित्यं त्रिकालं द्विकालमेककालं वा सोममभ्यर्च्य हविर्निवेदनमुत्तमं, दीपार्चनं मध्यमम् कुम्भार्चनं विना दीपार्चनमधमम्। प्रत्यहं जलसेकं कुर्वन् अङ्कुरान् परिरक्षेत्। कर्मान्ते अङ्कुरान् जले निक्षिपेत्। त्वरान्वितो यजमानः एवं कर्तुमशक्तश्चेद् सद्य एव उक्तक्रियाः सर्वाः कृत्वा अङ्कुरावापं कुर्यात्। एवमङ्कुरार्पणे कृते देवः प्रीतो भवेत्।

६. ध्रुवबेरप्रतिष्ठायामाचार्यादीनां नियमाः

अङ्कुरार्पणादूर्ध्वं स्नानब्रह्मयज्ञोपवासकूष्माण्डहोमादिभिः त्रिषवणस्नान-हविष्यान्नभोजनदन्तनखशोधनादिभिश्च आचार्यः नियतात्मा भवेत्। एवमेव ऋत्विजोऽपि प्रत्यहं सहस्रशः सावित्रीं जप्त्वा स्त्रीशूद्रादिसम्भाषणपरिवेषणान् वर्जयित्वा जितेन्द्रिया भवेयुः। प्राणायामसहस्रं कुर्युः। यजमानोऽपि कृच्छ्रं चरित्वा हविष्यभोजी जितेन्द्रियः स्यात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७. ध्रुवबेरप्रतिष्ठार्थं सम्भारसङ्ग्रहणम्

आचार्यः स्नात्वा नित्यकर्म निर्वर्त्य ध्रुवबेरप्रतिष्ठार्थं सम्भारसङ्ग्रहणं कुर्यात्। द्रव्यं चातुर्वर्णिकस्य तथाऽनुलोमस्य भक्तिमतः ग्राह्यम्। प्रतिलोमस्य तु न ग्राह्यम्। यागोपकरणादीनां स्रुवादीनाम् उपादानवृक्षाः पलाशबिल्वखदिराश्वत्थादयः। द्विप्रादेशं स्रुवं कुर्यात्। प्रादेशमात्रायाममिति केचन। स्रुवायामञ्च स्रुचं कुर्यात्। एवमेव जुहूमुपजुहूं दर्वीं च द्वितालायामां कुर्यात्। उपभृतं च प्रादेशत्रयायामम्, अग्निहोत्रहवणीं च षड्विंशत्यङ्गुलायामाम् अरणीदर्भमालातोरणवस्त्रस्रुवादियज्ञपात्रकरकादीन् वैखानससूत्रोक्तप्रकारेण अग्निष्टोमादिष्विव विधिवद् कारयेत्।

अरण्यर्थं शमीजातः अश्वत्थः तदभावे अन्योऽश्वत्थः शमी वा ग्राह्या। पट्टिकाद्वयमपि चतुर्विंशत्यङ्गुलायामं षडङ्गुलविस्तारं द्विगोलकोत्सेधं च कुर्यात्। मन्थदण्डं च द्वितालायामं दशाङ्गुलपरिणाहं खादिरं कुर्यात्। ताम्रायसपट्टैः बन्धयित्वा मूले गोलकप्रमाणकं, मौञ्ज्या नारिकेलत्वचा वा त्रिवृतां रज्जुं मन्थनाय समाहरेत्। वस्त्राणि च यज्ञार्थं कार्पासादीनि समाहरेत्। तानि द्वादशहस्तानि दशहस्तानि अष्टहस्तादहीनानि वा इति त्रिविधानि। पञ्चतालानि चतुस्तालानि त्रितालानि वा क्रमाद्विस्तृतानि अहतानि श्वेतवस्त्राणि नवान्येव स्युः। नोपयुक्तानि जीर्णानि च्छिन्नानि वा। दशनवाष्टहस्तानां द्वादशाष्टसप्तषड्ढस्तानां वा अन्यतमायामान्यपि वस्त्राणि अनुमतानि । यज्ञे कपिलगोघृतादीन्येव गव्यानि शुभानि। आजं माहिषं वा नोपादेयम्। तथा प्रतिलोमान्त्यजातादेः गव्यादीनि मासातीतानि वा न ग्राह्याणि। सद्योदुग्धं पयः श्रेष्ठम्।

सभ्ये पालाशाः समिधः, पौण्डरीके बैल्वकाः उपयोक्तव्याः। समिधः ऐन्द्रे पालाशाः, याम्ये खादिराः, वारुणे शमीमयाः, सौम्ये बिल्वमयाः, आग्नेये अश्वत्थमयाः, नैर्ऋत्यां प्लक्षमयाः, वायव्यां वटमयाः ऐशान्यां च औदुम्बराः ग्राह्याः। तथापामार्गा अपि समिधः शुभाः। नदीतीरे वनोद्याने देवालये च समिद्ग्रहणं कर्तव्यम्। समिधश्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशाङ्गुलमात्रकाः स्युः। द्वात्रिंशदङ्गुलानि इध्मानि। प्रतिहोमम् अष्टाधिकशतं समिधः, सभ्यस्य तु सहस्रम्, अन्तहोमस्य तु सप्त समिधः। सकण्टकं, क्रिमिदष्टं, कृशं, स्थूलं पुराणं समिधं वर्जयेत्। महापथे, श्मशाने, क्रूरदेवालये, पक्ष्यावासे, उरगावासे च समिधः नैव ग्राह्याः। आतुरेण अशुचिना हीनजातिना च न सङ्ग्राह्याः। कण्टके ग्रामनाशः, सुषिरे स्वामिनाशः, शुष्के दारिद्र्यं, क्रिमिदष्टे इष्टनाशः, पिपीलिकाच्छेदे त्वग्दोषः, दीर्घे मरणं, त्वक्छेदे दौर्बल्यं च क्रमात् फलं द्रष्टव्यम्। व्याधितेन आहृतं समिधं हुत्वा व्याधिं प्राप्नोति। तस्करैराहृतं हुत्वा दुर्भिक्षं, जीर्णालयाहृतं हुत्वा रोगम्, आतुराशुचिभिः आहृतम् अनावृष्टिभयं च प्राप्नोति। उक्तलक्षणानां सर्वासां समिधाम् अलाभे पालाशमश्वत्थं वा गृह्णीयात्। इध्मान्यपि जन्तुकण्टकलेपादिहीनानि शुष्काणि ग्राह्याणि। आर्द्रसधूमदुर्गन्धानि निम्बादिदूषितानि च वर्ज्यानि।

होमार्थानां च सर्वेषां मानानां मात्राङ्गुलेन मानं स्यात्। दशभिः पञ्चभिः साग्रैः अगर्भकैः दर्भैः, कुशैर्वा ग्रथितान् षट्त्रिंशदङ्गुलान् परिस्तरणकूर्चकान् कुर्यात्। साग्रान् दशविधान् दर्भान् आहरेत्। प्रोक्षणाय हस्तमात्रं कूर्चं, द्वादशाङ्गुलमात्राणि पवित्राणि, परिस्तरणकूर्चतुल्याः परिधयः, होमार्थं घृतं पयोद्रव्यं दधि च। प्रस्थार्धपूर्णे प्रणिधी, प्रस्थपूर्णा घृतस्थाली। तथैव प्रोक्षणीपात्रम्। द्विप्रस्थं चरुपात्रं, द्विप्रस्थपाकयोग्या स्थाली। सूत्रोक्तविधिना परिस्तरणादि समाहरेत्।

द्रव्यहीनायां प्रतिष्ठायां तद्ग्रामयजमानयोः हानिः तद्द्रव्यस्यापि हानिः भवति। क्रियाहीनायां तु प्रतिष्ठायां पुण्यहानिः। श्रद्धाभक्तिहीनायां सर्वस्य हानिः। मन्त्रहीनायां तु शुभकार्यस्य मन्त्रस्य अध्ययनस्य सर्वस्यपि हानिः भवति। तस्मात्सर्वप्रयत्नेन सर्वं पूर्णं समाचरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८. ध्रुवबेरप्रतिष्ठायां यागशालाकल्पनम्

आलयात् पुरतः दक्षिणे ईशान्ये वायव्ये उत्तरे वा यागशाला कल्पनीया। षोडशस्तम्भसंयुक्तां, चतुर्हस्तविस्तृतस्तम्भमध्यां, पञ्चहस्तोच्छ्रयतालोच्छ्रयतलां चतुरश्रां चतुर्द्वारसमायुतां, दर्शनीयां यागशालां कुर्यात्। प्रपां वा तादृशीम्। यागशालाद्वारेषु चतुर्दिक्षु पूर्वतः अश्वत्थं, दक्षिणे औदुम्बरं, पश्चिमे बिल्वम्, उत्तरे वटवृक्षं तोरणं कुर्यात्। पार्श्वयोः मध्यमे वा शङ्खाकारं चक्राकारं वा कुर्यात्। मध्ये पुण्ड्रं, कुम्भं, तथा शूलं च कुर्यात्। वटवृक्षादीनामलाभे अश्वत्थमेव कुर्यात्। पञ्चहस्तोत्सेधानि तदर्धविस्तृतानि चतुर्हस्तविस्तृतानि, त्रिहस्तविस्तृतानि वा मध्ये अरत्निमात्रत्रिशूलयुतानि तोरणानि वेदरूपाणि ध्यात्वा अश्वत्थोदुम्बरप्लक्षवटैः कृतानि प्रागादिचतुर्दिक्षु अग्निमीळे, इषे त्वोर्जेत्वा, अग्न आयाहि, शन्नो देवीरिति स्थापयेत्। यागशालायां दर्भमालाः लम्बनीयाः। द्वौ द्वौ दर्भौ, मध्ये पर्वणि पर्वणि द्वितालमात्रं लम्बनार्थं प्रक्षिप्य तद्दर्भशेषभागैः रज्जुं प्रदक्षिणं कुर्यात्। पिशाचदैत्यराक्षसग्रहनक्षत्रताराद्यैः सर्वैः सर्वत्र सर्वदा देवान् दर्भमाला रक्षति।

यागाशालां गोमयेनोपलिप्य पञ्चवर्णैः नानावस्त्रैः कदलीक्रमुकपूर्ण-कुम्भमुक्तादामध्वजधूपदीपदर्भमालाभिः अलङ्कुर्यात्। द्वारे द्वारे वितानाद्यैः भूषयेत्। दीपाङ्कुरैः पुष्पमालाभिश्च अलङ्कृत्य तण्डुलान् अवकीर्य वाद्यघोषपुरस्सरम् अलङ्कारं कुर्यात्। उत्तरे बेरस्य स्नानवेदिं कुर्यात्। ऐशान्ये श्वभ्रं कृत्वा उत्तरे जलनिर्याणं कुर्यात्। आहवनीयवत् द्विवेदिसहितं तद्बेरपीठात् प्रतिदिक् चतुरङ्गुलविस्तारं स्नानाय श्वभ्रं स्यात्।

यागशालायाः मध्ये चतुर्दिक्षु चतुर्हस्तायतं चतुरश्रं द्वितालोच्छ्रयं बिम्बमानायतं शय्यावेदिं कुर्यात्। नैरृत्ये देवस्यालङ्कारार्थं द्विहस्तायतविस्तारां चतुरश्रां वेदिं कारयेत्। वायव्ये यागोपकरणद्रव्यविन्यासार्थं चतुर्हस्तायतविस्तारां भागोन्नतिं वेदिं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुर्यात्। शय्यावेदीं परितः सर्वदेवार्चनस्थानं च कल्पयेत्, तथा सप्ताङ्गुलोत्सेधान् श्रीवत्सोदकुम्भभेर्यादर्शमत्स्ययुग्माङ्कुशशङ्खावर्तरूपाण्यष्टमङ्गलानि कारयेत् । शङ्खं चक्रं गदां शार्ङ्गं खड्गं च फलकामध्ये अर्धचित्रकरूपेण कारयेत्।

ब्रह्मा अग्निं पञ्चधा सृष्ट्वा पञ्चलोकेषु अकल्पयत्। प्राच्यामाहवनीयं सृष्ट्वा स्वर्गे अकल्पयत्। दक्षिणे अन्वाहार्यं सृष्ट्वा अन्तरिक्षे अकल्पयद्। प्रतीच्यां गार्हपत्यं सृष्ट्वा भूम्याम्, अकल्पयत्। उदीच्याम् आवसत्थ्यं सृष्ट्वा महर्लोके अकल्पयद्। मध्ये सभ्यं सृष्ट्वा जनर्लोके अस्थापयत्। एवं वायोरपि पञ्चरूपाणि विष्णोः मूर्तेश्च पञ्चरूपाणि। मध्ये विष्णुः, प्राच्यां पुरुषः, दक्षिणे सत्यः, प्रतीच्यामच्युतः, उत्तरे अनिरुद्ध इति। ब्रह्मचारिणामेकोऽग्निः, गृहस्थानां त्रेताग्निः, वानप्रस्थानां पञ्चाग्निः इति ब्रह्मा अकल्पयत्।

सभ्याग्नेः विष्णुरधिदेवः, आहवनीयाग्नेः पुरुषः, अन्वाहार्यस्य सत्यः, गार्हपत्यस्याच्युतः, आवसस्थस्य अनिरुद्धः। यागशालायां शयनाद् प्राच्यां पञ्चाग्निम् एकं सभ्यं वा स्थापयेत्। पञ्चाग्नयः पौण्डरीकेण सार्धं चेदुत्तमाः। प्राच्यां गार्हपत्यः, प्रतीच्यामन्वाहार्यः, मध्ये औपासनाग्निश्चेत् मध्यमः। पौण्डरीकाग्निना सह सभ्यः एकोऽग्निः चेत्, अधमः कल्पः। अग्निहोत्रमित्यत्र 'हो' शब्दः दुःखवाचकः। अग्नौ हुतं, नरकदुःखात् त्रायत इत्यतोऽग्निहोत्रस्य अग्निहोत्रम् इति नाम सार्थकम्।

यागशालायां ब्रह्मांशाद् तृतीयांशे सभ्यकुण्डं कुर्यात्। तस्य प्राच्यामाहवनीयं, दक्षिणे अन्वाहार्यं, पश्चिमे गार्हपत्यम्, उत्तरे चावसथ्यं च कुर्यात्। शल्यलोष्टतुषाङ्गार-तृणभस्मादिहीनया मृदा वालुकैश्च कुण्डं कुर्यात्।

गृहपतेः धार्यत्वात् गार्हपत्यस्य गार्हपत्यनाम। शय्यावेद्याः पश्चिमे वेदिद्वयसमन्वितं सार्धाष्टादशाङ्गुलमानेन वृत्तकुण्डं गार्हपत्यस्य कुर्यात्। गार्हपत्याधारभूतायाः भुवः मण्डलाकारत्वेन तत्कुण्डमपि मण्डलाकारम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आहवनीयाग्नेः सकाशाद् आह्रियमाणत्वेन दक्षिणाग्निः अन्वाहार्य इत्युच्यते। दक्षिणे कल्प्यमानत्वात् दक्षिणाग्निश्च। अन्वाहार्यस्याधारभूतमन्तरिक्षं चापाकारम्, अतः तत्कुण्डमपि चापाकारम्। तस्योत्सेधं विस्तृतिं च भागं कुर्यात्।

अग्निहोत्रादिके सर्वं हव्यमादाय तेन होतव्यः आहवनीयोऽग्निः। अतस्तस्य आहवनीय इति नाम सार्थकम्। चतुरश्राकारस्वर्गलोकस्थितत्त्वाच्च तत्कुण्डस्य चतुरश्राकारत्वमपि युक्तम्। यज्ञशालां नवधा विभज्य मध्ये ब्राह्मे शय्यावेदिं कृत्वा ऐन्द्रे पदे सभ्यम् आहवनीयं च कुर्यात्। आहवनीयञ्च औपासनाग्निकुण्डवत् कुर्यात्। ततश्च सभ्यस्य पूर्वभागे उत्तरे आहवनीयकुण्डस्य स्थानम्। कुण्डञ्च द्वात्रिंशदङ्गुलायतं, चतुरङ्गुलविस्तारं भागोन्नतं च। कुण्डस्य दक्षिणे ब्रह्मणः स्थानम् । तस्य दक्षिणभागे पितृस्थानम्। कुण्डस्योत्तरतः पार्श्वे सोमस्थानञ्च कल्पयेत्।

आवसथे वसतीति आवसथ्याग्नेः आवसथ्यनाम। त्रिकाश्रकाकार महर्लोक-स्थितत्त्वेन तत्कुण्डस्य त्रिकाश्रकाकारत्वम्। आवसथ्यकुण्डं षड्यवाधिकाष्टचत्वारिं-शदङ्गुलं, तदेकभुजोर्ध्ववेदिकं द्विवेदिसहितम्।

९. ध्रुवबेरादीनामक्ष्युन्मोचनम्

प्रतिष्ठादिवसात्पूर्वं नवमे सप्तमे पञ्चमे तृतीये द्वितीये वा दिवसे शिल्पिना अमन्त्रकं ध्रुवबेरस्य अक्ष्युन्मोचनं कारयेत्। तत्र सप्ताहम् उत्तमं, पञ्चाहं मध्यमं त्र्यहं चाधमम्। शिल्पी बेरस्य दृष्टिमण्डलमध्ये यूकामात्रम् अमन्त्रकं व्यपोह्य गौतमीयोक्तमार्गेणाक्षिमोचनं कुर्यात्। ततः परदिने आचार्यः समन्त्रकम् अक्षिमोचनं कुर्यात्। प्रतिष्ठादिनात् पूर्वं द्वितीये वा दिने इदमक्षिमोचनं विहितम्। प्रतिष्ठादिनात्पूर्वं तृतीये द्वितीये वा तदिति केचित्। सूर्यराहुशनीनाम् उदयं वर्जयित्वा अन्धनक्षत्रं च वर्जयित्या अन्यस्मिन् शुभदिने अक्षिमोचनं कार्यम्। तदा सर्वसम्पत्समृद्धिर्भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यथा तु सर्वनाशः। वर्णयुक्तध्रुवबेरस्य चित्राभासस्य च पूर्वेद्युः अक्षिमोचनं कुर्यात्। कौतुकादिबेराणां तु पूर्वस्मिन् पञ्चमे दिने तत् कुर्यात्।

यागस्थानस्य प्राच्याम् आग्नेय्यां ऐशान्यां दक्षिणस्यां वा दिशि अक्ष्युन्मोचनार्थं यागशालां कल्पयेत्। अक्षिमोचनार्थं वर्णपात्रं तूलिकां, सूचीं दृढकरीं, शलाकां च सुवर्णनिर्मितां तथा उलिकां ताडनीं च रजतनिर्मितां च सम्पादयेत्। आलयस्योत्तरे पार्श्वे कूटं प्रपां वा चतुर्हस्तायतां चतुरश्राम् अक्ष्युन्मेषायाधिवासार्थं कल्पयेत्। पञ्चगव्याद्यैः अभिषिच्य प्रतिमाम् आलयाभिमुखे पीठे प्राङ्मुखं स्थापयेत्। आचार्यः यजमानेन ऋत्विग्भिः सह स्नात्वा ब्रह्मयज्ञम् औपासनं वास्तुहोमं भूमियज्ञं च कृत्वा बिम्बस्य पर्यग्निं कृत्वा कुशोदकैः समभ्युक्ष्य संस्नाप्य नववस्त्रैः समलङ्कृत्य पुण्याहवाचनं कारयेत्।

आलयाभिमुखे भूमिमलङ्कृत्य धान्यराशौ पीठं सन्न्यस्य तन्मध्ये ब्रह्माणम् इन्द्रादिदिक्पालांश्चाभ्यर्च्य ब्रह्ममणिवज्रमौक्तिकवैडूर्यादिरत्नानि क्रमेण अष्टासु दिक्षु विन्यसेत्। अथवा चतुर्दिक्षु पञ्चरत्नानि निक्षिपेत्। रत्नालाभे सुवर्णं निक्षिप्य पीठे बेरं संयोज्य पश्चात् शिल्पिनमाहूय सुदृढं कारयित्वा अक्ष्युन्मोचनं कारयेत्। शिल्पी धृतोर्ध्वपुण्ड्रोपवीतः पश्चिमभागे प्राङ्मुखः स्थितः पवित्रं मनसा ध्यात्वा पीठस्योपरि देवेशमर्चयेत्। आचार्यः शिल्पिनं प्रपूज्य विसृजेत्।

अक्ष्युन्मोचनानन्तरं धान्यराशिं तिलराशिम्, आज्यं, दधि, मधु, क्षीरं देवस्य दर्शनाय पुरतः स्थापयेत्। गामेकां लक्षणान्वितां स्वर्णशृङ्गां रौप्यखुरां सवस्त्रां सवत्सां देवाग्रे स्थापयेत्। तदङ्गेषु उक्ता देवताः पूजयेत्। तृणमुष्टिं तृणापूपं च दद्यात्। धान्यराशिः अष्टद्रोणादहीना स्यादिति केचित्। षड्द्रोणादहीनेत्यपरे। शालिव्रीहिप्रियङ्गुमाषनिष्पावसर्षपतिलमुद्गाः अष्टौ धान्यानि प्रत्येकं द्रोणम् अथवा तत्समम् एकद्रोणं वा व्रीहीन् देवाग्रे स्थापयेत्। ध्रुवबेरस्याक्ष्युन्मोचने औपासनाग्निकुण्डे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आघारं हुत्वा विष्णुसूक्तपुरुषसूक्तादिभिः होमं कुर्यात्। कापिलेन घृतेन तदलाभे अन्यगव्येन माहिषाजादिकं विना जुहुयात्।

अक्षिप्रसाधकं वर्णं तूलीसमन्वितं सुवर्णपात्रेण धृत्वा पौरुषं सूक्तमुच्चार्य दक्षिणे नयने 'अतो देवा'दिना वामे च दृष्टिमोचनं कुर्यात्। पक्ष्मादीनां षण्मण्डलानां पृथिव्यप्तेजोय्वावाकाशपरमात्मेति षण्मण्डलाधिपान् स्मृत्वा अक्षिमोचनं कुर्यात्। अतो-देवादिना दक्षिणे नयने पुंसूक्तेन वामे च अक्षिमोचनं कार्यमिति केचित्। वर्णहीनस्य ध्रुवबेरादेः सुवर्णसूचीदृढकरीभ्यामेव पक्ष्मादीनि सङ्कल्प्य अक्ष्युन्मेषणं कार्यम्। श्रिये जातेति श्रीदेव्याः मेदिन्यादिना महीदेव्याश्च तथान्यदेवानां तत्तन्मन्त्रेण अक्ष्युन्मेषणं कृत्वा पुण्याहं वाचयेत्। अक्ष्युन्मोचनोत्तरं गवादीनि मङ्गलद्रव्याणि प्रदर्शयेत्। ततः अधिवासत्रयात् परं नेत्रे मन्त्रेण प्रोक्ष्य शयने हरिं शाययेत्।

१०. ध्रुवबेराद्यधिवासः

ध्रुवबेरादीनां स्थापनात्पूर्वं तेषामधिवासः कर्तव्यः। अनधिवासितानां बेराणां स्थापनेन तद्ग्रामस्य तथा यजमानस्थापकादीनां च आशु विनाशः सम्भवति। अधिवासोऽयं बिम्बशुध्यर्थमेव करणीयः। तथा बिम्बे देवतासान्निध्यकरणाय च। बेराणा-मक्ष्युन्मोचनानन्तरमधिवासः करणीयः। अधिवासक्रमः द्विविधः। पञ्चगव्यक्षीरजलाधिवास इति एकः क्रमः। जलपञ्चगव्यकुशोदाधिवासक्रमः अपरश्चेति। मण्डपं वा प्रपां वा अधिवासार्थं विमानाभिमुखे कारयेत्। जलगव्यकुशोदेषु प्रत्येकम् एकमहोरात्रमधिवासो विहितः। दिवा चैकं वा अधिवासयेत्। एवं कर्तुमशक्तश्चेत् त्रिदिनं दिनमेकम् अहो वा यामं वा केवले जले अधिवासयेत्। जलगव्यकुशोदेषु प्रत्येकं त्र्यहं द्व्यहमेकाहं वा अधिवासः उत्तमः कल्पः। दिनार्धं, तदर्धं, तदर्धं वा मध्यमः कल्पः। दशनाडिकाः तदर्धं त्रिनाडिका वा अधमः कल्पः। यद्वा - पूर्वे अहनि पञ्चगव्याधिवासं क्षीराधिवासं जलाधिवासं च प्रत्येकं याममात्रं कुर्यात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चगव्याधिवासप्रकारः

नीलवर्णायाः गोः मूत्रं, कृष्णायाः गोमयं, ताम्रवर्णायाः क्षीरं, श्वेतायाः दधि, कपिलायाः घृतं च सङ्गृह्णीयात्। षोडशांशेषु षड्भागं गोमूत्रं, चतुर्भागं गोमयं, त्रिभागं क्षीरं, द्विभागं दधि, एकभागं च घृतं गृह्णीयात्। धान्योपरि वस्त्राण्यास्तीर्य मध्ये धान्योपरि प्रधानकुम्भं प्राच्यां गोमूत्रम्, आग्नेय्यां गोमयं, दक्षिणे दधि, पश्चिमे घृतम् उत्तरे च क्षीरं न्यसेत्। कुम्भेषु कूर्चान् पञ्चरत्नानि च निक्षिपेत्। गोमूत्रे ऋग्वेदं, गोमये बृहस्पतिं, क्षीरे अथर्वाणं, दध्नि यजुर्वेदं, घृते सामवेदं ध्यात्वा तत्तन्मन्त्रेण गोमूत्रादीन् कलशे पूरयेत्। पश्चात्तोयेन च पूरयेत्। समिदग्रेण मर्दयेत्। तत्र तदधिदेवं शिवमर्चयेत्। पुरुषसूक्तेनाभिमन्त्रयेत्। प्रोक्षणे, प्राशने, अभिषेके, अधिवासने च पञ्चगव्यमेवं विनियोजयेत्। गव्यमपक्वं मृत्पात्रे पूरयेत्। त्र्यहं, द्व्यहं वा गव्यं न ग्राह्यम्। औपासनाग्निकुण्डं कृत्वा, आघारं हुत्वा देवेशं संस्नाप्य पुण्याहं वाचयित्वा पञ्चगव्ये प्राक्शिरः देवेशं शाययित्वा विष्णुब्रह्मरुद्रादिदेवेभ्यः हुत्वा तद्रात्रौ तदालयगतदेवेभ्यः सर्वेभ्यः मौद्गिकं बलिं निर्वापयेत्।

क्षीराधिवासप्रकारः -

प्रभाते स्नात्वा अधिवासगतं देवमुद्धृत्य, संस्नाप्य अवटं गव्येन क्षीरेणापूर्य तस्मिन् अधिदैवम् अथर्ववेदमभ्यर्च्य पुष्पाणि निक्षिप्य तस्मिन् देवं शाययित्वा पूर्ववत् होमं कृत्वा तद्रात्रौ बलिं निर्वापयेत्। अयं क्षीराधिवासः बहुषु ग्रन्थेषु वैकल्पिकत्वेन स्वीकृतः।

जलाधिवासप्रकारः -

द्वात्रिंशत्प्रस्थसम्पूर्णं कुम्भं तन्तुना परिवेष्ट्य द्रोणधान्योपरि विन्यस्य हेमरत्नादिना सह जलमापूर्य कुशकूर्चान् प्रक्षिप्य वस्त्रेण वेष्टयित्वा तत्र तीर्थान् आवाह्य पुण्याहवाचनानन्तरं तेनैव जलेन बेरं प्रोक्ष्य त्रिदिनं द्विदिनमेकाहं वा जलेऽधिवासयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नदीतटाकवापीषु समुद्रे वा नद्यादीनामलाभे तु जलद्रोण्यामधिवासः कार्यः। जलद्रोणीं कूर्चाक्षतसहितेन जलेन पूरयित्वा क्षीरोदधिरिति स्मृत्वा देवेशं नववस्त्राद्यैरलङ्कृत्य देवीभ्यां समायुतं जले प्राक्शिरः शाययित्वा शङ्खगदाद्यायुधानि दिक्षु अर्चयित्वा अजस्रदीपं सन्दीप्य परितः प्रावरणं कुर्यात्। तद्रात्रौ तदालये ग्रामे च प्रदक्षिणक्रमेण दिग्देवताभ्यो मुद्गनिष्पावतिलमाषाद्यपूपसंयुक्तं बलिं निर्वापयेत्। प्रभाते देवमुत्थाप्य शुद्धोदके संस्नाप्य अभ्यर्च्य यानमारोप्य ग्राममालयं वा प्रदक्षिणं कारयित्वा आलयाभिमुखे देवं संस्थापयेत्।

बिम्बं महत् चेद् अधिवासोऽशक्यः। अतः पञ्चगव्यैः क्षीरेण कुशोदैश्च पृथक् पृथक् अष्टोत्तरशतकुम्भान् पूरयित्वा अत्र देवताः पूर्ववत् पूजयित्वा मन्त्रैः अभिषेचयेत्। कौतुकादिबेराणां पञ्चगव्याधिवासः क्षीराधिवासश्च न भवतः। एतद्द्वयं विना जलाधिवासं कृत्वा ग्रामे सर्वत्र तद्रात्रौ प्रभूतं बलिं निक्षिपेत्। एवमेवान्यदेवबेराणां तथावताराणां पार्षदानां च बलिबेरवत् पृथगधिवासनमाचरेत्।

११. वास्तुहोमः

पञ्चगव्यप्राशनम्। पञ्चगव्यानि पञ्चगव्यषोडशांशमध्ये द्विभागं गोमूत्रकम्, एकभागं गोमयजलं, दशभागं क्षीरं, द्विभागं दधि, एकभागं घृतम् एवं विधिवत् संयोज्य, समभ्यर्च्य गायत्रीं समुच्चरन् पद्मपत्रेण प्रस्थमात्रं पञ्चगव्यं पिबेत्। अशक्तश्चेत् प्रस्थपादादहीनकं पिबेत्।

विमानं गोभिः ब्राह्मणैश्च शोधयेत्। तद्यथा- विमानाङ्कणे सतृणान् दूर्वाग्रान् पलालान् सजलानि पात्राणि निक्षिप्य, पञ्चरात्रं त्रिरात्रमेकरात्रं वा धेनूः स्थापयेत्। रात्रौ तासां दुग्धं नाहरेत्। दुग्धपानादिभिः वत्साः सन्तृप्ता भवेयुः। वत्सपीतस्तनाग्रेभ्यः स्रुतैः क्षीरबिन्दुभिः गोमयमूत्रैश्च तत्स्थानं शुद्धं भवति। तदनन्तरं तत्र ब्राह्मणभोजनं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कारयेत्। चतुर्विंशतिं वा पञ्चाशद् वा शताधिकं वा ततोधिकं वा ब्राह्मणान् तत्स्थाने भोजयेत्। भोजनानन्तरं तेषामुच्छिष्टं शोधयेत्।

अग्निमथनम् - यज्ञागारे अरणी प्राङ्मुखं सन्न्यस्य, अरण्यां महीं, मन्थे विष्णुम्, उत्तरपट्टिकायाम् अग्निं , रज्जौ वासुकिम्, अभ्यर्च्य, मन्थे रज्जुं समावेष्ट्य, उत्तरपट्टिकां संयोज्य, समन्त्रकं मथित्वा उत्पन्नमग्निं समुज्वाल्याभिवादयेत्। अथवा श्रोत्रियागारात् अग्निमाहत्य वैश्वानरसूक्तं जपेत्।

वास्तुहोमः - आलयस्योत्तरे पार्श्वे श्रामणकं कुण्डं कृत्वा मथितं लौकिकं वाग्निं स्थापयित्वा वास्तुहोमं रात्रौ आचरेत्। वास्तुपुरुषः आलयसमविस्तारः, चलाचलभेदेन द्विप्रकारः। अचलो वास्तुपुरुषः भूमौ प्राक्शिराः अधोमुखः शेते। सः शर्व इत्यभिधीयते। तस्योपरि शयानः चलवास्तुपुरुषः ऊर्ध्वमुखः मध्याह्ने प्राक्शिराः, सायं दक्षिणशिराः, अर्धरात्रे पश्चिमशिराः, प्रातः उत्तरशिराः एवं क्रमेण सङ्क्रमते। उल्कया अग्निमाहत्य मूलबिम्बस्य पार्श्वे सर्वत्र गर्भालये, अर्धमण्डपे, स्नपनालये, गोपुरे, प्राकारादिषु सर्वत्र प्रादक्षिण्यक्रमेण दर्शयित्वा पश्चादग्निं विसर्जयेत्। पञ्चगव्यं प्रोक्षयेत्। पुण्याहं कृत्वा विधिवत् वारुणवैश्वदेवाद्याहुतीः हुत्वा परिषेकं कारयेत्।

१२. आघारहोमः

आचार्यः यजमानं मन्त्रेणाभ्युक्ष्य सघृतं पयः प्राशयेत्। यजमानः द्विजश्चेत् समन्त्रकं, हीनवर्णश्चेत् अमन्त्रकं तमाचार्यः शिष्यत्वेन परिगृह्णीयात्। तेन शिष्यः पापात् प्रमुच्यते। ऋत्विजश्चाहूय आसनेषु उपवेश्य समन्त्रकं दधि प्राशयेत् । तत्तत्कर्मणि तांश्च नियोजयेत्।

मथिताग्निं वा संस्कृतं वास्तुहोमाग्निं वा गार्हपत्यकुण्डे प्रणयेत्। त्रिवारं संस्कृतः लौकिकाग्निरपि मथिताग्निसमो भवेत्। वास्तुहोमाग्निं तु विधिना संस्कृत्य गार्हपत्ये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणयेत्। आघारहोमार्थं गार्हपत्याग्निकुण्डे आघारान्ते अग्निं वर्धयित्वा तस्मात् क्रमेणान्वाहार्याहवनीयावसथ्यसभ्यपौण्डरीकादिकुण्डेषु अग्निं प्रणयेत् । तद्यथा- अच्युतं सत्यं पुरुषम् अनिरुद्धं विष्णुं वासुदेवं नारायणं च क्रमेण गार्हपत्यान्वाहार्याहवनीयावसथ्यसभ्यपौण्डरीकश्रामणकाग्निषु आवाह्य आघारहोमं कुर्यात्। आघारान्ते पक्वहोमात्पूर्वं तेषामन्तरं न व्रजेत्। एकाध्वर्युत्वे तु प्रवाहणानन्तरं पुनः परिस्तीर्य होममाचरेत्। अस्य प्रायश्चित्तं वैष्णवं यजेत्।

१३. होमेषु साधारणा अंशाः

होमेषु घृताहुतिः अविच्छिन्नतया चतुरङ्गुलिसंस्रावा भवेत्। अन्नाहुतिः अङ्गुष्ठपर्वमात्रा न्यग्रोधफलमात्रा वा सघृता भवेत्। लाजं मुष्टिमितं, तिलसर्षपसक्तूनामाहुतिश्च शुक्तिमात्रा। अनामिकाङ्गुष्ठाभ्यां समिदाधानं कुर्यात्। स्रुवमध्ये धृतां घृताहुतिं जुहुयात्। स्वस्थाग्नेः उन्मुखीकरणाय पूर्वम् 'अदिते अनुमन्यस्व ' इति, अन्ते च स्वास्थ्यविधानाय 'अदितेऽन्वमग्ग्स्थाः ' इति च परिषेकं कुर्यात्। अङ्गुष्ठानामिकयोः मध्ये स्रुवं धृत्वा प्रदेशिनीमध्यमे च स्रुवस्याधःप्रसार्य, कनिष्ठाङ्गुलिं विसृज्यैव चतुरङ्गुलप्रमाणं घृताहुतिं स्रुवेण जुहुयात्। अङ्गुष्ठानामिकमध्यमाभिः घृताक्तां समिधं गृहीत्वा मन्त्रान्ते प्रागग्रं जुहुयान्।

समिधाम् ऋषयोऽधिदेवताः। अपूपसमिधोः ईशः, लाजस्य रविः, आज्यसर्षपयोः अग्निः, तिलस्य पितरः, चरोश्च विधाता इत्येवमधिदेवताः ध्येयाः।

अग्नेः सप्त जिह्वाः-हिरण्या, कनका, रक्ता, कृष्णा, वसुप्रभा, अतिरक्ता, बहुरूपा चेति। तासां जिह्वानां स्थानानि क्रमात् ईशान्यपूर्वाग्नेयदक्षिणपश्चिमवायव्यमध्यदिक्षु भवन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किञ्च कुण्डे काष्ठेषु अग्नेः कर्णः, स्वल्पतरधूमस्थले नासिका, मन्दप्रज्वलनस्थले नेत्रम्, अङ्गारपुञ्जस्थले शिरः, महाप्रज्वलनस्थले मुखम्।

तत्र कर्णे होमः कृतश्चेत् व्याधिः, नासिकायां महद् भयम्, चक्षुषि अन्धत्वं, मस्तके सर्वनाशनम्। अतो मुखे जिह्वाग्रे जुहुयात्।

सप्तसु जिह्वासु मध्ये हिरण्यायां समिद्धोमं, कनकायां घृतं, रक्तायां सर्षपान्, कृष्णायां लाजं, वसुप्रभायामपूपम्, अतिरक्तायां तिलम् अन्यानि च बहुरूपायां जुहुयात्।

अग्नौ निर्धूमे ज्वलिते सति दीप्तेष्वग्निकणेषु अशब्दं भिद्यमानेषु आहुतीः जुहुयात्। मन्त्रान्तर्वर्तिनं विष्णुं स्मरन् स्वाहान्तैर्मन्त्रैर्जुहुयात्।

इध्महोमे तिष्ठन्तं चरुहोमे आसीनं समिदाज्याहोमे शयानं तिलापूपहोमादिषु सुखासीनं च अग्निं ध्यात्वा होमं कुर्यात्।

स्वाहा च श्यामकौशेयवस्त्रा, द्रुतकाञ्चनाभा, अपरा लक्ष्मीरिव ध्येया। स्वधा च रक्तकौशेयवस्त्रा नवदूर्वादलश्यामा।

अग्निः किंशुकपुष्पाभः, शुकपिञ्छाम्बरधारी, सर्वाभरणसंयुक्तः, ज्वाला-मालासमाकुलः, द्विशीर्षः, चतुःशृङ्गः, द्विश्रोत्रः, द्विनासिकः, चतुर्णेत्रः, सप्तहस्तः, त्रिपादः, मेखलादण्डकृष्णाजिनयज्ञोपवीतान्वितः, स्वाहास्वधाभ्यां सह दर्भसंस्तरे समासीनः, कपिध्वजः, मेषारूढः, दक्षिणे हस्ते शक्तिं वरदं स्रुक्स्रुवौ वामे जुहूमुपजुहूं गदां च बिभ्रत् कुण्डमध्ये ध्येयः। यद्वा - दक्षिणैः करैः स्रुक्-स्रुव-अक्ष-शक्तीः, वामबाहुभिः चामरं, व्यजनम् ,आज्यपात्रं च बिभ्रद्ध्येयः।

अग्निमध्ये शङ्खचक्रधरं, पीतवाससं, कालमेघश्यामं नारायणं ध्यात्वा गन्धाद्यैः पूजयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निजिह्वायां हुतं दोषाय न भवति, तदुच्छिष्टं न भवतीति ब्रह्मवादिनो वदन्ति।

१४. कुम्भपूजा

द्वात्रिंशत्प्रस्थसम्पूर्णं सौवर्णं राजतं ताम्रं मृण्मयं वा कुम्भं सूत्रेण परिवेष्ट्य यज्ञालये वायव्यभागे सन्न्यसेत्। पुण्यतीर्थनद्यादिजलमाहृत्य, कुशेनोत्पूय एलाचन्दनगन्धादीन् सन्न्यस्य शरावेण पिधाय वस्त्रेण समाच्छाद्य यज्ञालये वायव्ये सम्भारस्थाने सन्न्यसेत्। तज्जलं वस्त्रेणोत्पूय तेन कुम्भं पूरयेत्। कुम्भे परिमलद्रव्याणि पुष्पाक्षतादीनि नवरत्नादीनि च विन्यसेत्। तेन कलशदेवतासन्निधिः कलशे जायते यतः रत्नम् अस्थि, तन्तुः सिराः, मृत्तिका मांसम्, रक्तमृत्तिका शोणितम्, जलं मेदः, कूर्चं शुक्लम्, वेष्टनाम्बरं चर्म एवं कुम्भदेवस्य सप्तधातवो भवन्ति इति चिन्तनीयम्। अतः एतेष्वेकं विहीनं चेत् कुम्भे कुम्भदेवस्य सन्निधिर्न भवति। भारं वा तदर्धं वा पादं वा धान्यराशिः कुम्भपीठे न्यसनीयः। आत्मसूक्तं जप्त्वा प्राणायामहृदयादिन्यासं कृत्वा कुम्भजले अष्टदलपद्मं, तन्मध्ये श्यामवर्णं द्विभुजं महेन्द्रमण्डलं, तन्मध्ये पद्मे सितोत्पलवर्णं द्विभुजं वरुणमण्डलं, तन्मध्ये तप्तहाटकसङ्काशं, चतुर्भुजं, शङ्खचक्रधरमादिबीजं सन्न्यस्य अष्टसु दिक्षु प्रणवेनावेष्ट्य विष्णुसूक्तादि जप्त्वा ज्ञानयोगमार्गेण ध्यानमारभेत्।

प्राणायामे रेचकपूरककुम्भकेति अंशत्रयमस्ति। निःश्वासविसर्जनं रेचकं, श्वासपूरणं पूरकं, श्वासनिरोधः कुम्भकमित्युच्यते। कुम्भके सशिरस्कां सव्याहृतिकां गायत्रीं जपेत्। तेन अहोरात्रकृतं पापं तत्क्षणादेव नश्यति। पूर्वसन्ध्यायां तिष्ठन्, पश्चिम-सन्ध्यायामासीनः प्राणायामं कुर्यात्। षोडशप्राणायामैः अश्वमेधफलं भवति। भ्रूणहत्यादि सकलपापपरिहारोऽपि भवति। तत्र रेचकात् पापदाहः क्रियते, पूरकात् अमृताप्यायनं, कुम्भकाच्च मोक्षप्राप्तिः भवति। अन्तःशरीरस्थं पापपुरुषं रेचनेन बहिर्निष्कास्य सूर्यसोमोष्मणा सर्वकल्मषं दहेत्। पूरणकाले चन्द्रमण्डलात् अमृतम् इडाख्यनाड्याऽन्तः पूरयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुम्भककाले गायत्रीं प्रणवान्वितां सव्याहृतिकां सशिरस्कां त्रिः पठेत् । मूलमन्त्रं च जपेत्। एवं प्राणायामेन आत्मानं देवबिम्बं च शोधयेत्।

तदनन्तरं नाडीचक्रस्य मध्ये देवं ध्यायेत्। नाड्यः द्विसप्ततिसहस्रसङ्ख्याकाः नाभिप्रदेशात् तिर्यक् ऊर्ध्वम् अधश्चापि देहं व्याप्य तिष्ठन्ति। ताश्च त्रिविधाः आग्नेयाः, सौम्याः, सौम्याग्नेयाश्चेति। ऊर्ध्वमुखा आग्नेयाः, अधोमुखास्सौम्याः, तिरश्चीनाः सौम्याग्नेयाः। दशनाड्यः प्रधानाः- इडा, पिङ्गला, सुषुम्ना, गान्धारी, हस्तिजिह्वा, सुयशा, पूषा, अलम्बुसा, कुहू, शङ्खिनी चेति। तत्र इडासुषुम्ने पिङ्गलया सह ऊर्ध्वमुखे नासापुटे स्थिते, वर्णतः शुक्लरक्ते। गान्धारीहस्तिजिह्वे पूषासहिते, अधोमुखे, बस्तिदेशे स्थिते, वर्णतः पीतकृष्णे। अलम्बुसासुयशे दक्षिणपार्श्वे स्थिते वर्णतो ब्रभ्रुश्यामे। शङ्खिनी कुहूश्च वामपार्श्वे स्थिते, वर्णतः अञ्जनारुणे।

एवं स्वदेहे नाडीचक्रं ध्यात्वा दशवायून् चिन्तयेत्। प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जया इति। तत्र प्राणापानौ राजमणिप्रभौ। अपानकूर्मौ इन्द्रगोपप्रभौ। समानकृकरौ श्यामवर्णौ। व्यानधनञ्जयौ फेनवर्णौ। उदानदेवदत्तौ किञ्जल्कसदृशप्रभौ। तान् दशवायून् नाड्यो वहन्ति। इडा प्राणं, गान्धारी अपानम्, अलम्बुसा समानं, कुहू व्यानं, सुषुम्ना उदानं, पिङ्गला नागं, हस्तिजिह्वा देवदत्तं, पूषा कूर्मं, सुयशा कृकरं, शङ्खिनी धनञ्जयमिति। किञ्च इडा चान्द्रमसीनाडी वामनासापुटे स्थिता। पिङ्गला सूर्यनाडी दक्षिणनासापुटे स्थिता। अयने द्वे तथा सङ्क्रान्तिविषुवे चात्र भवन्ति। यदा प्राणः इडायां वर्तते तदा दक्षिणायनं, यदा पिङ्गलायां तदा उत्तरायणम्। यदा उभाभ्यां नासापुटाभ्यां प्राणः अकाले प्रयाति तदा सङ्क्रान्तिः। यदा काले प्रयाति तदा विषुवम्। तत्र दक्षिणायने स्नानादिकर्म कुर्यात्। सङ्क्रान्त्यां दानकर्माणि कुर्यात्। विषुवे यज्ञकर्माणि कुर्यात्।

इडायां पूरणं, पिङ्गलायां कुम्भकं, सुषुम्नायां च रेचनं कार्यम्। वामाङ्गुष्ठेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणनासापुटं पिधाय वामनासापुटेन पूरयेत्। कुम्भकं कृत्वा दक्षिणेनाङ्गुष्ठेन वामनासापुटं पिधाय दक्षिणपुटेन रेचयेत्। न द्रुतं न विलम्बं च जानुं प्रदक्षिणं कृत्वा अङ्गुलिस्फोटनं कुर्यात्, सा मात्रा। प्रथमया मात्रया इडा पूर्यते। द्वितीयातृतीयाभ्यां पिङ्गला पूर्यते। चतुर्थया सुषुम्ना। पञ्चम्या गान्धारी, षष्ठीसप्तमीभ्यां पूषा, अष्टम्या हस्तिजिह्वा, नवम्या अलम्बुसा, दशम्या सुयशा, एकादश्या शङ्खिनी, द्वादश्या कुहू इति क्रमेण नाड्यः पूर्यन्ते। कुम्भकेन स्तम्भिता एते वायवः क्रमाद् द्विगुणमात्राः। एतद्वायुचक्रं सर्वत्र भ्रमति। चक्रभ्रमणवेगेन नाभिदेशे हुताशनः उत्थितः शरीरगान् सर्वान् दोषान् निर्दहेत्। एवं वह्निमारुतैः नाड्यः शुद्धिमायान्ति। कुम्भकमात्रामतीत्य रेचकं कुर्यात्। नागकूर्मकृकरदेवदत्तधनञ्जयाः पञ्च वायवः पूरककाले जिताः क्रमेण प्राणादिषु लयं यान्ति। कुम्भककाले जिताः अपानादयः चत्वारः प्राण एव लयं यान्ति। अन्तः-करणचतुष्टयमिन्द्रियाणि च प्राण एव समापतन्ति। तत्र पूरके सर्वासु सन्धिषु वायुना पूरितासु हृत्पद्ममष्टदलम् उर्ध्वनालमधोमुखं विकासमुपयाति। कुम्भककाले तदूर्ध्वमुखं भवेत्। तस्मिन् हृदयपद्मे विकसिताष्टपत्रकर्णिके कर्णिकामध्ये देवं ध्यायेत्।

पश्चात् तत्वन्यासं कुर्यात्। स च न्यासः त्रिविधः। सृष्टिन्यासः, स्थितिन्यासः, संहृतिन्यासश्चेति। बिम्बे स्थिते स्थितिन्यासम्, आसीने सृष्टिन्यासं, शयने संहृतिन्यासं च कुर्यात्। केचित् प्रातः सृष्टिन्यासं, मध्याह्ने स्थितिन्यासं, सायं संहृतिन्यासं च कुर्यादित्याहुः। एवं न्यासं कृत्वा प्रतिमारूपं ध्यात्वा रक्षां विधाय देवमावाहयेत्।

मनः एकाग्रं कृत्वा पद्मकोशप्रतीकाशे हृदये अग्निशिखामध्ये परब्रह्मपरमात्मानं नारायणम् अम्बरे विद्युल्लेखामिव ध्यायेत्। इदं ध्यानं ब्रह्मार्पणमुच्यते। ब्रह्मभूते देवे आत्मनोऽर्पणमिति तस्यार्थः। स च परमात्मा अणोरणीयान् महतो महीयान् इति श्रुत्युक्तः, सुसूक्ष्मत्वाद् अनिर्देश्यः, इन्द्रियैरग्राह्यः, अव्यक्तः, अनादिनिधनः, अखिलस्य स्रष्टा पाता हर्ता च निर्गुणः। सर्वदेवमयः, सर्ववेदमयः, सर्वज्ञानमयः, सर्वाधारश्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चिन्त्यः। कुम्भजलेऽपि भगवान् निर्गुणः, निर्मलः, निष्कलः, सकलश्च ध्येयः। स च रुक्मवर्णः, रक्तास्यः, रक्तनेत्रः, किरीटहाराद्यलङ्कृतः श्रीवत्साङ्कश्चतुर्भुजः, दक्षिणैकहस्तेन भक्तानामभयप्रदः। वामेनान्यहस्तेन स्वकट्यामवलम्बितः। इतराभ्यां कराभ्यां शङ्खचक्रधरः।

एवं ध्यात्वा कुम्भजले देवमावाहयेत्। आवाह्य तत्र रुक्मवर्णं नारायण-वासुदेवाभिधानं देवं ध्यायेत्। ब्रह्मणः द्वे तत्त्वे स्यातां मूर्तममूर्तं चेति। यथा-सर्वगतस्याग्नेः अरण्यां विशेषसन्निधिर्भवति, मथनेन व्यक्तिश्च, एवं सर्वगतस्य विष्णोः कुम्भे ध्यानात् तत्र विशेषसन्निधिर्भवति। यथा मणिः उपाधिवशात् एकधा बहुधा च भवति, एवमेव विष्णुः भिन्नरूपाणि भजते। इन्धनैरिद्धोऽग्निरिव ध्यानेन्धनेनेद्धो विष्णुः व्यक्तो भवति। वेणुरन्ध्रविभेदेन षड्जादिस्वरभेदाः यथा भवन्ति, यथा एकमपि नभः नीलपीतादिभेदेन भिन्नं दृश्यते, एवं निराकारोऽपि देवोऽनेकरूपी भवति। तेन अखिलं जगत् ओतं प्रोतं च। तस्य वक्षसि श्रीवत्सं कौस्तुभमणिं च ध्यायेत्। चक्रशङ्खगदापद्मानि आयुधानि तथा पञ्चवर्णां वैजयन्तीमालां भूतमालां च ध्यायेत्। कलाकाष्ठ-निमेषादिकालस्वरूपमपि विष्णुं ध्यायेत्। भूर्भुवरादिलोकमूर्तिधरमपि तं ध्यायेत्। देवमानुषपश्वादिरूपं वेदेतिहासवेदान्तादिशास्त्ररूपं काव्यालापगीतिकाद्यखिलशब्दमूर्तिधरं सकलमूर्तामूर्तवस्तुजातरूपं सर्वगतमनन्तं ध्यात्वा आत्मसूक्तं जपेत्।

पुनः प्रतिष्ठा चेत् पुराणबिम्बात् तच्छक्तिं ध्यात्वा कुम्भे न्यसेत्। आवाहनं नाम क्षीरे सर्पिः, तिले तैलं, पुष्पे गन्धः, फले रसः यथा, तथा सर्वत्र विद्यमानोऽपि देवः, सर्वत्र व्यापिनस्तस्य एकत्र स्मरणरूपमावाहनम् अनुमन्यते भक्तानुकम्पया। अरण्यां व्याप्तो वह्निः एकत्र ज्वलितः यथा तथा मन्त्रैरावाहिते बेरे स्थले कूर्चे जले वा भक्तानुकम्पया स्थित्वा पूजां गृह्णाति।

बालालये अर्चितात् बेरात् देवं कुम्भजले ध्यात्वा आवाहयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५. ध्रुवबेरादीनां कलशस्नपनम्

कुम्भपूजानन्तरं ध्रुवबेरं कुम्भं च यज्ञालये संस्थाप्य पुरस्तात् सप्तस्नानकलशान् क्षीरघृतमधुसिद्धार्थोदकाक्षतोदककुशोदकचन्दनोदकपूर्णान् तथा शुद्धोदकसम्पूर्णान् उपस्नानकलशांश्च सन्न्यस्य तेषु तदधिदेवान् एकादशोपचारैः अथवा जलपुष्पैरर्चयित्वा ततो देवेशं क्षीरघृतादिना उष्णोदकेन च स्नपयित्वा शुद्धोदकैः अभिषिच्य प्लोतेन विमृज्य, वस्त्राद्यैरलङ्कृत्य विष्टरे देवीभ्यां सह स्थापयेत्। स्नपनोत्सवबलिबेराणि च पृथगेव संस्नाप्य अर्चयेत्।

यद्वा - द्वादशभिः कलशैः स्नपयेत्। पञ्चगव्यघृतमधुदधिक्षीरगन्धोदकाक्षतोदकफलोदककुशोदकरत्नोदकजप्योदकसर्वौषध्युदकपूर्णा द्वादशकलशाः उपस्नानकलशैः साकमस्मिन् पक्षे संस्थापनीयाः।

देवबिम्बस्य यागशालां प्रति आगमनसमये सर्ववाद्यघोषं, ध्वजच्छत्रधूपाद्युपचारं नृत्तगीतादिकं च मार्गे आचरेत्। पक्कम् आढकमाषकुलुत्थनिष्पावयुक्तं लाजतिलचूर्णापूपसक्तुभिः सहितं पुष्पजलकूर्चाक्षतयुक्तं च बलिं सर्वसन्धिषु भूतयक्षपिशाचनागराक्षसेभ्यः निर्वपेत्। पश्चात् देवं समादाय याने शिबिकायां वा आरोप्य ग्रामप्रदक्षिणपूर्वकं ग्रामं प्रदर्शयेत्। एवं कर्तुमशक्तश्चेत् धामप्रदक्षिणं कुर्यात्। बिम्बगौरवमनुलक्ष्य प्रदक्षिणमकृत्वापि देवागारं प्रवेशयेत्।

१६. शयनाधिवासः

शयनाधिवासे पूर्वं पुण्याहं वाचयित्वा क्षौमं तान्तवं वा प्रतिसरं स्वस्तिसूक्तेनाभिमृश्य स्वस्तिदेति मन्त्रेण देवस्य दक्षिणहस्ते देव्योः वामकरे तथा कुम्भे च बध्नीयात्। एवमेव स्नपनोत्सवबलिबेराणां च कुर्यात्। ललाटे चन्दनाद्यैः गन्धैरूर्ध्वपुण्ड्रं रचयेत्। आचार्यस्य ऋत्विजां च दक्षिणे करे प्रतिसरं बन्धयेत्। प्रतिष्ठायामुत्सवे वा इदं कौतुकबन्धनमावश्यकम्। अन्यथा सर्वं कार्यं विनश्यति। अथ शय्यावेदिं समभ्युक्ष्य शालियवतण्डुलैः तिलैर्वा आस्तीर्य सार्द्रान् कुशान् आस्तीर्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चर्मजं, रोमजं, मुण्डजं, अण्डजं तथा वामजं च तल्पं क्रमेण उपरि न्यस्य उपरि वेष्टनं उपधानद्वयं शिरोपधानं च विन्यसेत्। पञ्चायुधानि परितो विन्यसेत्। मुक्तादा-माद्यैरलङ्कुर्यात्। शकुनसूक्तपूर्वकं देवेशं शयने समारोप्य देवीभ्यां सह शाययेत्। उत्तराच्छादनमाच्छाद्य देवेशस्य दक्षिणे कुम्भं सन्न्यसेत्। स्नपनोत्सवबलिबेराणां चैकवेद्यां प्रत्येकं शयनं सङ्कल्प्य शाययेत्।

यज्ञशालां परितः सर्वान् देवान् एकादशोपचारैरभ्यर्च्य प्रभूतबलिमाहृत्य बलिनिर्वापं च कारयेत्। यज्ञालयं परितः वेदसूत्रपुराणादीनि स्तोत्रस्तुतिवाद्याघोषान् गेयनृत्ते च विधिवत् कारयेत्। तत्र ऋग्वेदं पूर्वभागे, यजुर्वेदं दक्षिणे, सामवेदं पश्चिमे, अथर्ववेदं चोत्तरे पठेत् । विपरीतं चरेत चेत् निष्फलं भवेत्।

१७. प्रतिष्ठाङ्गहोमः

दिवा होमं न कुर्यात्। रात्रौ च स्थापनं न कुर्यात्। अतो रात्रिहोमं कृत्वा दिवा स्थापनं कुर्यात्। विपरीतं कृतं चेत् राजराष्ट्रादिकं सर्वं विनश्यति। प्रथमं होतारमध्वर्युः देवयजनार्थमाह्वयेत्। स च होता 'नमः प्रवक्त्रे' इति वदन् स्वीयं हौत्रं स्वनामोच्चारणपूर्वकं 'हिं भूर्भुवस्सुवरोम्' इत्यन्तं प्रशंसेत्। ततः अध्वर्युः घृताक्ताः समिधः ओम् स्वाहेति अग्नौ प्रक्षिपेत्। ततो होता सप्तदशसामिधेनीः ऋचः शंसेत्। यजमानस्य गोत्रं प्रवरं च वदेत्।

ततः अध्वर्युणा नियुक्तः होता विष्णुः देव्यौ पारिषद्यांश्चेति सर्वदेवताः नाम्ना सङ्कीर्त्य आवहेति वदेत्। ततोऽध्वर्युः दक्षिणप्रणिधौ जले विष्णुमूर्त्यादिरुद्रान्तम् उत्तरप्रणिधौ जले धात्रादिविष्णुभूतान्तम् आवाहयामीति समाह्वयेत्। आवाहनक्रमेणैव चतुर्थ्यन्तेन जुष्टाकारं कृत्वा तत्क्रमेणैव आज्याहुतिं जुहुयात्। एवं सर्वदेवावाहनेन चतुर्वर्गसमृद्धिः चतुर्वेदसमृद्धिः चातुराश्रमसिद्धिः शान्तिः पुष्टिश्च फलं भवति। यागशालां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परितः प्रागादिचतुर्दिक्षु द्वारेषु अभिमुखे च यथोक्तदेवान् अर्चयेत्।

सभ्याग्नौ लाजैः सतिलचूर्णैरपूपैः सक्तुभिश्च सहाज्येन विष्णुसूक्तपुरुषसूक्ताभ्यां व्याहृत्यन्तं विंशतिकृत्वः जुहुयात्। स्वस्ति चैवेति प्रजापतय इति अग्निर्धीमतय इति आदित्येभ्य इति विश्वेभ्यो देवेभ्यो इति गणेभ्यो मरुतामिति षड्भिः, भूरग्नय इत्यादि चतुर्भिश्चेति आहत्य दशभिर्मन्त्रैः शतशो होमेन सहस्राहुतिहोमं निर्वर्तयेत्। विष्णुसूक्तं, पुरुषसूक्तं, श्रीसूक्तं, भूसूक्तम्, अतो देवादि सूक्तं, एकाक्षरादिसूक्तं, विष्णुगयत्री चेति एतैः सप्तभिः सूक्तैः चतुरावर्त्य होमः कर्तव्यः। अयं सभ्याग्नौ वसोर्धाराहोमः। पञ्चवारुणैः कूश्माण्डैश्च जुहुयात्। श्रिये जात इत्यारभ्य ये भूतान्तं सर्वदैवत्यं हुत्वा व्याहृतिहोमं कुर्यात्। यस्य देवस्य स्वको मन्त्रो न विद्यते तस्य नाममन्त्रं वैष्णवान्तं जुहुयात्।

विष्णवेत्यादिदशभिः, नारायणायेत्याद्येकादशैः, पुण्यनारायणायेत्यादि दशभिः, बलायेत्यादि द्वाभ्यां, सत्यायेत्यादि दशभिः, पुरुषायेत्यादि दशभिः, विष्णुक्रीडात्मन इत्यादिसप्तदशैः, पुण्यायेत्याद्यष्टादशैश्च मन्त्रैः जुहुयात्। अयम् अष्टाशीतिक्रमः दधिक्षीरलाजकपिलगोघृतानि सङ्गृह्य वैष्णवविष्णुसूक्तपुरुषसूक्तैः पौण्डरीकाग्नौ जुहुयात्। आलयं परितः स्थितान् इन्द्रादिदिक्पालान् ध्यात्वा तत्तन्मन्त्रैः विंशतिं जुहुयात्। तत्काले सभ्याध्वर्युः पञ्चवारुणमन्त्रादिभिर्जुहुयात्। अयं महाशान्तिहोमः प्रतिष्ठादिनात् पूर्वस्मिन् दिने कर्तव्यः।

स्थापनादिने पुनरन्यः महाशान्तिहोमः कर्तव्यः। सोऽपि पौण्डरीकेऽग्नौ। शतं श्वेतकमलानि कापिलघृतेन आप्लुत्य विष्णुगायत्र्या तथैव रक्तकमलं बिल्वपत्रं च पुरुषसूक्तेन हुत्वा वैष्णवेन यद्देवादीन् इत्यादिना ब्राह्मेण, ऐन्द्रेण, वारुणेन, रात्रिसूक्तेन, विश्वजित्सूक्तेन, सारस्वतसूक्तेन च जुहुयात्। सर्वदोषोपशमनहेतुत्वेन अयं महाशान्तिहोमः इत्युच्यते।

परिवारहोमे त्रैविध्यमस्ति। श्रीभूम्योः ब्रह्मेशानयोः भृगुमार्कण्डेययोः गरुडशेषयोः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होमः अधमः। विमानपालानां इन्द्रादिलोकपालानाम् आदित्यशेषयोः होमः मध्यमः। द्वारपालानां चक्रध्वजशङ्खमहाभूतपाकोर्जुऽनानां होमः उत्तमः इति।

सभ्याग्निं पौण्डरीकं च विना सर्वेष्वग्निषु अन्तहोमं कृत्वा अग्निं विसृज्य नृत्तगेयवाद्यानि चतुर्वेदाध्ययनं च कारयेत्। आचार्याय ऋत्विग्भ्यश्च यथोक्तं दक्षिणादानं कुर्यात्। वस्त्रभूषणैरपि भूषयेत्। दैवज्ञं च वस्त्राभरणादिभिः पूजयेत्।

सभ्याग्नौ वैष्णवं विष्णुसूक्तं पुरुषसूक्तम् एकाक्षरादि व्याहृत्यन्तं चरुणा जुहुयात्। समिद्घृताभ्यां चरुणा च जुहुयात्। एवं पुर्णाहुतिं कृत्वा पौण्डरीकाग्निं विसृजेत्।

आलयदक्षिणे प्रथमावरणे महानसे नैर्ऋते सभ्याग्निकुण्डं कृत्वा नित्यहोमार्थमग्निं निदध्यात्। तमग्निं सम्प्रणीयैव देवस्योत्सवमाचरेत्। नित्यहोमे अशक्तिश्चेत् सभ्याग्निं कुम्भे समारोप्य ध्रुवस्यावाहनात् पश्चात् कुम्भतोयं कूर्चेनादाय बिम्बं परितः संस्राव्य ध्रुवे अग्न्यारोपणं कुर्यात्।

१८.प्रतिष्ठाविधानम्

रत्नादिन्यासः - प्रभाते यजमानेन सहाचार्यः गर्भालयं प्रविश्य तालोन्नतं चतुरश्रं वृत्तं पद्माकारम् अर्चापीठं कृत्वा तन्मध्ये श्वभ्रं कृत्वा गोमयेनोपलिप्य पञ्चगव्यैः प्रोक्ष्य मध्ये गजं, गरुडं, ब्रह्ममणिं च प्रतिष्ठाप्य अष्टसु दिक्षु तत्तन्मन्त्रोच्चारणपूर्वकं वज्रादीनि रत्नानि तथा सुवर्णगैरिकादिधातून् बीजानि श्रीवंत्साद्यष्टमङ्गलानि पञ्चायुधानि तथा स्रुवादिवर्णचिह्नानि मेघविद्युल्लताश्च सन्न्यस्य तदुपरि श्रीरूपां हरिणीं तदुपरि कूर्मं च सन्न्यस्य क्षौमेणाच्छाद्य सुधया उपरि लेपयेत्। रत्नालाभे सुवर्णं, बीजानामलाभे यवं, धातूनामलाभे पारदं च तत्तत्प्रतिनिधिं कुर्यात्। औत्सवादीनां पीठं रत्नन्यासं विनैव कुर्यात्। सुवर्णशकलानि न्यसेदिति केचित्। पुरातने पीठे पूर्वं रत्नादौ सुप्रतिष्ठिते तत्तद्रत्नादिकं बुध्वा तत्तन्मन्त्रानुदीरयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बेराणां पीठे संयोजनम् - शय्यायां सुप्तं हरिं प्रणवेन प्रबोध्य बेरमुद्धृत्य पूर्ववस्त्राभरणजातानि विमुच्य नूतनैरलङ्कृत्य सुमुहूर्ते दैवज्ञं पूजयित्वा सर्ववाद्यसमायुक्तं शकुनसूक्तसमन्वितं तोयधारापुष्पवृष्टियुक्तम् आचार्यः शिरसा कुम्भं सङ्गृह्य पुरतो गच्छेत्। पश्चाच्च मूर्तिधारकाः देवालयं प्रदक्षिणं कृत्वा विष्णुसूक्तेन मूर्तीः स्थापयेत्।

अष्टबन्धद्रव्याणि - शङ्खचूर्णं, मधूच्छिष्टं, लाक्षा, त्रिफलं, कार्पासं, गुग्गुलं, रक्तशिलाचूर्णं, माहिषं नवनीतं चेति।

पञ्चबन्धद्रव्याणि - माहिषं नवनीतं, लाक्षाचूर्णं, शर्कराः, कार्पासं, गुग्गुलं चेति।

त्रिबन्धद्रव्याणि - माहिषं नवनीतं, लाक्षाचूर्णं, शर्कराश्चेति।

अष्टबन्धद्रव्याणाम् अधिदेवाः यथा - शङ्खचूर्णे चन्द्रः, मधूच्छिष्टे रोहिणी, हरीतक्यां हरिः, लाक्षायाम् अग्निः, कार्पासे वायुः, गुग्गुलौ चण्डदीधितिः, शिलाचूर्णे स्कन्दः, नवनीते यमश्चेति। शङ्खचूर्णं प्रस्थं, गुग्गुलमर्धप्रस्थं, तावन्तं लाक्षाचूर्णं, पादं कार्पासं, हरीतकीमधूच्छिष्टशिलाजानपि तावतः सङ्गृह्य चूर्णस्यैकीकृतस्यार्धं नवनीतं मिश्रयित्वा सम्पेष्य मन्त्रोच्चारणपूर्वकम् अवघातम् आचरेत्। अन्यदेवालयेषु रुद्रकाल्यादिबन्धार्थम् उपयुक्तमष्टबन्धनं विष्णवर्थं नैव गृह्णीयात् । बिम्बपीठस्य रन्ध्रे अष्टबन्धनं योजयेत् । अष्टबन्धनहानौ दोषोऽस्ति। पूर्वस्मिन् हानौ राष्ट्रनाशनम् , आग्नेय्याम् अग्निना दाहः, याम्ये व्याधिपीडा, नैरृत्यां सस्यनाशः, वारुण्यां वृष्टिनाशः, वायव्यां श्रीविनाशः, कौबेर्य्यामर्थनाशः, ऐशान्यां ग्रामनाशः, सर्वतश्च राष्ट्रनाशः, एवमष्टबन्धनहानौ पुनस्सन्धानमाचरेत्।

सूक्तादिजपः - कौतुकस्य पुरतः धान्योपरि कुम्भं सन्न्यस्य आत्मसूक्तविष्णुसूक्तश्रीसूक्तध्रुवसूक्तानि जपेत्।

बेरेषु व्याहृत्यादिन्यासः - सुवर्भुवर्भूरिति क्रमात् बेरस्य मूर्ध्नि नाभौ पादयोश्च न्यासं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुर्यात् । अकारादिक्षकारान्तपर्यन्तं वर्णान् पादादिमूर्धपर्यन्तं न्यसेत्। तथा मूर्धादिपादपर्यन्तम् एकाक्षरादिमन्त्रन्यासं कुर्यात्। एवमेव देव्योः परिवाराणां च तत्तद्बीजं हृदये न्यसेत्।

आवाहनम् - 'इदं विष्णु' रिति मन्त्रेण कुम्भस्थं देवं शक्तियुतं कूर्चेनादाय आयातु भगवानिति, विष्णुमावाहयामीति बिम्बस्य मूर्ध्नि स्रावयेत्। तत्पीठं परितः पुरुषाद्यावरणत्रयदेवानां श्रीभूब्रह्मशङ्करप्रभृतीनां च परिवाराणां तत्तन्मन्त्रैः आवाहनं कुर्यात्। दीपाद्दीपमिव ध्रुवबेरात् शक्तिं प्रणिधिजले ध्यायन् कौतुके आवाहयेत्। तथैव स्नपनोत्सवबलिबेरेषु क्रमेणावाहयेत्। कुम्भस्योदकेन कौतुकं परितः सुभद्राद्यावरणत्रयदेवान् आवाह्य अन्येषु परिवारबिम्बेषु तत्तन्मन्त्रैरावाहनं कुर्यात्।

मूलालयप्रतिष्ठा चेत् बालालयात् तद्बिम्बसंस्थितां शक्तिं कूर्चेन कुम्भे विन्यसेत्। तद्बिम्बं ध्रुवानुरूपं दोषवर्जितं स्वर्णादिकृतं चेत् कौतुकं कुर्यात्। सदोषश्चेत् समुद्रे नद्यां वा विधिना विसर्जयेत्। यदि दारुणा कृतं तर्हि अग्निना दाहयेत्।

प्रतिष्ठानन्तरम् अर्चनोक्तवत् अर्चनं कृत्वा वेदादिघोषं कारयित्वा पायसान्नं निवेदयित्वा होमं हुत्वा बलिं दत्वा बलिबिम्बम् आलयस्य प्रदक्षिणं कारयेत्। अपराह्णे प्रतिष्ठान्तोत्सवं कुर्यात्। नवाहं सप्ताहं पञ्चाहं त्र्यहं वा एकाहिकं वा उत्सवोक्तविधानेन उत्सवं कारयेत्। एकाहिकं चेत् ध्वजारोहणं न कुर्यात् । उत्सवान्तदिने रात्रौ स्नपनं कुर्यात्। प्रतिष्ठायाम् उपयुक्तं वस्त्रधान्यादिकं सर्वं आचार्याय दद्यात्। काष्ठादिकं तु शिष्टं दाहयेत्। अप्सु वा क्षिपेत्। स्रुवजुहूदर्वीदर्भमालादिकं तत्रैव परिरक्षयेत्। कुम्भस्थजलेनैव यः स्नायात् आत्मानं प्रोक्षयेद्वा स सर्वपापैः प्रमुच्यते। विधिवत्प्रतिष्ठाकरणेन एकविंशतिपूर्वान् तथा एकविंशतिपरांश्च कुलजान् आत्मना सह विष्णुलोकं नयति। क्षत्रियो विजयं कीर्तिं च लभते। सागरान्तभूभर्ता सन् अन्ते विष्णोः सारूप्यं गच्छति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्यः धनाढ्यो भूत्वा सर्वान् मनोरथान् भुक्त्वा सामीप्यं गच्छति। शूद्रस्तु धनसम्पन्नः सर्वान् कामान् भुक्त्वा विष्णुसालोक्यं गच्छति।

प्रतिष्ठाविधौ द्रव्यहीने द्रव्यहानिः, क्रियाहीने कर्महानिः, मन्त्रहीने सर्वार्थनाशश्च फलमुक्तम्। सर्वेषामपि देवानाम् एष एव प्रतिष्ठाविधिः। मन्त्र एव विशिष्यते।

विस्तृतक्रमेण प्रतिष्ठां कर्तुमशक्तश्चेत् वर्णहीनं शिलामयं बेरं ब्रह्मस्थाने प्रतिष्ठाप्य पूजयेदिति केचन वदन्ति। तत्क्रमस्तु एवं सर्वाङ्गसुन्दरं शिलामयं बेरं कृत्वा अमन्त्रकमक्षिमोचनं कृत्वा शिलस्थापनविधिना पर्यग्निपञ्चगव्याभ्यां शुद्धिं कृत्वा समन्त्रकाक्षिमोचनं कुर्यात्। ततः पञ्चगव्यादिपूरितान् कुम्भान् सरन्ध्रान् बेरमूर्ध्नि यथा धारा पतेत् तथा विन्यस्य अधिवासक्रियां कुर्यात्। यद्वा अभिमुखे पञ्चगव्यपूरितान् कुम्भान् कृत्वा प्रोक्षणं कुर्यात्। जलैश्च स्नापयेत्। पुनः महाप्रतिष्ठाविधिना प्रतिष्ठां कुर्यात्। औत्सवे बलिबेरे च तस्मादावाहनं कुर्यादिति।

सारसङ्ग्रहीतारौ

सम्पादकौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

VAIKHANASAGAMAKOSA

VOLUME IV

Summary of the

5. PRATISTHAPRAKARANAM

Part I

1. Definition and other details of the word 'PRATISTHA'

The word "Pratistha" is derived from the verbal root "STHA" prefixed by "PRATI". It is the act of installing the idol as the simulacrum in toto of the *god* meant to be adored with all attributes and deeds. It can be known from this that the *Supreme Self* is all pervasive like the Ether and He is free from any and all attributes. But it is because of the devotion of the devotee He is viewed to have various attributes. Such God with attributes is installed in the idol while the chant of the Mantras follows. The worship of Lord Vishnu in the idol relies up on such sacred installation in order to attain *Vaishnava*, the Place Highest. Hence *installation* is necessary. It is of two types as *co-installation* and *separate installation*. But in such instance the installation is fivefold. 1. Laying down the Bricks, 2. Projection of the inner chamber, 3. Laying the Crest-Brick, 4. Placing the Dhrva (the Chief-idol) form and 5 The Final Installation. In all these fivefold

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

installations Five respective Fires should be worshipped. The installation process consists of twenty-one aspects such as *Planting holy Sprouts*, *Collecting the material*, Opening the eyes of the idols etc.

2. The Difference between the form and effect of the Dhruva and Kautuka idols

While Dhruva is immovable Kautuka is movable. This phenomenon represents the two movable and immovable aspects of the God. The omnipresent aspect of the God which is all pervasive like the ether and beyond the purview of even Brahma and other gods is the *immovable* aspect of the God. Hence worshipping it also is with out any substratum for it. *Dhruvabera* is the representative of that aspect. The aspect which is different from the immovable one and manifested in the forms of *Matsya, Kurma* etc., is with attributes and *movable* by nature. *Kautukabera* is the representative of that aspect. Even if there are any defects in the Dhruvabera those can be rectified in the Kautukabera by virtue of the merits of the latter. Therefore the worship of Dhruvabera can be confined to offering flowers. But the *Kautuka* requires the entire process of worship. The worship of Dhruva is without any substratum. Hence the services like bathing, anointing sandal paste etc., are not possible. Still in the process of Dhruvabera worship the God is meditated upon as the wielder of Sankha (Conch) and Chakra (Disc) in two hands and of the other two keeping the right one in Abhaya mudra and the left

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

one resting at the waist. In this for the God is imagined to be in the regions of the Sun, Moon and Fire gods. The aspect of the God without any digital attributes is called Paranjyothi or Narayana. The other aspect with attributes is called Vishnu. Worshipping the God without any substratum is meant for monks. Worshipping Him in some substratum is meant for householders. But all the worshippers whether monks or householders should serve Him with utmost devotion. The God as the Paramapurusha with all attributes should be installed along with the Goddess Lakshmi and worshipped.

3.The Time of Dhrvabera Installation

It is the best time to install *Dhrvabera* during *Phalguna, Chaitra, Vaisakha, Pushya* and *Jyestha* months of *Uttarayana* of a year. It is mediocre to install during Dakshinayana in the months of Sravana, Asvayuja and Kartika. Installing during the months Bhadrapada and Ashadha is the lowest. The two months Margasirhsa and Magha are to be avoided. Uttara, Rohini, Sravana, Pushya, Punarvasu, Svathi, Hasta, Chitra, Anuradha and Asvini are the most favourable constellations. The Riktatithi days (The days devoid of any *tithis*) during the bright fortnight are to be ignored. The First, Second and Fifth *tithis* of the black fortnight are acceptable.

Monday, Thursday, Wednesday and Friday are acceptable. Among the fixed and movable Karanas the eightfold *Visti* should be shunned. The Variable signs (Chara Rasis) of

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

the Zodiac should be avoided. The constellations Ardra, Aslesha and Mula, Astami of black fortnight, the constellations with natural calamities like the fall of meteoroids, thunderbolts, untimely red sky, shower of dust, pebbles or stones, Vyatipata yoga, earthquake, stormy wind, the death of the king and the solar and lunar eclipses and the night time should strictly be prohibited.

4.Choosing the Preceptors and others

For the purpose of installation the *yajamana* should choose preceptors, installation-experts and other sacrificial priests. If the *yajamana* is a twice-born (a brahmin or a kshatriya or a vaisya) he can choose the preceptor by himself. In case he is a sudra or of any other inferior class he should choose his preceptor through the king as the *yajamana*. While directing the other priests he should appoint them through selecting a suitable person as *yajamana* just as choosing the king for choosing the preceptor. The preceptor should have under gone all the samskaras such as Nisheka as specified in the Vaikhanasa Agama scriptures. He should have the thorough knowledge of all related Mantras besides possessing good knowledge of the Vedas, of all worshipping methods and Vaikhanasa Agama Texts. He should be regular worshipper of sacrificial fire and good mannered with ideal character. He should be a theist, pure by mind and a staunch devotee of Lord Narayana. A man who is without wife and children, who is an atheist, who is a

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

dwarf or humped, who has any bodily deformity or leprosy, who has hatred for the Vedas, who is interested in other activities and who is a worshipper of other inferior gods is not eligible for the position of Preceptor. A man who is too old or too young, who is greedy of wealth and who sleeps at the time of Sun rise and Sun set is not eligible for the position of Preceptor. Sixteen persons with similar qualities of a preceptor should be chosen as rtviks (sacrificial priests). One for opening of the eyes of the Idol, one for Vastu Homa, five for Five kinds of Fire, one for Abja Homa, two for Brahma Veda and Samaveda, one as Hota, One for holy bath of the Idol, two for worshipping all the gods, and two for installation – in this manner the sixteen rtviks should be appointed for various activities.

For the preceptor, rtviks and Yajamana both the kinds of Aasauca (Aasauca of Birth and Aasauca of Death) will not have any effect from the day of Ankuraropana to the end of the whole activity of Installation. The preceptor considers the yajamana as his disciple and reciting the hymns "Anoraniyaan ...etc." (in case *yajamana* is a *twice-born*) sprinkles holy water on his head. If the yajamana is a Sudra or of a still lower origin sprinkles holy water on his head without any recitation of the vedic hymns and considers the king of that region as the *yajamana*. People belonging to lower castes like that of charioteers' class are not eligible either to perform or to motivate others to perform any worshipping activities for the gods. They cannot even offer anything for the sake of the god.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5.The Process of Ankurarpana

Ankurarpana or the *initial ritual of sowing seeds* falls on ninth or seventh or fifth or third day before the beginning day of the *installation* process. It can be performed either at the beginning of the day or in the night. If the ascending zodiac sign is favourable with more virtues this ritual can be performed even during day time. A hall or a room or a well-like structure either in the North-East or in the North to the temple should be built in accordance with the sacred texts for this purpose of Ankurarpana. That place should be sanctified with cow dung. In the middle of the ritualistic place a circle should be drawn filling it with the flour of white grains or chalk powder. That circle should be decorated with *darbha* grass and flowery garlands. The vessels brought for this purpose should be made of gold, silver, copper and clay. The number of clay pots and plates should respectively be sixteen, twelve, eight and four following the caste of the yajamana who can be a brahmin or a kshatriya or a vaisya or a sudra. Twelve is the best number for those pots plates. Eight is mediocre. Four is the lowest according to some scholars. Those vessels should be fresh and new. Even used ones also can be utilized having cleaned them well with water and burnt them on the heat of fire. A silver vessel is better than that of copper. A golden one is better than a silver one. One who is not capable of bringing any of these three can go for a clay one. The Trinity of Gods Brahma, Vishnu and Mahesvara are the ruling gods of these

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

vessels. Sali, Rice, Barley, Green grams, Black grams, Long Pepper, Wheat, Mustard, Bengal grams, Sesamum, Tilvaka and Masura seeds are preferable for Ankurarpana. If all of these are not available to the extent of availability these grains and pulses should be collected and dried up under sun shine, the best ones should be selected and on the previous day to this ritual they should be kept in water for soaking.

The Performer (Yajamana) should adore the Preceptor in an appropriate manner and should bow down before him requesting him to perform the Ankurarpana rite. Entire responsibility should be kept at the feet of the Preceptor. The Preceptor also should agree and should take vow to perform. At the end of the night's worship he must perform a special Puja of the God of the Gods, should report Him that he is going to begin the said rite and having taken His (God's) permission he should begin the activity.

The *presiding deities* of the pillars of the Ceremonial Hall *Dharma, Jnana, Vairagya* and *Aisvarya* and the twelve Adityas in the outer Chatushkona (Quadruple angle) are to be worshipped according to the scriptural procedure. Brahma in the middle of the Ceremonial Hall and Isha, Parjanya, Jayanta and the others, the twenty four deities around him should be worshipped. Pedestals for *Sesha, Vakratunda, Garuda, Chakra, Panktisha, Bhutesha, Sankha, Ankuradhipa* and *Santa* are to be arranged in the positions of Jayanta, Aditya, Grhakshata, Gandharva, Sugriva, Asura, Mukhya, Soma and Argala

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

respectively. In the middle Brahma surrounded by Sehsa and other deities should be worshipped. In all the eight directions around him the eight divine damsels Jaya, Vijaya, Vinda, Nanda and others should be prayed to in an appropriate manner. Then the clay having kept in a bronze vessel should be borne on the head of the Yajamana and he should go around the temple or the village with that clay on head.

A new pot with water filled to the brim having enveloped in a cloth along with some gold should be kept on the seat for corns in front of the God Soma. Soma, the Lord of the sprouts should be invited into that pot. Appropriate worship accompanied by sacrificial offering should be performed. Clay plates filled either with gravel or cow dung and covered with cloth should be set up in the place meant for them reciting the Vishnu Gayatri Mantra. The Goddess Medini the Clay plates, Raka in the holed pots and Sinivali in the *saravas* should be worshipped with sacrificial offerings. The seeds kept in the bronze vessel should be sprinkled with Milk followed by ritualistic recitations of hymns. They should be kept before Soma. He should be worshipped as their presiding deity. Then those seeds should be sowed while the Punyahavacana, the sounds of trumpets and the recital of Vishnu Sukta are performed. Water should sprinkle on those plates with the hymns of Varuna. Either women or Sudras perform Ankurarpana they should not sow the seeds. The preceptor himself on their behalf will sow them.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

The Moon is the presiding deity of the sprouts. Sprouts which are black or red or crooked or/and incapable of growing are to be avoided. Otherwise they will result the loss of property, quarrel, illness and death respectively. Sprouts which are in yellow hue, white, straight-grown and upward growing are auspicious. Daily Soma should be worshipped thrice or twice or once. It is the best way to offer *Havis* on such occasion and lighting a lamp and worship it is mediocre. Worshipping Light without Kumbharchana is the least. Sprinkling water over them everyday should protect the sprouts. At the end of the rite the sprouts should be kept in water. If Yajamana is in hurry and incapable of following this entire procedure he should at least perform all these sequential acts of this rite on a single day and should sow the sprouts. In this manner if the Ankurarpana process is done the god will be pleased.

6.Principles to be followed by the Preceptor and others at the time of installing Dhrvabera

After the Ankuraropana rite the Preceptor has to observe the deeds such as holy bathing, Brahma Yajna, fasting, Kushmanda Homa, Trishavana Snana, Havishyanna Bhojana, brushing teeth and cleaning the nails with full control over his mind. The other sacrificial priests also follow the same process. Every day they should do Savitri Japa for thousands of times. They should not see women or sudras. They should not accept

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

the food served by women or sudras. They should have self-control. They should practise Pranayama for thousands of times. Yajamana also live up on Havishyanna with self-control.

7. Collection of material for installing Dhrvabera

The preceptor has to collect the necessary material for the installation of Dhrvabera having taken his bath and having performed the daily rituals. The materials offered by any of the four castes or by those of *anuloma*-class can be accepted. But any material from *pratiloma*-class should not be accepted. The sacrificial instruments such as *srk* and *sruva* can be made of *palasa, bilva, khadira, asvattha* and such trees' wood. A *praadesa* is the span of the thumb and forefinger. The length of a *sruva* is recommended to be of two *praadesa*-s. Some opine that it should of one *praadesa*. The length of a *srk* also should be equal that of a *sruva*. The two *darvi*-s named *juhu* and *upajuhu* should be of two *taala*-s length. *Upabhrt* should of three *praadesas* length. *Agnihotravarni* should be of twenty six *angula*-s length. In the same manner *Arani, darbha malaatorana*, *vastra, sruva* and other sacrificial instruments should be made in accordance with the instructions found in *Vaikhanasasutras* just as in case of *Agnisthoma* and other such sacrifices.

The wood of Asvattha born from a Sami tree or that of a lonely Asvattha or lonely Sami is suitable for Arani. The two ligatures also should be of twenty four angula-s length, six

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

angula-s width and two golaka-s thickness. The Churning stick (*Mantha Danda*) also should be of *khadira* of two *taala*-s length and ten *angula*-s breadth. At the bottom it should be bound with a link of either copper or iron with one *golaka*-width. Three lengths of inter-twined rope of *darbha* grass or of coconut bark should be brought for churning. The cloths for sacrificial purpose should made of cotton. They are of three lengths of twelve *hasta*-s or ten *hasta*-s or eight *hasta*-s. Their width can be of five *tala*-s or four *tala*-s or three *tala*-s and they should be new and white in color. Used ones or torn ones or old ones are not allowed. Cloths of ten, nine and eight hasta-s length or twelve, eight, seven and six hasta-s or of any other length are also acceptable. The ghee and other cow products should be from a cow of Kapila color only for sacrificial purposes. The products of a goat or buffalo are not permitted. Even from the cows of lowest castes or of Pratiloma caste or of one month old ones from any source are not agreeable. Just milked milk is the best one.

Palasa (Butea frondosa) firewood for Sabhya rite and Bilva (Aegle marmelos) firewood for Paundarika are recommended for use. Palasa (Butea frondosa) firewood in the east, Khadira (Acacia catechu) firewood in the south, Sami (Prosoopis spicigera) firewood in the west and Bilva (Aegle marmelos) fire wood in the north, Asvattha (Ficus relogiosa) firewood in the Agneya, Plaksha (Ficus Virensait) firewood in the Nairrti, Vata (Ficus Bengalensis) firewood in the Vaayavya

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

and Audumbara ((Ficus- glomerata) firewood in Aisaani are recommended. The firewood of Apamaarga (Achyranthes aspera) is also auspicious. The firewood for sacrificial purpose should be collected from the riverbanks, the forest-gardens or temple-gardens. The *samidhas* (the firewood sticks) should be of 12 *angula*-s length only. *Idhmas* should be of 32 angula-s length. In every ritual 108 *samidhas* should be consumed. But in the *Sabhya* rite one thousand *samidhas* are required. In the *Antahoma* only seven *samidhas* are sufficient. A samidha with thorns or one eaten by insects or a very thin one or too bulged one or very old one should be avoided. Samidhas should not be collected from the main thoroughfare or a burial ground or a wild temple or a nest of a bird or an anthill. An ill person or an impure person or a person of a low caste should not collect samidhas. If the samidhas have thorn the village where the installation is taking place will perish. If it has holes the Yajamana will die. If it is very much dried results in poverty. If it is eaten by insects it leads to the death of dearest. If ants cut it skin diseases will effect. If it is too lengthy results in death. If its bark is removed gradual decay takes place. If an ill person brings the performer also falls ill. Drought will take place if thieves collect samidhas. Diseases will attack if they are collected from a dilapidated temple the performing priests. It will not rain if an ill person or an impure person brings them. If the *samidhas* of the above sources and quality are not available it will be better to bring *Palasa* or *Asvattha* ones. Idhmas should

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

be devoid of thorns and animal wastes. They should be well dried. Wet ones, smoky ones, those with bad smell and those of Nimba tree should be avoided.

Samidhas for sacrificial purpose should always be measured in angula-s. *Darbhas* or *Kusas* without any bulge, in the middle ten or five should be used for making *paristarana*-brushes of 36 angula-s length. Ten types of darbhas with good edges should be brought. One kurcha of a hasta length, Pavitras of twelve angula-s each, Paridhaa-s equivalent to Praistarana Kurchas are required along with ghee, milk and curd for sacrificial offerings. Pranidhi of one Prastha measure, Ghrtasthali of one Prastha, Prokshana vessel of similar measure, Charu Paatra of two Prasthas and a vessel of cooking two Prasthas are needed. All these should be collected according to the instructions in the Sutras.

If there is any shortage of material or fault in arranging the material the village and Yajamana will be effected. That material will fall short in that area forever. If there is any fault in the process of the installation the Punya will perish. The absence of faith and devotion results in all kinds of adversity. If there is any fault in the recital of Mantra it will not be auspicious for the Mantra, learning and the auspicious deed being performed. So by all means the entire activity should be taken care of for its perfection.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

8. The procedure of constructing Sacrificial Hall in installing Dhruvabera

The Sacrificial Hall can be erected in the *south* or *North-east* or *north-west* or *north* in front of the temple. It should have sixteen pillars. The distance between every two pillars must be of four *hasta*-s length. The roof should have the height of a *taala* of five *hasta*-s height. That central Yagasaala should be square-shaped with four entrances and should be pleasing to see. Or it can be a well-like structure. On all its four sides the sacrificial hall should be decorated with portals made of Asvattha on east, Audumbura on south, Bilva on west and Vata on north. On either sides of the entrances or in the middle the shapes of Sankha or Chakra should be installed. In the middle Pundra, Kumbha and Trident should be kept. If the wood of Vata and above said trees is not available only Asvattha can be used. The portals of the said types of wood should be of five hasta-s height and two and half or four three hasta-s width. In the middle of each portal trident of Aratni should be fixed. They should be meditated up on as the very forms of the four Vedas. While fixing these portals the following hymns *agnimile, ishetvorjetva*, *agna aayaahi* and *sanno devi* should be recited respectively on all the four quarters beginning with east. The series of darbha grass should be hung in the hall. That series should go from right to left in clock wise direction. Two blades of darbha in pairs with hanging darbhas of two tala-s length in the intervals should be decorated along the sides of the hall.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

This series of darbhas protects the gods from Pisachas, Daityas, Rakshasas, Grahas, Nakashatras, Taras etc. from all sides at all times.

The Sacrificial Hall should be anointed with cow dung. Then it should be decorated with five colours, different types of cloths, plantain trees and betel nut trees, *purna kumbha*-s, pearl chains, flags, fragrant smokes, delightful lights and series of *dharbha*-s. All the entrances should be adorned with creepers. Lamps with attractive flames and flowery garlands should be arranged on all sides. Rice particles should be sprinkled. Different kinds of auspicious instruments should be played up on. In the northern side the bathing platform of the chief idol should be arranged. An out let in the northeast should be arranged for allowing the flow of water from after the sacred bath of the divine idols. Just like in case of Aahavaniya on all sides of the pedestal of the idol there should be an out let for flow of bathing water with two platforms on either sides of each.

In the middle of the sacrificial hall there should be one square shaped platform in each direction of two tala-s height for the purpose of sleeping of the God. In the southwest there should be an elevated square-shaped platform for the purpose of decorating the God. That platform should of two hasta-s width and length. In the northwest an elevated platform of four feet width and length for the purpose of preserving all the material meant for sacrificial rites. Around the Sayyavedi (The platform for sleeping) there should be a place for the worship of all gods.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

In this manner the forms of Srivatsa, Waterpot, Drums, Mirror, Pair of Fish, Goad, Conch, and Whirling Cycle of eight angulas each should be installed in a very auspicious manner. Sankha (Conch), Chakra (Disc), Gada (Mace), Sarnga (The Divine Bow), Khadga (The Sword) in the middle of the plate should be drawn in colors.

Brahma created the Fire in five forms and placed in the five worlds. Ahvaniya fire was created and placed in the east in the Heaven. Anvaharya fire was created and kept in the aerial way in the south. Garhapatya fire was created and kept in the west on the Earth. Avasathya fire was created and kept in north in the Maharloka. Sabhya fire was created and kept in the middle of all worlds in the Janaloka. In the same way there are five forms of Vayu and Vishnu also. Vishnu in the middle, Purusha in the east, Satya in the south, Atcyuta in the west and Aniruddha in the north are located. One fire for Brahmacharins three fires for house holders and five fires for vanaprasthins are meant by Brahma.

Vishnu for Sabhya, Purusha for Ahavaniya, Satya for Anvaharya, Atcyuta for Garhapatya and Aniruddha for Avasathya are the respective Presiding Deities. In the eastern direction to the Sayyavedi of the sacrificial hall a source place for all the five said fires or Sabhya fire should be installed.

It would be the best if the five fires along with Paundarika are installed. In such case Garhapatya should be placed in the

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

east and Anvaharya in the west. It would be mediocre if Aupasanagni is placed in the middle. If Sabhya along with Paundarika is considered as one fire it would be the lowest. In the word '*Agnihotra*' the syllable '*ho*' means sorrow. That whichever is offered to the Fire will save the sacrificer from sorrow of the hell. Hence it is suitably called 'Agnihotra'.

In the sacrificial hall the third '*amsa*' from '*Brahmamsa*' should be *Sabhyakunda*. Ahavaniya should in the east of it. Anvaharya in its south, Garhapatya in its west and Aavasathya in the north should be placed. Clay which is not mixed with small pieces of sticks, stones, husk, charcoal and blade of dry grass should be used for structuring the sacrificial altar.

Since it is borne by the householder (Grhapati) it is called Garhapatya. In the west to the Sayyavedi a circular altar of 18½ *angula*-s measurement along with two elevated platforms should be arranged for Garhapatya. As the ground meant for Garhapatya is circular the altar structured there also is circular.

As the Dakshinagni is borrowed from Ahavaniya fire it is called Anvaharya. Since it is arranged in the south it is called Dakshinagni. The space (Antariksha) provided for Anvaharya is in the shape of an arch. Hence the altar meant for Anvaharya is also in the shape of an arch. It should be proportionately elevated and widespread.

As the entire sacrificial offering material should be brought and offered it is called Ahavaniya fire. As this fire is situated

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

in the square shaped Heaven its altar also should be in square shape. The sacrificial hall should be divided into nine parts. The middle of the hall is brahmasthana and it should be the Sayyavedi. In the eastern side of it the two fires Sabhya and Ahavaniya should be placed. The altar of Ahavaniya should also be structured in the similar shape of the altar of Aupasanagni. The northern place in the east to Sabhya is meant for Ahavaniya. It should be 32 *angula*-s length and 4 *angula*-s width. In the south of it is the place of Brahman. In the south to Brahman it is the place for Manes (Pitrsthana). The place in the north to the altar is meant for Soma.

The fire, which is located in the dwelling place (Avasatha), is called Aavasathya fire. Its source is Maharloka. Maharloka is said to be in the triangular shape. Hence the altar of this fire also is triangular shape. It is of 48 *angula*-s and 6 *yava*-s measurement. Adjacent to one of its angles there should be an elevated platform and the altar should totally possess two platforms.

9. The Process of Opening the Eyes of the Dhruvabera and others

On the second or third or fifth or seventh or ninth day before the installation day the sculptor should open the eyes of the chief idol without any chanting of mantras. Of these seventh day is the best. Fifth day is mediocre. Third is the lowest. He should open the eyes of the idol to the extent of the size of a

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

louse in the circle of the vision of the idol following the scriptural procedure of Gautamiya tradition. On the next day the preceptor should open the eyes with proper chanting of mantras. Some people support the view that the ceremony of opening the eyes by the preceptor should take place on the second day before installation. Some others maintain that it can be either on the third or second day from the occasion of installation. This celebration of opening the eyes can be performed on any day except on the days of the rise of the Sun or Rahu or Saturn or except on the days with blind stars. If this instruction is followed everything will prosper with plenty of wealth. Otherwise it ends with destruction of all. If the idol is in colours or in paintings its eyes should be opened on the previous day. In case of Kautuka Beras it can be on the Panchami day before installation. In the east or south-east or north-east or south to the sacrificial place the location for the opening of eyes of the idol is to be structured. For the purpose of opening the eyes the instruments like plate of colours, brush, a strong needle, a golden rib, a pair of silver chiseler and hammer should be made ready. In the northern side of the temple a square shaped pit or well should be dug with measurements of four hasta-s length and width. The idol should be sprinkled up on with the liquid of five types of cow products. Then it should be kept on a pedestal facing the temple (while the idol facing the east). The preceptor along with the yajamana and priests should take bath and perform Brahmayajna, Aupasana, Vastuhoma and Bhumiyajna. Bimba

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

should be purified on the heat of the fire. The holy water of Kusa grass should be sprinkled over it. The idol should be properly showered for bathing and should be dressed in new garments. Then the act of Punyahavachana should be performed. The ground in front of the temple should be decorated. There a heap of corn should be laid down. There a up on a pedestal should be arranged. In the middle of it Brahman, Indra and other deities of the quarters should be worshipped. Brahma mani, diamond, pearl and other precious gems should be laid down in the middle and the eight quarters respectively. Or the five major gems should be laid down in the four major directions. If gems are not available gold should be kept. The chief idol should be joined to the pedestal. Later the sculptor should be called and with his help the eyes of the idol should be made opened. The sculptor should bear Urdhvapundras on his forehead and should put on Yajnopavita. Standing in the west facing east he should meditate up on the God of the gods on the pedestal and worship Him with pure mind. The preceptor should adore the sculptor and see off him. After the act of the opening the eyes of the God the heap of the corn, the heap of sesames, the ghee, curd, honey and milk should be kept before the God for seeing them all. A cow with all good signs, gold-covered horns and sivler-covered hoofs along with its calf should be kept before the God. All respective gods should be worshipped in various parts of it. A fistful grass and a grassy cake should be offered to it. Some scholars say that the heap of corns

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

should at least 8 *drona*-s in measure. In the opinion of some others it should be not less than 16 *drona*-s. The grains of Sali, Vrihi, Priyangu, Masha, Nishpava, Sarshapa, Tila and Mudga – the eight types of corns one *drona* each or one drona of Satsava or Vrihis should be kept in front of the God. In the process of opening the eyes of the God in the altar meant for Aupasanagni the base-fire of the altar should be offered with various sacrificial material followed by the recital of Vishnu Sukta, Purusha Sukta and so on. Without mixing the ghee of she-buffalo or goat, the pure ghee of either *kapila* cow or that of an ordinary cow should be offered.

Holding the golden vessel of colours and decorating the eyes, the *right eye* should be opened with the recital of Purusha Sukta and the *left eye* with the recital of the *hymn* "*ato deva*" etc. The six regions of eyes beginning with eyelash also should be opened having worshiped their six presiding deities respectively – the Earth, Water, Fire, Air, Ether and Paramatma. The right eye reciting Purusha Sukta and the left eye reciting the hymn "*ato deva*" etc. If the colour is not available the eyes of the Dhruva Bera can be opened with the golden needle and strong rib only. The Eyes of Goddess Sridevi with the hymn "*Sriye Jata*" etc., and those of the Godess Earth with the hymn "*Medinya*" etc., should be opened. Then the Punyahavacana rite should be performed. After opening the eyes various auspicious material like the five products of cow etc., should be presented before the eyes of the God and Goddesses. After

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

three *adhivasa*-s after this act, reciting relevant hymns it should be arranged for the sleeping of Lord Hari in the Sayyavedi.

10. Adhivasa of Dhruvabera and other beras

Before the installation of Dhruvabera and other beras *adhivasa* should be arranged for them. If the idols are directly installed without *adhivasa* the Yajamana, the village and the installing priests will immediately meet with destruction. This *adhivasa* is necessary for the purification of the idol and also for inviting the divine power of the deity into the idol. *Adhivasa* is to be performed immediately after the act of opening the eyes of the idol. This act is of two types. According to one order *adhivasa* is to be arranged first in *pancagavya*-s (the five products of the cow – milk, curds, clarified butter, urine and cow dung), then in the milk and finally in water. Following the second order it is to be arranged first in water, then in the *pancagavya*-s and then in the kusa-water in order. In front of the Vimana structure of the temple a separate hall or a well should be arranged for *adhivasa*. In each of the above liquids the idol should be kept for one day and one night in the respective order. If it is not possible to do so at least for one day time in each the idol should be kept for this purpose. If it is not possible to do even this much the idol can be laid down in waters only for *adhivasa* for three days or one day (sun rise to sunrise) or one day time (sunrise to sunset) or a quarter of one day time. It is the best kind to allow the idol for adhivasa in

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

water, pancagavya and kusa-water for three days or two days or one day in each. If it is for a half-day or half of it or half of the half it is mediocre. If it is just for ten nadikas or half of it or three nadikas it is the least of preference. Or at least it is suggestible to arrange for *adhivasa* for one yaama (quarter of day) in each of the said liquids on the preceding day of the installation.

Panchagavyadhivasa Procedure

Urine of blue cow, dung of black cow, milk of copper-red cow, curds of white cow and ghee of *kapila* cow are to be collected. Of the total sixteen parts of *pancagavya*-s six parts of urine, four parts of dung, three parts of milk, two parts of curds and one part of ghee should be mixed together. On the heap of grains a new cloth should be spread. In the middle of it the main pot is to be arranged. Then cow's urine in the east, dung in south-east, curds in the south, ghee in the west and milk in the north should be placed. In all the five pots kurcha' s of darbha grass and five kinds of gems should be dropped in. Rgveda in the cow's urine, Brhaspati in the cow dung, Atharvan in the milk, Yajurveda in the curds and Samaveda in the ghee should be meditated up on. With various hymns from those sources these five cow products should be poured in a single vessel. Then the vessel should be filled with water. Then with the edge of a dry fire stick (samith) the content of the vessel should be mixed. There the presiding deity of it Lord Shiva should be worshipped. The hymns of Purusha Sukta are to be

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

recited. In the process of Prokshana, Prasana, Abhisheka and Adhivasa pancagavya should be utilized in the following manner. Unboiled cow products are to be filled in a clay vessel. The content should be touched for three days or two days or one day at least. Aupasanagni should be made ready. The base fire should be worshipped. The Lord should be bathed. Punyaha act is to be performed. Then in the five cow products collection the lord is to be laid down keeping the idol's head eastward. Then homa for Vishnu, Brahma and Rudra is to be performed. During that night all the gods of that temple should be offered with the bali of preparations of green grams.

Kshiradhivasa Procedure

In the next morning the god from the adhivasa is to be brought out. He should again be bathed. The Pot should be filled with cow milk. Atharvan, the presiding deity of it, is to be worshipped. Flowers are to be laid in it. There the God is to be laid down. In the same procedure of previous kind homa and bali processes are to be performed to all the other deities. The process of Kshira-adhivasa is found differently in different agama texts.

Jaladhivasa Procedure

A pot of 32 prastha-s' measure is to be taken. Its mouth is to be covered with a thread. That pot should be laid down on the grains and be filled with gold, gems, water and kusa kurchas. The face of it is to be covered with a cloth. All the holy water-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

sources (Tirthas) are to be invited into it. Punyahavacana act is to be performed. With that water the Bera is to be sprinkled upon . Then the Bera should be allowed for *adhivasa* for three days or two days or one day. The idol can be laid down in a river or a lake or a well or an ocean. In the absence of the availability of any of these water sources the *adhivasa* can be in bucketful water. The bucket is to be filled with water. It is to be considered as the Milky ocean by mind. The God is to be decorated with new garments and ornaments. Along with the two goddesses He should be laid down in the water keeping His head eastward. The weapons Conch, Disc, Mace and others are to be worshipped in their respective directions. A lamp of continuous flame is to be arranged and a curtain around Him should be held. During that night *bali* for all the gods of the temple and village with preparations and cakes with green grams, black grams, sesames etc., should be offered. In the next morning the God should be awaken, bathed with pure water, worshipped, seated on a chariot and taken around the village or temple and placed on a pedestal facing the temple.

If the idol is too large *adhivasa* is not possible. So 108 pots with the five products of cow, milk and kusa-water should separately be made ready. The gods should be worshiped as per the specified procedure. The said hymns should follow while abhisheka takes place. For Kautuka Beras adhivasa in pancagavya and milk is not there. Only adhivasa in water is allowed. After that bali for all the gods in the said procedure in

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

the entire village is to be performed. In the same way for the idols of all other gods, for various incarnations of Vishnu and for the attendants of Vishnu separate *adhivasa* is to be arranged.

11. Vastu Homa (The Sacrifice of Vastu)

Then all of them should take the pancagavya-s. Of the total sixteen parts of *pancagavya*-s two parts of urine, one part of dung-water, ten parts of milk, two parts of curds and one part of ghee should be mixed together as per the scriptural suggestion. It should be properly worshipped. Reciting the Gayatri mantra pancagavya of a *prastha* measure taken in a lotus leaf should be drunk. If any one is unable he should take at least to the extent of a quarter *prastha*.

The Vimana structure should be purified with cows and brahmins in the following way. In the premises of the Vimana vessels full of water, grass, durvas, straws and husk should be arranged. Cows should be left there for five nights or three nights or one night. They should not be milked during nights. The calves should please by drinking their milk. The Drops of milk that fall from the udders when the calves finish drinking the milk and the dung and urine of those cows purify the premises. Then brahmins should be fed with good food. The number of the brahmins should be 24 or 50 or 100 or more. After they take the meals the remains of their eating should be cleaned.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Churning the Fire (Agni Mathanam)

Arani should be placed eastward in the sacrificial hall. The Earth in the Arani, Vishnu in the churning stick, The Fire in the upper strip and Vasuki (the king of Serpants) in the rope should be worshipped. The rope should be enjoined to the churning stick and the upper strip also should be attached to it. With support of hymns the process of churning should be started. The Fire should be produced and offered salutations. Or fire should be brought from the house of a Vedic scholar who worships Agni every day. In such case after bring the fire the Vaisvanara Sukta should be recited.

Vastuhoma

In the northern side of the temple the Sramanaka Altar should be arranged. Either churned or household fire can be brought and laid down in the altar for Vastuhoma. This homa should be performed during night. Vastu Purusha, the presiding deity of Vastu of the temple, is of two types by nature of movable and immovable. The immovable Vastu Purusha sleeps down faced on the ground facing east. He is called Sarva. The movable Vastu Purusha sleeps over Sarva facing upwards. He faces east in the afternoon, south in the evening, west in the midnight and north in the early morning. Thus he moves constantly. Having collected Fire with a flaming spark by the side of the chief idol, in the Sanctum Sanctorum, in the projected hall, in the bathing place, in the principal gate, around the

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

compound walls and everywhere else in the premises of the temple the fire should be shown and dropped. Pancagavya should be sprinkled. Punyaha act should be performed. Sacrificial offerings to Varuna and Vaisvadevas should be done and *parisheka* should be performed.

12. Aghara Homa

The preceptor reciting hymns should offer milk with ghee to the Yajamana to drink. The preceptor should accept the Yajamana as a disciple reciting hymns in case of a twice-born and without any hymns in case of a low caste one. The disciple by this act will be freed from all sins. Then the other sacrificial priests should be invited, offered seats and be asked to take curd that is being offered followed by the recital of vedic hymns. They should be appointed in their respective duties.

Either churned or the fire of the Vastu Homa can be brought and laid down in the altar of Garhapatya Fire. If not the house hold fire purified thrice also is equal to that of churned fire. But in case of Vastu Homa Fire it should strictly be purified following the scriptural procedure before laying in the Fire place of Garhapatya Altar. For the sake of *Aghara Homa* the Fire in the source should be produced in the Garhapatya Altar. It should be increased with blazes in order to distribute it to Anvaharya, Ahavaniya, Avasathya, Sabhya and Paundarika Altars. *Aghara Homa* should be performed having invited Atcyuta, Satya, Purusha, Aniruddha, Vishnu, Vasudeva and

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Narayana respectively in the Garhapatya, Anvaharya, Ahavaniya, Avasathya, Sabhya , Paundarika and Sramanaka Fires. At the end of the Aghara Homa and before the Pakva Homa one should not move in between those fires. If the same Adhvaryu is to perform after the Prvahana again one has to perform the homa. As a rectification Vaishnava Rite is to be performed.

13.General Aspects of Homa

In the Homas the offering of ghee should be performed without any break in the form of flow of *caturanguli* measure. Annam mixed with ghee should be offered to the extent of the first phalange of one's thumb or equivalent of a Banyan fruit each time. A fistful of fried corn, a pearl-shell sized sesames or mustards or barley should be offered. A Samidha (sacrificial fire stick) should be taken with the ring finger and thumb for offering in the fire. Ghee should be offered holding the *Sruva*-instrument in its middle. To receive the healthy fire the offerings should be begun with the mantra "Adite anumanyasva". At the end for the sake of Svasthyavidhana sprinkling of ghee around the altar is to be done reciting the mantra "aditenvamaggsthah". Holding the *Sruva* with the thumb and ring fingers in its middle keeping the stretched index finger and middle finger under the Sruva and having left free the little finger the offering of Ghee should be given with Sruva. This is called *caturanguli pramana*. At the end of the mantra a Samidha with ghee should be taken

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

with thumb, ring finger and middle finger and should be offered to the fire keeping its top eastward.

Seers for Samidhas, Isa for Apupas, Ravi for fired corns, Fire for ghee and musturds, Manes for sesames, the Creator for Charu are the presiding deities and they should be meditated up on.

The seven tongues of the Fire are Hiranya, Kanaka, Rakta, Krshna, Vasuprabha, Atirikta and Bahurupa. North-east, east, south-east, south, south-west, west and north-west are their respective directions.

Moreover, in the altar the ear of the Fire is in the fire wood. Whence the little smoke is emitted it is the nose of the Fire. Where it burns low it is the eyes of the Fire. The heap of coal is His head and the multitude of flames is His face.

If any one offers at the ears of the Fire will be effected by disease. If offers at the nose will get fear. By offering at the eyes he will become blind. By offering at the head will meet with overall destruction. So one should effortfully offer at the face and at the edge of the tongues in particular.

Again among the seven tongues, samidhas to be offered to the Hiranya, ghee to the Kanaka, mustards to the Rakta, fried corn to the Krshna, *apupa* to the Vasuprabha, sesames to the Atirikta and the rest of the offerings to the Bahurupa.

While the fire burns without smoke in the blazing fire the

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

offerings should be offered in such a way that the fire sparks should not make any sound. Meditating up on Lord Vishnu who is pervasive in all the mantras and suffixing *svaha* at the end of every recital of mantra the homa is to be performed.

Agni is to be meditated up on in standing posture in the Idhma Homa, in sitting posture in the Charu Homa, in sleeping posture in the Samidaajya Homa and in a relaxed sitting posture in the Tilaapupa Homa.

The Goddess **Svaahaa** is to be meditated up on as the very form of Goddess Lakshmi in black silk garments with bodily golden hue. The Goddess **Svadhaa** is to be meditated up on as one in red silk garments with bodily black hue resembling the colour of new durva grass.

The Fire God resembles a Kimsuka flower in hue. He puts on silk garments of parrot's feather colour. He is adorned with all ornaments and encircled by chains of flames. He is two headed, four horned, two eared, two nosed, four eyed, seven handed and three footed. He holds danda and puts on black antelope's skin, mekhala and yajnopavita. He sits on the Darbhasana along with Svaaha and Svaddhaa. The symbol of his banner is monkey. He mounts on the back of a goat. He should be meditated as one with seven hands wielding Sakti, Bestowing posture, Sruk and Sruva in the four right hands and Juhu, Upjuhu and mace in the left three hands. Or with Sruk,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Sruva, Aksha and Sakti in the right four hands and Chaury fan, Vyajana, Ajyapatra in the left three hands should be meditated up on.

In the middle of the fire Lord Narayana with Divine Conch and Disc in hands, putting on yellow silk garments with bodily dark cloud's hue should be meditated up on. He should be worshipped with sandal paste and other material with devotion. Whichever is offered at the tongue of the fire for the sake of other gods is never at fault. It is not considered as remain of fire's meal in the view of great scholars who realized the Supreme Brahman.

14. Kumbha Puja

A golden or silver or copper or clay pot of 32 *Prastha*-s quantity should be placed in the north-west corner of the sacrificial hall having covered its face with threads. Water from holy rivers and tirthas is to be brought for filling the pot. Kusa-s, elachis, sandal paste etc., should be merged in the water. Then the pot should be covered with a plate of same metal or material. It should then be covered with a new cloth over it and kept in the north-west corner. Having filtered with a cloth the water brought for this purpose should be filled in the pot. Fragrant items, flowers, auspicious yellow rice and the major nine gems should be dropped in the pot. By this the God of Kalasa is born in the kalasa at the sacrificial place. Gem is his bone, threads are arteries, clay is flesh, red clay is blood, water

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

is marrow, Kurcha is semen virile and the covering cloth is the skin. Thus the seven major ingredients of the body of Kumbha Devata are to be thought of. In the absence of any one of these seven the God will not stay in the Kalasa. At the base-pedestal of the Kumbha a *bhara* of grains or half of it or half of the half should be poured. Reciting Atman Sukta and observing Pranayama, anganyäsa and karanyasa Astadala padma (eight petalled lotus) is to be imagined in the Kumbha. In the middle of it in an inner circle Mahendra with two arms and in black coloured body should be imagined. In middle of that circle of Mahendra the circle of Varuna should be imagined. There Varana shining like white lotus with two arms should be imagined. In the middle of it the first Seed of the Universe (Lord Vishnu) with four arms and black in colour resembling a well-burnt clay pot is to be laid down. In all the eight directions with the utterance of Pranava it should be allowed to enter and settle in the Kumbha. Then a Japa of Vishnu Sukta is to be performed and then should proceed to observe meditation through Jnana Yoga method.

In the Pranayama there are three aspects Recaka, Puraka and Kumbhaka by names. Exhalation is called Recaka. Taking breath in or Inhalation is called Puraka. Stopping breath or Sustenance of breath taken in without allowing it to go out is known as Kumbhaka. Gayatri Mantra with its crest-prefix (*Siras*) and suffixes (*Vyahrti*-s) should be uttered in japa mode. By doing so the sins committed even in the previous day and night

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

will immediately perish. Pranayama should performed in standing posture in the morning Sandhyavandana and in sitting posture in the evening Sandhyavandana. Sixteen Pranayama-s earn the effect of performing one Asvamedha sacrifice. It evades the effects of all the worst of the sins such as killing the baby in the womb. Recaka process burns the sins. Puraka process fills one with nectar. Kubhaka process brings salvation. The Being of Sins (Papa Purusha) will be expelled out from the body by the Recaka process. And with the hot breaths of Surya and Soma all the impurity of sins will be burnt. In the Purana process the nectar from the Chandramandala is filled in the region of Ida Nadi. Gayatri Mantra with its crest-prefix (*Siras*) and suffixes (*Vyahrti*-s) should be uttered for three times during Kumbhaka. The Mantra proper should be uttered for a long time in the Japa process. In this manner with this Pranayama the performers of installation should purify themselves and the idol of the God.

Then in the middle of the Nadicakra Lord Vishnu should be imagined. Seventy two thousand Nadis spreading upwards and downwards in the entire body from the naval point as their central point prevail in the human system. They are of three types as Agneya Nadis (Nadis of Fire), Saumya Nadis (Nadis of Moon) and Saumya-Agneya Nadis (Nadis of Moon and Fire together). All the upward Nadis are Agneya Nadis. All the downward Nadis are Saumya Nadis. Those spread sideward in the body are Saumya-Agneya Nadis. Of all these Ida, Pingala,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Sushumna, Gandhari, hastijihva, Suyasa, Pusha, Alambusa, Kuhu and Sankhini are the ten Prime Nadis. Of those ten Ida and Sushumna along with Pingala are located in the upward nostril points. Those two are white and red in colour. Gandhari and Hastijihva along with Pusha dwell downwards in the Basti-region of the body. They are white and black in colour. Alambusa and Suasa are in the right side and their colours are tawny and black respectively. Sankhini and Kuhu are in the left side of the body and their colours are collyrium and red.

In this manner the Nadi Cahakra should be imagined and the ten *vital airs – Prana, Apana, Vyana, Udana, Samana, Naga, Kurma, Krkara, Devadatta and Dhananjaya* are to be filled in these ten nadis. Of these Prana and Naga shine like Rajamani. Apana and Kurma are as red as an Indragopa insect. Samana and Krkara are greenish black in colour. Vyana and Dhananjaya resemble foam in colour. Udana and Devadatta shine with reddish hue like Kinjalka (pollen of lotus). These ten vital airs are carried by the above ten Nadis in the following order. Ida carries Prana, Gandhari carries Apana, Alambusa carries Samana, Kuhu carries Vyana, Sushumna carries Udana, Pingala carries Naga, Hastijihva carries Devadatta, Pusha carries Kurma, Suyasa carries Krkara, and Sankhini carries Dhananjaya. Moreover Ida is the Nadi of Moon resides in the left nostril. Pingala is Suryanadi and resides in the right nostril. These two are the two paths of Sankranti and Vishuva. While Prana is in the Ida it is Dakshinayana. When it is in Pingala it is Uttarayana.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

When Prana travels through both the nostrils at a time it is Sankranti. When goes along with the time it is Vishuvam. In the Dakshinayana one should perform acts like bathing. In the Sankranti one should offer in charity. In the Vishuva it is suggested to perform Yajna.

Inhalation in Ida, holding the breath in Pingala and exhalation in Rechana are to be done. While inhaling the right nostril should be closed with the left thumb and breath should be taken in with the left nose. That breath should be held for sometime in and in the process of exhalation the left nostril should be closed with the right thumb and the held breath should be released out. Without any hurry or delay the should be moved around the knee and it should be sounded with the index finger and thumb. The time taken to that act is called one *matra* unit of time. Ida requires a time of one matra. The second and third matras should be spent for Pingala. The fourth matra is spared for Sushumna. The fifth matra is required for Gandhari. The sixth and seventh matras are to be taken for Pushan. The Hastijihva extends till the end of the eight matra. The ninth, tenth, eleventh and twelfth matras are respectively meant for Alambusa, Suyasa, Sankhini and Kuhu Nadis. These airs obstructed in the Kumbhaka process are doubled in matra units. This cycle of vital airs move around everywhere in the body. Due to the force of the movement of the cycle of the vital airs the fire at the naval part wakes up and burns all the irregularities in the body. In this manner the Nadis in the

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

human body are purified by the combination of the fire and vital airs. After passing the matra span of Kumbhaka process one should practise Rechaka. The five vital airs Naga, Kurma, Krukara, Devadatta and Dhananjaya which are conquered in the process of filling gradually merge respectively in Prana, Apana and other major vital airs. The four major vital airs beginning with Apana also merge in the Prana. The four internal organs and the sense organs also merge in the Prana. In the Puraka process while all the joints are filled with air the eight-petalled Lotus of heart blooms with its stalk upward and the petals down ward. In the Kunbhaka procéss it blooms upward. In the central pedestal of the that lotus the Lord should be contemplated and meditated up on.

Then the Nyasa process is to be commenced. This Nyasa is threefold. Srsti Nyasa (The Nyasa of Creation), Sthiti Nyasa (The Nyasa of Sustenance) and Samhrti Nyasa (The Nyasa of Destruction). While the idol is standing the Nyasa is of Sustenance. If the idol is in sitting posture it is Sristi Nyasa and when the idol is laying posture it is Samhrti Nyasa. Some scholars suggest that Srsti Nyasa in the morning, Sthiti Nyasa in the afternoon and Samhriti Nyasa in the evening should be performed. Having performed Nyasa in this manner concentrating upon the form of the idol and having arranged for the protection the God should be invited.

With the concentrated mind Lord Narayana like a

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

lightening in sky should be contemplated upon in the form of Para Brahman and Paramatma in the crest of the fire flame amidst the petals of the lotus of heart. This process of meditation is called Brahmarpana. The submission of Individual Self to the Lord Vishnu as the Para Brahman is called Brahmarpana. That Paramatman is subtler than the subtlest and greater than the greatest as the Vedic scriptures read. Because of his subtlety He is beyond comprehension, beyond sensual perception, inexpressible, one without beginning and end, creator, protector and destroyer of the entire creation. He is free from all attributes. He is the form of all gods, all the Vedas, all kinds of knowledge and the Source of all. In the water of the Kumbha also He is to be meditated upon as the God with out attributes, pure, indescribable and also describable. He is in golden hue. His face and eyes are red in colour. He possesses a crown, necklaces and other ornaments. He is marked with Srivatsa and has four arms. With one of his right hands he bears *abhaya* mudra. He keeps one of his left hands at his waist. He wields the divine disc and divine conch.

Having meditated upon him with such description He should be invited into the waters of the Kumbha. There the form of the Narayana Vasudeva in golden hue should be contemplated up on. Brahman has two aspects one with form and the other one without form. Just as the all pervasive Fire has his presence in the Arani and manifested through kindling

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

process Lord Vishnu also allows his devotees to feel his presence in the Kumbha. Just as a gem is felt one and many Vishnu also manifests himself in different forms. The fire is manifested from kindling the Arani with fuel. Similarly kindling the heart through meditation also manifests the God. The difference in placement of holes in a flute causes the seven musical notes. In the same manner the same sky appears in different colours such as blue, yellow etc. Likewise the single formless God is manifested in many forms. The entire universe is filled with Him. The Kaustubha Gem should be meditated up on the chest of Him. In the same manner the usual weapons Disc, Conch, Mace and the Lotus and the five coloured Vaijayanti Garland and Bhuta Mala also should be meditated upon. Vishnu should be meditated upon as the very form of time in the time units such as *Kala, Kastha, Nimesha* etc. He should also be thought of as the form of the worlds *Bhu, Bhuvar, Suvar* etc. He should be contemplated upon as the forms of the gods, human beings, animals, the Vedas, epics, Vedanta, Kavyas, Musical lyrics and other forms of the word and sense and in the forms of all manifested and unmanifested beings.

Then the Atma Sukta should be recited. If the idol is being reinstalled the power of the God should be extracted from the old idol and kept in the Kumbha. It is for the sake of gracing the devotees the God is invited into a single substratum though He is all-pervasive just like the ghee in milk, oil in sesame seeds, fragrance in flowers and juice in fruits. The fire

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

spread in a forest starts burning from one place. Similarly the God receives the worship of the devotees having entered the idol, place, brushy blade of grass or water only for the sake of favoring the devotees with compassion. The God who was worshipped in the *balalaya* should be meditated upon and be invited into the Kumbha.

15.Bathing of the idols (Beras) with the waters of Kalasa

After the Kumbhapuja the Dhruva Bera and the Kumbha should be kept in the sacrificial place. In front of them seven pots (kalasas) with milk, ghee, honey, white-mustard water, *akshata* water, Kusa water and Sandal paste-mixed water should respectively be filled in them. Then there should be some sub pots (Upasnana kalasas) kept by the side of them. The respective presiding deities of the pots should be worshipped either with the eleven usual services or with water and flowers. Then the God should be bathed with milk, ghee etc., arranged there and then with the pure water also. He should be cleaned dry with a fresh and dry cloth, decorated with new garments and ornaments and be placed on a seat along with His two spouses. The idols of Snapana , Utsava and Bali should be separately bathed and worshipped.

Or they should be bathed with twelve pots Kalasas). Those twelve Kalasas should be filled with the five cow products, curd, milk, sandal water, akshata water, fruit water, Kusha water,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

water of gems, Japa water and all herbal water. The sub pots (Upkalasas) also should be kept by the side.

While the idol of the Principal Deity arrives at the sacrificial place all the auspicious instruments should be sounded and the services such as holding the symbolic flag and divine umbrella, offering *dhupa*, dance and prayer songs should be rendered on the way. The preparations made of red grams, black grams, *kuluthhas*, *nishpavas*, fry corn, sesame powder and other types of flour should be offered in the form of oblations to the *Bhutas, Yakshas, Pisachas, Nagas* and *Rakshasas* in different road junctions on the way to the sacrificial place. Then the God should be brought in a palanquin taking Him around village in order to show Him the village. If it is not possible He should be taken around the palace at least. Depending on the weight of the idol it can be taken into the main dwelling place of the God even without any go around (Pradakshina) process.

16. Laying Ceremony (Sayanadhivasa)

Before beginning the Sayanadhivasa process it is necessary to perform Punyaha. Then four *Pratisaras* (amulets) made up of either silk ribbon or threads should be made ready by reciting Svasti Sukta. Then with the hymn Svastida one *Pratisara* to the right wrist of the God, two to the left wrists of the two spouses of the God and one around the neck of the Kumbha should be tied up. To the idols of Snapana , Utsavaand Bali also *Pratisaras*

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

should be tied in the same manner. With Sandal paste and other auspicious materials Urdhva Pundra should be drawn on the fore head of the God. Pratisaras should be tied up to the right wrists of the preceptor and all the sacrificial priests. In the Installation Ceremony and also in every Festival of the God this Kautuka bandhanam (Tying up Pratisaras) is necessary. Otherwise the entire activity will perish. Then the Platform of Bed should be sanctified with cleansing process. The grain particles of Sali, Yava and Tandulas or Tilas should be spread on it. Wet Kusa-grass also should be spread. Gradually the skin-made, hairy, (iron) metal made, feathery and snake skin made bed sheet layers should be laid down one by one. Over them an enclosure should be prepared. Two pillows on both sides and one at head side should be arranged. The five weapons should be kept around. The bed should be decorated with pearls and flowery garlands. The God along with His two Spouses should be laid down on the bed reciting Sakuna Sukta. Then the upper cover should be spread over keeping the Kumbha on the right side of the God. For the idols of Snapana , Utsava and Bali also separate sankalpa should be performed and they should be arranged to sleep separately on a single platform. All the gods should be worshipped with the usual eleven services around the right around the sacrificial hall. Abundant offerings should be made for them all. Around the Sacrificial Hall Vedic recitations, recitations of Sutras, Puranas, Stotras, Prayers, Dance and Musical performances and playing on the auspicious

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

musical instruments should be arranged as per the sacred orders. The four Vedas –Rgveda, Yajurveda, Samaveda and Atharvaveda should be recited on East, South, West and North directions respectively. Anything against this order will become fruitless.

17. Pratistha Homa

Homa should not be performed during day time. Installation should not be performed during night. So having performed the Homa during night the idol installation should be done during day time. Anything done against this will result the destruction of the kingdom, king or people. At first Adhvaryu should invite the Hota for performing the sacrificial worship of the God. Saying "Namah pravktre" the Hota should declare his priestly status reciting the hymn "Him Bhurbhuvassuvarom". Then Adhvaryu should drop into the sacrificial fire some dry wood applying ghee to them. Then Hota should recite seventeen Rks (Hymns) related to dropping the samidhas (dry wood pieces). He should announce the racial order of seers of the Yajamana (Performer of the Sacrifice).

Next the Hota appointed by the Adhvaryu should pronounce the names of the God, the two Spouses of the God and all the other gods as the Gods courtiers and should invite them all to the sacrificial place. Then Adhvaryu has to invite Vishnu to Rudra into the southern water place and Brahma to

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Vishnubhutas into the northern water place. In the same order as in Avahana, the process of Homa also should be performed calling out the names of all gods ending in Dative case. The result of this performance is the prosperity of the four human objects, four Vedas, four stages of life, the Peace of the world and wealth of all members of the society. Around the sacrificial place all the gods in front of each entrance in all the four directions should be worshipped in the prescribed order.

Homa for twenty times should be performed in the *Sabhya* Agni with *Lajas, Apupas* with sesame powder and the *Saktu* flour mixed with ghee along with the recital of Vishnu Sukta and Purusha Sukta. With the ten Matras – *Sasti Caiva* etc., *Prajapataye* etc., *Agnrdhimataye* etc., *Adityebhya* etc., *Visvebho devebhya* etc., *Ganebhyo marutam* etc., for six and *Bhuragnaye* etc., for four – those respective gods should be worshipped in the Homa process 100 times for each god coming to 1000 times Homa for all together. Further a Homa should be performed repeating for four times the seven Suktas – Vishnu Sukta, Purusha Sukta, Sri Sukta, Bhu Sukta, Ato Devadi Sukta, Ekaksharadi Sukta and Vishnu Gayatri. This is called Vasordhara Homa in the Sabhyagni. Then Varuna homa for five times and Kusmanda homa for five times should be performed. Following this ritual Vyahrti Homa beginning with *Sriye Jata* to *Ye Bhutantam* should be performed addressing all the gods. If any god has no mantra in his name the homa for him should be offered reciting the name of Vishnu for his sake.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Homa with *Vishnve* etc, for ten times, *Narayanaya* etc., for eleven times, *Punyanarayanaya* etc., for ten times, *Balaya* etc., for two times, *Satyaya* etc., for ten times, *Purushaya* etc., for ten times, *Vishnukridatmane* etc., for seventeen times and Punyaya etc., for eighteen times should be performed. This order of eighty eight number should be performed with curd, milk, fry corns and ghee of tawny cow reciting the Suktas of Vaishnava, Vishnu and Purusha offering Homa in the *Paundarika* fire. Contemplating up on the names of the Lords of the eight directions Indra and others a Homa for twenty times should be performed with their respective hymns. At the same time the Adhvaryu of Sabhyagni should offer Homa for five times with Varuna hymns. This ***Mahasanti Homa*** should be performed on the previous day to the Installation.

On the day of Installation another ***Mahasanti Homa*** should be performed. It also should be in the *Paundarika* fire only. Hundred White Lotuses dipped in tawny cow's ghee followed by Vishnu Gayatri mantra should be offered to the fire. Similarly reciting Purusha Sukta a Homa should be performed offering Red Lotuses and Bilva leaves. Then reciting hymns of Vaishnava, Yaddevaadin etc, Braahma, Aindra, Vaaruna, Ratri Sukta, Visvajit sukata and Saarasavata Sukta a Homa should be performed. This Mahasanti Homa should be performed as a rectification of all defects that take place during the required ritualistic performance.

Parivarahoma (the Homa for the retinue of the God) is of

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

three types. One is for the Sridevi and Bhu Devi, for Brahma and Ishana, for Bhrugu and Markandeya or forGaruda and Sesha. This Homa is lowest. The Homa for the attendants of Vimana, for the eight quarterly deities Indra etc., and for Aditya and Sesha is of mediocre type. The Homa for the door attendants and for the Disc, Flag, Conch, Mahabhutapaka and Arjuna is of the best kind.

Except in the Sabhyagni and Paundarika in all other fires the *Antahoma* should be performed and the fire should be disposed. The performances of dance, singing and Vedic recitation should be arranged. The preceptor and the other sacrificial priests should be honored with proper honorarium (Dakshina). They should be adorned with clothes and ornaments. The concerned Astrolger also should be honored with clothes and ornaments.

In the Sabhyagni the hymns belonging to Vaishnava Sukata, Vishnu Sukta and Purusha Sukta beginning with *ekakshara* to the end of *vyahrtis* should be read for Homa while offering with Charu. Another Charu should be offered to the Samit and Rta. In this manner Purnahuti should be performed and the Paundarika fire can be disposed.

The Sabhaygni Altar should be created in the southern side of the temple in the first enclosure, in the kitchen in the South-west part. There the fire should be produced for daily rituals of Homa. Having pleased that Fire only the festival of

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

the God should be started. If it is not possible to perform Homa every day Sabhaygni should be kept in a pot. Dhruva should be invited into the pot. Then the water of a pot should be taken with a brush of darbha grass and poured around the idol of the God. Then that fire should be imposed on Dhruva.

18. The Installation Process (Pratisthavidhana)

Ratnadinyasa (Laying the gems etc.,)

Early in the morning the Yajamana along with the Preceptor should enter the Sanctum Sanctorum. There a square shaped pedestal of a *tala* height with a lotus like circle in it should be erected for the purpose of worship. In the middle of it a hole should be made. The cow dung and other five cow products should be applied on it. In the middle of it an elephant, Garuda and Brahmamani should be installed. In all the eight directions of it the diamond and other gems along with their respective mantras and gold, Gairika and other metals, the seeds of different grains, Srivatsa and other auspicious materials and the five weapons, the golden and other hues, the clouds and lightening arts should be laid down on it. Over them a deer in the form of Sri and a tortoise over it should be kept. It should be veiled with a silk cloth and on the surface of it *sudha* should be anointed. Gold in the absence of gems, Yava grains in the absence of other seeds and mercury in the absence of other metals can represent in place of those requisites. The pedestals of Utsava bera (Festive Idol) and other idols can be

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

laid even without any gems. Some scholars suggest that golden pieces can be kept in place of them. In the old pedestal gems and other material were laid down, those gems and other material should be recollected and the respective hymns should be recited.

Fastening the pedestals and the idols

The Lord Hari sleeping on the bed should be awakened with the recital of Pranava. The Idol should be lifted up. The earlier cloth and ornaments should be removed. It should be ornamented with new ones. In an auspicious moment having worshipped the astrologer, the preceptor should collect a pot full of water and flowers and bearing it on his head should move forward while the sounds of different auspicious instruments and *sakuna sukta* recital follow him. The bearers of the idols should follow him. After going around the temple once the idol should be laid down on the pedestal.

The eight adhesive substances

The ashes of conch shell, bees' wax, lac, the three myrobalans (Triphalas), cotton, fragrant gum resin, the powder of red stone and the butter of buffalo are the eight adhesive substances.

The five adhesive substances

The butter of buffalo, the powder of lac, sugars, cotton and the fragrant gum resin are the five adhesive substances.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

The three adhesive substances

The butter of buffalo, the powder of lac, and sugars, are the three adhesive substances. Chandra for the ashes of conch shell, Rohini for bees' wax, Agni for lac, Hari for the three myrobalans (Triphalas), Vayu for cotton, Canda Didhiti for fragrant gum resin, Skanda for the powder of red stone and Yama for the butter of buffalo are the eight governing deities of these eight adhesive substances. While preparing the solution or paste of these substances the required measurement is one prastha of Conch Shell's ashes, half prastha of guggula, half prastha of lac powder, quarter prastha of cotton, quarter prastha each of the rest of the substances. After mixing all these substances the butter of buffalo should be mixed with them all. They should be pasted while reciting mantras. The pasting process used in the other temples of Rudra should not be used in the Vishnu temples. In the hole of the pedestal the paste of the eight adhesive substances should filled. In case of any shortage or defect of the eight substances it will be a great mistake. If there is any defect on the eastern side the country will be destroyed. If it is in the southeast a danger from fire is suspected. In the south it results diseases. In the southwest it results the destruction of grains. In the west it ends in the loss of rains. In the northwest it leads the loss of wealth. In the north it leads to the loss of money. In the northeast it results in the destruction of the village. If it is in all sides it leads to

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

the destruction of the entire country. When such defect is seen anywhere it should be reunited.

The recitation of Suktas

Having kept the Kumbha on a heap of grains in front of the Kautuka idol the Atma Sukta, Vishnu Sukta, Sri Sukta and Dhruva Sukta should be recited.

Nyasa of Vyahrtis in the idols

Uttering Suvar..Bhuvar ... etc., gradually on the head and naval part of the idol *nyasa* is to be performed. The syllables beginning from *akara* too *kshakara* should be laid from the feet to the head of the idol. Then from the head to feet the mantranyasa from monsyllabic mantras also should be done. In the similar manner for the goddesses and the attendants also their respective bijas should be laid down.

Avaahanam

With the help of the brush of kusas reciting the mantra "Idam Vishnu etc.," the God along with power should be extracted from the Kumbha and saying "Ayaatu Bhagavaan etc.," the water from the Kumbha should be poured on the head of the idol. Around the pedestal *avaahana* should be performed to the goddesses and gods like Sri, Bhu, Brahma, Sankara and others in the three enclosures of Purusha and others. Just as a lamp is lit from another lamp the power from the *Dhruva bera*

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

should be extracted for making the *pranidhi jala* powerful and then *Kautuka Bera* also should be made powerful with it. In the similar manner the idols of Snapana, Utsava and Bali also should be made powerful. With the water of the Kumbha the Gods of the Subhadhra and other three enclosures should be invited around the *Kautuka Bera*. Then all other attendant deities should be invited.

If it is the installation in the main temple the power should be extracted from the idol in the baalaalya with the Kurcha and should be laid down in the Kumbha. If that form is in proportion to that of Dhruva Bera and free from defects being made up of gold them it should be made Kautuka. If it is with any defects it should be dropped in a river or a ocean. If it is made of wood it can be burnt by fire.

After the installation *Arcana* should be performed according to the sacred orders. The vedic recitations should be continued. The sweet milk rice should be offered. The Homa and Bali-offerings should be extended. The form of the Bali idol should be taken around the temple. In the afternoon the installation ceremony should be performed. The festival can be of nine days or seven days or five days or three days or one day span. If it is of just one day there is no need of hoisting any flag. On the last day of the festival during the night the snapana (bathing cermony) should be observed. The clothing and grains used for installation should be offered to the preceptor. The

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

remaining wood and other material can be burnt or can be thrown into waters. The homa material like sruva, darvi etc., can be preserved there itself. Who either sprinkles the water of the Kumbha over his head or takes a bath with that water will be relieved from all sins. By installing in the process explained in the scriptures twenty-one earlier generations and twenty-one coming generation of the performer will dwell in the *Region of Vishnu*. If the performer is a *Khsatriya* gets victory and fame. He will become the ruler of the earth till the end of the oceans and attains *sarupya* of Vishnu at the end. If the performer is a *Vysya* will become very rich. After fulfilling all his desires he will attain *samipya* of Vishnu. If asudra performs the installation he will become very rich, gets all desires fulfilled and attains salokya of Vishnu.

In the process of Pratistha if the shortage of materials is there those materials will continue to be scarce. If the process is defective the defect continues. If any defect occurs in the mantra the entire wealth will perish. The same is the installation process for all gods. But the Mantra differs.

TRANSLATION INTO ENGLISH
BY
Dr. Rani Sadasiva Murty

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैखानसागमकोशे परामृष्टानां ग्रन्थानां सङ्केताः विवरणानि च ।

सङ्केतः	ग्रन्थः	प्रवक्ता	संस्करणम्
स.	समूर्तार्चनाधिकरणम्	अत्रिः	तिरुमलतिरुपतिदेवस्थानेन १९४८ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितम् ।
ज्ञा.	ज्ञानकाण्डः	कश्यपः	तिरुमलतिरुपतिदेवस्थानेन १९६० क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः ।
अ.	अर्चनाधिकारः	भृगुः	१. आकुलमन्नाडु आर्. पार्थसारथि-भट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृकारूपः । २. तिरुवनन्तपुरकेरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयस्य देवनागर्यां लिखितः करगजमातृकारूपः ।
क्रि.	क्रियाधिकारः	भृगुः	तिरुमलतिरुपतिदेवस्थानेन १९५३ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः ।
खि.	खिलाधिकारः	भृगुः	तिरुमलतिरुपतिदेवस्थानेन १९६१ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः ।
नि.	निरुक्ताधिकारः	भृगुः	आकुलमन्नाडु आर्. पार्थसारथि-भट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृकारूपः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र. प्रकीर्णाधिकारः भृगुः मद्रास् हिन्दूरत्नाकरगोपालकृष्ण - मुद्राणालयाभ्याम् १९२९ क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः।

य. यज्ञाधिकारः भृगुः मद्रास् हिन्दूरत्नाकर मुद्राणालयेन १९३१ क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः।

वा. वासाधिकारः भृगुः आकुलमन्नाडु आर् . पार्थसारथि- भट्टाचार्याणाम् आन्ध्रलिप्यां ग्रन्थलिप्यां च पार्थक्येन लिखितः तालपत्रमातृकाद्वयरूपः।

वि. विमानार्चनाकल्पः मरीचिः मद्रास् वेंकटेश्वरमुद्रणालयेन १९२६ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीः

वैखानसागमकोशः

चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम्

प्रथमो भागः

श्रौतस्मार्तादिकं कर्म निखिलं येन सूत्रितम् ।
तस्मै समस्तवेदार्थविदे विखनसे नमः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीः

वैखानसागमकोशः

चतुर्थं सम्पुटम्

५. प्रतिष्ठाप्रकरणम्

प्रथमो भागः

१. प्रतिष्ठाशब्दनिर्वचनादि

५.१.१ प्रतिष्ठाशब्दनिर्वचनम्

वा.८

अत ऊर्ध्वं प्रवक्ष्यामि विष्णोर्वै स्थापनक्रमम्।
प्रतिष्ठा स्थापनं चेति द्विविधं चेति पर्ययौ।।

प्रतिष्ठाख्यं विशेषेण प्रोक्तं तत्रैव मे शृणु।
सर्वकर्मपरं देवं सकलीकृतपूर्वकम्।।

प्रतिबुद्ध्या प्रतिष्ठा चेत् प्रतिष्ठेत्युच्यते बुधैः।

५.१.२ प्रतिष्ठाया उद्देशः

ज्ञा.५९. १०२

अथ विष्णोर्देवेशस्य प्रतिष्ठाविधिं व्याख्यास्यामः। सोऽव्ययः सर्वव्याप्याकाशोपमो निष्कलः परमात्मा ज्ञानेन भक्त्या च युक्तस्य अन्तः सन्निहितो भवति। 'आत्मा गुहायां निहितोऽस्य जन्तो' रिति श्रुतिः। तस्माद्भक्तिमता तेन सकलं सङ्कल्प्य भक्त्या मन्त्रैश्च प्रतिष्ठापिते बिम्बे भक्तानुकम्पया सकलः तद्बिम्बे समाविष्टः देवः प्रतिष्ठितो भवेत्। अव्यक्तं शाश्वतम् अनादिमध्यान्तम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतीन्द्रियं देवैरप्यनभिलक्ष्यं यद्वैष्णवं पदं तत्प्राप्तिफलं तदर्चनम्। तस्य मूलं प्रतिष्ठा।

५.१.३ प्रतिष्ठा द्विविधा

वा. ८

तेनैव द्विविधं प्रोक्तं सहैव पृथगेव वा।।

५.१.४ प्रतिष्ठा पञ्चविधा

स. २९.७२,७३

आद्येष्टकानां विन्यासो गर्भप्रक्षेपणं तथा।
मूर्धेष्टकानां न्यासश्च ध्रुवसंस्थापनं तथा।।
महाप्रतिष्ठा श्रेष्ठा च प्रतिष्ठा पञ्चधा स्मृता।

५.१.५ पञ्चविधप्रतिष्ठायां कालमार्गः

य.३१, २२ - २७

पञ्चप्रतिष्ठाकालं च प्रवक्ष्यामि तपोधनाः।
भूमिं सम्यक् परीक्ष्यैव कर्षणं कारयेद्यथा।।

प्रासादं कल्पयित्वाऽत्र द्वारस्थानस्य दक्षिणे।
भूम्यामधस्ताद्विधिवद्विशेषेणोपवर्गतः।।

प्रथमेष्टकानां विन्यासकालं स्थानमिदं बुधाः।
पश्चाद्यथोक्तं विधिना गर्भं संसाद्य मन्त्रवित्।।

---------- तेवा कण्ठान्ते पट्टिकान्तरे।
द्वारस्थापनकाले वा स्थापयेद् गर्भभाजनम्।।

---------ततो धीमानालयस्यावसानके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

-------शिष्टमङ्गं च देवाद्यं क्रमशस्ततः।।

समालोक्य सुसंस्थाप्य स्थूपिशूलं ततो बुधः।
स्थापयित्वा यथान्यायं सुधावर्णं च लेपयेत्।।

५.१.६ पञ्चविधप्रतिष्ठायां सामृतक्रमः

य.३१. २८ , २९ , ३२ - ३५

प्रथमं चेष्टकान्यासं गर्भन्यासमतः परम्।
पुनः शूलं सुसंस्थाप्य प्रतिष्ठां पुनराचरेत्।।

अथो मूर्धेष्टकान्यासं कृत्वा चैवं द्विजोत्तमाः।
क्रमं पञ्चप्रतिष्ठायां सामृते तु विशेषतः।।

आदिमध्यावसाने तु स्थापयेच्चेत् ध्रुवार्चनम्।
ध्रुवान्ते जातिवर्गान्ते स्थापयेत्सह कौतुके।।

निश्चित्य विधिना पूर्वं प्रासादं कर्तुरिच्छया।
बालस्थानं च तस्योक्ते स्थाने कृत्वा सलक्षणम्।।

बालबिम्बं च सङ्गृह्य प्रतिष्ठाप्य यथाविधि।
पश्चात्प्रतिष्ठां कृत्वाऽन्ते प्रतिमां त्वरितो गुरुः।।

ततो बालगृहाद्देवं मूलधामनि पूर्ववत्।
कृत्वा यत् स्थापितं चैव सामृतं त्विति तद्विदुः।।

५.१.७ पञ्चविधप्रतिष्ठायां हारकक्रमः

य.३१. ३० , ३१ , ३६

हारकं चेद्विशेषेण प्रथमे चेष्टकां क्रमात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थापयित्वा ततो गर्भं पश्चान्मूर्धेष्टकां पुनः।।

ततः शूलं सुसंस्थाप्य वर्णेनैवानुलिप्य च।
ध्रुवं तत्कौतुकाद्यैश्च स्थापयेद्धारके बुधः।।

अशक्तः कौतुकाद्यैश्च मूलधमनि शास्त्रवित्।
प्रतिष्ठा यत् कृता तत्तु हारकं चेति कथ्यते।।

५.१.८ सामृतहारकयोः मुख्यगौणविवेकः

य. ३१. ३७

ययोस्तु सामृतं मुख्यं गौणं तद्धारकं विदुः।
ततो ध्रुवार्चाभेदोऽपि सामान्यं स्याद्विशेषतः।।

५.१.९ प्रतिष्ठा पञ्चविंशत्यंशात्मिका

वि.३३. २४० , २४१

अस्य यज्ञस्य प्रथमम् अङ्कुरार्पणं, द्वितीयं सम्भारहरणं, तृतीयमक्ष्युन्मोचनं, चतुर्थं बिम्बशुद्धिः, पञ्चममग्निमथनं, षष्ठं वास्तुशुद्धिः, सप्तममग्निप्रणयनम्, अष्टमं कुम्भपूजा ध्यानं, नवमं कलशस्थापनं प्रतिसरं शयनास्तरणं च, दशमं शयनाधिवासनम्, एकादशं वेदाध्ययनं, सर्वदेवार्चनं द्वादशं हौत्रशंसनादि, त्रयोदशं प्रधानहोमं, चतुर्दशं देवस्योत्थापनं स्नानं, पञ्चदशं रत्नन्यासं, षोडशं दक्षिणादानमग्निसङ्ग्रहणं, सप्तदशं सद्मप्रदक्षिणम् , अष्टादशं चलाचलस्थापनं तयोरावाहनं , चैकोनविंशम् अन्यदेवानामावाहनं, विंशतिकं पुण्याहम्, एकविंशं देवार्चनं, द्वाविंशतिकं ब्राह्मणभोजनं वैष्णवपूजनं, त्रयोविंशम् उत्सवं, चतुर्विंशं स्नापनं, पञ्चविंशं महाहविर्निवेदनम् इति क्रमेण एतेषां विपर्यासं न कारयेत्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२.ध्रुवकौतुकयोरर्चनाभेदः

५.२.१ ध्रुवकौतुकयोः अचलचलभगवद्रूपबिम्बत्वम्

ज्ञा.५५. ९६

अथ अर्चनाकौतुकारम्भसत्क्रियां व्याख्यास्यामः। अचलं चलमिति द्विविधं भगवतो रूपम्। तत्र सर्वगं व्योमाभमपोहलक्षणं ब्रह्माद्यैरप्यनभिलक्ष्यं निष्कलमचलम्। तदाराधनं निरालम्बम् तत्स्थानीयं ध्रुवरूपम्। तस्मात् अचलात्मनो यद् भिन्नं सर्वदेवात्मकं मत्स्याद्यंशजनकं सकलं तच्चलम्। तदाराधनं सालम्बम् तत्स्थानीयं कौतुकम्। तस्मात् महाबेरे दोषेऽपि कौतुकसम्पदा नश्यति। ध्रुवबेरं परञ्ज्योतीरूपम् तदलक्षणमपि न दोषाय भवति, अरूपत्वात्तस्य।

क्रि.११. १४८ - १५८

'नारायणं परं ब्रह्म' परमात्मेति कीर्त्यते।।

तद्रूपं परमं सूक्ष्मम् अक्षरं निष्कलं च यत्।
तत्स्थानीयं ध्रुवं प्रोक्तम् अशक्यं निष्कलार्चनम्।।

तत् पुष्पन्यासमात्रं स्यात् ध्रुवबेरार्चनं मतम्।
विष्णोर्यत् सकलं रूपं स्थूलं सर्वस्य कारणम्।।

तत्स्थानीयं कौतुकं स्यात् तत्र पूजां समाचरेत्।
यथोपयोगशक्यत्वात् कर्तुं पुष्पादिपूजनम्।।

सालम्बनत्वाद्विहितं सकलत्वाच्च पूजनम्।
ध्रुवस्य निष्कलत्वाच्च निरालम्बनहेतुना।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अशक्यत्वात्तत्र कर्तुं स्नानगन्धादिर्विग्रहम्।
आदिकालव्यवच्छेदात् नेष्यते तद् ध्रुवार्चनम्।।

तथापि पूजनं कर्तुं ध्रुवबेरे यदीच्छति।
स्नानप्लोतौ विना सर्वैरुपचारैर्यथाविधि।।

'ऋतं सत्ये' ति मन्त्रेण पूजयेदिति केचन।
नारायणानुवाकेन पुनः पुष्पाञ्जलिं ददेत्।।

रविमण्डलमध्यस्थं तप्तहाटकसन्निभम्।
शङ्खचक्रधरं सौम्यं प्रसन्नेन्दुनिभाननम्।।
अभयं दक्षिणं पाणिं वामं कट्यवलम्बितम्।
चन्द्रमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम्।।
अग्निमण्डलमध्यस्थं पूर्ववत् परिकल्पयेत्।

५.२.२ अचलचलयोः संज्ञाभेदः

ज्ञा.५५. ९६

यदा निष्कलं सूक्ष्मं तदा परञ्ज्योतिर्नारायण इति च कीर्त्यते। यदा स्थूलः सकलः तदा विष्णुरिति।

५.२.३ निरालम्बसालम्बाराधनयोरधिकारिभेदः

ज्ञा.५५. ९७

निरालम्बाराधनं सङ्कल्पधनिनां श्रेष्ठाश्रमिणाम्। सालम्बं सम्यक् संसारनिष्ठानां भुक्तिमुक्तिफलप्रदत्वात्। अभीक्ष्णदर्शनात् परिचर्यया भक्तिर्भवति। नृणामभक्तानां कृतं सर्वं निष्फलम्। तस्मात् भक्तिहेतुत्वात् सलक्षणं परमपुरुषरूपं कृत्वा श्रिया सहैव संस्थाप्य प्रकृतिपुरुषौ अर्चयेत्। सालम्बाराधने कौतुकसम्पत् सर्वेषां सम्पदिति विज्ञायते।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३. ध्रुवबेरप्रतिष्ठाकालः

५.३.१ विष्णुध्रुवबेरप्रतिष्ठाकालः

क्रि. ६ . ३४ - ३७, ४० - ४५

मासेषु फाल्गुने चैत्रे ज्येष्ठे वैशाखतिष्ययोः।
उत्तमं, श्रावणे मध्यं कार्तिकाश्वयुजोरपि।।

अधमं भाद्रपादेऽपि तथाऽऽषाढे तु मासि वै।
मार्गशीर्षे च माघं च वर्जयित्वा विचक्षणः।।

शेषेष्वपि च कर्तव्यं त्वरितेनेति मे मतिः।
शुक्लपक्षे तथा कृष्णे त्रिभागे त्र्यंशकं विना।।

रेवतीरोहिणीतिष्यस्वातीश्रवणवासवाः।
चित्राश्विनीशतभिषक्पुनर्वस्वैन्दवादिषु।।

अनन्धकाणनक्षत्रे करणे च शुभोदये।
त्रिजन्मसु प्रतिष्ठा स्याद्यजमानस्य भूपतेः।।

काव्यजीवज्ञवारांशहोराद्रेक्काणराशिषु।
बुधवारांशकादींस्तु प्रशंसन्ति मनीषिणः।।

तिथ्यः षष्ठ्यष्टमीपर्वरिक्तानन्दातिथिष्वपि।
चरेषु करणेष्वेव शुभयोगेष्वविष्टिषु।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिथिवारर्क्षयोगादिदोषैरपि विवर्जिते।
रव्यादयो ग्रहास्सर्वे चन्द्रे रिक्तेऽष्टमे ग्रहैः।।

त्रिषडायगतैः पापैः शुभैः केन्द्रत्रिकोणगैः।
शुभैर्युक्तेऽथवा दृष्टे कामशुक्रविवर्जिते।।

प्रतिष्ठां देवदेवस्य कुर्यात् पूर्वाह्ण एव वै।

ज्ञा. ५९. १०२, १०३

अ. १४

अत ऊर्ध्वं विधानेन विष्णोः स्थापनमुच्यते।
अयने चोत्तरे श्रेष्ठमथवा दक्षिणे चरेत्।।

मार्गशीर्षकमाषाढं पैतृके द्वे च वर्जयेत्।
रोहिणी भरणी हस्तमुत्तरं च पुनर्वसुः।।

वारुणं स्वातितिष्यं च मृगपौष्णाश्विनी भवेत्।
शुक्लपक्षे तु सङ्ग्राह्या काले वा पञ्चमीतिथौ।।

शुक्ले च सप्तमी ग्राह्या रिक्ता वर्ज्या ततो गुरुः।
गुरुशुक्रबुधेन्दूनां शुभवारसमायुतम्।।

स्थिरलग्ने स्थिरं कुर्यात् चरलग्ने चरं भवेत्।
शुभयोगं च ये दृष्टा यजमानानुकूलतः।।

दिनं पक्षं च कालं च लग्नं चैवाशुभं विना।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरार्कसौरराहूणां शुक्रेण गुरुणाऽन्विते।।

शुभग्रहफलं नास्ति क्रूरग्रहफलं भवेत्।
सहोदये सहदृष्टिं तद्देवं स्थापितं विना।।

नृपग्रामगुरोः कर्तुर्दिनलग्नानुकूलतः।

वि. २७. २०२, २०३

उदगयने फाल्गुनचैत्रवैशाखतैष्यज्येष्ठेषूत्तमम्, दक्षिणायने श्रावणाश्वयुजकार्तिकेषु मध्यमम्, प्रौष्ठपदाषाढयोरधमम्, मार्गशीर्षमाघौ विवर्जयेत्, उत्तरारोहिणी-श्रवणपुष्यपुनर्वसुस्वातीहस्तचित्राऽनूराधाऽश्विनीषु, सिते पक्षे पक्षच्छिद्रां विवर्ज्य, कृष्णपक्षे प्रथमाद्वितीयापञ्चमीषु सोमगुरुसौम्यकाव्यवारेषु करणेषु विशिष्टेषु ध्रुवेषु चरेषु वा विष्टिमष्टविधां त्यक्त्वा, चरराशिं विहाय, स्थिरराशौ उभयराशौ वा श्रेष्ठे विष्णोः प्रतिष्ठां कुर्यात्। आर्द्राऽऽश्लेषमूलनक्षत्रे, कृष्णाष्टम्या-मुल्कापातेऽशनिपाते दिग्दाहे पांसुलोहितोपलवर्षव्यतीपातभूकम्पाति-मारुतराजमरणचन्द्रसूर्योपरागयुक्तेषु ऋक्षेषु रात्रौ च परिवर्जयेत्।

य. २३. १ - १०

अथ वक्ष्यामि देवस्य स्थापनाविधिमुत्तमम्।
अयने चोत्तरे प्रोक्तमथवा दक्षिणे चरेत्।।

मार्गशीर्षमथाषाढं माघप्रोष्ठपदौ विना।
मासेषु फाल्गुनं श्रेष्ठं चैत्रो वैशाख एव वा।।

अधमं कृत्तिकामासं शेषमासाश्च मध्यमम्।
निन्दितेष्वपि मासेषु प्रायश्चित्तादिकं चरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रवणं वारुणं हस्तं रेवती च पुनर्वसुः।
स्वात्यनूराधकश्चैव तिष्यश्चित्राश्वयुक् तथा।।

उत्तरात्रयरोहिण्यो ग्राह्याः सम्यग्विशेषतः।
शुक्लपक्षे विशेषेण काले वा पञ्चमीगतम्।।

षष्ठी च पञ्चमी ग्राह्या विष्टिभागविवर्जिता।
स्थिरराशिः सुसङ्ग्राह्या न ग्राह्यं चरराशिकम्।।

केचनोभयराशौ वा त्वरिते तु शुभोदये।
गुरुशुक्रबुधेन्दूनां शुभवारं समाहरेत्।।

पूर्वात्रयमथार्द्रां च मखां मूलं च कृत्तिकाम्।
ज्येष्ठाश्लेषौ विवर्ज्यैव मन्दारौ च विवर्जितौ।।

चतुर्थीं चाष्टमीं चैव नवमीं च चतुर्दशीम्।
अमावास्यां पौर्णमासीं सायं चैवापराह्णकम्।।

विवर्ज्यैव च रात्रिन्तु पूर्वाह्णे सम्यगाचरेत्।

प्र. ११. १

[सुप्रशस्ते मुहूर्ते वै प्रतिष्ठां कारयेदित्येव निर्दिश्यत इति विशेषः।]

स. २७. १९ - २६

अयने चोत्तरे कुर्याद्दक्षिणे वा त्वरान्वितः।।

मार्गशीर्षकमाघौ द्वौ निन्दितौ ब्रह्मणा पुरा।
तयोरपि च कर्तव्यं त्वरितेनेति केचन।।

मासेषु फाल्गुनः श्रेष्ठश्चैत्रवैशाखयोस्तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिष्ये ज्येष्ठेऽश्वयुङ्मासे श्रावणे मासि वा पुनः।।

श्रवणे चैव रोहिण्यां स्वात्यां हस्ते पुनर्वसौ।
त्रिषूत्तरेषु रेवत्यां श्रविष्ठे वारुणे तथा।।

सौम्यत्वाष्ट्रानुराधेषु तिष्ये चैव विशेषतः।
अन्यस्मिन् सुप्रशस्ते वा यथोक्तगुणसंयुते।।

नक्षत्रे च तिथौ युग्मे प्रशस्ते विष्टिवर्जिते।
गुरुशुक्रबुधेन्दूनामेकवारयुते शुभे।।

ग्रामस्य यजमानस्याप्यनुकूलेऽपि तत्र च ।
चरराशिं विसृज्यैव स्थिरराशिं प्रगृह्य च ।।

सुप्रशस्ते मुहूर्ते वै प्रतिष्ठां कारयेद् बुधः।

खि. १६. १० -१५

[पूर्वपक्षे प्रकुर्वीत कृष्णपक्षे त्रियाद्यके इति, रेवत्यामिति स्थाने रोहिण्यामिति च निर्दिश्यत इति विशेषः।]

अ. ११

[अत्र रोहिणीमृगपौष्णाश्विनीनक्षत्राणि अधिकतया निर्दिश्यन्त इति विशेषः।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४.आचार्यादिवरणम्

५.४.१ ध्रुवबेरप्रतिष्ठायाम् आचार्यादिवरणम्

ज्ञा. ५९. १०३

तदर्थं[1] यजमानः पूर्वतो गुरून् स्थापकाद्यानध्वर्यूंश्च वरयेत्।

अ. १४ ; क्रि. ६. ४५

५.४.२ वर्णानुरूपमाचार्यवरणम्

स. २७. १७ - १९

द्विजातिर्यजमानश्चेदाचार्यं वरयेत् स्वयम्।
शूद्रोऽथवाऽनुलोमो वा कर्तुमिच्छेत्तु भक्तिमान्।।

राजानं यजमानं च सङ्कल्प्यैव गुरुं वरेत्।
हौत्रशंसनकाले तु राजवत् प्रवरं वदेत्।।

प्रतिलोमस्तथा चेदं वैष्णवं कर्म नाचरेत्।

५.४.३ आचार्यलक्षणम्

ज्ञा. ५९. १०३

वैखानससूत्रोक्तविधानेन निषेकादिसंस्कारक्रियायुक्तान् मन्त्रकल्पविदः

---

1. ध्रुवबेरप्रतिष्ठार्थम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नित्यस्वाध्यायपरान् मर्मज्ञानार्चनादिसर्वप्रयोगज्ञान् वैखानसविदः साग्नीनाहूयाभिपूज्य तेषु ज्ञानोत्कटं श्रुतवृत्तशीलसम्पन्नं भूपरीक्षादिप्रतिष्ठान्तेष्वर्चनाद्युत्सवान्तेषु क्रियाप्रयोगविशेषज्ञं यथोक्तमन्त्रांस्तत्प्रायश्चित्तञ्च सम्यग्वेत्तारमास्तिक्ययुतं प्रसन्नमानसं निष्कलसकलध्याननिश्चलं शान्तिशक्तिसमायुक्तं नारायणपरायणं तत्कर्मपरं वैष्णवं भक्तिमन्तमेकं गुरुं वरयित्वा

स. २७. ९ - १५ ; प्र. ११. २ - ५ ; वि. २७. २०३

य. २३. ११ - १५ ; वा. ८

खि. १६. २ - ७

[अत्र भूम्याद्येकादशविधिक्रमज्ञमित्यधिकम्।]

५.४.४ आचार्यत्वानर्हाः

ज्ञा. ५९. १०३

पत्न्यपत्यरहितदुर्वृत्तनास्तिककुब्जवामनातिदीर्घहीनाङ्गातिरिक्ताङ्गपङ्गुबधिरान्धकुनखिश्यावदन्तशिपिविष्टषण्डान् क्षयकुष्ठापस्मारोन्मादादिपापरोगयुतान् वेददूषकपाषण्डान् अन्यकर्मपरान् अन्यदेवताभक्तानपि वर्जयित्वा

वि. २७. २०३

हीनदीर्घाऽतिरिक्ताङ्गकालमत्सरापस्मारकुष्ठोन्मादोदरशर्करामधुमेहादिव्याधियुतान् कुनखश्यावदन्तशिपिविष्टविद्धशेफपाषण्डान् राजपितृगुरुदेवब्राह्मणप्राज्ञवेददूषकान् कुपितान्धबधिरकुब्जवामनायाज्ययाजककुलटापुत्र(पुत्र)हीनातिवृद्धातिबालान् अर्थलुब्धान् विरूपकान् अन्यशास्त्रपारङ्गतान् पाषण्डभक्तान् अस्तामितोदिताशयनान् अन्यदेवताभक्तान्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नास्तिकभ्रान्तचित्तशठादीन्वर्जयेत्।

य. २३. १६ - १८ ; वा. ८

५.४.५ स्थापकादिवरणम्

स. ३०. ७ - १६

आचार्यो यजमानश्च स्थापकान् ऋत्विजोऽपि च ।
प्रतिष्ठादिवसात्पूर्वं पञ्चमेऽह्नि त्र्यहेऽथवा।।

पूर्वेद्युर्वाथ पूर्वाह्णे वरयेदुक्तलक्षणान्।
मन्त्रसूत्रविदः शिष्टान् पत्नीयुक्ताननिन्दितान्।।

वैखानसेन सूत्रेण निषेकादिक्रियान्वितान्।
औपासनं जपं होमं वैश्वदेवं च कुर्वतः।।

प्रपन्नान् भक्तिसंयुक्तान् सर्वकर्मसु निश्चलान्।
ईदृग्गुणसमायुक्ताश्चत्वारः स्थापकाः स्मृताः।।

अलाभे च त्रयो वापि द्वौ वा ग्राह्यौ तु तद्गुणौ।
बिम्बानां कौतुकादीनां सर्वेषां तु पृथक् पृथक्।।

यावन्तस्तत्र होमाः स्युस्तावन्तोऽध्वर्यवः स्मृताः।
ऋत्विजौ ब्रह्मसोमौ द्वौ होता चैकस्तथैव च ।।

अक्ष्युन्मेषणहोमार्थं वास्तुहोमार्थमेव च।
स्नपनार्थं त्रयः प्रोक्ताः सर्वदेवार्चनाय वै ।।

पञ्चाहीनान् सदस्यांश्च उपद्रष्टारमेव च।
संन्यासिनो वनस्थान् वा न गृह्णीयात् पदार्थिनः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थिनो गृहस्थाश्च ग्राह्या वा ब्रह्मचारिणः।
सुवृत्ताः परिपूर्णाङ्गाः मन्त्रकल्पविचक्षणाः।।

न दुष्टाङ्गा न दीर्घाङ्गा न ह्रस्वाङ्गा न मत्सराः।
योग्यानेवात्र संयोज्य गुरुर्वै याजयेत्क्रमात्।।

५.४.६ ऋत्विगादिवरणम्

वि. २७. २०३ , २०४

उक्तलक्षणसम्पन्नान्[1] षोडश ऋत्विजश्च ; अक्ष्युन्मोचनहोमार्थमेकं, वास्तुहोमस्यैकं, पञ्चाग्नीनां पञ्च, अब्जहोमस्यैकं, ब्रह्मसोम (मावृ?) ऋत्विजौ द्वौ, होतारमेकं, स्नानार्थमेकं, सर्वदेवार्चनार्थं द्वौ, स्थापनार्थं द्वौ च, एवं वरयेत् ; परिवारदेवहोमानामध्वर्यूंश्च वरयेत्, अशक्तश्चेत् यथालाभं वरयेत्।

ज्ञा. ५९. १०३

तथैवंविधगुणान् स्थापकांश्चतुरस्त्रीन् द्वौ वा बिम्बप्रतिष्ठापनार्थं पौण्डरीकाग्नेरध्वर्युमेकं पञ्चाग्नीनां पञ्च वास्तुहोमस्यैकं परिवारहोमानामध्वर्यून् ब्रह्मसोमावृत्विजौ द्वौ होतारमेकं सर्वदेवार्चनार्थं चत्वारो द्वौ वा स्थापनार्थं प्रतिबेरमेकमेवं पदार्थिनः सम्यग्वरयित्वा

खि. १६. १६३ - १६६

पूर्वोक्तगुणसम्पन्नाश्चत्वारो मूर्तिधारकाः।।
होमेषु षोडश प्रोक्ताः सर्वकर्मसु निश्चलाः।
एको हौत्रे समुद्दिष्टः एको वै स्नापने तथा।।

1.आचार्यलक्षणप्रकरणे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अक्षिमोचनकार्यार्थं द्वावत्र वृणुयात्तथा।
सर्वदेवार्चनार्थं तु चत्वारस्सम्प्रकीर्तिताः।।

एवमाहृत्य यत्नेन पूजयित्वा पृथक् पृथक्।

अ. १४ ; क्रि. ६. ४६ , ४७

५.४.७ अङ्कुरार्पणमारभ्य प्रतिष्ठापर्यन्तम् आचार्यादीनामाशौचाभावः

य. २५. ४३, ४४

गुरोस्तस्य विशेषेण यावत्कर्म समाप्यते।
तावदङ्कुरमारभ्य द्विधाऽशौचं न लिप्यते।।

तथैव ऋत्विजां वापि यजमानस्य तस्य च ।
यावत्कर्मावसानान्तं नास्ति तावदघं तयोः।।

अ. १४

५.४.८ आचार्येण यजमानस्य शिष्यत्वेन स्वीकारः

ज्ञा. ६३. १०९

गुरुर्यजमानं शिष्यं सङ्कल्प्य द्विजातिम् 'अणोरणीयानि' त्यनुवाकेन प्रोक्ष्य शूद्रः अनुलोमो वा कारयिता चेदमन्त्रकमभ्युक्ष्य राजानं यजमानं कल्पयेत्। तद्भृत्यत्वादनधिकाराच्छूद्रानुलोमयोः। तावुभौ च समग्रं फलं लभेताम्। सूतादिप्रतिलोमो यत्किञ्चिदपि दैविकं कर्म कर्तुं कारयितुं देवार्थं द्रव्यं दातुं च नार्हत्येव।

य. २५. ३४ - ३६

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.अङ्कुरार्पणविधानम्

५.५.१ अङ्कुरार्पणकालः

क्रि. ३७. १ - ३

भूपरीक्षादीनि कर्माणि देवकार्याणि यानि च।।

तेषु तेषु प्रकुर्वीत विधिना चाङ्कुरार्पणम्।
कर्मारम्भदिनात्पूर्वं नवमे वाथ सप्तमे।।

पञ्चमे वा तृतीये वा सद्यो वाऽङ्कुरमिष्यते।

प्र. १०. १, २;   नि.२०;   खि. १६. १६, १७

वि. २६. १९८;   य. २२. १, २ ;   अ. १४;   ज्ञा. ५८. १००

स. २६. १ , २

[अत्र
भूपरीक्षादिकं कर्म यस्मिन्नहनि कारयेत्।।

प्रत्यब्दं पूजनं वापि नैमित्तिकमथापि वा।
तस्मात्तु दिवसात्पूर्वम् --------------।।
इत्यधिकम्।]

स. २६ . ४०, ४१

नैव प्रीणाति भगवान् अङ्कुरार्पणमह्नि चेत्।
----------------------------------।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मात् कुर्यात् प्रयत्नेन रात्रावेवाङ्कुरार्पणम्।
गुणाधिक्यं यदि भवेल्लग्नादिष्वह्नि वाचरेत्।।

खि. १६. २८

[अत्र प्रदोषे वाऽर्पणं कुर्यात् इत्यधिकम्।]

५.५.२ अङ्कुरार्पणमण्डपकल्पनम्

प्र . १०. २ - ८

आलयाभिमुखे वापि ऐशान्ये चोत्तरेऽपि वा।।

रुद्रहस्तं द्विजातीनां नृपाणां नवहस्तकम्।
वैश्यानां मुनिहस्तं तु शूद्राणां पञ्चहस्तकम्।।

षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम्।
मण्डपं वाथ कूटं वा प्रपां वा विधिना चरेत्।
गोमयालेपनं कृत्वा शाम्यन्त्विति च मन्त्रतः।
श्वेततण्डुलचूर्णं वा सुधाचूर्णमथापि वा।।

सूक्ष्मचूर्णं च कृत्वा तु वालुकैर्मिश्रितं तथा।
[illegible] ' सोमं राज' ति मन्त्रतः।।

युग्मं च स्नावयित्वा तु दर्शनीयं च सुन्दरम्।
चक्रवालाद्यलङ्कृत्य पालिकाङ्कुरशोभितैः।।

मध्ये चक्रं च कृत्वा तु दर्शनीयं च कारयेत्।
वितानैः स्तम्भवेष्टैश्च दर्भमालाद्यलङ्कृतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. १४ . १८

[अत्र विष्वक्सेनालये वापि मण्डपादीन् प्रकल्पयेत् इति अधिकम्।]

क्रि. ३७. १८ - २०

य. २२ . ९ - १२

आलयाभिमुखे वाथ चैशान्ये चोत्तरेऽथ वा।।

स्नपनालये वा शान्तस्य उत्तरे वा समाचरेत्।

वितानाद्यैरलङ्कृत्य गोमयेनोपलिप्य च ।।

पञ्चवर्णैरलङ्कृत्य यावन्नेत्रमनःप्रियम्।

नवहस्तं सप्तहस्तं पञ्चहस्तमथापि वा।।

विस्तारायामवत्तुल्यं चतुरश्रं प्रकल्प्य च ।

नि. २०

[अत्र त्रिहस्तं वा इति अधिकम्।]

खि. १६ . २९ - ३१

आलयात्पुरतो वापि उत्तरे वा मनोरमे।।

मण्डपेऽष्टस्तम्भयुते चतुरश्रे सुविस्तृते।

ऊर्ध्वेऽलङ्कारसहितवितानेन स्वलङ्कृतम्।।

मण्डलान्युपलिप्यालङ्कुर्याद्वर्णैस्तु पञ्चभिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.३ अङ्कुरार्पणपात्राणां गौणकल्पः

वि. २६. १९८

सद्य एवासन्ने[1] पालिकादीनामलाभे शरावादिपात्राणि सङ्गृह्य पालिकादिवत्कृत्वा कारयेत्, अथवोपयुक्तां जलेन प्रक्षाल्य पर्यग्निं कृत्वा कारयेदित्येके।

क्रि. ३७. ६

५.५.४ अङ्कुरार्पणपात्राणामुपादानद्रव्येषु तारतम्यम्

वा. ७

ताम्रजाद्राजतं श्रेष्ठं राजताद्रौक्ममुत्तमम्।
एवं कर्तुमशक्तोऽपि मृण्मयं वापि कारयेत्।।

५.५.५ अङ्कुरार्पणपात्रसङ्ख्या, यजमानवर्णानुरोधेन

वि. २६. १९८

अङ्कुरार्पणपात्राणि पालिकाकुम्भशरावान् सुवर्णरजतताम्रमृण्मयान्वा; ब्राह्मणो यजमानश्चेत् प्रत्येकं षोडश, क्षत्रियश्चेत् द्वादश, वैश्यश्चेत् अष्टौ, शूद्रश्चेच्चत्वारः, सर्वेषां चतुरो वा गृह्णीयात्।

खि. १६. १८, २४, २५ ; नि. २० ; वा.७ ; य. २२. ६

स. २६. ३ - ५

[अत्र कांस्यमयान् इत्यधिकम्।]

क्रि. ३७. ३ - ६

[समूर्तार्चनाधिकरणवत्।]

1.शुभकर्मोपक्रमदिने इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.६ अङ्कुरार्पणपात्राणां सङ्ख्यानुरोधेन त्रैविध्यम्

अ. १४

उत्तमं द्वादशेनैव मध्यमं चाष्टकं भवेत्।
चत्वारश्चाधमं प्रोक्तं प्रत्येकं तु पृथक् पृथक्।।

५.५.७ पालिकायाः लक्षणम्

वि. २६. १९८

पालिकोत्सेधं मात्राङ्गुलेन चतुर्विंशत्यङ्गुलं, समवृत्तं, तदुत्सेधं षडंशं कृत्वा एकांशं पादं, त्र्यंशं नालं, द्व्यंशं पालिका पादोदरविष्कम्भं दशाङ्गुलम्, अर्धाङ्गुलभित्तिकं पद्माकारं, नालस्योदरविष्कम्भं चतुरङ्गुलम्, अर्धाङ्गुलभित्तिकं मुखस्योदरविष्कम्भं षोडशाङ्गुलमर्धाङ्गुलभित्तिकं, नालान्तं, क्रमात्सङ्क्षिप्तम्, ओष्ठतारं एकाङ्गुलम्, एवं पालिका। --------------अशक्तश्चेद्यथालाभमानेन कारयेदित्येके।

क्रि. ३७. ७ - १०

उत्सेधः पालिकादीनां चतुर्विंशाङ्गुलो भवेत्।
कुम्भ (मुख?) स्योदरविष्कम्भं षोडशाङ्गुलमिष्यते।।

भित्तिरर्धाङ्गुलञ्च स्यादोष्ठमेकाङ्गुलं भवेत्।
नालस्योदरविष्कम्भं चतुरङ्गुलमीरितम्।।

भित्तिरर्धाङ्गुलं प्रोक्तमेवं नालमितिर्भवेत्।
पादस्योदरविस्तारं दशाङ्गुलमुदाहृतम्।।

भित्तिरर्धाङ्गुलञ्च स्यात्पद्माकारन्तु कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा. ७

मानाङ्गुलेन मानेन दण्डमष्टादशाङ्गुलम्।
षडङ्गुलं तु तन्नाहं गर्तयुक्तं तु कारयेत्।।

पालिकामुखविस्तारं भ्रामयेदष्टाङ्गुलं विदुः।
तदर्धं पादविस्तारं तत् षड्भागैकमाष्टकम्।।

अथवा षोडशाङ्गुल्यं भ्रामयेत् पालिकामुखम्।
विस्तारैकत्रिभागैकं वर्तितं बिलमुच्यते।।

य. २२ . ३

वितस्त्या पालिकोत्सेधं तदर्धं विपुलं मुखम्।
अधोऽपि विपुलं नाहं मध्यनाहं दशाङ्गुलम्।।

प्र. १० . ५६, ५७

स. २६ . ६, ७

त्रितालः पालिकोत्सेधो द्वितालश्चाथवा पुनः।
उत्सेधोऽर्धप्रमाणं स्यात् पालिकामुखविस्तरः।।

तदर्धं मूलविस्तारः क्रमेणोर्ध्वं प्रगृह्य तत्।

नि. २०

खि. १६ . १९ , २०

बिम्बेन कौतुकेनैव समोच्चाः पालिका मताः।
तदर्धमाना वा कुर्यात्तालमात्रमिताश्च वा।।

ध्रुवबेरमुखायामं पालिकायामविस्तरम्।
तदर्धं मूलविस्तारं क्रमशो ह्रासयेद् बुधः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ५८ . १०१

पालिकानामायामं द्वितालं ध्रुवबेरमुखायामं मुखं तदर्धमूलमानुपूर्व्येण सङ्क्षिप्तम्

५.५.८ कुम्भस्य लक्षणम्

क्रि. ३७. १० - १४

कुम्भस्योदरविस्तारं द्वादशाङ्गुलमात्रकम्।।

भित्तिरर्धाङ्गुलं प्रोक्तं कुम्भाकारं तु कारयेत्।
मुखस्योदरविस्तारं पञ्चाङ्गुलमुदाहृतम्।।

भित्तिरर्धाङ्गुलं प्रोक्तं कुम्भोत्तुङ्गं तु कारयेत्।
कण्ठमेकाङ्गुलं प्रोक्तम् ओष्ठमेकाङ्गुलं भवेत्।।

कुम्भाकारं चतुर्दिक्षु भागविस्तारसंयुतम्।
यवमात्रं द्वारमानं द्वन्द्वं द्वन्द्वं तु कारयेत्।।

सर्वानन्यान् प्रकारांश्च पालिकावत्प्रकल्पयेत्।

वि. २६ . १९८

[अत्र द्वादशेत्यस्य स्थाने षोडशेति, अशक्तश्चेद्यथालाभमानेन कारयेदित्येके इति च विशेषः।]

ज्ञा. ५८ . १०१

छिद्रकुम्भानां सार्धतालायामं मूलं भागं चतुर्दिक्षु मध्यतो भागविस्तृतपञ्चद्वारयुतम्।

नि. २०

य. २२. ४, ५

कुम्भोदयं तु तत्तुल्यं रसमात्रं मुखायतम्।
कुम्भोष्ठमिव वक्त्रं स्यात्कुम्भकुक्षिर्दशाङ्गुलम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आश्रमद्वारसंयुक्तं शेषं तत्पालिकासमम्।

प्र. १०. ५७, ५८

खि.१६ . २१, २२

तच्चतुर्थैकहीनस्तु छिद्रकुम्भः प्रमाणतः।
त्रिभागादेकभागस्तु कुम्भद्वारस्य चोच्छ्रयः।।

आयामात् त्रिगुणो नाहः द्वारो भाग उदाहृतः।
पञ्चद्वारसमायुक्तान् छिद्रकुम्भान् विशेषतः।।

स. २६ . ७, ८

[अत्र आयामार्धपरीणाहः इति विशेषः।]

वा. ७

घटिकां[1] कारयेद्विद्वान् पञ्चद्वारसमन्वितम्।
तस्य दण्डोन्नतं कृत्वा पूर्वदण्डार्धमुच्यते।।

केचित्तस्यैव दण्डन्तु चतुरङ्गुलमुन्नतम्।
घटिका घटकविस्तारम् अष्टाङ्गुलमुदाहृतम्।।

एवं क्रमेण कर्तव्यं घटिकां कारयेद् बुधः।

नि. २०

५.५.९ शरावस्य लक्षणम्

य. २२ . ५

तालोत्सेधं शरावं स्यान्मुखाद्याः पालिकासमाः।।

नि. २० ; प्र. १०. ५९

1. घट एव घटिकापदेनोच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ५८ . १०१

शरावाणां मुखं तालविस्तारायामं षडङ्गुलमुन्नतं मूलं भागम्।

स. २६ . ९

प्रादेशमात्रविस्तारं शरावाणां मुखं भवेत्।
शरावाणामधः कुर्यात्तदर्धं वा यथोचितम्।।

वा. ७

शरावदण्डस्यायामं षडङ्गुलमिति स्मृतम्।।

अथवाष्टाङ्गुलं तत्र पादस्योच्छ्रयमुच्यते।
शरावमुखविस्तारं अष्टाङ्गुलमुदाहृतम्।।

तदर्धं पादविस्तारं यथाशोभं तथाचरेत्।

खि. १६ . २३

षडङ्गुलसमुत्सेधान् शरावानपि सम्भरेत्।
विस्तारादि शरावाणां पालिकासममुच्यते।।

वि. २६ . १९८

शरावाणामोष्ठमेकाङ्गुलम्, एतदेव विशेषः। अन्यत्सर्वं पालिकावत्कारयेत्, अशक्तश्चेद्यथालाभमानेन कारयेदित्येके।।

क्रि. ३७ . १४, १५

५.५.१० अङ्कुरार्पणे वर्ज्यानि पात्राणि

वा. ७.

पालिकाघटिकादीनि सम्यग् दग्धं मृदा कृतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुर्यादेकत्र कार्ये तु पुनः कर्म न विद्यते।
नाहस्य पालिकादीनां विस्तारार्धेन वर्धितम्।।

भेदं छेदं च दीनं च सुषिरं काचहीनकम्।
वर्जयेत्तत्प्रयत्नेन कृत्वा तच्छास्त्रपारगः।।

५.५.११ अङ्कुरार्पणपात्राणामधिदैवतम्

वा. ७

विरिञ्चं विष्णुमीशानं पालिकाद्यधिदैवतम्।

५.५.१२ अङ्कुरार्पणे तोये धान्यनिक्षेपः

वि. २६. १९९

धान्यानि शालिव्रीहियवमुद्गमाषप्रियङ्गुगोधूमसर्षपचणकतिलतिल्वकमसूराणि ; एतेषामलाभे यथालाभम् आहृत्य संशोष्य सारं सङ्गृह्य तस्मिन् दिने पूर्वाह्णे तोये निक्षिप्य ----------------।

क्रि. ३७. १६ - १८

[अत्र प्रस्थमात्रमादाय इति विशेषः]

स. २६. १० - १२

[अत्र निष्पाव इत्यधिकम्।]

अ. १४

[अत्र समूर्तार्चनाधिकरणवत्।]

वा. ७

[अत्र कङ्कु इत्यधिकम्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ५८ . १०१

[अत्र कङ्कु-निष्पाव इति धान्यद्वयम् अधिकतयोक्तमिति विशेषः।]

खि. १६ . २६ , २७

[अत्र काश्यपज्ञानकाण्डवत्।]

प्र. १० . ६४

[अत्र खिलाधिकरवत्।]

य. २२ . ६ - ९

[अत्र कुलुत्थ इत्यधिकम्।]

नि. २०

[अत्र अलाभे मुद्गः सर्षपो वा इत्यधिकम्।]

५.५.१३ अङ्कुरार्पणे यजमानप्रार्थना

प्र. ११ . ११ - १४

श्वेतगन्धानुलेपैश्च श्वेतपुष्पाङ्गुलीयकैः।।

आचार्यान् (यँ?)सम्यगभ्यर्च्य नमस्कृत्य स्वदैववत्।

'कर्मेदं मे कुरुष्वे' ति याचेदाचार्यमादरात्।।

शिष्यः समर्पयेत्सर्वं भारमाचार्यपादयोः।

आचार्यः सुप्रसन्नात्मा शिष्यानुग्रहतत्परः।।

तथैवेति सुसङ्कल्प्य कुर्याच्चैवाङ्कुरार्पणम्।

क्रि. ६ . ४६ , ४७ ; खि. १६ . ८, ९ ; वा. ८

ज्ञा. ५८ . १०१ ; वि. २६ . १९९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.१४ आचार्यसङ्कल्पः

ज्ञा. ५८. १०१

गुरुरपि तत्कर्म करिष्यामीति सङ्कल्प्य रात्रिपूजावसाने देवस्य विशेषपूजां कृत्वाऽऽरभेत।

वि. २६ . १९९

५.५.१५ आचार्येण भगवदनुज्ञायाचनम्

क्रि. ३७. २० - २२

आचार्यो यजमानश्च सायं सन्ध्यामुपास्य च ।।

सम्भृत्य सर्वसम्भारान् यथार्हं तत्र मण्डले।
देवदेवं प्रणम्यैव कार्यमावेद्य मन्त्रतः।।

अनुमान्य प्रभुं कुर्यात् अङ्कुरार्पणमत्वरः।

५.५.१६ अङ्कुरार्पणे मण्डपस्तम्भाधिदेवतार्चनम्

प्र. १०. ९, १०

धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम्।
अन्तःस्तम्भचतुष्कोणे स्थापयेदधिदेवताः।।

बाह्यानां द्वादशादित्याः द्वादशानां तु देवताः।
अर्चयित्वा यथान्यायं तत्तद्विधिमथाचरेत्।।

५.५.१७ अङ्कुरार्पणे पददेवतार्चनम्

प्र. १०. ११ - ५६

पञ्चहस्तं त्रिहस्तं वा एकहस्तमथापि वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चविंशत्पदं कृत्वा मध्ये ब्रह्मासनं चरेत्।।

सञ्चारार्थं भवन्त्यष्ट परितश्च पदानि वै।
प्रागादिमध्यमाः प्रोक्ताः द्वाराश्चत्वार एव च ।।

शेषितार्कपदे धीमान् पालिकानां स्थितिं चरेत्।
व्रीहिभिस्तण्डुलैर्वापि पङ्क्तिं कुर्याद्विधानतः।।

षोडशाङ्गुलमायामं यथालाभसमुन्नतम्।
त्रिवेदिसहितं कुर्यात् वेदाश्रं ब्राह्ममासनम्।।

पूर्वद्वारोत्तरे शेषं दक्षिणद्वारपूर्वके।
वक्रतुण्डस्य पीठं स्यात् पश्चिमद्वारदक्षिणे।।

पङ्क्तीशमुत्तरद्वारे पश्चिमे सोमपीठकम्।
कुम्भे वाथ समभ्यर्चेत् तत्पूर्वे शान्तमर्चयेत्।।

षण्णां पीठं प्रकल्प्यैव ब्रह्मणश्चोक्तवच्चरेत्।
ऐन्द्रादि च तथैशान्तं जयाद्यप्सरसोऽर्चयेत्।।

आढकं वा तदर्धं वा पादं वा तण्डुलैः पृथक्।
बाह्येऽष्टाङ्गुलिविस्तारे पीठे वा स्थण्डिलेऽपि वा।।

चतुरश्रं सुवृत्तं च त्रिकोणं धनुराकृति।
दण्डाकारं च पद्माभं वस्वश्रं समवृत्तकम्।।

जयादीनां क्रमात्पीठं पालिकाबाह्यतश्चरेत्।
दिक्पालानां तु शक्तश्चेत् मण्डलानि तु कारयेत्।।

भूम्यां वा पूजयेत् तद्वत् कुशकूर्चेषु सत्वरः।
चतुरश्रं त्रिकोणं च सुवृत्तं वज्रमेव च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्धचन्द्रं च षट्कोणं वृत्तं नूपुरमेव च ।
दिगीशमण्डलाकारम् अन्येषां चतुरश्रकम्।।

अश्वत्थपल्लवं दूर्वां कुशं चाबध्य मध्यमे।
पालिकादीन् क्रमेणैव मृदा वा पूरयेच्छुचिः।।

गायत्रीमन्त्रमुच्चार्य प्रणवेनादाय मन्त्रवित्।
मेदिनीमन्त्रमुच्चार्य चैशान्यादिषु पालिकाः।।

सन्न्यस्यैव ततः कुम्भान् द्वारवामे च सन्न्यसेत्।
'राकामहं' समुच्चार्य द्वारदक्षिणतः पुनः।।

'सिनीवाली'ति मन्त्रेण आचार्यः सन्न्यसेत्क्रमात्।
जातिक्रमेण चैशान्तं पालिकानां पदे पदे।।

ब्रह्मणो दक्षिणे पार्श्वे आचार्यश्चोत्तरामुखः।
ब्राह्ममासनमास्थाय देवदेवमनुस्मरन् ।।

ब्रह्माद्यान् हृदयात्पूर्वं प्रणिध्यां सन्निवेशयेत्।
स्थण्डिलोपरि कूर्चेषु पात्रादावाहयेत्क्रमात्।।

चतुर्मुखं चतुर्बाहुं सर्वाभरणभूषितम्।
अभयं दक्षिणं हस्तं वाममूरुप्रतिष्ठितम्।।

कुण्डिकामक्षमालां च वहन्तं दक्षवामयोः।
पद्मासनस्थं हेमाभं श्यामवस्त्रं च पद्मजम्।।

मूर्तिमन्त्रैस्समावाह्य ब्रह्माणं प्राङ्मुखं यजेत्।
प्राग्द्वारे प्राङ्मुखं चैव दक्षिणद्वारके तथा।।

प्रत्यग्द्वारविमानेऽपि चोत्तरद्वारके तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अब्जजं प्राङ्मुखं चान्यान् यथाविधि च संस्मरेत्।।

भवनं प्राङ्मुखादीनां प्राङ्मुखश्च प्रजापतिः।
पङ्क्तिमध्ये समभ्यर्च्येत् ब्राह्ममन्त्रं समुच्चरन्।।

हेमाङ्गं पीतवस्त्रं च द्विभुजं पद्मधारिणम्।
स्थितं करण्डिकामौलिं शेषं तत्पश्चिमामुखम्।।

अनन्तं सर्वनागानाम् अधिपं वारुणीपतिम्।
फणसप्तकसंयुक्तं सिताभं प्राञ्जलिं स्मरेत् ।।

प्रवालाभं गजमुखम् आसीनं चोत्तरामुखम्।
कदलीचूतपनसपाशाङ्कुशधरं प्रभुम्।।

एकदंष्ट्रं चतुर्बाहुं वक्रतुण्डं स्मरेद् बुधः।
पीताम्बरं तं श्यामाभं खड्गखेटकधारिणम्।।

द्विभुजं करण्डिकामौलिं पङ्क्तीशं प्राङ्मुखं स्मरेत्।
सितं श्यामाम्बरं सौम्यं द्विभुजं दण्डधारिणम्।।

करण्डमकुटसंयुक्तं सुस्थितं दक्षिणामुखम्।
अभ्राभां रक्तवस्त्रान्तां द्विहस्ताम्बुजधारिणीम्।।

सर्वभूषाभूषिताङ्गां जयामैन्द्रपदेऽर्चयेत्।
नीलाभां पीतवस्त्रान्तां द्विकराम्बुजधारिणीम्।।

भूषाभूषितसर्वाङ्गां विजयामनलेऽर्चयेत्।
कुमुदाभां हरिद्वस्त्रां द्विकरां पङ्कजाङ्कितताम्।।

नानाभूषाभूषिताङ्गां विन्दां याम्यपदेऽर्चयेत्।
धातकीपत्रसङ्काशां नीलनीलाम्बरावृताम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विकरामम्बुजधरां नन्दां नैर्ऋतिपदेऽर्चयेत्।
धौताभां पीतवस्त्रान्तां द्विहस्ताम्बुजधारिणीम्।।

पुष्पाभरणसंयुक्तां पुष्टिकां वारुणेऽर्चयेत्।
स्वर्णाभां रक्तवस्त्रान्तां द्विहस्ताम्बुजधारिणीम्।।

कुमुद्वतीं भूषिताङ्गीं वायव्ये चार्चयेत्क्रमात्।
रक्ताभामभ्रसङ्काशवसनां भूषणैर्वृताम्।।

द्विकरामम्बुजधरां सौम्ये चोत्पलकां यजेत्।
हाटकाभां हरिद्वस्त्रां पद्मसंयुतबाहुकाम्।।

सर्वालङ्कारसंयुक्तां विशोकामर्चयेत्ततः।
रक्ताभां हाटकाभां च हरिणीं नीलवर्णकाम्।।

धातकीपत्रसङ्काशां कुमुदोत्पलसन्निभाम्।
अशोकाभां क्रमादेताः द्विभुजाः पद्मधारिणीः।।

विपरीताम्बरधराः सुखासीनास्तदासनाः।
जयाद्यास्सर्वभूषाङ्गाः ध्यायेदत्रेति केचन।।

मेदिनीं चैव राकां च सिनीवालीं स्मरेद् बुधः।
मेदिनीं पीतवस्त्रान्तां श्यामाङ्गीं द्विभुजां स्थिताम्।।

हस्तयोः पालिकां धृत्वा सुकेशीं तद्दिगाननाम्।
पूर्णचन्द्रप्रियां देवीं पूर्णचन्द्रनिभाननाम्।।

हेमाङ्गीं रक्तवस्त्रां तां राकां कुम्भधरां स्थिताम्।
शेषं तद्वच्छिनीवालीं सिताङ्गीं श्यामलाम्बराम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शरावं दधतीं मन्ये मेदिनीं सदृशां तथा।
ध्यात्वा तत्तत्पदे सम्यक् आसीनां वाथ चार्चयेत्।।

बीजे सोमं तथा ध्यात्वा हस्ताभ्यां बीजधारिणम्।
स्थानकं वाथ चासीनं चोत्तरे दक्षिणामुखम्।।

एवं ध्यात्वा ततो देवम् आसनादिभिरर्चयेत्।
हविस्सम्यङ् निवेद्यैव बलिं वा दापयेद् बुधः।।

जयादीनां क्रमाद्वर्णः प्रादक्षिण्यक्रमेण तु।

य. २२ . १२ - ४५

प्रागुदन्तं रसैः सूत्रैः पञ्चविंशत्पदं तथा।।

कृत्वाऽत्र मध्यमे पीठं पदेनैकेन वेधसः।
सङ्कल्प्य परितश्चाष्टौ चारणार्थाय तान् पदान्।।

त्यजेद्दिशासु चतुरो निर्गमाय विचक्षणः।
शेषितार्कपदे धीमान् पालिकानां पृथक् पृथक्।।

स्थण्डिलं कारयित्वाऽत्र तत्पदायामविस्तृतम्।
विपुलार्धोच्चमानाः स्युर्युगस्याग्राः पृथक् पृथक्।।

पालिकापीठमेवं स्याद्धान्यैर्वा तण्डुलेन वा।
ऋत्विग्विपुलमायामं वसुमात्रोदयं क्रमात्।।

पीठं तद्वज्जयादीनां शेषादीनां क्रमात्तथा।
आढकं वा तदर्धं वा पादं वा व्रीहिभिः क्रमात।।

चतुरश्रं सुवृत्तं च त्रिकोणं धनुराकृति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दण्डाकारं च पद्माङ्कं वह्न्यश्रं समवृत्तकम्।।

जयादीनां क्रमात्पीठं शार्ङ्गदण्डौ ततः परम्।
अङ्गुलेनैव चैतेषां द्वाराणां दक्षिणे चरेत्।।

शेषादीनां च शम्भोश्च कृत्वा शान्तासनान् सदा।
शेषादीनां जयादीनां पालिकाबाह्यतश्चरेत्।।

शक्तश्चेत्तत्तद्दिक्पालस्थण्डिलान् कारयेद्यथा।
भूम्यां वा पूजयेत्तद्वत्पवित्रं तत्तदासनम्।।

अश्वत्थपल्लवं दूर्वां कुशं चाबद्ध्य मध्यमे।
पालिकादीन् क्रमेणैव मृदा वै पूरयेच्छुचिः।।

गायत्रीमन्त्रमुच्चार्य प्रणवेनादाय मन्त्रवित्।
मेदिनीमन्त्रमुच्चार्य चैशान्यादिषु पालिकाः।।

सन्न्यस्य च ततः कुम्भान् द्वारवामे च सन्न्यसेत्।
'राकामहं' समुच्चार्य द्वारदक्षिणतः पुनः।।

'सिनीवालिं पृथुष्टे' ति शरावं सन्न्यसेत्क्रमात्।
जातिक्रमेण चैशान्तं पालिकानां पदे पदे।।

ब्रह्मणो दक्षिणे पार्श्वेऽप्याचार्यश्चोत्तरामुखः।
ब्राह्ममासनमास्थाय देवदेवमनुस्मरन्।।

ब्रह्माद्यान् हृदयात्पूर्वं प्रणिध्यां सन्निवेशयेत्।
स्थण्डिलोपरि कूर्चेषु पात्रादावाहयेत्क्रमात्।।

चतुर्मुखं चतुर्बाहुं सर्वाभरणभूषितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभयं दक्षिणं हस्तं वाममूरुप्रतिष्ठितम्।।

कुण्डिकामक्षमालां च कराभ्यां दधतं क्रमात्।
ब्रह्मासनस्थं हेमाभं श्यामवस्त्रं च पद्मजम्।।

प्राग्द्वारे प्राङ्मुखं चैव दक्षिणे द्वारकेऽपि वा।
प्रत्यग्द्वारविमानेऽपि चोत्तरद्वारके तथा।।

अजं प्राङ्मुखमन्यांश्च यथाविधि च संस्मरेत्।
हेमाङ्गं पीतवस्त्रं च द्विभुजं पद्मधारिणम्।।

स्थितं करण्डिकामौलिं शेषं तत्पश्चिमामुखम्।
प्रवालाभं गजमुखमासीनं चोत्तरामुखम्।।

कदलीचूतपनसधरं पाशाङ्कुशं प्रभुम्।
एकदन्तं चतुर्बाहुं वक्रतुण्डं स्मरेद् बुधः।।

पीताम्बरं तं श्यामाङ्गं खड्गखेटकधारिणम्।
द्विभुजं करण्डिकामौलिं पक्षीशं प्राङ्मुखं स्मरेत्।।

सितं श्यामाम्बरं सौम्यं द्विभुजं दण्डपाणिनम्।
करण्डमकुटसंयुक्तं सुस्थितं दक्षिणामुखम्।।

रक्ताभं हाटकं पश्चाद्धरितं नीलमेव च ।
धातकीपत्रसङ्काशं कुमुदं चोत्पलप्रभम्।।

आकाशाभं क्रमादेता द्विभुजा पद्मधारिणीः।
उपवीताम्बरधराः सुखासीनास्तदाननाः।।

जयाद्याः सर्वभूषाङ्गाः ध्यात्वा मन्त्री दिशि स्वयम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेदिनीं चैव राकां च सिनीवालीं स्मरेद् बुधः।।

मेदिनीं पीतवस्त्रां तां श्यामाङ्गीं द्विभुजां स्थिताम्।
हस्तयोः पालिकधरां सुकेशीं तद्दिगाननाम्।।

पूर्णचन्द्रप्रियां देवीं पूर्णचन्द्रनिभाननाम्।
हेमाङ्गीं रक्तवस्त्रां तां राकां कुम्भधरां स्थिताम्।।

शेषं तद्वत्सिनीवालीं सिताङ्गीं श्यामलाम्बराम्।
शरावं दधतीमन्यां मेदिनीसदृशां तथा।।

ध्यात्वा तत्तत्पदे चैव आसीनांश्चाथवाऽर्चयेत्।
बीजे सोमं तथा ध्यात्वा हस्ताभ्यां बीजधारिणम्।।

स्थानकं वाऽथ चासीनं दक्षिणे चोत्तरामुखम्।
एवं ध्यात्वा तथा देवानासनादिभिरर्च्य च ।।

हविः सम्यङ्निवेद्यैव सर्वेषां च हविर्ददेत्।
बलिं वा दापयेत्सम्यक् शेषादिभ्यो यथाक्रमम्।।

पानीयं मुखवासं च दद्यान्मन्त्रमनुस्मरन्।

वा. ७

आलयात्प्रमुखे चैव उत्तरे वा यथार्हकम्।
गोमयेनोपलिप्यैव पैष्ट्या भूमिमलङ्कृताम्।।

तन्मध्ये कल्पयेत्सूत्रं पदभागं पृथक् चरेत्।
पूर्वान्तमुत्तरान्तं तु षट्सूत्रं तु प्रसार्य च ।।

एवं कृत्वा तु कोष्ठं तु पञ्चविंशतिसङ्ख्यया।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मध्ये ब्रह्मपदं त्वेकं परितोऽष्टानि लेखयेत्।।

पूर्वं तु दक्षिणं चैव पश्चिमं चोत्तरादिशम्।
प्रत्येकं तद् व्यपोह्यैकं द्वारार्थं तु विचक्षणः।।

तच्छेषद्वादशे कोष्ठे आग्नेयादिविदिक्स्थितम्।
षड्द्रोणं व्रीहिमादाय तदूर्ध्वे चास्तरेद् बुधः।।

तन्मध्ये ब्रह्मणः पीठं त्रिवेदिसहितं क्रमात्।
षडङ्गुलोन्नतं वापि यथालाभोन्नतं तु वा।।

अथ तालोन्नतं पीठं त्रिवेदिसहितं पुनः।
पूर्वद्वारोत्तरे शेषं दक्षिणे वक्रतुण्डकम् ।।

दक्षिणद्वारपार्श्वे तु वीशचक्रौ च विन्यसेत्।
तथा पङ्क्तीशभूतेशौ पश्चिमद्वारपालकौ।।

उत्तरद्वारपार्श्वे तु शङ्खशान्तौ च कल्पयेत्।

वक्रतुण्डं च वारुण्ये पङ्क्तीशं द्वारदक्षिणे।
ब्रह्मणः परितोऽष्टौ च जयादीन्कल्पयेत् क्रमात्।।

पश्चिमे तालविस्तारं त्रिवेदिसहितं क्रमात्।
षडङ्गुलोन्नतं पीठं पृथक् चैव प्रकल्पयेत्।।

तद्बाह्ये कल्पयेद्विद्वान् प्रागादीनां यथाक्रमम्।
षडङ्गुलायतविस्तारं पीठं प्रति समाचरेत्।।

ब्रह्मणश्चाकृतिं वक्ष्ये शृणुध्वं मुनिसत्तमाः।
रुक्मवर्णं सुखासीनं पद्मस्योपरि संस्मरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्भुजं चतुर्वक्त्रं दक्षिणाधःकरादिषु।
अभयं कलशं धृत्वा सपद्मं कटकान्वितम्।।

किरीटाभूषणैर्युक्तं कटकाङ्गुलिसंयुतम्।
सावित्रीसहितं नित्यं पीठोपरि समाहितम् ।।

एवं ध्यात्वा समावाह्य अर्चयेदष्टविग्रहैः।
ब्रह्मादीनि विशोकान्तमर्चयेच्च क्रमेण वै।।

ऊर्ध्वे कूर्चान्विनिक्षिप्य ध्यात्वोपरि समाहितः।
'ब्रह्म जज्ञे' ति मन्त्रेण विरिञ्चावाहनादिकम्।।

निवेद्यान्तं च सम्पूज्य तथैवान्यांश्च दैवतान्।
अर्चयित्वा विशेषेण सोदकन्तु बलिं क्षिपेत्।।

नि. २०

पञ्चविंशत्पदान् कृत्वा मध्ये ब्रह्मासनं भवेत्।
सञ्चारार्थं भवेदष्टपरितश्च पदानि वै।।

प्रागादिमध्यमा प्रोक्ता द्वावेकं च पदे पदे।
स्थापयेत्तत्क्रमेणैव वर्णानां च यथाक्रमम्।।

पादायामं तदुत्सेधमर्धं ब्रह्मासनं भवेत्।
पद्मादिद्वारवामे तु बाह्ये कल्पस्तदासनम्।।

शेषविघ्नेशपक्षीशसोमानां च पृथक् पृथक् ।
जयादीनां च सर्वेषाम् आसनानि पृथक् पृथक्।।

हस्तमात्रायतं तारं तत्समं हि तदर्धकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सेधमिह विज्ञेयं संख्याभेदमिहोच्यते।।

ब्रह्मणो द्वारदेवानाम् आसनं चतुरश्रकम्।
चतुरश्रे जयं चैव वृत्तं च विजयासनम्।।

विन्दायाश्च त्रिकोणं स्याद्धनुराकृति पौष्टिकम्।
नन्दायाः दण्डकाकारं पद्मवत्कुसुमासनम्।।

त्रिकोणं चोत्पलायाश्च विशोकायाश्च वृत्तकम्।
एव ..... च जयादीनां द्वारदक्षिणतः क्रमात्।।

पीठानि परिकल्प्यैव पङ्क्तिबाह्ये यथाक्रमम्।
अङ्कुरार्पणकाले तु दक्षिणे द्वारदेवताः ।।

ब्रह्माणं प्राङ्मुखं ध्यात्वा शेषादींस्तं निरीक्ष्य च।
प्राग्द्वारे देवतागारे ब्रह्माणं पश्चिमामुखम्।।

कलशाक्षमालापाणि च जटामकुटमण्डितम्।
चतुर्भुजसमायुक्तं ब्रह्माणमिति चार्चयेत्।।

वि. २६ . १९९ , २००

देवेशं प्रणम्य विशेषतोऽभ्यर्च्य अलङ्कृते मण्टपे यथेष्टमानेन सपिष्टैः प्रागग्रैरुत्तराग्रैरष्टभिस्सूत्रैरेकोनपञ्चाशत्पदं कृत्वा मध्ये पदे ब्रह्माणम् अभ्यर्च्य तत्परितश्चतुर्विंशतिपदं विसृज्य बाह्यपदे च ऐशानादि 'ईशं पर्जन्यं जयन्तं महेन्द्रम् आदित्यम् सत्यम् अग्निं वितथं गृहक्षतं यमं गन्धर्वं भृङ्गराजं निर्ऋतिं दौवारिकं सुग्रीवं सरित्पतिम् असुरं शोषणं जवनं नागं मुख्यं सोमम् अर्गलम् अदिति' मिति चतुर्विंशतिदेवान् प्रणवादिनमोन्तं पूर्वं तोयं पुष्पमन्नं पश्चात्तोयं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च प्रक्षिप्य अभ्यर्च्य पुष्पादीन् संशोध्य मध्यपदे तालोन्नतं त्रिवेदिसहितं ब्रह्मणः पीठं कृत्वा बाह्यपदे चेन्द्रादिषु पदत्रयं द्वारं विभज्य ईशानादिकोणेषु पदत्रयं द्व्यङ्गुलोन्नतं तण्डुलैर्व्रीहिभिर्वा, यथालाभं दण्डवत् पङ्क्तिं कृत्वा जयन्ते शेषस्य आदित्ये वक्रतुण्डस्य गृहक्षते गरुडस्य गन्धर्वे चक्रस्य सुग्रीवे पङ्क्तीशस्य असुरे भूतेशस्य मुख्ये शङ्खस्य सोमे अङ्कुराधिपस्य अर्गले शान्तस्य च यथालाभमान्नेन पीठानि कुर्यात् ; मध्ये पदे ब्रह्माणं प्राङ्मुखमभ्यर्च्य शेषादींश्चार्चयित्वा ब्रह्मणः परितोऽष्टसु पदेषु प्रागाद्यैशानान्तं जयां, विजयां, विन्दां, नन्दां, पुष्टिकां, कुमुद्वतीम्, उत्पलिकां, विशोकाम् इत्यष्टावप्सरसोऽभ्यर्च्य तद्बाह्यपदे च ऐन्द्रादिषु दिग्देवान् तत्तद्दिक्षु समर्चयेत्। एतेषां यथालाभं हविर्निवेदयेत्। हविषोऽलाभे बलिं वा दद्यात्।

क्रि. ३७. २२ - ३२

प्रागग्रैरुत्तराग्रैश्च सूत्रैरष्टभिरष्टभिः।।

पदमेकोनपञ्चाशत् विरचय्य सलक्षणम्।
मध्ये त्रिवेदिसहितं पीठं तालोन्नतं विधेः।।

कृत्वा चतुर्मुखं तत्र ब्रह्माणं सम्यगर्चयेत्।
प्रदक्षिणक्रमेणैव तत्र बाह्यपदेषु वै।।

ईशानादि चतुर्विंशद्देवानेतान् समर्चयेत्।
ईशं पर्जन्यं जयन्तं महेन्द्रादित्यसत्यकान्।।

अग्निं च वितथं चैव ग्रहक्षतयमौ तथा।
गन्धर्वं भृङ्गराजं च निर्ऋतिं दौवारिकं तथा।।

सुग्रीवं च सरिन्नाथम् असुरं शोषणं तथा।
जवनं नागमुख्यौ च क्रमात्सोमार्गलादितीन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आवाह्य तोयं पुष्पं च हविस्तोयं ददेत्ततः।
पुष्पादीनपि संशोध्य मध्ये द्वारान् प्रकल्प्य च ।।

द्वारेशानर्चयेदष्टौ तत्तद्दिग्द्वारपार्श्वयोः।
जयन्ते शेषमभ्यर्च्य आदित्ये तु विनायकम्।।

ग्रहक्षते तु गरुडं गन्धर्वे तु सुदर्शनम्।
सुग्रीवेऽपि च पक्षीशं भूतेशमसुरेऽर्चयेत्।।

मुख्ये शङ्खं समावाह्य पूजयेच्छान्तमर्गले।
ब्रह्मणः परितोऽष्टासु प्रागादीशान्तमर्चयेत्।।

जयां च विजयां विन्दां नन्दामप्यथ पुष्टिकाम्।
कुमुद्वतीमुत्पलकाम् अष्टावप्सरसः[1] क्रमात्।।

तद्बाह्ये दिक्षु विदिशास्विन्द्रादींश्च समर्चयेत्।

५.५.१८ अङ्कुरार्पणे पीठदेवतार्चनम्

स. २६ . १३ - २२

प्रमुखे मण्डपे चैव पञ्चवर्णैरलङ्कृते।।

सप्तकिष्कुप्रमाणेन पञ्चभिस्त्रिभिरेव वा।
तण्डुलैर्व्रीहिभिर्वापि पङ्क्तिं कुर्याद्विधानतः।।

हस्तविस्तारसंयुक्तं गोलकोन्नतिसंयुतम्।
चतुर्दिक्षु तथा हस्तविस्तारद्वारसंयुतम्।।

---

1. अत्र सप्तैवाप्सरसो नाम्ना निर्दिश्यन्ते। विशोकाया अष्टमाप्सरसो नामापि उपलक्षणतया गृहीतव्यम्। विमानार्चनाकल्पे तथोक्तेः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तन्मध्ये ब्रह्मणः पीठं तण्डुलैर्वापि शालिभिः।
षडङ्गुलसमुत्सेधं षोडशाङ्गुलमायतम्।।

त्रिवेदिसहितं कुर्याच्चतुरश्रं समन्ततः।
शेषादीनां तु षण्णां वै पीठमेवं प्रकल्पयेत्।।

पादौ प्रक्षाल्य चाचम्य मध्ये ब्रह्माणमर्चयेत्।
प्रागृद्वारादुत्तरे शेषं वक्रतुण्डं तु दक्षिणे।।

दक्षिणद्वारपार्श्वे तु गरुडं चक्रमेव च ।
पङ्क्तीशं पश्चिमद्वारात् दक्षिणे च विधानतः।।

भूतेशमुत्तमासीनं पीठं चैव यथाविधि।
पूर्वस्मिन्नुत्तरद्वारात् सोमं शान्तं समर्चयेत्।।

इन्द्रादीशानपर्यन्तं जयाद्यप्सरसोऽर्चयेत्।
हविषा च समायुक्तं सर्वेषामुत्तमं पृथक्।।

ब्रह्मादीनां तु षण्णां वै मध्यमं तु प्रकीर्तितम्।
अधमं ब्रह्मणश्चैव शेषाणां बलिरेव तु ।।

ज्ञा. ५८ . १०१

खि. १६ . ३१ - ३८

व्रीहिभिस्तण्डुलैर्वाऽत्र पीठं सम्यक्प्रकल्पयेत्।।

मध्ये ब्रह्माणमुद्दिश्य षोडशाङ्गुलमायतम्।
त्रिवेदिसहितं पीठं कुर्यात्कर्माङ्गुलोच्छ्रयम्।।

प्राच्यां शेषं समभ्यर्च्य वक्रतुण्डञ्च दक्षिणे।
पङ्क्तीशं पश्चिमेऽभ्यर्च्य सोमञ्चैव तथोत्तरे।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्वक्सेनं च तत्रैव पूजयेच्च यथाविधि।
इन्द्रादीशानपर्यन्तं जयादीरपि चार्चयेत्।।

भागोन्नतं द्वादशाङ्गुलायतं तिसृभिस्तथा।
वेदिभिस्सहितं कुर्यात्पीठान्येषां पृथक् पृथक्।।

मध्ये ब्रह्माणमावाह्य ब्रह्माणञ्च समर्चयेत्।
देवानन्यांश्चार्चयेत्तु तत्तत्पूजाक्रमेण ह।।

निवेदनसमायुक्तं सर्वेषामुत्तमं भवेत्।
षण्णां ब्रह्मादिदेवानामर्चनं मध्यमं भवेत्।।

ब्रह्मणे विनिवेद्यान्यदेवानां बलिदापनम्।
अधमो मार्ग उद्दिष्ट इति प्रोवाच पूर्वजः।।

अ. १४

पञ्चहस्तप्रमाणेन चतुरश्रं समं तथा।
धान्यपीठं च कृत्वा तु मध्ये ब्रह्माणमर्चयेत्।।

प्राच्यां चक्रं समभ्यर्च्य वक्रतुण्डं तु दक्षिणे।
पङ्क्तीशं पश्चिमेऽभ्यर्च्य उत्तरे सोममर्चयेत्।।

सोमेशानद्वयोर्मध्ये विष्वक्सेनं समर्चयेत्।
जयादीन् परितोऽभ्यर्च्य ऐशान्यादि प्रकल्पयेत्।।

ब्रह्मादिसर्वदेवानां पूजयित्वा यथाक्रमम्।
हविर्भिस्सन्निवेद्यैव उत्तमं तु पृथक् पृथक्।।

ब्रह्मादिषट् च देवानां मध्यमं तु हविर्भवेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अधमं हविरेवोक्तं उभयोर्ब्रह्मसोमयोः।।

अन्येषामेव देवानां बलिरेवं प्रदीयताम्।

५.५.१९ अङ्कुरार्पणे मृत्सङ्ग्रहणम्

प्र. १०. ५९ - ६१

आलयस्योत्तरे वापि ऐशान्ये वा विशेषतः।।

गोमयेनोपलिप्यैव मेदिनीं तु समर्चयेत्।
चक्रं शान्तं समभ्यर्च्य हरेत्तज्झठरे मृदम्।।

कांस्यपात्रे सुसन्न्यस्य शिष्यस्य शिरसि न्यसेत्।
ग्रामं प्रदक्षिणं कृत्वा आलयं वा प्रदक्षिणम्।।

५.५.२० अङ्कुरार्पणे सोमकुम्भार्चनम्

क्रि. ३७. ३३ - ३७

उत्तरे[1] धान्यपीठं तु चतुरङ्गुलमुन्नतम्।।

सोमस्याभिमुखे कुर्यात् सुवृत्तं साध्वलङ्कृतम्।
षोडशप्रस्थसम्पूर्णं कालहीनं नवं शुभम्।।

कुम्भमादाय विधिना तन्तुना परिवेष्ट्य च।
प्रक्षाल्य पूरयित्वाद्भिः वस्त्राभ्यां वेष्टनं चरेत्।।

---

1 मण्डपस्योत्तरे इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिमन्त्र्य च सौवर्णीं प्रतिमां तत्र निक्षिपेत्।
तस्मिन् कुम्भे समावाह्य सोमं ध्यात्वा समर्चयेत्।।

हविर्निवेदयेत् पश्चात् मुखवासं च दापयेत्।

वि. २६ . २०१

[अत्र सौवर्णीं प्रतिमाम् इति स्थाने तथा वस्त्राभ्यामिति स्थाने वस्त्रेणेति, सुवर्णं निक्षिप्य अभ्यर्च्य इति च विशेषः।]

५.५.२१ अङ्कुरार्पणे बीजावापप्रकारः

वि. २६. २०१

पालिकादीन् मृदा वालुकाभिर्वा सकरीषमापूर्य तेषां मध्ये प्रत्येकं तन्तुना बध्वा वस्त्रेण वेष्टयेत्। वस्त्रालाभे दर्भेण बध्नीयात्, ईशानादि ईशपर्जन्यसप्तकेषु अग्निवितथभृङ्गराजेषु निर्ऋतिदौवारिकशोषणेषु जवननागादितिषु च क्रमेण पालिकाकुम्भशरावान् विष्णुगायत्र्या संस्थाप्य पालिकासु मेदिनीं, छिद्र-कुम्भेषु राकां, शरावेषु सिनीवालीं समभ्यर्च्य हविर्निवेदयेत्, (अलाभे बलिं दद्यात्) कांस्यपात्रे बीजानि निक्षिप्य क्षीरेणाभिषिच्य सोमस्याभिमुखे संन्यस्य तेषु सोममभ्यर्च्य पालिकादीनि वस्त्रेणाच्छाद्य पुण्याहं वाचयेत्, आचार्यादिभ्यो दक्षिणां दद्यात्, बीजानि 'सोमं राजानम् ' इत्यभिमृश्य तूर्यघोषसमायुक्तम् आचार्यः प्राङ्मुख उदङ्मुखो वा 'वैष्णवं, विष्णुसूक्तं' , 'सोमं राजान' मिति जपन्नङ्कुरानर्पयेत्। 'एते शत' मित्यादि-वारुणमन्त्रैर्जलसेकं कुर्यात्, आचार्यादिभ्यो भक्तेभ्यश्च ताम्बूलं दद्यात्।। अङ्कुरान् सोमकुम्भं च गुप्तदेशे तथा विन्यस्य पालिकादीन् पिधाय ---
------------------ सोममभ्यर्च्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रि. ३७. ३७ - ५०

मृद्भिर्वा वालुकाभिर्वा गोकरीषैर्विशेषतः।।

पालिकादीन् समापूर्य तन्तुना परिवेष्ट्य च ।
वस्त्रैरावेष्टयेत्पश्चात्पात्राणि च यथाक्रमम्।।

न्यसेदीशे पालिकाश्च कुम्भान् पर्जन्यके तथा।
शरावान् सत्यके न्यस्य पुनरग्नौ च पालिकाः।।

निदध्याद्वितथे कुम्भान् शरावान् भृङ्गराजके।
नैर्ऋते पालिका न्यस्य कुम्भान् दौवारिके तथा।।

शरावान् शोषणे न्यस्य जवने पालिकाः पुनः।
नागे कुम्भांस्तथा न्यस्य शरावानदितौ न्यसेत्।।

जपन् वै विष्णुगायत्रीं यथोक्ते स्थापयेत्पदे।
पालिकासु महीं राकां छिद्रकुम्भेषु चार्चयेत्।।

शरावेषु सिनीवालीम् अभ्यर्च्य विधिना गुरुः।
पूर्वनीतानि धान्यानि गृहीत्वा कांस्यभाजने।।

गव्येन पयसा सिक्त्वा सोमस्याभिमुखे न्यसेत्।
तेषु सोमं समावाह्य समभ्यर्च्य निवेदयेत्।।

वैष्णवं विष्णुसूक्तं च ओषधीसूक्तमेव च ।
'सोमं राजान' मिति च जपन् मङ्गलपूर्वकम्।।

अङ्कुराण्यभिमन्त्र्यैव तानि पात्रेषु निक्षिपेत्।
मेदिनीमन्त्रमुच्चार्य पालिकासु विशेषतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'राकामहं' समुच्चार्य छिद्रकुम्भेषु वापयेत्।
'सिनीवाली' ति मन्त्रेण शरावेषु विनिक्षिपेत्।।

वारुणं मन्त्रमुच्चार्य जलसेकमथाचरेत्।
पुण्याहं वाचयित्वा तु मुखवासं प्रदापयेत्।।

आचार्याय पदार्थिभ्यो दक्षिणां विहितां ददेत्।
अङ्कुरान् सोमकुम्भं च गुप्ते देशे निधाय च।।

पिदध्याच्च पिधानेन कर्मान्ते च विसर्जयेत्।

ज्ञा. ५८. १०१ , १०२ ; खि. १६. ३९ - ४७ ; अ. १४

प्र. १०. ६२ , ६३ , ६५ - ६७ , ६९ , ७०

पालिकादीन् प्रपूर्यैव गायत्रीमन्त्रमुच्चरन्।
ऐशान्यादिषु कोणेषु स्थापयेत्ताश्च पालिकाः।।

द्वारवामे तु कुम्भं स्यात् शरावं द्वारदक्षिणे।
नववस्त्रैः समावेष्ट्य पालिकादीन् समर्चयेत्।।

हविःपात्रं तु सङ्गृह्य वायव्ये सोममर्चयेत्।
पुण्याहं वाच्य तत्काले तूर्यघोषणमाचरेत्।।

'इमे बीजे'ति मन्त्रेण तद्बीजान्यभिमर्शयेत्।
विष्णुसूक्तं समुच्चार्य यजमानयुतो गुरुः।।

'सोमं राजे' ति मन्त्रेण वापयेदङ्कुरांस्ततः।
वारुणं मन्त्रमुच्चार्य जलसेकं तु कारयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रणवेनार्कपत्रैर्वा तथा चैरण्डपत्रकैः।
आच्छादयेद्यावदन्तं त्रिकालाभ्यर्चनं मतम्।।

अत्र देवान् विसृज्यैव गुप्ते देशे निधापयेत्।
वस्त्रैर्नवैः समाच्छाद्य पालिकादीन् समर्चयेत्।।

नि. २०

रात्रिपूजावसाने तु देवेशं सम्प्रणम्य च ।
मृदा वा सिकताभिर्वा गोकरीषयुतं स्मृतम्।।

वैष्णवं मन्त्रमुच्चार्य पालिकादीन् प्रपूज्य च ।
हविः सम्यङ् निवेद्यैव ब्रह्मादिद्वारदेवताः।।

स्थापयेत्स्थण्डिलस्यार्धे कोणे वा द्वारि पालिकान्।
स्थापयेत् वाथ वामे तु कुम्भं सन्न्यस्य वै बुधः।।

द्वारस्य दक्षिणे भागे शरावान् स्थापयेत् क्रमात्।
मेदिनीं च तथा उर्वीं पुण्यां पामरितामिति ।।

पालिकां तु समभ्यर्च्य तथा राकां वराङ्गनाम्।
मुख्यां चेति च रक्ताङ्गीं छिद्रकुम्भे समर्चयेत्।।

पितृणां हि तथा पुण्यां सिनीवालीं गभस्तिनीम्।
शरावेषु समभ्यर्च्य अर्चयेदष्टविग्रहैः ।।

पञ्चावरान् समाहूय पुण्याहं तत्र वाचयेत्।
मुहूर्ते समनुप्राप्ते दैवज्ञमभिपूज्य च।।

आचार्यं पूजयित्वा तु वस्त्रहेमाङ्गुलीयकैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यः सुप्रसन्नात्मा वैष्णवं सूक्तमुच्चरन्।।

उक्तबीजान् समादाय विष्णुसूक्तं समुच्चरन्।
'सोमं राजान' मन्त्रेण बीजावापनमाचरेत्।।

तूर्यधोषसमायुक्तं वाद्यगीतसमायुतम्।
स्तोत्र ----- समायुक्तम् अङ्कुरानर्पयेद्बुधः।।

भक्तानां ब्राह्मणादीनां ताम्बूलं चैव दापयेत्।
नित्यपूजासमायुक्तं सोमकं चार्चनैर्युतम्।।

खिले पुरा मया प्रोक्तं ----- शेषमशेषतः।

वा. ७

पालिकादीन् प्रगृह्यैव 'शुची वो हव्य' मुच्चरन्।
प्रक्षाल्य पालिकादीनि अलङ्कृत्य प्रयत्नतः।।

सदूर्वाश्वत्थमुकुलैस्तन्तुना परिवेष्टयेत्।
ओष्ठपादप्रदेशाभ्यां श्वेतवस्त्रैरलङ्कृतम्।।

तस्य च्छिद्रं पिधायैव दर्भाद्यादि तृणेन च ।
तां मृदा पूरयेद्विद्वान् तद्वेद्योपरि विन्यसेत्।।

ऐशान्यादि क्रमेणैव विधायाचार्यशिष्यकौ।
'इदं विष्णुर्विचे' त्युकृत्वा तत्र कार्यं समाचरेत्।।

'अणोरणीयानि' त्युकृत्वा प्रोक्षयेत्सर्वपालिकाम्।

मृत्पात्रेषु विनिक्षिप्य विष्णुगायत्रिमुच्चरन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जलेन परिषेकं च 'येते शतमि' ति ब्रुवन्।
नित्यपूजावसाने तु देवेशं सम्यगर्चयेत्।।

द्रोणैर्द्रोणार्धकैर्वापि यथाशक्ति निवेदयेत्।
ताम्बूलसहितं तत्र देवेशस्य निवेदयेत्।।

पश्चाच्छेषं समादाय विप्रैर्भक्तजनैरपि।
दत्वा यथोचितं तत्र पश्चात् कर्म समाचरेत्।।

मेदिन्यादि चतुर्भिश्च ऐशान्यादि यथाक्रमम्।
आसनावाहनं चैव अर्घ्यं पाद्यं तथैव च ।।

पुष्पं गन्धं तथा धूपं दीपदानान्तमर्चयेत्।
नैवेद्यं नैव कुर्वीत अन्यत् सर्वं समाचरेत्।।

पश्चाद्वादकमाहूय प्रोक्षयित्वा विचक्षणः।
'शन्नो देवी'रितीत्युक्त्वा तेन कर्म समाचरेत्।।

शृङ्गाभ्यां रुक्मशङ्खाभ्यां काहलाद्यादिपूर्वकम्।
घोषयेत्सर्ववाद्यन्तु अत्वरः शुद्धमानसः।।

श्रोत्रियांश्च समाहूय पुण्याहमपि वाचयेत्।
पश्चाद् बीजान् प्रगृह्यैव कांस्यपात्रे समाहितः।।

ऊर्ध्वे कूर्चं विनिक्षिप्य सोमं राजानमुच्चरन्।
सोमं तत्रैव चावाह्य अर्चयित्वाष्टविग्रहैः।।

आचार्यहस्तादादाय विष्णुसूक्तं समुच्चरन्।
पालिकोपरि संवाप्य प्रत्येकं देशिकोत्तमः।।

अहतैश्च नवैर्वस्त्रैः प्रत्येकं तत्र चाहरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पालिकापादमावेष्ट्य 'विष्णुस्त्वां रक्ष'मुच्चरन्।।
पश्चात्तोयं समादाय वारुणं मन्त्रमुच्चरन्।
सर्वत्र सेचनं कृत्वा भक्तानन्यानि चाहरेत्।
एकाहं द्व्यहं तत्र यावदङ्कुरसम्भवम्।।
तत्रार्कैरण्डपत्राणि गृहीत्वोर्ध्वे समर्चयेत्।
मूर्धेष्टकशिलां तत्र निधायैव द्विजोत्तमः ।।
गुप्तदेशे समावेश्य रक्षां तत्रैव कारयेत्।
एवं कर्तुमशक्तश्चेत् अत्रिणोक्तक्रमाच्चरेत्।।

५.५.२२ स्त्रीशूद्राणां यजमानत्वे विशेषः।

स. २६ . २९

स्त्रीशूद्रौ कारयेतां चेत् ताभ्यां वापं न कारयेत्।

य. २२. ४७

शूद्रश्चेन्नैव वापयेत्।

प्र. १०. ६८

शूद्रस्तु यजमानश्चेत् नववस्त्रैर्गुरुं पुनः।
सम्पूज्य दक्षिणां दत्वा ततस्तेनैव वापयेत्।।

५.५.२३ अङ्कुराणामधिदेवता

स. २६. ३९

अङ्कुराणां तु सर्वेषां चन्द्रः प्रोक्तोऽधिदेवता।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.२४ अङ्कुरार्पणे वर्जनीया अङ्कुराः

स. २६. ३१, ३२

श्यामलाश्च तथा रक्ता ये च तिर्यग्गता अपि।।

अङ्कुरास्त्वप्ररूढाश्च वर्जनीयाः प्रयत्नतः।

५.५.२५ अङ्कुराणां वर्णादिकमपेक्ष्य फलम्

स. २६. ३२ - ३४

श्यामेषु द्रव्यनाशः स्यात् रक्तेषु कलहो भवेत्।।

तिर्यगगतेषु रोगः स्यादप्ररूढे मृतिर्भवेत्।

शुभं पीतेषु शुक्लेषु ऋजुमूर्ध्वं गतेषु च ।।

कर्तुः कारयितुश्चैव भवत्येव न संशयः।

एवमेतत् क्रमेणैव मङ्गलायाङ्कुरार्पणम्।।

५.५.२६ अङ्कुरपात्रार्चनम् उत्तमम्

वि. २६. २०१

नित्यं दीपयुतं त्रिकालं द्विकालम् एककालं वा, सोममभ्यर्च्य हविर्निवेदनमुत्तमम्।

५.५.२७ अङ्कुरपात्रार्चनम् मध्यमम्

वि. २६ . २०१

नित्यं दीपयुतं त्रिकालं द्विकालम् एककालं वा -------------- हविर्विना नित्यं दीपार्चनमेव कारयेन्मध्यमम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.२८ अङ्कुरपात्रार्चनम् अधमम्

वि. २६ . २०१

नित्यं दीपयुतं त्रिकालं द्विकालम् एककालं वा,--------------------
सोमकुम्भार्चनं विना कारयेदधमम्।

५.५.२९ सद्योऽङ्कुरार्पणम्

प्र. १०. ७१ - ७६

अमावास्याव्यवहिते कुर्यात्सद्योऽङ्कुरार्पणम्।
सङ्क्रमव्यवधानेऽपि सद्य एवेति केचन।।

सद्योऽङ्कुरश्चेद्रात्रौ वा दिवा वापि च कारयेत्।
तथा सर्वक्रियां कृत्वा पुष्पैर्वा तण्डुलैस्तथा।।

वापयेत्कर्मणस्तस्य सद्य एव तु कारयेत्।
पात्रालाभे शरावे वा यथालाभं च कारयेत्।।

अर्च (र्प ?) येत् तण्डुलान् शुद्धान् सद्यः कालाङ्कुरार्पणे।
गृह्णीयात्पालिका एव नवपञ्चैककल्पने।।

ब्रह्मणोऽभिमुखे चैकं शेषास्तु परितो दिशि।
तत्तद्दिगीशमभ्यर्च्य तत्तन्मन्त्रेण चार्चयेत्।।

एष एव विशेषः स्यादन्यत्सर्वं खिलोक्तवत्।
लक्षणं च तथैवोक्तं तत्रैव च गुणागुणाः।।

य. २२ . ४८ - ५१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ५८ . १०२

[अत्र पुण्याहान्ते श्वेततण्डुलैः पुष्पैश्च पालिकादीन् पूरयेत् इति विशेषः।]

क्रि. ३७ . ५०, ५१

[अत्र ज्ञानकाण्डवत्।]

वि. २६ . २०२

[अत्र श्वेततण्डुलैः पद्माद्यैः श्वेतपुष्पैश्च इति विशेषः।]

अ. १४

त्वरितः त्रियहे वापि सद्यो वा कर्मपूर्वतः।
अहर्वापि तथा कुर्यात् तदा रात्रौ न दोषकृत्।।

स. २६ . ३५ - ३९

पञ्चमेऽहनि युक्ते तु सद्यः कर्तुं त्वरान्वितः।
तृतीयेऽहनि वा तद्वदङ्कुरानर्पयेद् बुधः।।

परिधायाहतैर्वस्त्रैः पालिकाश्च समन्ततः।
परिधायाहतं वस्त्रं सोत्तरीयाङ्गुलीयकः।।

आचार्यः सुप्रसन्नात्मा वापयेदङ्कुरांच्छुभान्।
अशक्तस्तण्डुलैः शुद्धैः सद्यस्कैर्वा शुभाङ्कुरैः।।

पालिकादीन् प्रपूर्यैव पञ्चभिर्वाथ वर्णकैः।
अलङ्कृत्य तु पद्माद्यैः पुष्पैर्वापि च विन्यसेत्।।

अङ्कुरोक्तक्रियाः सर्वास्तैस्तैरेव समाचरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.५.३० प्रतिष्ठादिकर्मान्ते अङ्कुरविनियोगः

प्र. १० . ७७

कर्मान्ते जलमध्ये तु निक्षिपेद्विजयाङ्कुरान्।

५.५.३१ अङ्कुरार्पणे दीपदानम्

प्र. १० . ७७

अजस्रदीपदानं तु सर्वत्र विधिना चरेत्।

५.५.३२ अङ्कुरार्पणस्यावर्जनीयता

वि. २६ . २०२

एवम् अङ्कुरार्पणे कृते देवः प्रीतो भवेत्। अङ्कुरार्पणे हीने कृतं कार्यं सर्वं निष्फलं भवति। तस्मात्सर्वप्रयत्नेन अङ्कुरार्पणं कृत्वा सर्वकर्म समारभेदित्याह मरीचिः।

स. २६ . ४० ; ज्ञा. ५८ . १००, १०१ ; क्रि. ३७. ५२

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

६. ध्रुवबेरप्रतिष्ठायामाचार्यादीनां नियमाः

५.६.१ आचार्यनियमः

स. २७. २७ - ३१

उक्ताङ्कुरार्पणादूर्ध्वं स्नात्वा स्नानविधानतः।।

पौरुषं वैष्णवं सूक्तं यजुर्वेदस्य संहिताम्।
यथाक्रमं जपन्नेव ब्रह्मयज्ञं समाचरेत्।।

सूक्तैर्द्वादशभिर्वाथ सावित्र्याथ सहस्रशः।
त्रिरात्रमुपवासं वा पादकृच्छ्रमथापि वा।।

एकाहमुपवासं वा किल्बिषस्यानुरूपतः।
आचार्यो नियतात्मा वै चरेत्कृच्छ्रं मुदान्वितः।।

अथवा पावनार्थं तु त्रिरात्रं व्रतमाचरेत्।
यद्देवाद्यैस्तु कूष्माण्डैः जुहुयात्तदनुक्रमात्।।

य. २५ . ४० - ४२

वा. ८

अङ्कुरार्पणकादूर्ध्वमारम्भदिवसादधः।
कूष्माण्डहोममब्जाग्नौ कारयेद् गुरुरत्वरः।।

शुद्धदन्तनखश्चैव धृतवस्त्रोत्तरीयकः।
त्रिषवणस्नानपूर्वं तु हविष्याशी जितेन्द्रियः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं क्रमाच्चरेद्विद्वान् ऋत्विग्भिस्सार्धमाचरेत्।
एवं कृत्वा विशेषज्ञः कायशुद्ध्यर्थमाचरेत्।।

प्र. ११ . १४ - १६

क्रि. ६ . ५५ - ५७

आचार्यो नियतात्मा वै चरेत्कृच्छ्रं विशुद्धये।।

अशक्तावुपवासादौ ब्राह्मणान् वापि भोजयेत्।
'यद्देवादि' चतुस्सूक्तैर्जुहुयादाज्यमन्वहम्।।
'वैश्वानराये' ति जपन्नुपतिष्ठेत पावकम्।

५.६.२ ऋत्विङ्नियमः

क्रि. ६ . ४८ - ५५

--------------- कृत्वा चैवाङ्कुरार्पणम्।
वापयित्वा ततः सर्वे केशश्मश्रुनखानि च ।।

शुद्धाः त्रिषवणस्नाताः सूक्ते पौरुषवैष्णवे।
जपन्तः पावमान्याख्यां यजुर्वेदस्य संहिताम्।।

ब्रह्मयज्ञं च कुर्वन्तः सूक्तैर्द्वादशभिस्तथा।
जपे'दृतं च सत्यं' च तथा 'देवकृतस्य' च।।

'यन्मे गर्भादि' सूक्तं च 'तरत्सम' मतः परम्।
'वसोः पवित्र' मित्यादि 'जातवेदस' इत्यपि।।

विष्णोर्नुकादिसूक्तं च पौरुषं सूक्तमेव च।
एकाक्षरादिसूक्तं च ध्रुवसूक्तमतः परम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'त्वमग्ने रुद्र' इत्यादि रुद्रसूक्तमतः परम्।
'पवस्वा' दि तथा सूक्तमेतद् द्वादशसूक्तकम्।।

जपन्तः प्रत्यहं देवीं सावित्रीं तु सहस्रशः।
त्रिरात्रमुपवासं वा पादकृच्छ्रमथापि वा।।

एकाहमुपवासं वा चरेयुस्सर्व एव ते।
आचार्यो नियतात्मा वै चरेत्कृच्छ्रं विशुद्धये।।

वि. २७ . २०४

ते सर्वे सुलुप्तकेशश्मश्रुकेशनखाः शुद्धदन्ताः स्नात्वा अघमर्षणं कृत्वा सावित्रीपूर्वं द्वादश सूक्तानि जप्त्वा प्राजापत्यं, पादकृच्छ्रम्, एकाहं वोपोष्य पापं सर्वं सन्दह्य यावत्प्रतिष्ठान्तं तावद्धविष्यभोजिनो दर्भास्तरणशायिनः स्त्रीशूद्रादि सम्भाषणपरिवेषणान् वर्जयित्वा त्रिषवणस्नायिनो जितेन्द्रिया भवेयुरिति विज्ञायते।

ज्ञा. ५९. १०३ , १०४

ज्ञा. ६३. १०९

अथाचार्याद्याः सर्वे पूर्वेद्युः स्नाताः कृतप्राणायामाः सायं सन्ध्यामुपास्य स्वकीयानग्नीन् हुत्वा कर्मारभेयुः। स्थापकाः शतं प्राणायामान् कुर्युः।

स. ३०. २४

स्नात्वा पदार्थिनः सर्वे श्वेतवस्त्रानुलेपनाः।
परिधायाहतं वस्त्रं सोत्तरीयाङ्गुलीयकाः।।

खि. १६. १५५ - १५८

त्रियहं द्वियहं वापि एकाहं वा विधानतः।।

उपवासञ्च कृत्वा तु ऋत्विजः प्रयतास्तथा।
स्नात्वा स्नानविधानेन जप्त्वा सूक्तानि वै क्रमात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राणायामसहस्रं तु कुर्युः सर्वे जितेन्द्रियाः।
शतञ्चाष्टसमायुक्तं कुर्युर्वात्र समाहिताः।।

ब्रह्मयज्ञञ्च कृत्वा तु स्वकीयाग्नीनुपास्य च।
ध्यात्वा नारायणं देवं समासीरन् यतव्रताः।।

५.६.३ पदार्थिनियमः

य. २५. ३१ - ३३

स्नात्वा पदार्थिनः सर्वे सायं सन्ध्यामुपास्य च ।।

यागशालां प्रविश्यैव दक्षिणे चोत्तरामुखः।
आचार्यमभिवाद्यैव ब्रह्मासनसमन्वितम्।।

आस्थाय चोर्ध्वपुण्ड्रं तत्प्राणायामं च धारयेत्।

५.६.४ यजमाननियमः

ज्ञा. ५९. १०३

देवयजनं करिष्यामीति [1]ताननुज्ञाप्य तैरनुज्ञातो यजमानः स्वकिल्बिषानुरूपं कृच्छ्रं चरित्वा शुद्धात्मा जितेन्द्रियो यावत्प्रतिष्ठान्तं तावद्धविष्यभोजी भूत्वा आलयार्चनमेतद्देवयजमानमारभ्य पूर्वोक्तैरेव कारयेत्।

क्रि. ६. ५७ , ५८

तथैव यजमानोऽपि चरेत् कृच्छ्रं विशुद्धये।।

अनन्यतत्परो भूयात् हविष्याशी जितेन्द्रियः।

स. २७ . ३२

***

1.आचार्यादीन् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७. ध्रुवबेरप्रतिष्ठार्थं सम्भारसङ्ग्रहणम्

५.७.१ आचार्येण सम्भारसङ्ग्रणम्

य. २३ . १८, १९

अथाचार्यः प्रसन्नात्मा गौरवेण नियन्त्रितः।।

स्वविधिं मनसा ज्ञात्वा शिष्यानुग्रहतत्परः।

स्नात्वा निर्वर्त्य नित्यानि सम्भारानपि सम्भरेत्।।

क्रि.६. ५८

आचार्येणोक्तसम्भारान् यजमानः समाहरेत्।।

५.७.२ द्रव्यसङ्ग्रहणे नियमः

स. २८ . ३६, ३७

द्रव्यं विप्रस्य सङ्ग्राह्यं क्षत्रियस्य विशस्तथा ।

शूद्रस्य चानुलोमस्य ग्राह्यं भक्तिमतः पुनः।।

प्रतिलोमस्य न ग्राह्यं द्रव्यं किञ्चिच्च जात्वपि।

नि. २८

५.७.३ यागोपकरणानां स्रुवादीनामुपादानवृक्षाः

खि. १६ . ५३

पलाशबिल्वखदिरद्रुमैः पात्रान्तराणि च।

कल्पयेच्च स्रुवादीनि यज्ञोपकरणानि वै।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. २७ . ४४

[अत्र पलाशस्थाने अश्वत्थो निर्दिश्यते।]

ज्ञा. ६१. १०६

५.७.४ स्रुवमानम्

स. २७ . ४४ - ४९

द्विप्रादेशं स्रुवं कुर्यान्मूलनाहं तदर्धकम्।।

आनुपूर्व्यक्रमेणैव मूलात् सङ्क्षिप्तमग्रतः।
प्रादेशार्धं बिलादर्वागग्रनाहं च कारयेत्।।

तस्याग्रे चापि कर्तव्यं प्रादेशोद्वृत्तमण्डलम्।
गोलकं बिलविस्तारं बिलमध्ये तदूर्ध्वकम्।।

शिखावत्तत्र कर्तव्यं व्रीहिमात्रोन्नतं क्रमात्।
भित्तिस्तस्मात्तु गर्ते द्वे ते घृताधारके स्मृते।।

तद्गर्ते निम्नमेकैकं माषमात्रं च मध्यमे।
स्रुवमेवं प्रकुर्वीत होता मानं पृथक् पृथक् ।।

प्रादेशत्रयमायामं स्रुवस्यैवेति केचन।

ज्ञा. ६१ . १०६; अ. १९; खि. १६ . ५४ - ५६ ;
प्र. ११ . २६, २७; वा. ८; वि. २९ . २१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

५.७.५ स्रुचो मानम्

स. २७. ४९ - ५१

स्रुवायामं स्रुचं कुर्यादग्रं स्यात्तु षडङ्गुलम्।।

पद्मस्य मुकुलार्धेन तुल्यमग्रं यथा भवेत्।
द्व्यङ्गुलं तस्य मध्ये च बिलमङ्गुलनिम्नकम्।।

तस्मादामुकुलाग्राद्वै घृतधाराबिलान्वितम्।

५.७.६ जुहूमानम्

खि. १६ . ५७ - ६१

द्वितालमात्रमायामः तदर्धं नाह उच्यते।
एवं मूलं प्रकुर्वीत पद्मस्य मुकुलोपमम्।।

भागं पद्मं समुद्दिष्टं मूले चाग्रमुदाहृतम्।
मूलादर्धपरीणाहं दण्डाग्रे तु विचक्षणः।।

अग्रे चाष्टाङ्गुलायामं तलं सम्यक् समाचरेत्।
उभौ पार्श्वौ च तन्मानं त्रिकोणं चाग्रसंयुतम्।।

भित्तिपार्श्वं प्रकुर्वीत एकाङ्गुलमुदाहृतम्।
निम्नं विस्तारमुद्दिष्टं क्रमेणाग्रं क्षयं चरेत्।।

शेषं तलं प्रकुर्वीत सर्वं युक्त्या समाचरेत्।
एवं जुहूं प्रकुर्वीत ------------------।।

अ. १९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र. ११. २८ - ३०

जुहूदण्डसमायामं (जुहूदण्डस्य चायामं?) चतुर्विंशतिकाङ्गुलम्।
नाहं तदर्धमित्युक्तं पद्मस्य मुकुलोपमम्।।

षडङ्गुलं तु तस्याग्रं नाहं तस्य विचक्षणः।
युगाङ्गुलाग्रविस्तारम् अष्टाङ्गुलमथायतम्।।

शेषं तु त्र्यंशमित्युक्तं विस्तृतोन्नतमङ्गुलम्।
मध्यगर्तानुपूर्व्येण जुह्वाश्चैव क्रमं विदुः।।

वा. ८

स. २७ . ५१ - ५४

कुर्याज्जुहूं द्वितालां च मूलनाहस्तदर्धकः।।

पद्मस्य मुकुलाकारं मूलदण्डस्य चोच्यते।
तद्दण्डाग्रपरीणाहो मूलादर्धं विधीयते।।

दण्डाग्रेऽष्टाङ्गुलायामः पार्श्वत्रयसमायुतः।
पार्श्वे त्वेकाङ्गुलोत्सेधो विस्तारो भित्तिरुच्यते।।

मध्ये षडङ्गुलं निम्नं शिष्टं कुर्वीत बुद्धिमान्।
जुहूमेवंविधां कृत्वा -----------------।।

वि. २९. २१३

जुहूप्रमाणं द्वितालायामं, द्वादशाङ्गुलपरीणाहं, मूलं पद्ममुकुलाकारम्, अग्रे चाष्टाङ्गुलायामं, चतुरङ्गुलविस्तारं, द्वादशा(षड)ङ्गुलोन्नतं, मध्ये निम्नमर्धाङ्गुलं, भित्तिरेकाङ्गुला, घृतधारायुतम्, ऊर्ध्वे मुकुलाकारम् अधस्ताद्दण्डाकारं कारयेत्।

ज्ञा. ६१ . १०६

जुह्वाश्चायामं द्वितालं तदर्धनाहं पद्ममुकुलोपमं मूलं मूलार्धपरिणाहं कण्ठमग्रे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृशमूर्ध्वप्रदेशं षडङ्गुलं चतुरश्रं चतुरङ्गुलविस्तृतमष्टाङ्गुलायामं पार्श्वत्रय-समन्वितमेकाङ्गुलविस्तारोन्नतभित्तिकं मध्ये निम्नयुतम् -------।

५.७.७ उपजुहूमानम्

खि. १६ . ६५ - ६९

द्वितालमात्रमायामं तदर्धं नाह उच्यते।
एवं मूले प्रकुर्वीत अग्रं चैव तदर्धकम्।।

ऊर्ध्वं प्रादेशमात्रं तु चतुरश्रं समन्ततः।
भित्तिरेकाङ्गुलं प्रोक्तमुन्नतं तु तदर्धकम्।।

मध्ये प्रादेशमात्रं तु नाहं वै वर्तुलाकृतिम्।
निम्नं चतुर्यवं प्रोक्तं क्रमान्निम्नं विचक्षणः।।

ऊर्ध्वं षडङ्गुलायामं त्रियश्रं मुकुलोपमम्।
घृतधारां प्रकुर्वीत वर्तुलां मुकुलाकृतिम्।।

यवद्वयसुविस्तारं तदर्धं निम्नमुच्यते।
उपजुह्वाः समुद्दिष्टमिति प्रोवाच पूर्वजः।।

अ. १९

वि. २९. २१३

उपजुहूप्रमाणं द्वितालायामं, द्वादशाङ्गुलपरिणाहम्, अग्रे अष्टाऽङ्गुलायामं, समवृत्तं, भित्तिरर्धाङ्गुला, घृतधारायुतमेवं कारयेत्।

वा. ८

उपजुह्वायतं पश्चात् यमद्वयमुदाहृतम्।।

तदर्धं नाहमित्युक्तं मूलादग्रं तदर्धकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आनुपूर्व्यात् कृशं दण्डं गलान्तमिति संज्ञितम्।।

ऊर्ध्वं प्रादेशमायामं चतुरश्रं षडङ्गुलम् ।।

तदर्धं विस्तृतं कुर्याच्छेषमग्रं त्रियश्रकम् ।
उन्नतं चाङ्गुलार्धं स्यादित्युच्छ्रयमिति स्मृतम्।।

ओष्ठमेकाङ्गुलं ज्ञात्वा तन्मध्ये निम्नमाचरेत्।
पूर्णचन्द्राकृतिं कृत्वा प्रादेशं तस्य नाहकम्।
निम्नं चतुर्यवागाधम् अग्रान्तं तु क्रमाद् बुधः।।

ज्ञा. ६१. १०६

उपजुह्वाश्चायामं यमद्वयं तदर्धनाहमूलं मूलार्धनाहं कण्ठं शनैः शनैः कृशमूर्ध्वे प्रदेशे षडङ्गुलं चतुरश्रमर्धाङ्गुलोन्नतैकाङ्गुलिविस्तृतभित्तिकं मध्ये प्रादेशमात्रवृत्तं चतुर्यवावगाढनिम्नयुतं तदूर्ध्वे त्रिकोणं मुकुलोपमं षडङ्गुलनिम्नमामुकुलान्तं घृतधारायुतम्

५.७.८ दर्वीमानम्

खि. १६ . ६२ - ६४

द्वितालमात्रमायामं घनमेकाङ्गुलं भवेत्।
अग्रे षडङ्गुलायामं विस्तारं भाग उच्यते।।

मूलं पञ्चाङ्गुलायामं तदर्धं विस्तृतं भवेत्।
अग्रान्मूलान्तरं चैव मध्ये गोलकमुच्यते।।

अग्रान्मध्यात् क्षयं कुर्यान्मूलान्मध्यात् क्षयं चरेत्।
शेषं युक्त्या प्रकुर्वीत दर्वी चैव विचक्षणः।।

ज्ञा. ६१ . १०६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. २७ . ६० - ६२

[अत्र दर्व्याः मध्यं द्विगोलकमिति अधिकम्।]

प्र. ११ . ३६, ३७

[अत्र त्रयोदशाङ्गुल्या दण्डमित्यधिकम्।]

वि. २९ . २१३

[अत्र ' दर्वी तालद्वयायामा, अग्रे पञ्चाङ्गुलायामविस्तारा, मूले भागविस्तारायामा चेति' निर्दिश्यते।]

वा. ८

प्र. ११. ३७, ३८

मूलस्थूलं भवेन्नारी अग्रस्थूलं नपुंसकम्।।

मूलादग्रं क्रमाद्वृत्तं पुंरूपमिति कथ्यते।

५.७.९ दर्व्या उपादानवृक्षाः

स. २७. ६२

अश्वत्थोदुम्बरप्लक्षवटैरेव विधानतः।।

५.७.१० उपभृतो मानम्

प्र. ११. ३१ - ३५

पश्चादुपभृतं कुर्यात् प्रादेशत्रयमायतम्।

प्रादेशं नाहमित्युक्तं मूलादग्रं तदर्धकम्।।

आनुपूर्व्यात् कृशं दण्डं गलान्तमिति संज्ञितम्।

ऊर्ध्वे प्रादेशमायामं चतुरश्रं षडङ्गुलम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदूर्ध्वेऽर्धाङ्गुलायामं कण्ठमेवं प्रचक्षते।
शेषं तु त्र्यंशकं कुर्यात् तत्र तेनैव कारयेत्।।

उन्नतास्याङ्गुलार्धं स्यात् भित्युच्चमिति कथ्यते।
ओष्ठमेकाङ्गुलं ज्ञात्वा तन्मध्ये निम्नमाचरेत्।।

पूर्णचन्द्राकृतिं कृत्वा प्रादेशं तस्य नाहकम्।
निम्नं चतुर्यवागाढम् (धम्) अग्रान्तन्तु क्रमाद् बुधः।।

स. २७ . ५४ - ६०

---------------------कुर्यादुपभृतं तथा।।

जुहूसमस्तदायामो नाहस्तद्वदुदीरितः।
ग्रीवा मूलार्धनाहा स्यान्मूलादूर्ध्वं कृशं शनैः।।

एवं दण्डं विजानीयात् प्रादेशायतमेव च ।
ऊर्ध्वे प्रादेशमात्रं च चतुरश्रं षडङ्गुलम्।।

तत्रैकाङ्गुलविस्तारां भित्तिमर्धाङ्गुलोच्छ्रयाम्।
कृत्वा च कल्पयेन्मध्ये निम्नं तच्चतुरङ्गुलम्।।

वृत्तं तन्मध्यमे चापि निम्नं प्रादेशमात्रकम्।
अर्धाङ्गुलायतां कुल्यां कुर्वीत विधिवित्तमः।।

ऊर्ध्वे षडङ्गुलायामं त्रिकोणं मुकुलोपमम्।
घृतधारां प्रकुर्वीत निम्नादामुकुलान्तकाम्।।

तां यवद्वयविस्तीर्णां यवनिम्नां च कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.११ अग्निहोत्रहवण्याः मानम्

वि. २९ . २१२, २१३

अग्निहोत्रहवणी षड्विंशत्यङ्गुलायामा अधस्तात् षोडशाङ्गुलदण्डा द्वादशाङ्गुलपरिणाहा तदूर्ध्वे पञ्चाङ्गुलायामं वृत्तं मध्ये निम्नं भागं, परितो भित्तिरेकाङ्गुला, तस्मादग्रान्तं घृतधारायुतमेकाङ्गुलविस्तारं त्र्यश्रम्, अग्रादधस्तात् पञ्चाङ्गुलमानुपूर्व्येण सङ्क्षिप्तं घृतधारापार्श्वयोरेकाङ्गुलं, भित्तिरर्धाङ्गुला, उपरिच्छत्राकारं घनं भागमेवं कारयेत्।

५.७.१२ अरण्यादिनिर्माणविधिः

य. २४ . २६, २७

अरणीं दर्भमालां च तोरणान् वस्त्रमेव च ।
स्रुवादियज्ञपात्राणि करकादीन् यथाक्रमम्।।

सूत्रे विखनसा प्रोक्तमग्निष्टोमादिषु क्रमात्।
तथैव कारयेद्विद्वान् यज्ञैः सर्वैर्विशिष्टितम्।।

५.७.१३ अरण्योरुपादानद्रव्यम्

वि. २९ . २१२

अरण्यर्थमश्वत्थं शमीजातमन्यं वा सङ्गृह्य

वा.८

शमीजातं च अश्वत्थम् अरण्यर्थं प्रगृह्य च।
त्वगादीनां व्यपोह्यैव शोषयित्वा विचक्षणः।।

स. २७ . ३४ , ३५; ज्ञा. ६१ . १०६ ; अ. १९
खि. १६ . ४८, ४९; प्र. ११ . ४२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.१४ अरण्योर्मानम्

खि. १६ . ४९, ५०

पट्टिकामधरां कुर्याच्चतुर्विंशद्भिरङ्गुलैः ।।

उत्सेधो भाग उद्दिष्टः विस्तारस्तु षडङ्गुलः ।
ऊर्ध्वपट्टीं च तन्मानमवक्रां सम्प्रगृह्य च ।।

स. २७ . ३६ - ३९

द्वितालायामविस्तारां भागोत्सेधां शुभां तथा।
तां षडङ्गुलविस्तारां गृह्णीयादरणीकृते।।

तत्समां चोर्ध्वफलकां गर्तायामं यवद्वयम्।
तालनाहं तदग्रे च मूले चापि शिखायुतम्।।

एकाङ्गुलं शिखामानमीदृशं दण्डमाहरेत्।
उत्तरां चारणिं सम्यगूर्ध्वभागेन तत्समाम्।।

तदूर्ध्वफलकां चैवमधरारणिमात्रतः।

अ. १९ ; **वि. २९. २१२ ;**

प्र. ११ . ४३; **वा. ८**

ज्ञा. ६१ . १०६

[द्विगोलकोत्सेधाम् इति विशेषः।]

५.७.१५ मन्थदण्डमानम्

प्र. ११ . ३९ - ४२

द्वितालायामसंयुक्तं खादिरं दण्डमेव च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

दशाङ्गुलपरीणाहं समवृत्तं तथैव हि।
शाखाङ्गुलसमायुक्तं मूलादग्रं तु बन्धयेत्।।

तत्ताम्रायसपट्टैर्वा बन्धयित्वा विचक्षणः।
तन्मूले सुषिरं कृत्वा गोलकं तत्प्रमाणकम्।।

एवं तु मन्थदण्डः स्यात् कुर्यात्तच्छास्त्रपारगः।

स. २७ . ३९ - ४३

कारयेन्मन्थदण्डं तु तालनाहयुतं क्रमात्।।
अष्टाङ्गुलं भित्तिनाहः प्रमाणं चोत्तरारणेः।
------तथा मूलं मन्थनार्थं तु योजयेत्।।

त्यजेदष्टाङ्गुलं मूलं तदग्रे द्वादशाङ्गुलम्।
त्रीणि त्रीण्यङ्गुलान्येव पार्श्वतश्चाधरारणिम्।।

एतदङ्गुलमध्यं तु श्रोणिदेश इति स्मृतः।
एवं मथित्वात्र मध्ये कुर्यादग्निसमृद्धये।।

अन्यत्र मथितं तच्चेदशुभावहमुच्यते।

ज्ञा. ६१ . १०६

[अत्र प्रादेशपरिणाहम् इति विशेषः।]

खि. १६ . ५१

[अत्र द्वादशाङ्गुलनाहम् इति विशेषः।]

वा. ८

[अत्र षोडशाश्रम् इति विशेषः।]

वि. २९ . २१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.१६ मन्थनरज्जुनिर्माणविधिः

वि. २९ . २१२

मौञ्ज्या त्रिवृतां रज्जुं मन्थनाय समाहरेत्।

स. २७ . ४३ ; प्र. ११ . ४४

अ. १९

नारिकेलत्वचां सारं त्रिवृतं रज्जुना भवेत्।।

५.७.१७ यज्ञार्थवस्त्रोपादानद्रव्यम्

ज्ञा. ६१ . १०७

वस्त्राणि दुकूलादीनि कार्पासादीनि श्वेतानि वा आहत्य ------।

५.७.१८ यज्ञे ग्राह्यं वस्त्रम्

स.२८ . ११ - १३

वस्त्रं द्वादशहस्तं वै दशहस्तमथापि वा।।

अष्टहस्तादहीनं च त्रिविधं वस्त्रमुच्यते।
पञ्चतालं चतुस्तालं त्रितालं विस्तृतं क्रमात्।।

अहतश्वेतवस्त्राणि नवान्येव समाहरेत्।
उपयुक्तं च जीर्णं च छिन्नं च परिवर्जयेत्।।

प्र. ११ . ४५

दशाष्टनवभिर्हस्तैर्वस्त्रमायतमुच्यते।
त्रिचतुः पञ्चतालं वा विस्तृतं वस्त्रमुच्यते।।

वा. ८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि. २९. २१३, २१४

वस्त्रं द्वादशाष्टसप्तषड्ढस्तानामन्यतमायामं पञ्चचतुस्तालविस्तृतम्।

५.७.१९ यज्ञे ग्राह्यं घृतम्

प्र. ११ . ४६

गव्यं घृतं चाहरेत कापिलं तु गवादिषु।

ज्ञा. ६१ . १०७ ; खि. १६ . ७१ ; वा. ८

स. २८ . ३०

घृतादीनि च गव्यानि सद्यः पक्वं घृतं शुभम्।

५.७.२० यज्ञेऽग्राह्यं घृतम्

वा. ८

आजं च माहिषं त्यक्त्वा पक्षातीतं तु वर्जयेत्।

अन्यदेवस्य लेख्यादि गवां तत्र विशेषतः।।
प्रतिलोमान्त्यजातेश्च गव्याद्यादीनि वर्जयेत्।

स. २८ . ३०

[अत्र मासातीतमिति विशेषः।]

प्र. ११ . ४६

५.७.२१ यज्ञे ग्राह्यं पयः

स. २८ . ३१

सद्योदुग्धं पयः श्रेष्ठं न शुक्तमभिधीयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.२२ यज्ञे ग्राह्याः समिधः

स. २८.१

पालाशखादिराश्वत्थन्यग्रोधोदुम्बरास्तथा।
शमीबिल्वौ च निर्दोषाः समिधः सुप्रदेशजाः।।

ज्ञा. ६८. १०७ ; वि. २९. २१३

खि. १६. ७०

[अत्र अपामार्ग इति अधिकम्।]

५.७.२३ समिद्ग्रहणे दिङ्नियमः

अ. १९

ऐन्द्रे पालाशमेवोक्तं खादिरं याम्य एव च ।
शमी वारुण एवोक्ता सौम्ये बैल्वं समाहरेत्।।

आग्नेयेऽश्वत्थमेव स्यात् नैर्ऋत्यां प्लक्षमेव च ।
वायव्यां तु वटं चैव ऐशान्यामौदुम्बरं भवेत्।।

५.७.२४ सभ्यादौ समिद्विशेषः

अ. १९

सभ्ये पालाशमेवोक्तं पौण्डरीके च बैल्वकम्।

५.७.२५ समिद्ग्रहणे देशनियमः

अ. १९

नदीतीरे वनोद्याने देवालयेऽङ्गिरोऽवदत्।

५.७.२६ समिदिध्मनोः मानम्

स. २८ . २

याज्ञिकाः समिधो ग्राह्याः द्वादशाङ्गुलमात्रकाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. १९

[अत्र कनिष्ठाग्रपरीणाहमित्यधिकम्।]

अ. १९

श्रामणाग्नौ च होमश्चेत् समिधां द्वादशाङ्गुलम्।

अ. १९

द्वात्रिंशदङ्गुलं चेध्मम् अवक्रं सम्प्रगृह्य च ।
आघारं चैकदारूणां वास्तौ द्वा वा न चाचरेत् ? ।।

५.७.२७ समिधां सङ्ख्या

खि. १६ . ७१

अष्टाधिकशतं कुर्यात् प्रतिहोममयं क्रमः।

खि. १६ . ७२

सहस्रमाज्यसंयुक्ताः सभ्यस्य समिधः स्मृताः।।

अ. १९

अन्तहोमं च हुत्वा तु समिधः सप्तसंयुतम्।

५.७.२८ समिधां दोषास्तत्फलानि च

अ.१९

कण्टकं क्रिमिदष्टं च त्वक्छेदं पिपीलिकादिः।
कृशं स्थूलं पुराणं च समिधं च विवर्जयेत्।।

समिधां च न सङ्ग्राह्यं दोषयुक्तं विशेषतः।
पक्ष्यावासोरगावासो जीर्णाधौधं ? विना भवेत्।।

महापथे श्मशाने च क्रूरदेवालये विना।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रहे स्थिते तु न ग्राह्यं सङ्ग्रहो विधिना भवेत्।।

ब्राह्मणादींश्च वर्णान् तु कुम्भाकारां ? सुसङ्ग्रहेत्।
आतुरोप्यशुचिश्चैव हीनजातिर्न सङ्ग्रहेत्।।

कण्टके ग्रामनाशः स्यात् सुषिरं स्वामिनाशनम्।
शुष्कं चैव तु दारिद्र्यं क्रिमिरिष्टविनाशनम्।।

पिपीलिकां च त्वग्दोषः दीर्घे च मरणं ध्रुवम्।
त्वक्छेदं तु च दौर्बल्यं पक्ष्यावासादिदूषितः।।

व्याधितेनाहृतं हुत्वा व्याधिं दुर्भिक्षं तस्करैः।
जीर्णालयाहृतं हुत्वा तदा रुग्णो न संशयः।।

आतुराशुचिभिर्ग्राह्यम् अनावृष्टिभयं भवेत्।

५.७.२९ समिधां प्रतिनिधिः

ज्ञा. ६१ . १०७

सर्वालाभे पालाशमश्वत्थं वा।

अ. १९ ; स. २८ . २

५.७.३० इध्मनां प्रमाणम्

अ. १९

[1]चतुर्विंशांशमिध्मं स्यात् सर्वेषां दोषवर्जितम्।।

सङ्गृह्य बहुलं चेध्मं सर्वेषां होममाचरेत्।

स. २८ . ३

1.चतुर्विंशाङ्गुलानि इध्मानीति यावत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. २८ . १०, ११

जन्तुकण्टकलेपादिहीनं शुष्कं तदिन्धनम्।।

आर्द्रं सधूमं दुर्गन्धं वर्ज्यं निम्बादिदूषितम्।

५.७.३१ होमसाधनानां परिमाणम्

स. २८ . ६

होमार्थानां च सर्वेषां मानं मात्राङ्गुलेन वै।।

५.७.३२ परिस्तरणकूर्चस्वरूपम्

स. २८ . ३ , ४

दशभिः पञ्चभिर्युक्तैः कुशैः साग्रैरगर्भकैः।।

दर्भैर्वा ग्रथितान् सम्यगग्रिकुण्डं प्रति प्रति।

षट्त्रिंशदङ्गुलान् कुर्यात् परिस्तरणकूर्चकान्।

५.७.३३ दर्भविशेषाहरणम्

वि. २९ . २१३

साग्रान् दश[1] दर्भान् (कुशकाश) विश्वामित्रादीन् वाऽहृत्य

ज्ञा. ६१ . १०७

५.७.३४ प्रोक्षणकूर्चमानम्

स. २८ . ५

प्रोक्षणाय कृतं कूर्चं हस्तमात्रं विधीयते।

---

1. दशविधानित्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.३५ पवित्रमानम्

स. २८ . ५

द्वादशाङ्गुलमात्राणि पवित्राणि तथैव च।।

५.७.३६ परिधिमानम्

स. २८ . ६

परिस्तरणकूर्चैश्च तुल्याः परिधयः स्मृताः।

५.७.३७ प्रतिष्ठाहोमद्रव्यम्

वि. २९ . २१४

होमार्थं घृतं (पयो) दधि च ।

५.७.३८ प्रणिधिमानम्

स. २८ . ७, ८

------------------ [1]तदर्धे प्रणिधी स्मृते।

------------------------------------।।

केचित् कुडुम्बसम्पूर्णे प्रणिधी कारयेदिति।।

------------------------------------।

वि. २९ . २१४

५.७.३९ घृतस्थालीपरिमाणम्

स. २८ . ७

प्रस्थपूर्णा घृतस्थाली ------------------।

1.प्रस्थार्धपूर्णे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि. २९ . २१४

[1]तथैवाज्यस्थालीः ।

५.७.४० प्रोक्षणीपात्रपरिमाणम्

स. २८ . ७

[2]तथैव प्रोक्षणीपात्रम् ----------------।।

वि. २९ . २१४

५.७.४१ चरुपात्रपरिमाणम्

स. २८ . ७

------------------- द्विप्रस्थं चरुरुच्यते।।

५.७.४२ पाकस्थालीपरिमाणम्

वि. २९ . २१४

द्विप्रस्थपाकयोग्यां स्थालीम् ---------- ।

स . २८ . ८

५.७.४३ वैखानससूत्रोक्तविधिना समिधाद्याहरणम्

वा. ८

समित्परिधिकूर्चं च परिस्तरणमेव च।

आज्यस्थाल्युपपात्रं तु सूत्रोक्तविधिना हरेत्।

1. प्रस्थार्धपूर्णा। 2. प्रस्थार्धपूर्णम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.७.४४ प्रतिष्ठायां द्रव्यहीनायामनिष्टफलम्

स. २८ . ३३

उक्तद्रव्यस्य हीने तु तद्ग्रामयजमानयोः।
तद्द्रव्यस्यापि हानिः स्यात् --------।।

ज्ञा. ६१ . १०७

५.७.४५ प्रतिष्ठायां क्रियाहीनायामनिष्टफलम्

ज्ञा. ६१ . १०७

क्रियाहीने पुण्यहानिः।

स.२८. ३३

[अत्र ग्रामयजमानयोः हानिरिति निर्दिश्यत इति विशेषः।]

५.७.४६ प्रतिष्ठायां श्रद्धाभक्तिहीनायामनिष्टफलम्

स. २८ . ३४

श्रद्धाभक्त्योर्विहीने च हानिः सर्वस्य वै भवेत्।।

ज्ञा. ६१ . १०७

५.७.४७ प्रतिष्ठायां मन्त्रहीनायामनिष्टफलम्

स. २८ . ३४, ३५

शुभकार्यस्य हानिः स्यान्मन्त्रस्याध्ययनस्य च ।

मरीचिर्मन्त्रहीने च सर्वहानिमथाब्रवीत्।
तस्मात् सर्वप्रयत्नेन सर्वं पूर्णं समाचरेत्।।

ज्ञा. ६१ . १०७ ; नि. २८

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८. ध्रुवबेरप्रतिष्ठायां यागशालाकल्पनम्

५.८.१ ध्रुवबेरप्रतिष्ठायां यागशालास्थानम्

स. २८ . ३७, ३८

आलयात्पुरतो वापि दक्षिणे वा मनोरमे।।

ईशान्ये वाथ वायव्ये उत्तरे यागमन्दिरम्।

ज्ञा. ६२ . १०७; अ. १५; प्र. ११. ४९ ;

खि. १६ . ८३, ८४; नि. २८; य. २५ . १ ; वि. २९. २११

५.८.२ यागशालास्वरूपम्

वा. ८.

अथ वक्ष्ये विशेषेण यागशालीयलक्षणम्।।

षोडशस्तम्भसंयुक्तं गुणपङ्क्तियुतं तथा।
विस्तृतायाममुद्दिष्टं समं तत्र प्रकल्पयेत्।।

प्रमुखे तत्र सोपानं प्रतिद्वारं प्रकल्पयेत्।
उच्छ्रयं तत्कपोतान्तं पालिकान्तं समुच्यते।।

प्रासादाद्दण्डमानेन दीर्घं निश्चित्य यत्नतः।
प्रपां वा तत्र कुर्वीत कूटं वा वर्षवारणम्।।

स. २८ . ३८ - ४१

कल्पयेद्यागशालां च लक्षणेन समायुतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मण्डपं कूटमथवा चतुर्द्वारसमायुतम्।
विस्तारद्विगुणोत्सेधान् स्तम्भान् कुर्याद्यथाविधि।।

प्रपा वा तत्र कर्तव्या षोडशस्तम्भसंयुता।
स्तम्भान्तरं चतुर्हस्तमुच्छ्रायश्च यथार्हतः।।

तस्य तालस्तलोत्सेधो यथालाभमथापि वा।

नि. २८

खि. १६ . ८४ - ८६, ८८, ८९

षोडशस्तम्भसंयुक्तां मध्ये पादविवर्जिताम्।।

पादैर्द्वादशभिर्युक्तां कूटं वा परिकल्पयेत्।
पादान्तरं चतुर्हस्तं चतुर्दिक्षु यथाक्रमम्।।

एकहस्ततलोत्सेधं तलं कृत्वातिसुन्दरम्।

अथवा कारयेद्विद्वान् प्रपां लक्षणसंयुताम्।।

देवालयस्य परितः प्रपां कृत्वा विशेषतः।

ज्ञा. ६२ . १०७, १०८

यागशालां षोडशस्तम्भयुतां चतुर्हस्तविस्तृतस्तम्भमध्यां पञ्चहस्तोच्छ्रय-तालोच्छ्रयतलां चतुरश्रां प्रपां कूटं वा यथोचितं कृत्वा

प्र. ११. ४९, ५०

वि. २९ . २११

[अत्र त्रिपङ्क्तिमित्यधिकम्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रि. ६ . ५९

[स्तम्भान्तरं चतुर्हस्तं त्रिहस्तं वेति विशेषः।]

अ. १५

मण्डपं वाथ कूटं वा प्रपां वापि च कारयेत्।
षोडशं चोत्तमं हस्तं मध्यमं द्वादशं भवेत्।।

अधमं चाष्टहस्तं च तदालयकरेण च।
नवपङ्क्तिसमायुक्तं मध्ये पादविवर्जितम्।।

चतुरश्रं समं कृत्वा एकहस्तं तलोच्छ्रयम्।

य. २५ . २ , ३

मण्डपं वाथ कूटं वा कृत्वा वासाधिकारवत्।
चतुर्द्वारसमायुक्तं दर्शनीयं च कारयेत्।।

प्रपा चेत्किष्कुहस्तेन नन्दधातुरसेन वा।
विस्तारायामसंयुक्तं चतुरश्रं समं स्थलम्।।

५.८.३ यागशालानिर्माणक्रमः

य. २५ . ४ - १०

कृत्वा च दर्भरज्ज्वा वा मौञ्ज्या वा तद्दजुं समम्।
बिल्वकीलान् सुसंस्थाप्य दशरज्जुं प्रसारयेत्।।

प्रागन्ताश्चोत्तरान्ताश्च रज्जुकण्ठद्वयान्विते।
कीलान् कीले समाबद्ध्य अचलं सुदृढं क्रमात्।।

प्रसार्य पूर्वं प्रागन्ताः पश्चात्तदुपरि क्रमात्।
उदगन्तास्तथा मध्ये तेनैव गणयेत्पदान्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुश्शूले चतुष्षट्के वसुसन्धौ यथाक्रमम्।
स्थापयेत्क्रमशः स्तम्भान् क्रमुकाद्यैर्मनोरमैः।।

दशतालमर्कतालं वा स्तम्भानामुन्नतिर्भवेत्।
प्रागन्ताश्चोत्तरान्ताश्च सन्न्यसेत्पट्टिकाः क्रमात्।।

नालिकेरदलै रन्ध्रान् सञ्छाद्य प्रागुदङ्मुखम्।
वर्षवारणकूटं च विना केचिद्वदन्ति च ।।

कारयेच्चेत्पलालैस्तमच्छिद्रं कारयेत्क्रमात्।

स. १४ . ३, ४

५.८.४ यागशालाद्वारेषु कल्पनीयस्य तोरणस्य स्वरूपम्

वा. ८

न्यग्रोधप्लक्षं चाश्वत्थः पितृवृक्षयुतं तथा।।

तोरणार्थं समादाय लक्षणं वक्ष्यते मया।
पादायामसमं वापि विस्तृतं तत् त्रिहस्तकम्।।

तन्मध्येऽरत्निमात्रेण पूर्णकुम्भाकृतीकृतम्।
दर्पणाकारवच्चैव पद्मस्य मुकुलाकृतिः।।

शङ्खचक्राकृतिं चैव शूलाकारमथापि वा।
एवं तु तोरणं कुर्यात् क्रमाद्वेदस्य सङ्ख्यया।।

अथवा पञ्चहस्तं च त्रिहस्तं दीर्घमेव वा।
तदर्धं विस्तृतं चैव तोरणानि च कारयेत्।।

अलङ्कारास्तोरणाश्च ग्रामादिषु विशेषतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेणुं वा क्रमुकं वापि समाहृत्य प्रयत्नतः।।

पूर्वोक्तेन क्रमेणैव यथाशोभं तथा चरेत्।
अन्यैश्च सारवृक्षैश्च तोरणान्येव कारयेत्।।

प्र. ११ . १८

स. २७ . ६३ - ६६

यज्ञालयचतुर्द्वारस्थापनाय यथाक्रमम्।
कारयेत्तोरणान्येवमश्वत्थादिभिरेव च ।।

पञ्चहस्तसमुत्सेधः पादयोश्च विधीयते।
तदन्तरं द्विहस्तं स्यात्पादपट्टीं च योजयेत्।।

पट्टिकायामूर्ध्वमधो दारुशूलानि कारयेत्।
तच्छूलानां समुत्सेधो विंशत्यङ्गुल उच्यते।।

विमानपादमानं च तोरणोत्सेध उच्यते।
चत्वारि तोरणान्येवं कारयेल्लक्ष्मकोविदः।।

अ. १५

चतुर्द्वारसमायुक्तं चतुर्दिक्षु च तोरणम्।
अश्वत्थं पूर्वतः कुर्यात् औदुम्बरं च दक्षिणे।।

पश्चिमे बिल्वमेवोक्तं वटवृक्षं तथोत्तरे।
तोरणस्तम्भमानं स्यात् द्वारस्यैव तु मानतः।।

अधिके चोर्ध्वहस्तं तु अधस्तादेकहस्तकम्।
तदर्धं विस्तृतं चैव फलकामानमाचरेत्।।

पार्श्वयोर्मध्यमे वापि शङ्खाकारं च दारुणा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चक्राकारमथो वापि कारयित्वा सलक्षणम्।।

मध्ये पुण्ड्रमथो कुम्भं कारयेत् सुदृढं यथा।
किञ्चिच्छूलत्रयं वा (त्य?)रत्निमात्रं समाहरेत्।।

शिल्पिना कारयेद्विद्वान् तोरणानि सुसंन्यसेत्।

खि. १६ . ७२ - ७७

तोरणानि च कुर्वीत चतुर्दिक्षु यथाक्रमम्।।

अश्वत्थं पूर्वतः कुर्यात्पैतृकं दक्षिणे तथा।
पश्चिमे क्षीरवृक्षश्च वटवृक्षमथोत्तरे।।

पञ्चहस्तसमुत्सेधं द्विहस्तयुतविस्तृतम्।
मध्ये त्रिशूलं कुर्यात्तु एकारत्निप्रमाणतः।।

अथवा कारयेद्विद्वान् पादायामं विचक्षणः।
पादयोरन्तरं तस्य विस्तारः समुदाहृतः।।

एवं यज्ञालये प्रोक्तस्तोरणानां विधौ विधिः।
गोपुरेषु विमानेषु तोरणानि समाचरेत्।।

अश्वत्थेनैव कुर्याद्वा तत्तद्द्वारप्रमाणतः।
एषामलाभे चाश्वत्थं गृह्णीयाद्विधिकोविदः।।

ज्ञा. ६१ . १०६

तोरणार्थमश्वत्थोदुम्बरप्लक्षवटान् सर्वालाभे अश्वत्थं वा आहृत्य पञ्चहस्तोत्सेधानि तदर्धविस्तृतानि चतुर्हस्तविस्तृतानि त्रिहस्तविस्तृतानि वा मध्ये अरत्निमात्रत्रिशूलयुतानि तोरणानि कारयित्वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

५.८.५ यागशालाद्वारेषु तोरणस्थापनम्

ज्ञा. ६२ . १०८

तोरणान्यादाय वेदरूपाणि ध्यात्वा यथाक्रमेण अश्वत्थोदुम्बरप्लक्षवटैः कृतानि प्रागादिचतुर्दिक्षु 'अग्निमीळे' 'इषे त्वोर्जेत्वा' 'अग्न आयाहि' 'शन्नो देवी' रिति स्थापयित्वा

वि. २९ . २१२ ; स. २८ . ४५ , ४६ ; नि. २८

५.८.६ यागशालायां लम्बनीयायाः दर्भमालायाः स्वरूपम्

खि. १६ . ७८ - ८३

दर्भमाला च कर्तव्या दर्भैश्छिन्नैः समायतैः।
द्वितालमात्रं तं दर्भं लम्बनार्थं विहाय च ।।

प्रक्षिप्य दर्भौ द्वौ द्वौ तु मध्ये पर्वणि पर्वणि।
दर्भैः शिष्टाङ्गभागैस्तु रज्जुं कुर्यात्प्रदक्षिणम्।।

एवं संवर्तिताग्रैस्तु दर्भमालानुपालिता।
ग्रहतारागणास्सर्वे रज्वग्रे तु समर्चिताः।।

परिरक्षन्तु देवा हि दर्भमालागणे स्थिताः।
पिशाचदैत्यरक्षांसि विधूय परितस्त्विह ।।

सन्ध्याकाले तानि देवाः कालचक्रे स्थितानि वै।
इत्युक्त्वा नित्यकार्येषु दर्भस्थानमपेक्ष्य च।।

दैविकं कर्म कुर्वीत रक्षार्थं दर्भमालया।

स. २७ . ६७ - ७१

अगर्भान् साग्रदर्भांश्च कुशानपि समाहरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्भमाला च कर्तव्या दर्भैश्छिन्नसमायुतैः।।

अधो द्वितालमात्रं वै लम्बनार्थं विहाय च ।
प्रक्षिप्य दर्भौ द्वौ द्वौ च मध्ये पर्वणि पर्वणि।।

तद्दर्भशेषभागैश्च रज्जुं कुर्यात्प्रदक्षिणम्।
एतस्यां दर्भमालायां परीतायां च तत्र वै।।

पिशाचान् दैत्यरक्षांसि विधूय परितः सदा।
ग्रहनक्षत्रताराद्यैः सर्वैस्सर्वत्र सर्वदा।।

परिरक्षति देवान् वै दर्भमाला गुणान्विता।

ज्ञा. ६१ . १०६, १०७ ; वा. ५

५.८.७ यागशालायाः अलङ्करणप्रकारः

अ. १५

गोमयेनोपलिप्यैव पञ्चवर्णैर्विचित्रकैः।।

वितानस्थूणवेष्टैश्च नानावस्त्रैरलङ्कृतम्।
कदलीक्रमुकसंयुक्तं पूर्णकुम्भसमन्वितम्।।

मुक्तादामैरलङ्कृत्य ध्वजैश्च परिशोभितम्।
धूपदीपसमायुक्तं दर्भमालाभिरावृतम्।।

य.२५. २१ - २४

तोरणं पूर्णकुम्भं च दीपाङ्कुरसमायुतम्।।

द्वारे द्वारे विभूष्यैव वितानाद्यैर्विभूषयेत्।
दर्भमालासमायुक्तं बालध्वजसमायुतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुष्पमालादिभिश्चान्यैर्भूषयेद्दर्शनीयकम्।
गोमयेनोपलिप्यैव सर्वतः समलङ्कृतम्।।

पञ्चवर्णैरलङ्कृत्य तण्डुलानवकीर्य च।

वि. २९. २१२

[स्तम्भवेष्टनमुक्तादामाद्यैरलङ्कृत्य ---------------------------
तद्द्वारपार्श्वे कदलीक्रमुकोदकुम्भदीपाङ्कुराद्यैरलङ्कृत्य इत्यधिकम्।]

ज्ञा. ६२ . १०७ ; नि. २८.; स. २८. ४६, ४७

खि. १६ . ८६ , ८९ - ९१ , ९५ , ९६ , २५७ - २६२

तोरणैः पूर्णकुम्भैश्च अलङ्कुर्यान्मनोहरम्।।

देवालयस्य परितः प्रपां कृत्वा विशेषतः।
वितानेन समाच्छाद्य स्थूणाश्चावेष्ट्य यत्नतः।।

मुक्तादामपताकादि सर्वालङ्कारसंयुतम्।
दर्भमालापरिक्षिप्तं तोरणैश्चाप्यलङ्कृतम्।।

कृत्वैव यज्ञवाटन्तु----------------।

सर्वेषां मण्डपानां च प्राकारस्यालयस्य च ।
स्तम्भवेष्टनवस्त्रैश्च नानावर्णपरिष्कृतैः।।

अलङ्कारक्रियां कुर्याद्वाद्यघोषपुरस्सरम्।

श्वभ्रस्य परितः कुर्यात्पङ्क्तिं किष्कुप्रमाणतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चकिष्कुप्रमाणं वा यथालाभमथापि वा।।

द्वितालविस्तृतां चैव सङ्गतां गोलकोन्नताम्।
तण्डुलैर्व्रीहिभिर्वापि पङ्क्तिं सम्प्रति कारयेत्।।

चतुर्द्वारसमायुक्तां द्वितालां तालमानतः।
दर्भमालाञ्च परितः पादाग्रेष्ववलम्बयेत्।।

वितानेन समाच्छाद्य स्थूणानां वेष्टनं चरेत्।
मुक्तादामपताकाद्यैरलङ्कुर्याद्विशेषतः।।

द्वारं तोरणसंयुक्तं पूर्णकुम्भसमन्वितम्।
क्रमुकैः कदलीभिश्च इक्षुकाण्डैरलङ्कृतम्।।

एवं सुसाध्य यत्नेन-------------------।

५.८.८ स्नपनवेद्याः स्थानम्

अ. ११

उत्तरे स्नानवेदिं च बेरस्यैवार्हकं क्रमात्।।

५.८.९ यागशालायां बिम्बस्नपनार्थं श्वभ्रकल्पनम्

वा. ८.

श्वभ्रं कृत्वा तथैशान्ये द्विमेखलमिति स्मृतम्।
मेखलोन्नतविस्तारं युगाङ्गुलमिति स्मृतम्।।

उत्तरे जलनिर्याणं कारयित्वा विधानतः।
त्रिषु हस्तस्य विस्ताराद् द्विगुणायतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं श्वभ्रं प्रकुर्वीत इति शास्त्रस्य चोदितम्।

स. २९ . ४४ - ४६

ऐशान्यां यागशालायामौपासनविधानतः।
श्वभ्रं च स्नपनार्थं तु कर्तव्यं तद् द्विवेदिकम्।।

अथवा बिम्बपीठं तु यावदायतविस्तृतम्।
पीठस्य परितस्तस्य चतुर्दिक्षु तथैव च ।।

श्वभ्रं भागाधिकं कुर्यादुत्तरे जलमार्गकम्।
दक्षिणोत्तरयोर्देव्योः श्वभ्रं कुर्यात्तथैव च ।।

प्र. ११ . ५६ ; वा. ८.

वि. ३० . २१६

[1]ऐशान्यामाहवनीयवत् द्विवेदिसहितं, तद्वेरपीठात् प्रतिदिक्चतुरङ्गुलाधिकविस्तारं स्नानाय श्वभ्रं च उत्तरे वारिमार्गं च कारयेत्।

खि. १६ . २५४ - २५६

देवालयस्य पुरतः स्नपनार्थं विचक्षणः।।

मण्डपं वा प्रपां वापि शालां वा कूटमेव वा।
कारयित्वा विधानेन मध्ये श्वभ्रञ्च कारयेत्।।

अर्चापीठप्रमाणाद्धि प्रतिदिक्चतुरङ्गुलम्।
हित्वाऽवकाशमौपासनाग्निवत् श्वभ्रमाचरेत्।।

1.यागशालायाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.१० यागशालायां शय्यावेदिस्थानम्

वा. ८

एवं सङ्कल्प्य तन्मध्ये निम्नोन्नतविवर्जितम्।।

तृणशल्यान् व्यपोह्यैव भूमिं तत्र प्रकल्पयेत्।
स्तम्भान्तरं प्रकुर्वीत चतुर्हस्तान्तरं क्रमात्।।

एवं सङ्कल्प्य तन्मध्ये सूत्रस्य पदमाचरेत्।
पूर्वान्तमुत्तरान्तं च वायुसूत्रं प्रसारयेत्।।

एवं कृते तु तत्कोष्ठमेकाशीतिस्तु सङ्ख्यया।
मध्ये नवपदं विष्णोः शय्यास्थानं प्रकल्पयेत्।।

य. २५. १०, ११

मध्ये नवपदं ब्राह्मं शयनस्थानमीरितम्।।

बिम्बाद्यर्धप्रमाणं वा भित्तिमानमथापि वा।
प्रागादिपरितो भागान् पदान् द्वाराय संन्यसेत्।।

५.८.११ शय्यावेद्याः मानम्

स. २८ . ४१ - ४३

शय्यावेदिं च तन्मध्ये[1] चतुर्हस्तप्रमाणतः।।

एकहस्ततलोत्सेधां चतुरश्रां प्रकल्पयेत्।
बिम्बादर्धाधिकं मानं शय्यावेदिं चतुर्दिशम्।।

शय्यावेद्यूर्ध्वतः कुर्यात् कूटं वर्षादिवारणम्।

1. यागशालामध्ये।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.१२ शय्यावेदिकल्पनम्

अ.११

शय्यावेदिं च तन्मध्ये समाश्रं भित्तिमानतः।।

तुल्याश्रं च समुत्सेधं तलं कुर्यात्सलक्षणम्।

मध्ये वेदिं प्रकल्प्यैव चतुर्हस्तप्रमाणतः।।

द्वादशाङ्गुलमुत्सेधं तलं कृत्वातिसुन्दरम्।

ज्ञा. ६२. १०८

तन्मध्ये शयनं चतुर्दिक्षु चतुर्हस्तायतं चतुरश्रं द्वितालोच्छ्रयम् अर्धाधिकं बिम्बमानायतं वा परिकल्प्य तथैवालङ्कृत्य

वा.८

[बिम्बस्यार्धप्रमाणेन शय्यावेदिं प्रकल्पयेदित्यधिकम्।]

खि. १६ . ८७, ८८

तन्मध्ये स्थण्डिलं कृत्वा चतुर्हस्तप्रमाणतः।
एकहस्ततलोत्सेधं चतुरश्रं विधानतः।।

तदर्धमथवा कुर्याद् बिम्बाध्यर्धमथापि वा।

नि . २८

स. २८. ४१, ४२

शय्यावेदिं च तन्मध्ये चतुर्हस्तप्रमाणतः।।

एकहस्ततलोत्सेधां चतुरश्रां प्रकल्पयेत्।
बिम्बादर्धाधिकं मानं शय्यावेदिं चतुर्दिशम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र. ११ . ५०, ५१

निम्नोन्नतं विभज्यैव जलस्थलसमीपकम्।।

पूर्वोक्तेन विधानेन अलङ्कृत्य यथाक्रमम्।
मध्ये वेदिं प्रकल्प्यैव बिम्बाद्यर्धप्रमाणतः।।

वा. ८

द्वितालस्योच्छ्रयं कुर्यात् शय्यावेदिं प्रकल्पयेत्।।

बिम्बस्यार्धप्रमाणेन कारयेदिति केचन।

वि. २९ . २११

तद्विमाननिर्देशहस्तेन त्रिहस्तादिपञ्चहस्तान्तं पादहस्तविवृद्ध्या नवधा भित्तिमानं तस्य स्थले तालं द्विभागं, तदर्धं वा, पादोच्चं भित्तिमानसमं पादाधिकमर्धाधिकं, पादोनद्विगुणं द्विगुणं वा शय्यावेदिविस्तारं, भित्तिमानसमं पादोनमर्धं, बिम्बार्धाधिकं त्रिपादाधिकद्विगुणं, अर्धाधिकद्विगुणं त्रिगुणं वा, तच्चतुर्थांशमुत्सेधम्।

५.८.१३ यागशालायाम् अलङ्कारवेदिस्वरूपम्

वि. ३० . २१६, २१७

[1]नैर्ऋतपदे देवस्यालङ्कारार्थं द्विहस्तायतविस्तारां, चतुरश्रां वेदिं कृत्वा।

५.८.१४ यागशालायां संभारवेदिस्वरूपम्

वि. ३० . २१७

[2]वायव्ये यागोपकरणद्रव्यविन्यासार्थं चतुर्हस्तायतविस्तारां, भागोन्नतां, वेदिं कुर्यात्।

वा. ८ ; प्र. ११ . ५५

1.यागशालायाः। 2.यागशालायाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

५.८.१५ यागशालायां देवतास्थानम्

प्र. ११ . ५४

[1]नैर्ऋते देवतास्थानं कल्पयेत्तद्विचक्षणः।

वा. ८

५.८.१६ यागशालायां सर्वदेवार्चनस्थानम्

वा.८

[2]तस्या वेद्यास्तु परितः सर्वदेवार्चनार्थकम्।

५.८.१७ अष्टमङ्गलानां निर्माणप्रकारः

य. २४ . २८ - ३०

वृक्षैस्तद्याज्ञिकैः कुर्याद् वितस्त्यङ्गुलमुन्नतम्।
विपुलं नागाङ्गुलेनैव अश्रनेत्रघनं क्रमात्।।

फलकां कृत्वैव तन्मध्ये धात्वङ्गुलसमुन्नतम्।
श्रीवत्सादींस्तथा तस्मिन्नर्धचित्रं च कारयेत्।।

श्रीवत्सं पूर्णकुम्भं च भेरीमादर्शनं क्रमात्।
मत्स्ययुग्माङ्कुशं शङ्खमावर्तं चाष्टमङ्गलम्।।

वि. २९ . २१३

सप्ताङ्गुलोत्सेधान् श्रीवत्सोदकुम्भभेर्यादर्शनमत्स्ययुग्माङ्कुशशङ्खावर्तांश्च अष्टमङ्गलानि कृत्वा।

---

1. शय्यावेद्या इत्यनुवर्तते। 2. शय्यावेद्याः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा. ८

अथाष्टमङ्गलादीनि द्वितालायाममेव च।।

प्रादेशविस्तृतं चैव षडङ्गुलमथापि वा।
घनं च चतुरङ्गुल्यं व्यङ्गुलं वापि कारयेत्।।

तस्य मध्ये लिखेद्विद्वान् रूपं तस्य पृथक् पृथक्।
आवर्तं शङ्खभेर्यौ च मत्स्ययुग्माङ्कुशं तथा।

पूर्णकुम्भं च आदर्शं श्रीवत्सादीनि लेखयेत्।
तत्तदाकृतिकं कुर्यात् अष्टाङ्गुलमथायतम्।।

प्र. ११ . १९ - २१

[तालायाममथापि वा इति स्थाने द्वितालायतमेव च इति दृश्यते।]

५.८.१८ पञ्चायुधानां निर्माणप्रकारः

य. २४ . ३१

शङ्खं चक्रं गदां चैव शार्ङ्गं खड्गं तथैव च ।
कारयेत्फलकामध्ये एतत्स्यादर्धचित्रकम्।।

प्र. ११ . २५; वि. २९ . २१३

५.८.१९ अष्टमङ्गलान्यतमस्य आवर्तस्य लक्षणम्

प्र. ११ . २२ - २४

आवर्तलक्षणं वक्ष्ये पञ्चविंशत्पदं तथा।
ईशादिनैर्ऋतान्तन्तु पदं त्रिस्त्रिः क्रमेण च ।।

पूर्वमध्यमपाश्चात्यपदान्येव तु योजयेत्।
वायव्याद्यग्निकोणान्तमुदङ्मध्यमदक्षिणे।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तरालपदांश्चाष्टौ विनैव तु विचक्षणः।
एतैश्च सप्तदशभिः आवर्तमभिधीयते।।

५.८.२० आहवनीयादीनां यागाग्नीनां सृष्टिः

ज्ञा. ५ . ७

नारायणनियोगेन सर्वसिसृक्षुर्ब्रह्मा भगवन्तं ध्यात्वाऽऽसीनः सहस्राब्देऽतीते हृत्पुण्डरीकं त्रिवेदिसहितं पद्माकृत्या एकमग्निं व्यक्तीभूतं पर्याप्तं दृष्ट्वा आनम्य --------------। प्राच्याम् आहवनीयं, दक्षिणेऽन्वाहार्यं, प्रतीच्यां गार्हपत्यम्, उदीच्याम् आवसथ्यं, मध्ये सभ्यम् अजनयत्। पश्चात् स्वयं भूर्भुवस्सुवर्महर्जनोलोकेषु गार्हपत्यान्वाहार्याहवनीयावसथ्यसभ्यांश्च यथाक्रमेण प्रतिष्ठापयित्वा ------------------------------।

स. २९ . १४ - १६ ; ६१ , ६२

ब्रह्माऽग्निं पञ्चधा सृष्ट्वा पञ्चलोकेष्वकल्पयत्।।

स्वर्गे चाहवनीयं तु प्रतिष्ठाप्य ततः परम्।
तथान्तरिक्षेऽन्वाहार्यं द्वितीयं परिकल्प्य च ।।

भूम्यां च गार्हपत्याग्निं महर्लोके तथैव च ।
आवसथ्यं जनर्लोके सभ्यं चाग्निमकल्पयत्।।

हृत्पुण्डरीकादन्योऽग्निः सञ्जातो ब्रह्मणस्तु यः ।।

हृत्पुण्डरीकजातत्वात्पौण्डरीकं हि तद्विदुः।

वि. ३० . २१५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.२१ पञ्चाग्नीनां कल्पने निदानम्

स. २९ . ६५ - ६८ ; ७० , ७१

यथैव वायोरेकस्य पञ्चधा भेद उच्यते।
तथैव मूर्तेर्विष्णोश्च सर्वप्राणिहिताय वै।।

नामरूपादिभेदेन पञ्चधा भेद उच्यते।
एष पुरुषः पञ्चधा पञ्चात्मेत्याह ऋक् श्रुतिः।।

तथा तदर्थमग्नेश्च नाममन्त्रक्रियादिषु।
पञ्चधा भेदमिच्छन्ति प्रतिष्ठायां हरेः प्रभोः।।

पञ्चमूर्त्यधिदेवांस्तान् पञ्चाग्नीन् परिकल्पयेत्।

मध्ये विष्णुस्तु पुरुषः प्राच्यां सत्यस्तु दक्षिणे।।

प्रतीच्यामच्युतस्तद्वदनिरुद्धस्तथोत्तरे।
तत्तद्दैवत्यवद्धोमं तत्तद्देशे प्रकल्पयेत्।।

ज्ञा. ६२ . १०८

५.८.२२ यागाग्नीनाम् आश्रमिव्यवस्था

ज्ञा. ५ . ७

तेषामाश्रमिणां ब्रह्मचारिणामेकोऽग्निः, गृहस्थानां त्रेताग्निः वानप्रस्थानां पञ्चाग्निरिति कल्पयित्वा पौण्डरीकाग्निं स्वयं सङ्गृह्य जपहोमस्वाध्यायादिभिर्यत् परं तज्जिज्ञासयाऽभ्यर्चयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.२३ पञ्चाग्नीनामधिदेवाः

स. २९. ६८ - ७०

विष्णुमूर्तिस्तु सभ्याग्नेरधिदेवः प्रकीर्तितः।।

तथैवाहवनीयाग्नेः पुरुषो देवता स्मृतः।

सत्योऽन्वाहार्यदेवश्च गार्हपत्येऽच्युतस्तथा।।

आवसथ्येऽनिरुद्धश्च पञ्चानां पञ्च देवताः।

५.८.२४ यागशालायां कल्पनीयानामग्निकुण्डानां सङ्ख्या

अ. ११

पञ्चाग्निं च तथा कुर्यात् सभ्यमेकमथाऽपि वा।।

सङ्कल्प्य शयनात्प्राच्यां कारयेद्विधिचोदितम्।

स. १४. ४

५.८.२५ अग्निकुण्डसङ्ख्या उत्तमा

य. २५. २६

पञ्चाग्नीन् पौण्डरीकेण सार्धं चेदुत्तमं विदुः।।

५.८.२६ अग्निकुण्डसङ्ख्या मध्यमा

य. २५. २७

गार्हपत्यं तथा प्राच्यामन्वाहार्यमतः परम्।

औपासनाग्निकुण्डं च मध्यमं तेषु चेद्बुधः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.२७ अग्निकुण्डसङ्ख्या अधमा

य. २५. २८, २९

प्रधानं गार्हपत्यं स्यात्सभ्यवद्धौत्रशंसने।
सभ्यमेकाग्निकुण्डं चेदधमं परिचक्षते।।

पौण्डरीकाग्निना सार्धं यज्ञे चास्य हरेः प्रभोः।

५.८.२८ अग्निहोत्रशब्दनिर्वचनम्

स. २९ . ४९, ५०

हो इत्येव विषादोऽपि विषादो दुःखमुच्यते।
दुःखं तापत्रयं प्रोक्तं तापो हि नरकः स्मृतः।।

तस्मात्तु नरकान्नित्यं यस्मिन्नग्नौ हुतं सदा।
त्रायते यजमानं तदग्निहोत्रमिति स्मृतम्।।

५.८.२९ यागशालायां सभ्याद्यग्निकुण्डानां कल्पनम्

य. २५. १२ - २१

[1]ब्रह्मांशात्तत्तृतीयांशे सभ्यं श्रामणकाग्निवत्।
कारयेत्तत्पदात्पूर्वं कुण्डमाहवनीयकम्।।

औपासनाग्निवद्धीमानाग्नेय्यां मध्यमे पदे।
पौण्डरीकाग्निकुण्डं तद्द्वादशाङ्गुलमुच्छ्रयम्।।

---

1. एकाशीतिपदैः विभक्तायां यागशालायां मध्ये नव पदानि ब्रह्मांशः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टादशभिरध्यर्धैरङ्गुलीभिर्भ्रमीकृते।
वृत्तं तदूर्ध्ववेदिः स्यादेकैकं भागमुन्नतम्।।

ऊर्ध्वमध्यमविस्तारमाश्रमाङ्गुलमेव च ।
षडङ्गुलविशालं तदधोवेद्यास्तु लक्षणम्।।

दलैः षोडशभिर्युक्तं कृत्वा निम्नं दशाङ्गुलम्।
तस्मात्प्रतीच्यां भागांशे पदे सूत्रोक्तवत्सुधीः।।

अन्वाहार्यं तथा कुर्यात्तस्माज्ज्ञातिपदे पुनः।
चतुस्तालसमायामं तालोत्सेधं समस्थलम्।।

कृत्वा सम्भारवेदिः स्यादुदीच्यामाश्रमे पदे।
कृत्वाथ गार्हपत्यं तत्सूत्रोक्तविधिना बुधः।।

तस्माज्ज्ञातिपदे साक्षात्कुम्भार्चायै प्रकल्पयेत्।
तस्मात्प्राच्यां युगांशे तु चावसथ्यं सलक्षणम्।।

कृत्वा सूत्रोक्तवद्धीमानैशान्ये श्वभ्रमाचरेत्।
बहिर्गते पदे धीमानष्टाविंशत्पदेषु तत्।।

देवानां पार्षदां स्थानं शिष्टाः सञ्चरणाय वै।

स. २९. ११ - १३

वक्ष्येऽहं यागशालायामग्निकुण्डप्रकल्पनम्।।

प्राच्यामाहवनीयं स्यादन्वाहार्यं तु दक्षिणे।
पश्चिमे गार्हपत्यं स्यादावसथ्यं तथोत्तरे ।।

मध्ये सभ्यं च कर्तव्यं शय्यावेद्यास्तु पूर्वतः।
उत्तरे शयनाद्वाथ कारयेदिति केचन।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.३० अग्निकुण्डस्य उपादानद्रव्यम्

प्र. ११ . ६०, ६१

शल्यलोष्टतुषाङ्गारतृणभस्मादिहीनया।।
मृदा वा वालुकैस्तत्र पृथक् कुण्डं प्रकल्पयेत्।

स. २९ . ४३ ; ज्ञा. ६२ . १०८
अ. १८ ; वा. ८

५.८.३१ गार्हपत्यशब्दनिर्वचनम्

स. २९ . ५२

धार्यो गृहपतेर्यस्माद् गार्हपत्य इति स्मृतः।।

५.८.३२ गार्हपत्याग्निकुण्डस्य परिमाणम्

अ. १८

[1]पश्चिमे वृत्तकुण्डं स्यात् वेदिद्वयसमन्वितम्।
अष्टादशभिरध्यर्धैरङ्गुलीभिर्भ्रमीकृते।।

वृत्तं तदूर्ध्ववेदिः स्यादधोवेदिं वृत्तमात्रकम्।
उत्सेधं विस्तृतं चैव वेद्या भागं प्रचक्षते।।

ब्रह्म सोमपितृस्थानं पूर्वोक्तेन विधानतः।

खि. १६ . २४१ - २४३ ; प्र. ११ . ५५ ; वा. ८

स. २९. २८

[अत्र अष्टादशाङ्गुलैरिति विशेषः।]

1.शय्यावेद्याः पश्चिमे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ६२ . १०८

[सार्धाष्टादशाङ्गुलीभिरिति विशेषः।]

५.८.३३ गार्हपत्याग्निकुण्डस्य आकारे उपपत्तिः

स. २९ . १८ , १९

आकृतिर्मण्डलाकारा भुवस्तस्मात्तदाकृतिः।।

कुण्डं च गार्हपत्यस्य------------------।

वि. ३० . २१६

[1]तत्पश्चिमे गार्हपत्यं पूर्णचन्द्राकृति ऊर्ध्ववेदिविस्तारं सप्ताधिकत्रिंशदङ्गुलं द्विवेदिसहितम् एकैकं भागं विस्तारोत्सेधं, मध्ये निम्नं षडङ्गुलं --------- कारयति।।

ज्ञा. ४४. ७८

[अत्र सप्ताधिकत्रिंशदङ्गुलमित्यस्य स्थाने षट्त्रिंशदङ्गुलं समम् इति विशेषः।]

५.८.३४ अन्वाहार्य-दक्षिणाग्निशब्दनिर्वचनम्

स. २९. ५१, ५२

अग्नेश्चाहवनीयस्य यस्मादाह्रियते तथा।

ततोऽन्वाहार्य इत्युक्तो दक्षिणाग्निः पुरातनैः।।

दक्षिणे कल्प्यमानत्वाद्दक्षिणाग्निश्च स स्मृतः।

1.शय्यावेद्याः पश्चिमे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.३५ अन्वाहार्याग्निकुण्डस्याकारे उपपत्तिः

स. २९ . १७, १८

-------------- चापवच्चान्तरिक्षकम्।।

कृत्वान्वाहार्यस्य रूपं धनुषो रूपवत्ततः।

ज्ञा. ४४ . ७८ ; वि. ३० . २१५; वा. ८

५.८.३६ अन्वाहार्याग्निकुण्डलक्षणम्

वि. ३० . २१५, २१६

याम्ये अन्वाहार्यमर्धचन्द्राकृति (दक्षिणे) भागमूर्ध्ववेदिविस्तारं, दक्षिणोत्तरं त्रिंशदङ्गुलं, प्राक्पश्चिमं षष्ट्यङ्गुलं द्विवेदिसहितम् एकैकं भागविस्तारोत्सेधं, मध्ये निम्नं त्रिकोलकम् ।

ज्ञा. ४४ . ७८

[अत्र विस्तारोत्सेधं भागं रसनिम्नमेवं कारयेत् इत्यधिकम्।]

अ. १८

याम्ये धन्वाकृतिं कुर्यात् द्विवेदिसहितं क्रमात्।।

त्रिंशदङ्गुलसंभ्रान्त्या वृत्तं कृत्वा तदर्धकम्।
दक्षिणार्धोर्ध्ववेदिः स्यात् प्राक्पश्चिममायतम्।।

उत्सेधं विस्तृतं चैव भागमेवं समाचरेत्।
अधोवेदिं च कृत्वा तु विस्तारं गोलकं भवेत्।।

भागायताधिकं विद्यात् उन्नतं गोलकं भवेत्।
ब्रह्मसोमपितृस्थानं पूर्ववद्विधिमाचरेत्।।

ज्ञा. ६२. १०८ ; प्र. ११ . ५४ ; वा. ८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. २९. २६, २७

अङ्गुल्या पञ्चविंशत्या चतुर्भिश्च यवैः सह।।

वृत्तं भ्रम्या तदर्धं तु व्यपोह्योत्तरतः क्रमात्।
तद्दक्षिणेऽन्वाहार्यस्य कुण्डं कुर्याद्विधानतः।।

खि. १६. २३७ - २४१

धनुराकृतिकं कुर्याद्याम्ये वेदिद्वयान्वितम्।।

त्रिंशदङ्गुलसंभ्रान्त्या कृते वृत्तेऽर्धभाजिते।
अवाचीनेन चार्धेन कल्पितो धनुराकृतिः।।

अन्वाहार्याग्निरुदितः क्षेत्रमौपासनाग्निवत्।
उत्सेधं विस्तृतिश्चैव भागं वेद्याः समाचरेत्।।

ब्रह्मसोमपितृस्थानान्याहरेदुक्तमार्गतः।
द्वादशाङ्गुलमायाम उन्नतं भाग उच्यते।।

अन्तरं भाग उद्दिष्टः पैतृकं गोलकं चरेत्।

५.८.३७ आहवनीयशब्दस्य निर्वचनम्

स. २९. ४७, ४८

अग्निहोत्रादिकं हव्यं सर्वमाहुतिसंज्ञकम्।।

आदाय तेन हव्येन होतव्योऽयं द्विजातिभिः।
तस्मादाहवनीयाख्यां गतो वह्निर्महाद्युतिः।।

५.८.३८ आहवनीयाग्निकुण्डस्य आकारे उपपत्तिः

स. २९. १७

चतुरश्रो यतः स्वर्गः कुण्डं चाहवनीयकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुरश्रं समाख्यातं ------------------।।

ज्ञा. ४४. . ७८ ; वि. ३० . २१५

५.८.३९ आहवनीयाग्निकुण्डस्य स्थानम्

वि. ३० . २१५

यज्ञशालां नवधा विभज्य मध्ये ब्राह्मे शय्यावेदिम् ऐन्द्रे पदे सभ्यम् आहवनीयं च। आहवनीयं चौपासनाग्निकुण्डवत् कुर्यात्

प्र. ११ . ५२, ५३

सभ्यस्य पूर्वभागे तु कुण्डमाहवनीयकम्।।

उत्तरे वा पुनः कुर्यादौपासनविधानतः।

ज्ञा. ६२. १०८ ; वा. ८

५.८.४० आहवनीयाग्निकुण्डस्य परिमाणम्

अ. १८

चतुरश्रं समं कृत्वा द्वात्रिंशच्चाङ्गुलायतम्।
चतुरङ्गुलविस्तारम् उन्नतं भागमेव च ।।

मध्ये च निम्नं कृत्वा तु चतुर्विंशतिकाङ्गुलम्।
द्विभागं निम्नमेवं स्यात् ऊर्ध्ववेदिं प्रकल्पयेत्।।

षट्त्रिंशदङ्गुलायाममुन्नतं तु द्विगोलकम्।
भागं तु विस्तृतं चैव सीवनीक्षयचन्द्रवत्।।

दक्षिणे ब्रह्मणः स्थानं चतुरश्रं समन्ततः।
द्वादशाङ्गुलविस्तारम् उन्नतं भागमेव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य दक्षिणभागे तु पितृस्थानं प्रकल्पयेत्।
शूर्पाकारं च कृत्वा तु दक्षिणाग्रं प्रचक्षते।।

कुण्डस्योत्तरतः पार्श्वे सोमस्थानं प्रकल्पयेत्।
समवृत्तं च कृत्वा तु तालमात्रमिति स्मृतम्।
भागान्तरे ततः कृत्वा एतदाहवनीयकम्।।

स. २९ . २२ - २५

द्वात्रिंशदङ्गुलायाममूर्ध्ववेदिं चतुर्दिशम्।
चतुरङ्गुलविस्तारां कोलकोत्सेधसंयुताम्।।

कृत्वा परिगतामेवमधोवेदिं च कारयेत्।
अधोवेद्याः समुत्सेधविस्तारौ भागकौ मतौ।।

कुण्डमध्ये चतुर्विंशत्यङ्गुलायतविस्तृतम्।
भागनाहं च कुर्वीत चतुरश्रं समन्ततः।।

निम्नं पञ्चाङ्गुलं वापि षडङ्गुलमथापि वा।
कुण्डमाहवनीयाग्नेरेवमेव विधानतः।।

वा. ८

[अत्र त्रिंशदङ्गुलमित्यस्य स्थाने वस्वङ्गुलमिति निम्नं पञ्चाङ्गुलं वापि षडङ्गुलमथापि वा इत्यस्य स्थाने षडङ्गुलमिति च विशेषः।]

५.८.४१ आवसथ्यशब्दनिर्वचनम्

स. २९ . ५३

वसत्यावसथे यस्मादावसथ्यस्ततो भवेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.४२ आवसथ्याग्निकुण्डस्य आकारे उपपत्तिः

स. २९ . १९

-------------------- महर्लोकस्त्रिकाश्रकः।

आवसथ्यस्य तु प्रोक्तं तथा कुण्डं त्रिकाश्रकम्।।

वि. ३०. २१५ ; ज्ञा. ४४. ७८

५.८.४३ आवसथ्याग्निकुण्डस्य लक्षणम्

वि. ३० . २१६

[1]उत्तरे चावसथ्यं त्रिकोणं षड्यवाधिकाष्टचत्वारिंशदङ्गुलं तदेकभुजयुतोर्ध्ववेदिकं द्विवेदिसहितम् एकैकं भागविस्तारोत्सेधं, मध्ये निम्नं त्रिकोलकं प्रागग्रं कारयति

ज्ञा. ४४ . ७८ ; ६२. १०८

ऊर्ध्ववेद्येकभुजं षड्यवाधिकमष्टचत्वारिंशदेवं त्रिभुजं द्विवेदिसहितम्

--- उदीच्यां

सपादयवत्रयाष्टाङ्गुलिभिः संयुक्तं चत्वारिंशदङ्गुल्यायतैकभुजेन त्र्यश्रोर्ध्ववेदिकं पूर्वाग्रमावसथ्यस्य

खि. १६ . २४४ - २४६

[अत्र सपादत्रियवैर्युक्ताष्टचत्वारिंशदङ्गुलैः इति विशेषः]

प्र. ११ . ५६ ; वा. ८

---

1. शय्यावेद्याः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.४४ आवसथ्याग्निकुण्डस्य परिमाणम्

वा. ८

वस्वङ्गुलं रसघ्नं तु एतैष्षड्भिर्यवैर्युतम्।।

भुजा त्वेकं तदूर्ध्वे तु त्रिकोणाकृतिरुच्यते।
दक्षिणाद्युत्तरान्तादि पूर्वाग्रं तु प्रकल्पयेत्।।

द्विवेदिसहितं कुर्याद् अन्वाहार्योक्तवत्कृतम्।
गार्हपत्योक्तवन्निम्नं मध्ये तस्य विचक्षणः।।

एवं कृत्वा तु शुद्धात्मा आवसथ्यं प्रकल्पयेत्।

स. २९. २९, ३०

अ. १८

त्रिकोणं चोत्तरे कुर्यात् वेदिद्वयसमन्वितम्।।

द्विप्रदं तृ च ? वेद्युक्तं चत्वारिंशत्सहाष्टभिः।
अङ्गुलानां भुजाश्चैव कर्तृभुजौ चोर्ध्ववेदिका।।

द्विवेदिसहितं कुर्यात् विस्तारं भागमुन्नतम्।
आग्नेये नैर्ऋते चैव उत्तरे च त्रिकोणके।।

ब्रह्मसोमपितृस्थानं पूर्वोक्तेन विधानतः।

५.८.४५ सभ्यशब्दनिर्वचनम्

स. २९ . ५३, ५४

ऋषिष्वग्निषु वेदेषु देवेष्वपि पितृष्वपि।।

सभ्यं गतेषु मुख्योऽभूत् तस्मात्सभ्य उदाहतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.४६ सभ्याग्निकुण्डस्य स्थानम्

ज्ञा. ६२ . १०८

शयनात् प्राच्यां श्रामणकाग्निकुण्डविधिना अग्निकुण्डं सन्न्यस्य ------

प्र.११ . ५२

वा. ८

शयानाद् दक्षिणे वाथ सभ्यकुण्डं प्रकल्पयेत्।

अ. १८

मध्ये सभ्यं च कृत्वा तु श्रामणेनैव पूर्ववत्।।

५.८.४७ सभ्याग्निकुण्डस्याकारः

वा. ८

सभ्यस्याहवनीयस्य चतुरश्रं प्रकल्पयेत्।

५.८.४८ सभ्याग्निकुण्डस्याकारे उपपत्तिः

स. २९ . २०

चतुरश्रो जनर्लोकः कुण्डं सभ्यं च तादृशम्।

ज्ञा. ४४ . ७८ ; वि.३० . २१५

५.८.४९ सभ्याग्निकुण्डस्य लक्षणम्

वि. ३० . २१५, २१६

यज्ञशालां नवधा विभज्य मध्ये ब्राह्मे शय्यावदिम् , ऐन्द्रे पदे सभ्यं ---
---शय्यावेद्याः प्राच्यामाहवनीयस्य पश्चिमे सभ्याग्निकुण्डं त्रिवेदिसहितं, एकैकं भागविस्तारोत्सेधम् , ऊर्ध्ववेद्यायामं द्वात्रिंदङ्गुलं मध्यवेदिविस्तारं पञ्चाङ्गुलं द्विचत्वारिंशदङ्गुलमधोवेद्यायामं पञ्चदशाङ्गुलं मध्ये निम्नम् , अष्टाङ्गुलं, दशाङ्गुलं द्वादशाङ्गुलं वा कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ६२. १०८

सभ्याग्निकुण्डमध्यनिम्नमष्टाङ्गुलमिति केचित्

वा. ८.

शयनाद्दक्षिणे वाथ सभ्यकुण्डं प्रकल्पयेत्।।

वेदाङ्गुलं रसघ्नं तु ऊर्ध्ववेदिं चतुर्दिशम्।।

त्रिमेखलस्य सभ्यस्य द्वादशाङ्गुलमुन्नतम्।
मध्यवेद्यास्तु विस्तारं विष्ण्वादित्याङ्गुलं भवेत्।

अन्यद् द्विमेखलं प्रोक्तं पुरुषादीनि सङ्ख्यया।
विस्तारस्योन्नतं कुर्यात्सभ्यमेवं प्रकल्पयेत्।।

स. २९ . ३६ , ३७

कुण्डमध्ये चतुर्विंशदङ्गुलायतविस्तृतम्।
निम्नमष्टाङ्गुलं वापि दशाङ्गुलमथापि वा।।

अग्नेः सभ्यस्य कुण्डं च कुर्यादेवं विधानतः।

५.८.५० पौण्डरीकशब्दनिर्वचनम्

स . २९ . ६१, ६२

हृत्पुण्डरीकादन्योऽग्निः सञ्जातो ब्रह्मणस्तु यः।।

हृत्पुण्डरीकजातत्वात् पौण्डरीकं हि तद्विदुः।

वा. ८

पद्मस्य गार्हपत्यस्य वृत्तमेवमुदाहृतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.५१ पौण्डरीकाग्नेः लोकाः

स. २९ . ६३

तपोलोकश्च सत्यं च विष्णोर्लोको जनस्तथा।

५.८.५२ पौण्डरीकाग्नेः अधिदेवता

स. २९ . ६३

पौण्डरीकाधिदेवस्तु नारायण इति स्मृतः।।

५.८.५३ पौण्डरीकाग्नेरुपयोगः

स. २९ . ६४

सर्वनिष्कृतिहोमार्थं क्रतूनामुत्तरः क्रतुः।

तदग्नौ सर्वकाम्यं च यजेदित्याह पूर्वजः।।

५.८.५४ पौण्डरीकाग्निकुण्डस्य स्थानम्

स. २९ .२१

सभ्यस्य दक्षिणे कार्यं पौण्डरीकं क्रमाद्बुधैः।।

ज्ञा. ६२. १०८

५.८.५५ पौण्डरीकाग्निकुण्डस्य लक्षणम्

वि. ३० . २१६

[1]आग्नेय्यां पौण्डरीकं त्रिवेदिसहितम् ऊर्ध्ववेदिविस्तारं सप्ताधिकत्रिंशदङ्गुलम् , एकैकं भागविस्तारोत्सेधम् अधोवेदिविस्तारं षडङ्गुलं प्रागादिषोडशदलैर्युतं, मध्ये निम्नमष्टाङ्गुलं, दशाङ्गुलं वा करोति।

1.शय्यावेद्याः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञा. ६२ . १०८

गार्हपत्याग्निकुण्डवत् वृत्तमेकैकं भागोन्नतं त्रिवेदिसहितं षडङ्गुलायतषोडश-दलैरधोवेदिकं मध्ये निम्नमष्टाङ्गुलमन्यत्सर्वमौपासनवत्

स. २९ . ३८ - ४२

सभ्याग्निकुण्डादाग्नेय्यां पौण्डरीकं प्रकल्पयेत्।।

द्वादशाङ्गुलमुत्सेधं समवृत्तं प्रकल्पयेत्।
अष्टादशभिरध्यर्धैरङ्गुलीभिर्भ्रमीकृतम्।।

वृत्तं तदूर्ध्ववेदि स्यात् पौण्डरीके विशेषतः।
भित्तेरुत्सेधविस्तारमूर्ध्ववेद्यास्त्रिकोलकम्।।

शेषं निम्नं च कर्तव्यं निम्नमष्टाङ्गुलं भवेत्।
मध्यवेदिसमुत्सेधं विस्तारो भाग उच्यते।।

अधोवेद्याः समुत्सेधश्चतुरङ्गुलमेव वै।
षडङ्गुलं तु विस्तारो दलैः षोडशभिर्युतः।।

५.८.५६ पौण्डरीकाग्निकुण्डस्याकारे उपपत्तिः

वि. ३० . २१५

पुण्डरीकवत्तपोलोकः। कुर्यात्तद्वत्पौण्डरीकम्

स. २९. २० , ६१, ६२

पौण्डरीकं तपोलोकं पद्माग्निं तु दलैर्युतम्।।

हृत्पुण्डरीकादन्योग्निः सञ्जातो ब्रह्मणस्तु यः।।

हृत्पुण्डरीकजातत्वात् पौण्डरीकं हि तद्विदुः।
तस्याकारश्च कुण्डस्य पुण्डरीकवदुच्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.५७ पौण्डरीकाग्निकुण्डपरिमाणम्

खि. १६ . २४६ - २५१

सभ्यस्य दक्षिणे कुर्यात्पौण्डरीकं क्रमाद्बुधः।
द्वादशाङ्गुलमुत्सेधं समवृत्तं प्रकल्पयेत्।।

अथाष्टादशभिस्सार्धैरङ्गुलैश्च भ्रमीकृते।
वृत्तं तदूर्ध्ववेदिः स्यात्पौण्डरीकानलस्य वै।।

उत्सेधो विस्तृतिश्चैव ऊर्ध्ववेद्या द्विगोलकम्।
निम्नमष्टाङ्गुलं कुर्याच्छिष्टं मृद्भिश्च पूरयेत्।।

मध्यवेद्यास्समुत्सेधं भागमात्रं प्रचक्षते।
विस्तारो भाग उद्दिष्टो मध्यवेद्यास्तथैव च ।।

अधोवेद्यास्समुत्सेधश्चतुरङ्गुलमेव च।
रसाङ्गुलं तु विस्तारः दलैष्षोडशभिर्युतः।।

ब्रह्मसोमपितृस्थानान्याचरेत्पूर्ववद्बुधः।

अ. १८

[अत्र निम्नमष्टाङ्गुलं कुर्यात् इत्यस्य स्थाने निम्नं पञ्चाङ्गुलं भवेदिति विशेषः।]

प्र. ११ . ५३

वा. ८.

आहवनीयवद्वेदि द्विमेखलमिति स्मृतम्।
शय्यावेद्यास्तु चाग्नेय्यां पौण्डरीकं प्रकल्पयेत्।।

धृत्यङ्गुलिभिरध्यर्धे भ्रमीकृत्य प्रयत्नतः।
समवृत्तं तदूर्ध्वं तु एकाङ्गुलमुदाहृतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अधोवेद्यास्तु विस्तारं षडङ्गुलमिति स्मृतम्।
वेदाङ्गुलोन्नतं प्रोक्तं कलाख्यं तद्दलैर्युतम्।।

मध्यवेद्यास्तु विस्तारम् उन्नतं युगसंख्यया।
ऊर्ध्ववेद्यास्तु विस्तारं वेदाङ्गुलमिति स्मृतम् ।।

उन्नतं च द्विगोलं स्यात् कारयेद्देशिकोत्तमः।
मध्ये निम्नं च कर्तव्यं सभ्यस्यैवाग्निकुण्डवत्।।

५.८.५८ पौण्डरीकाग्निमहिमा

ज्ञा. ५ . ७, ८, ९

स मुदा विरिञ्चोऽर्चयित्वा तस्याग्नेर्मध्ये वेदान् ऋषीन् पितॄन् भूतादीन् असृजत्।------------------------ एवं प्रवृत्ते काले कदाचित् ऋषयो ब्रह्मलोके भगवन्तमभ्यर्च्य ध्यानेन नियतमानसं पद्मासने सुखासीनं देवं पितामहं दृष्ट्वा आनम्य प्रमुखे मरीच्यत्रिभृग्वादयोऽब्रुवन्। 'भगवन्! कमर्चयसि कैर्मन्त्रैः केनाग्निना जुहोषि तत् सर्वं श्रोतुमिच्छाम' इत्ययाचन्त। स्नेहार्द्रमानसः तान् पृथक् पृथक् वक्ष्यामि युष्माभिश्चोदितं सर्वं शृणुध्वमृषिसत्तमाः। भगवन्तं विष्णुम् अर्चयामि चतुर्वेदमन्त्रैः वैदिकेन विधानेन पौण्डरीकाग्निं जुहोमीति। एवमुक्ते ते सर्वे विस्मयोत्फुल्ललोचनाः 'त्वया देव! कथितमग्निमच्युतपूजार्थं अस्मास्वनुग्रहं कुर्वि' त्यवोचन्। तच्छ्रुत्वा पितामहः 'सर्वतश्शान्तिकरं सर्वकामप्रदं पारमात्मिकं सर्ववेदमयमग्निं विष्णुपूजार्थं मुक्तिदं देवैरप्राप्यं गृह्णीते' त्युक्त्वा तेभ्योऽदात्। तस्मात् अस्मिन् अग्नौ यद्यत्क्रियते तदमोघञ्चैव भवति। आभिचारिकवश्यादिप्रतिषिद्धम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्मरणमात्रेणैवापगतपापो भवति किं पुनर्जपैर्होमैः। दुष्प्राप्यः पारमात्मिकोऽयमग्निः। तस्मादब्जाग्निः सम्यक् योग्यैरेव सेवितव्यः।

तस्मादग्निं प्रदक्षिणं कृत्वा विश्वमन्त्रेण प्रदक्षिणं प्रणामञ्च करोति यस्सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते। नित्यं स्वहृदि श्वेतवर्णं त्रिवेदिभिरलङ्कृतं अष्टसहस्रदलयुतमिलाकृतिं ध्यात्वा तन्मध्ये सहस्रज्वालायुतमाग्नेयमण्डलं तन्मध्ये प्रणवं नित्यं प्रातः कालेऽभ्यस्य विधूतपापसङ्घतो विष्णुलोकं स गच्छति। प्रयाणकालेऽप्येवं स्मृत्वा शङ्खचक्रगदाधरः श्यामलाङ्गश्चतुर्भुजो भूत्वा द्विजेन्द्रमारुह्य नमस्कृतः स्तूयमानः सुरगणैः सर्वान् लोकान् अतिक्रम्य विष्णुलोकं स गच्छति।

पूर्ववद्ध्यात्वा वारुणं मण्डलं तन्मध्ये श्वेताब्जं सहस्रदलयुतं तन्मध्ये चन्द्रबीजमादिषष्ठं सानुस्वारं प्रणवोभयसम्पुटितं ध्यात्वा नित्यं सायं प्रातः योऽभ्यस्यति स संवत्सरमात्राद्बृहस्पतिसमो भवति। य इदं पर्वणि पर्वणि स्वाध्यायं करोति ब्रह्मलोकं स गच्छति।

पद्मपुष्पैः कपिलाघृताक्तैः पुरुषसूक्तेन लक्षहोमं परमं जुहोति यः सोऽन्ते कलेवरं त्यक्त्वा परमं पदं गच्छति।

५.८.५९ श्रामणकशब्दस्य निर्वचनम्

स. २९ . ५७ , ५८

साकल्यमग्निहोत्रस्य तपसां चापि चालनम्।।

विचिन्त्य श्रमणे चाग्निं ब्रह्मा यमसृजत् पुरा।

तस्माच्छ्रामणकं प्राहुरग्निमेतं पुरातनाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.६० श्रामणकाग्नेः अधिकारी

स. २९ . ६०, ६१

एष श्रामणकाग्निस्तु वनस्थस्य विधीयते।
गृहस्थोऽग्निं यथा नित्यं जुहोत्यौपासनं बुधः।।
श्रामणकं वनस्थोऽपि तथा नित्यं जुहोति च ।

५.८.६१ श्रामणकाग्निकुण्डस्य स्थानम्

खि. १६ . २३६

शय्यास्थानस्य पूर्वे तु कुण्डं श्रामणकं चरेत्।।

५.८.६२ श्रामणकाग्निकुण्डस्य आकारः

स. २९. ३७, ५९

कुण्डं श्रामणकाग्नेश्च कुर्यात्सभ्याग्निकुण्डवत् ।।

सभ्याग्नेरेव भिन्नोऽभूदग्निः श्रामणको यतः।
तस्माद् द्वयोरग्निकुण्डं तुल्यमेवेति संस्मृतम्।।

५.८.६३ श्रामणकाग्निकुण्डस्य परिमाणम्

खि. १६ . १३७ - १४८

पूर्वन्तु वास्तुहोमार्थमालयस्य तथोत्तरे।।

स्थण्डिलञ्चोपलिप्यैव अलङ्कुर्यात्तु वर्णकैः।
सागरङ्गमनद्यादावाहृत्य सिकताः शुभाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशाङ्गुलमुत्सेधं तावद्घनमनिन्दितम्।
द्वात्रिंशदङ्गुलायामं चतुरश्रं समन्ततः।।

ततो मध्येऽवकाशः स्याच्चतुर्विंशतिकाङ्गुलम्।
अवगाढं तु तस्यैव द्वादशाङ्गुलमिष्यते।।

ततः कुर्याद्बहिर्वेदिं द्विचत्वारिंशदङ्गुलैः।
उत्सेधो भाग उद्दिष्टः ऊर्ध्ववेद्या विधानतः।।

मध्यवेद्यास्तु विस्तारः पञ्चाङ्गुल इति स्मृतः।
उत्सेधो भाग उद्दिष्टः मध्यवेद्याः प्रकीर्तितः।।

ततः कुर्यादधो वेदिं पञ्चाशद्भिरथाङ्गुलैः।
उत्सेधो भाग उद्दिष्टः विस्तारस्तु द्विगोलकः।।

दक्षिणे ब्रह्मणः पीठं षोडशाङ्गुलमायतम्।
चतुरश्रं समं कुर्यात् भागोन्नतिसमन्वितम्।।

तस्य पश्चिमभागे तु पितृस्थानं प्रकल्पयेत्।
षोडशाङ्गुलमायामः उन्नतं गोलकं भवेत्।।

शूर्पाकारञ्च कृत्वा तु दक्षिणाग्रं प्रकल्पयेत्।
उत्तरे सोममुद्दिश्य षोडशाङ्गुलमायतम्।।

भागोन्नतं प्रकुर्वीत समवृत्तं तु पीठकम्।
वेदिप्रमाणं कर्तव्यं सीवनीक्षतचन्द्रवत्।।

एवं श्रामणकं कुण्डं कृत्वाऽथाग्निं च साधयेत्।

ज्ञा. ४४ . ७८ ; स. २९ . ३७ , ३८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा.८

मध्ये गर्तं प्रकुर्वीत द्वादशाङ्गुलमुच्यते।।

अथ पञ्चाङ्गुलं वेदिविस्तारमिति केचन।
कुण्डमध्ये चतुर्विंशत्यङ्गुलान्तमिति स्मृतम्।।

कुण्डं श्रामणकं चैव कल्पयेत्सभ्यवद् बुधः।

५.८.६४ औपासनशब्दस्य निर्वचनम्

स. २९ . ५४ - ५६

त्रीनग्नीन् वाथ पञ्चाग्नीनाहिताग्निर्जुहोत्यमून्।।

आवसथ्याख्यया केचिदाहुरौपासनं च वै।
विवाहादिगृहस्थेन निधायाजस्रमेव च ।।

होमैरुपासनादग्निरौपासन इतीरितः।

५.८.६५ औपासनाग्निकुण्डस्य आकारः

स. २९ . ५६, ५७

भेदो ह्याहवनीयस्य चाग्निरौपासनो यतः।।

कुण्डमौपासनस्यापि ज्ञेयमाहवनीयवत्।

५.८.६६ औपासनाग्निकुण्डस्य स्थानम्

खि. १६ . २३७

पूर्वोक्तेन विधानेन ऐन्द्रे चौपासनं चरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.६७ औपासनाग्निकुण्डस्य परिमाणम्

खि. १६ . १७४ - १८२

देवालयस्य परितः कुण्डमौपासनं चरेत्।
स्थण्डिलञ्चोपलिप्यैव वालुकाभिः प्रपूरयेत्।।

द्वात्रिंशदङ्गुलायामं चतुरश्रं समन्ततः।
षडङ्गुलसमुत्सेधं स्थलं सम्यक् प्रकल्प्य च ।।

तत्र मध्येऽवकाशः स्याच्चतुर्विंशतिकाङ्गुलम्।
अवगाढन्तु तस्यैव भागमात्रमुदाहृतम्।।

तद्बाह्ये बाह्यवेदिस्स्याच्चत्वारिंशद्भिरङ्गुलैः।
उत्सेधो विस्तरश्चैव भागमात्रं प्रवक्ष्यते।।

ब्रह्मसोमपितृस्थानकल्पनं विधिना चरेत्।
द्वादशाङ्गुलमायामं चतुरश्रं समन्ततः।।

उत्सेधो भाग उद्दिष्टः ब्रह्मस्थानस्य कारयेत्।
तस्य पश्चिमभागे तु पितृस्थानं प्रकल्पयेत्।।

द्वादशाङ्गुलमायाममुन्नतं गोलकं भवेत्।
शूर्पाकारं तु कृत्वा तु दक्षिणाग्रं प्रकल्पयेत्।।

उत्तरे सोममुद्दिश्य स्थानं वृत्तं समाचरेत्।
द्वादशाङ्गुलमायाममुन्नतं गोलकं भवेत्।।

वेदिप्रमाणं कर्तव्यं सीवनीक्षतचन्द्रवत्।
अक्षिमोचनमुद्दिश्य चैवमौपासनं चरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.८.६८ सभ्याद्यग्निकुण्डानां मेखलासङ्ख्या

वा. ८

अत ऊर्ध्वं प्रवक्ष्यामि सभ्यादीनां पृथक् पृथक्।
सभ्यस्य पौण्डरीकस्य मेखलात्रयमुच्यते।।

सर्वेषामन्यकुण्डानां द्विमेखलमिति स्मृतम्।

प्र. ११ . ५७

५.८.६९ अन्वाहार्याग्निकुण्डानां वेदिसङ्ख्या वेदिस्वरूपं च

ज्ञा. ६२ . १०८

अन्वाहार्यावसथ्यगार्हपत्यानां कुण्डस्य वेदिद्वयं प्रत्येकं भागोन्नतविस्तारं मध्ये निम्नं षडङ्गुलमन्यत् सर्वमौपासनकुण्डवत्।

५.८.७० अग्निकुण्डवेदिपरिमाणम्

स. २९. ३१ - ३५

भागं तु परितो हित्वा शेषं निम्नं षडङ्गुलम्।
अधोवेदिं च परितः चतुरङ्गुलविस्तृताम्।।

एवं द्विवेदिसहितं कुण्डान्येतानि[1] कल्पयेत्।
वेद्योर्भागस्तु विस्तारश्चैकैको भाग उन्नतः।।

द्वात्रिंशदङ्गुलायामामूर्ध्ववेदिं चतुर्दिशम्।
वेदिस्तु मध्यमा प्रोक्ता द्विचत्वारिंशदङ्गुला।।

पञ्चाशदङ्गुलायामा ह्यधो वेदिः समन्ततः।

---

1. औपासनान्वाहार्यगार्हपत्यावसथ्यानां कुण्डानि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिसृणामपि वेदीनां विस्तारश्चोच्छ्रयस्तथा ।।

प्रतिष्ठाङ्गुलमुद्दिष्टं प्रत्येकं च तथैव च।
मध्यवेद्यास्तु विस्तारः पञ्चाङ्गुलमिति स्मृतम्।।

प्र. ११ . ५८ - ६०

एकैकवेद्या विस्तारमुन्नतं चतुरङ्गुलम्।
सभ्यस्य मध्यमं पञ्च पद्मस्याधः षडङ्गुलम्।।

औपासनोर्ध्ववेद्याः स्यादुन्नतं तु द्वियङ्गुलम्।
दक्षिणोत्तरयोश्चैव संस्थानं ब्रह्मसोमयोः।।

द्वादशाङ्गुलसंयुक्तं चतुरश्रं सुवृत्तकम्।

नि. २०

अग्निकार्यविधिं वक्ष्ये सर्वलोकहिताय च।
कुण्डे वा स्थण्डिले वापि अग्नेरायतनं द्विधा।।

कुण्डान्युक्तानि सर्वाणि यावदुन्नतविस्तृतम्।
स्थण्डिलं सम्प्रकल्प्यैव मृदं तत्रैव निश्चयम्।।

वेदिं कृत्वोर्ध्वमुद्दिश्य गोलकद्वयमावृतम्।
मध्ये छिद्रं प्रकुर्वीत खनित्वात्र विशेषतः।।

तदन्ते गोलकं हित्वा शेषं निम्नं तदुन्नतम्।
स्थालादुपरि तत्रैव गोलकेनैव छिद्रितम्।।

मध्ये वेद्युपवेदी च उक्तवत्परितः क्रमात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रागग्रास्तिस्रो रेखास्तु उदगग्रास्तिस्रलेखनम्।।

ब्रह्मा वैवस्वतस्सोमः मध्ये दक्षिणवामयोः।
प्रागग्राणां तिसृणां तु अधिदेवाः प्रकीर्तिताः।।

रुद्रो विष्णुश्च शक्रश्च मध्ये पश्चिमपूर्वयोः।
तिसृणामुदगग्राणामधिदेवाः प्रकिर्तिताः।।

ब्रह्मणा च पुरा प्रोक्तं पञ्चाग्निं पञ्चलोकवत्।
कुण्डान्येवं प्रकारेण तानि निश्चित्य यत्नतः।।

५.८.७१ दिग्देवतानामग्निकुण्डस्थानम्

स. २९ . ७५ , ७६

परितो यागशालायां तस्य तस्य दिशि क्रमात्।।

दिग्देवतानामष्टानामन्येषां च यथाविधि।
औपासनाग्निकुण्डं च कारयेत पृथक् पृथक्।।

५.८.७२ परिवारदेवानामग्निकुण्डकल्पनम्

ज्ञा. ६२ . १०८

सर्वपरिवारदेवानां बिम्बं कृत्वा तत्तदालयाभिमुखे च औपासनविधिना महाग्निकुण्डं शयनं कुम्भपूजाञ्च कारयेत्। दिग्देववीशशान्तचक्रभूतानां वा तेषां बिम्बाभावे देवेशस्यैव पञ्चाग्नीन् पौण्डरीकाग्निकुण्डानि वा कल्पयेदित्येके । बिम्बाभावेऽपि दिग्देववीशशान्तचक्रमहाभूतानां पृथगेव होमं तन्त्रतः कुर्यादिति भृगुः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. १८

एवमेवं च कृत्वा तु कुण्डमौपासनस्यवत्(?)।।

गरुडस्य शैषिकस्यैव मुखे चौपासनं भवेत्।

इन्द्रादिलोकपालानां प्रमुखेऽग्निं पृथक् पृथक्।।

औपासनविधानेन कुण्डं कृत्वा सलक्षणम्।

भूतस्थाने प्रकुर्वीत भूतपीठस्य पूर्वतः।।

एवं कुण्डं च कृत्वा तु पश्चादग्निं च साधयेत्।

ग्रहशान्तिं च कृत्वा तु ग्रहशान्तिविधानतः।।

स. २९ . ७७ ; खि. १६ . २२२ - २५४

वि. ३० . २१७, २१८

अथवा देवेशस्यास्य यज्ञस्य पञ्चाग्नीन् पौण्डरीकाग्निं च, कृत्वा यागशालां परितश्चैकभक्तियुतां प्रपां कृत्वा, इन्द्रेशानयोर्मध्ये वीशस्य, इन्द्राग्न्योर्मध्ये चक्रस्य, यमपावकयोर्मध्ये श्रीभूतस्य, यमानिलयोर्मध्ये ब्रह्मणः, नीलवरुणयोर्मध्ये पुण्यस्य, वरुणोदानयोर्मध्ये ख्यातीशस्य, वायुसोमयोः मध्ये शङ्खस्य, सोमेशानयोर्मध्ये शान्तस्य, प्राग्द्वारादुत्तरे मणिकसन्ध्ययोर्दक्षिणे न्यक्षस्य, दक्षिणद्वारपूर्वे व विखनसतापसयोः पश्चिमे विवस्वतः, पश्चिमद्वारदक्षिणे किष्किन्धतीर्थयोरुत्तरे मित्रस्य, उत्तरद्वारपश्चिमं विकटशेषयोः, पूर्वे क्षत्तुः, प्राच्यां दक्षिणोत्तरयोर्नित्याऽक्षयोर्दक्षिणोत्तरयोर्ध्वज-विकटशेषयोः, पूर्वे क्षत्तुः, प्राच्यां दक्षिणोत्तरयोर्नित्याऽक्षयोर्दक्षिणोत्तरयोर्ध्वज-

Digitized by Madhuban Trust, Delhi

ब्रह्मेशपुण्यभृगून्विना कारयेन्मध्यमोत्तमम्। श्रीभूतचक्रवीशान्विना कारयेन्मध्यममध्यमम्। लोकपालान्विना कारयेन्मध्यमाधमम्। देवेशस्यैव पञ्चाग्नीन् कारयेदधमोत्तमम्। त्रेताग्निविधानेन गार्हपत्याहवनीयाग्नीन् कल्पयित्वा एतेषां प्रधाने गार्हपत्याग्नौ सभ्यवत् सर्वं कुर्यात्, एतदधममध्यमम्। सभ्याग्निमेकमेव कृत्वा सर्वहोमानस्मिन्नग्नौ जुहुयादेतदधमाधमम् आचक्षते। सर्वत्र पौण्डरीकाग्निं कारयेदिति केचित्। एवं नवधा भवति, अन्यत्सर्वं समानम्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९. ध्रुवबेरादीनामक्ष्युन्मोचनम्

५.९.१ शिल्पिकर्तृकध्रुवबेरस्याक्ष्युन्मोचनकालः

य. २३ . २०, २१

प्रतिष्ठादिवसात्पूर्वं नवमे वाथ सप्तमे।।

पञ्चमे वा तृतीये वा द्वितीये वाप्यमन्त्रकम्।
शिल्पिना कारयित्वा तु शुद्धिं चैवात्र कारयेत्।।

वि. २७ . २०४

स. २८ . ६४, ६५

प्रतिष्ठादिवसात्पूर्वं तृतीयेऽहन्यमन्त्रकम्।।
कारयेद् ध्रुवबेरस्य शिल्पिनैवाक्षिमोचनम्।

खि. १६ . ११४ ; नि. २८

ज्ञा. ६० . १०४

[अत्र तृतीये इत्यस्य स्थाने पञ्चमे इति विशेषः।]

क्रि. ६ . ६३

[अत्र काश्यपज्ञानकाण्डवत्।]

५.९.२ अक्ष्युन्मोचनकालस्य उत्तमादित्रैविध्यम्

अ. १५

प्रतिष्ठोक्तदिनात्पूर्वं सप्ताहे चाक्षिमोचनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्ताहं चोत्तमं विद्यात् पञ्चाहं मध्यमं भवेत्।
त्रियहं चाधमं विद्यात् तदर्हं च समाचरेत्।।

५.९.३ आचार्यकर्तृकध्रुवबेराक्ष्युन्मोचनस्य कालः

खि. १६ . १३६ ; १९३ , १९४

[1]परेऽह्नि कार्यं मन्त्रेण गुरुणा चाक्षिमोचनम्।।

प्रतिष्ठोक्तदिनात्पूर्वं द्वितीये वा समाहितः।।
आचार्यो मन्त्रसंयुक्तमाचरेदक्षिमोचनम्।

स. २८ . ७० ; नि. २८

ज्ञा. ६०. १०५

प्रतिष्ठादिनात्पूर्वं --------- तृतीये द्वितीये वा समन्त्रकमक्ष्युन्मोचनं कारयेदिति केचित्।

प्र. ११ . ७३, ७४

हित्वार्कराहुसौराणाम् उदयं तु द्विलोचने।
नयनोन्मीलनं कुर्यात्सर्वसम्पत्समृद्धये।।
अन्धनक्षत्रके कुर्यात्सर्वनाशो न संशयः।

य. २३ . २२ ; वा. ८ ; वि. २७ . २०४

वा. ८

अथवा कारयेद्विद्वान् मन्त्रवच्चाक्षिमोचनम्।।
जलाधिवासनात्पश्चात् कारयेत्तद्विचक्षणः।

1.अमन्त्रकाक्षिमोचनं शिल्पिना यस्मिन् दिने क्रियते तस्मात् परस्मिन् दिने इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.९.४ वर्णयुक्तध्रुवबेरस्याक्ष्युन्मोचनकालः

अ. १४

वर्णयुक्ते ध्रुवे कुर्यात्पूर्वेद्युश्चाक्षिमोचनम्।।

५.९.५ कौतुकादिबेराणामक्ष्युन्मोचनकालः

स. २८ . ५४, ५५

प्रतिष्ठोक्तदिनात्पूर्वं पञ्चमे ह्यक्षिमोचनम्।।

कारयित्वा विधानेन मन्त्रवच्चाक्षिमोचयेत्।

नि. २८

५.९.६ अक्ष्युन्मोचनार्थं यागशालाप्रकल्पनम्

प्र. ११ . ६१, ६२

यागस्थानस्य पूर्वे तु प्रपां कृत्वा विचक्षणः।।

नयनोन्मीलनार्थाय यागशालां प्रकल्पयेत्।

क्रि. ६ . ६३, ६४

[अत्र कूटमित्यधिकम्।]

वा. ८

[अत्र आग्नेय्याम् ऐशान्यां दक्षिणस्यां वा यागमन्दिरं प्रकुर्वीत इत्यधिकम्।]

खि. १६ . ९२ - ९६

आलयस्योत्तरे पार्श्वे कुर्यात् कूटं प्रपां तु वा।

चतुर्हस्तायतां दिक्षु प्रत्येकं चतुरश्रकाम्।।

चतुर्हस्तसमायुक्तां चतुर्हस्तोच्छ्रयां तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तालोत्सेधं तलं तत्र वास्तुहोमार्थमिष्यते।।

मण्डपं वा प्रपां वाथ विमानाभिमुखे तथा।

कारयेदधिवासार्थमक्ष्युन्मेषाय कर्मणे।।

सर्वेषां मण्डपानां च प्राकारस्यालयस्य च।

स्तम्भवेष्टनवस्त्रैश्च नानावर्णपरिष्कृतैः।।

अलङ्कारक्रियां कुर्याद्वाद्यघोषपुरस्सरम्।

५.९.७ अक्ष्युन्मोचनार्थं कौतुकादिबेराणां रत्नन्यासपूर्वकं पीठे संयोजनम्

वि. २७ . २०४, २०५

कौतुकादिबिम्बानामक्ष्युन्मोचनं चेत् पूर्वेद्युस्तद्दिने वा पीठ सङ्घातं कुर्यात्। आलयाभिमुखे गोमयेनोपलिप्य पैष्ट्या भूमिमलङ्कृत्य तन्मध्ये धान्यराशौ पीठं सन्न्यस्य तन्मध्ये ब्रह्माणमिन्द्रादिदिग्देवान् तत्तद्दिक्षु तत्तन्नाम्नाऽभ्यर्च्य पुष्पादीन् संशोध्य 'ब्रह्मा देवाना' (वै. म. प्र. ६) मिति ब्रह्मस्थाने ब्रह्ममणिम्, 'इन्द्रं प्रणवन्त' (वै. म. प्र. ८) मिति इन्द्रे वज्रमणिम्, 'अग्नावग्नि' (वै. म. प्र. ८) रिति आग्नेयां मौक्तिकं, 'यमो दाधारे' (वै.म.प्र. ९ व. ४) ति याम्ये वैडूर्यम्. 'वसवः प्रथम' (वै. म. प्र. ९) इति नैर्ऋत्यां शङ्खजम्, 'एते शत (वै. म. प्र. ८) मिति वारुण्यां स्फटिकं , 'मरुतः परमात्मा' (वै. म. प्र. ९) इति वायव्यां पुष्यकम्, 'सोमं राजान' (वै. म. प्र. ९) मिति सौम्ये चन्द्रकान्तम्, 'ईशान' (वै.म. प्र. ९) इति ऐशान्यां नीलं च क्रमेण विन्यसेत्। अथवा चतुर्दिक्षु पञ्चरत्नानि निक्षिप्य रत्नालाभे सुवर्णं निक्षिप्य 'भूरसिभू' (वै.म. प्र. ८) रित्यादिना पीठे बेरं संयोज्य पश्चाच्छिल्पिनमाहूय सुदृढं कारयित्वा अक्ष्युन्मोचनं कारयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्र. ११ . ८० - ८२

[अत्र धातूनां बीजानां सुवर्णस्य च न्यासः अधिकः।]

य. २३ . २३ - ३५

कौतुकादिषु बेरेषु लोहितेषु ततो बुधः।
पूर्वेद्युस्तद्दिने वाथ पीठसङ्घातमाचरेत्।।

आलयाभिमुखे वाथ यजमानगृहेऽथवा।
कर्ममण्डपमध्ये वाऽप्यन्यदेवालयेऽथवा।।

गोमयेनोपलिप्यैव पञ्चवर्णैरलङ्कृतम्।
धान्येन स्थण्डिलं कृत्वा पीठं मध्ये सुसन्न्यसेत्।।

धात्रादिभूतपर्यन्तमवटं कारयेद् बुधः।
पीठस्य दक्षिणे भागेऽप्याचार्यश्चोत्तरामुखः।।

तस्य पश्चिमभागे तु किञ्चिद्दूरं समाश्रितः।
धृतोर्ध्वपुण्ड्रोपवीतः स्थपतिः प्राङ्मुखः स्थितः।।

पवित्रं मनसा ध्यात्वा देवेशं च पुनर्गुरुः।
एकजानुसमासीनः ध्यात्वा प्राङ्मुखमासयेत्।।

पश्चाद्रत्नान्तसमादाय अधिपांस्तेषु संस्मरेत्।
पीठोपरि च दिक्पालान् धातारं चार्चयेत्क्रमात्।।

ब्रह्मस्थाने ब्रह्ममणिमैन्द्रे वज्रमणिं न्यसेत्।
आग्नेय्यां मौक्तिकं याम्ये वैडूर्यं नैरृते बुधः।।

शङ्खजं वारुणे मन्त्री स्फाटिकं पुष्यकान्तकम्।
वायव्ये चन्द्रकान्तं च सौम्ये नीलं ततोपरि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्दिग्दैवत्यमन्त्रांश्च जप्त्वोपांशु न्यसेद् गुरुः।
रत्नालाभे यथालाभं सौवर्णं वाथ निक्षिपेत्।।

पश्चाद्देवं समभ्यर्च्य भूरसीति जपन् गुरुः।
प्रतिष्ठाप्य नमस्कृत्य आहूय स्थपतिं पुनः।।

पीठस्योपरि देवेशं स्थपतिश्चार्चयेत्पुनः।
सूत्रान्प्रसार्य स्वस्थाने स्थापयेत्प्रतिमाः पुनः।।

गुरुः परीक्ष्य सुदृढं कृत्वा यन्त्रेण बुद्धिमान्।
शिल्पिनं च प्रपूज्यैव तं विसृज्य -------

खि. १६ . ९६ - १०२

कृत्वाऽङ्कुरार्पणं रात्रौ प्रभातेऽर्चां नवां यदि।।

कौतुकं बेरमादाय पीठं कृत्वा सलक्षणम्।
पश्चाच्छिल्पिनमाहूय सम्पूज्याभरणाम्बरैः।।

तदर्चायास्तु पीठे तु मध्ये च परितस्तथा।
पञ्च स्थानानि निम्नानि शिल्पिना परिकल्पयेत्।।

तेषां मध्ये पदे रत्नं 'ब्रह्मा देवा' दिना न्यसेत्।
ऐन्द्रे वज्रं सुसन्न्यस्य याम्ये वैदूर्यमेव च।।

वारुणे स्फटिकं न्यस्य सौम्ये मौक्तिकमेव च ।
तत्तन्मन्त्रं समुच्चार्य तत्तद्दिक्षु सुसन्न्यसेत्।।

एवं रत्नानि विन्यस्य पञ्चस्थानेषु मन्त्रवित्।
ताम्रेण शिल्पिना तानि समाच्छाद्य दृढं पुनः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मिन् पीठे क्रमेणैव शिल्पिनाऽर्चां सुयोजयेत्।
दृढं संयोज्य तं पीठे निश्छिद्रमचलं चरेत्।।

स. २८ . ५३, ५४ ; नि. २८

५.९.८ अक्ष्युन्मोचनोपकरणानामुपादानद्रव्यम्

स. २८ . १४, १५

अक्षिमोचनमुद्दिश्य वर्णपात्रं च तूलिकाम्।
सूचीं दृढकरीं चापि सुवर्णेनैव कारयेत्।।

कर्षमात्रसुवर्णेन तदर्धार्धेन वा कृताम्।
स्वशक्त्या वा प्रयत्नेन शलाकां कारयेत्सुधीः।।

अ.१५

वि. २९ . २१४

[अत्र तूलिका इत्यस्य स्थाने उलिका इति।]

प्र. ११ . ६६

हेमपात्रैस्तु सूचीभ्यां रजतैर्वापि चाहरेत्।
उलिकां ताडनीं चैव शिलां लोहमयस्य वै।।

वा. ८

उलिकां ताडनीं चैव रौप्येणैव कृतां हरेत्।।

हैमेन कृतसूचीभ्यां राजतैर्वापि चाहरेत्।

५.९.९ ध्रुवबेरस्य अमन्त्रकमक्ष्युन्मोचनं शिल्पिकर्तृकम्

खि. १६ . ११४ - ११६

शिल्पशास्त्रोक्तविधिना शिल्पिना चाक्षिमोचनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कारयित्वा गुरुर्धीमान् दृष्टिमण्डलमार्गतः।
दृष्टिमण्डलमध्ये तु यूकामात्रं व्यपोहयेत्।।

अमन्त्रकं च यत्सर्वं शिल्पिना कारयेत्क्रमात्।
वस्त्रैराभरणैस्सर्वैः पूजयित्वा तु शिल्पिनम्।।

प्र. ११ . ६२, ६३

वा.८

[गौतमीयोक्तमार्गेण शिल्पिना अक्षिमोचनं कुर्यादित्युच्यत इति विशेषः]

५.९.१० शिल्पिकर्तृकाक्ष्युन्मोचनानन्तरं ध्रुवबेरशोधनम्

य. २३ . ३६ - ४०

गव्याद्यैरभिषिच्यैव आहरेत्प्रतिमां पुनः।
आलयाभिमुखे पीठे स्थापयेत्प्राङ्मुखं हरिम्।।

आचार्यस्सुप्रसन्नात्मा यजमानेन ऋत्विजः।
सार्धं स्नात्वा विधानेन ब्रह्मयज्ञं च कारयेत्।।

-------------------------------------।
औपासनाग्निकुण्डं च कृत्वा मध्ये सलक्षणम् ।।

तस्यैवोत्तरतः पार्श्वे भूमियज्ञं यजेत्क्रमात्।
पर्यग्निं कारयित्वा तद् बिम्बस्यातीव पार्श्वतः।।

हिरण्यपवमानाद्यैस्समभ्युक्ष्य कुशोदकैः।
संस्नाप्य समलङ्कृत्य वस्त्रैराद्यैर्नवैस्तथा।।

खि. १६ . १६७ - १७३

प्रभाते च स धर्मात्मा सूत्रोक्तेन विधानतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्नात्वा स्नानविधानेन आचार्यस्स्थापकैस्सह।
देवालयं शनैर्गत्वा प्रदक्षिणमथाचरेत्।।

मृष्टसिक्तोपलेपाद्यैस्संस्कुर्याद्देवतागृहम्।
अक्ष्युन्मोचनमुद्दिश्य वास्तुहोमं समाचरेत्।।

अक्ष्युन्मेषमथो वक्ष्ये कौतुकस्य ध्रुवस्य च ।
कृत्वाङ्कुरार्पणं रात्रौ प्रभाते मध्यमेऽहनि।।

प्रासादस्योत्तरे पार्श्वे कृते श्रामणकेऽनले।
आघारं विधिवत्कृत्वा मथितेनैव वह्निना।।

सूत्रोक्तेन विधानेन भूमियज्ञं यजेत्क्रमात्।
पर्यग्निं चैव कृत्वा तु बिम्बपार्श्वे विशेषतः।।

पञ्चगव्यैस्समभ्युक्ष्य गायत्र्या प्रणवाद्यया।
स्थानशुद्धिं ततः कृत्वा पुण्याहं वाचयेत्क्रमात्।।

स. २८ . ७१, ७२ ; ज्ञा. ६० . १०४ ; क्रि. ६ . ६४

प्र. ११ . ६७, ६८

वा. ८

वास्तुहोमाङ्गहोमार्थं कल्पयेत्स्थण्डिलं पृथक्।।

आघारं विधिवद्धुत्वा परिषिच्य च पावकम्।
वास्तुहोमं कृतं पूर्वं पर्यग्निं चात्र कारयेत्।।

प्रोक्षयित्वा तु मन्त्रज्ञः पुनश्चैवाक्षिमोचनम्।
देवस्याभिमुखे चैव प्रच्छन्नपटमास्तरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तराभिमुखो भूत्वा देवशुद्धिं च कारयेत्।
शिल्पिस्पर्शविशुद्ध्यर्थं प्रोक्षयेद्देशिकोत्तमः।।

वि. २७ . २०५

आलयाभिमुखे मण्टपं, प्रपां वा, अलङ्कृत्य बिम्बं संस्नाप्य, तन्मध्ये विष्टरे संस्थाप्य उत्तरे चौपासनाग्निकुण्डं कृत्वा वास्तुहोमं हुत्वा बिम्बस्यातीव पार्श्वतः पर्यग्निं कृत्वा पञ्चगव्यैर्बेरमभ्युक्ष्य

नि. २८ ; अ. १५

५.९.११ वर्णयुक्तयोः केवलयोश्च ध्रुवकौतुकयोः शोधनप्रकारः

खि. १६ . १३३ - १३७

बिम्बशुद्धिं प्रवक्ष्यामि ध्रुवकौतुकयोस्ततः।
वर्णयुक्ते ध्रुवे तत्र चित्राभासे विशेषतः।।

तदालयकृतेनापि वास्तुहोमेन वै तथा।
अङ्गहोमेन चेष्टेन पुण्याहं प्रोक्षणं चरेत्।।

द्विजेभ्यो रुक्मदानेन यथाशक्ति कृतेन तु।
भोजनेन च विप्राणां बेरशुद्धिर्विधीयते।।

शिल्पिनं तु विसृज्यैव पश्चात्कार्यं समाचरेत्।
परेह्नि कार्यं मन्त्रेण गुरुणा चाक्षिमोचनम्।।

अक्षिमोचनमुद्दिष्टं बेरशुद्ध्यर्थमादितः।

५.९.१२ अक्ष्युन्मोचनोत्तरं दर्शनीयानां द्रव्याणां स्थापनम्

क्रि. ६ . ७३ - ७९

धान्यराशिं तु कृत्वा तु तिलराशिं प्रकल्पयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आज्यं दधि मधु क्षीरं प्रस्थमात्रं पृथक् पृथक्।
कांस्यपात्रे गृहीत्वैव सुवर्णकलशान्वितम्।।

दण्डके धान्यपीठे तु स्थापयेदुत्तरादिकम्।
सामवेदं यजुर्वेदं ऋग्वेदाथर्ववेदकौ।।

क्रमेण देवताः पूज्याः गामेकां लक्षणान्विताम्।
स्वर्णशृङ्गां रौप्यखुरां सवस्त्रां कांस्यदोहनाम्।।

सवत्सां पूर्णपुष्टाङ्गां देवाग्रे स्थापयेद् बुधः।
धान्यराशौ तथा सोमं तिलराशौ पितॄनपि।।

जप्त्वा शुद्धा इम इति गोसावित्रीमनुस्मरन्।
पूजयेत्तत्तदङ्गेषु तदुक्ता देवता अपि।।

तृणमुष्टिं प्रदायास्यै गोसूक्तेनाभिमृश्य च ।
अत्र गावो हिम इति गोसूक्तमभिधीयते।

खि. १६ . १८६ , १८७ ; प्र. ११. ६३ - ६५; ज्ञा.६०.१०४ ; वा.८

स. २८ . ७७ - ८०

[अत्र 'अष्टद्रोणादहीना तु राशिरित्यभिधीयते' इत्यधिकमिति विशेषः।]

नि. २८

[अत्र 'षड्द्रोणादप्यहीना तु राशिरित्यभिधीयते' इत्यधिकमिति विशेषः।]

य. २३ . ४५ - ५०

खुरशृङ्गान् सुवर्णेन समाबद्ध्य सवत्सकाम्।
गामेकां वै सुसंस्थाप्य देवस्याभिमुखे शुभाम्।।

घृतं मधु दधि क्षीरं प्रस्थमात्रादहीनकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौवर्णे राजते ताम्रे कांस्यपात्रे सहाटके।।

समापूर्य ततो मन्त्री चोत्तरान्तं न्यसेत्क्रमात्।
सामवेदं यजुर्वेदमृग्वेदाथर्ववेदकौ।।

क्रमात्तेषु समभ्यर्च्य धान्यान्यष्टौ समाहरेत्।
शालिव्रीहिप्रियङ्गूश्च माषनिष्पावसर्षपान्।।

तिलमुद्गौ च धान्यानि प्रत्येकं द्रोणमाहरेत्।
अथवा तत्समं व्रीहीन् गृह्णीयादेकमेव वा।।

तदर्धं तण्डुलं प्रोक्तं तदर्धं तिलमाहरेत्।
वायुं तस्मिन्समभ्यर्च्य वेदाध्ययनमाचरेत्।।

खि. १६ . १९५ - १९७ ; वि. २७ . २०६

अ. १५

सवत्सां गां सुसङ्गृह्य निर्व्रणां च ? सुलक्षणम्।।

सुवर्णेनैव कृत्वा तु खुरौ शृङ्गौ च बन्धयेत्।

देवस्याभिमुखे कुर्यात्प्रच्छन्नपटमाहरेत्।।

शालिव्रीहियवा मुद्गास्तिलमाषप्रियङ्गवः।
गोधूमास्सर्षपाश्चैव वर्णं चैव सुसङ्ग्रहेत्।।

देवस्याभिमुखे तानि पृथगेवं सुसङ्ग्रहेत्।
सौवर्णं राजतं ताम्रं कांस्यं मृण्मयमेव च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चपात्रं च कृत्वा तु प्रस्थमात्रं पृथक् पृथक्।
आम्लेन शोधयित्वा तु वारिणा च सुशोधयेत्।।

क्षीरं दधि घृतं चैव मधुसिद्धार्थकं भवेत्।
स्वर्णपात्रे घृतं पूर्य रजते क्षीरपूरितम्।।

मधु ताम्रे सुसम्पूर्य मृत्पात्रे तु दधि ग्रहेत्।
कांस्ये सिद्धार्थकं ग्राह्यं प्रस्थमात्रं पृथक् पृथक्।।

सवत्सां गां बन्धयेत्तत्र तृणापूपं निवेदयेत्।

५.९.१३ ध्रुवबेराक्ष्युन्मोचने होमः

खि. १६. १७४ - १८२

देवालयस्य परितः कुण्डमौपासनं चरेत्।
स्थण्डिलञ्चोपलिप्यैव वालुकाभिः प्रपूरयेत्।।

द्वात्रिंशदङ्गुलायामं चतुरश्रं समन्ततः।
षडङ्गुलसमुत्सेधं स्थलं सम्यक् प्रकल्प्य च।।

तत्र मध्येऽवकाशः स्याच्चतुर्विंशतिकाङ्गुलम्।
अवागाढन्तु तस्यैव भागमात्रमुदाहृतम्।।

तद्बाह्ये बाह्यवेदिस्स्याच्चत्वारिंशद्भिरङ्गुलैः।
उत्सेधो विस्तरश्चैव भागमात्रं प्रवक्ष्यते।।

ब्रह्मसोमपितृस्थानकल्पनं विधिना चरेत्।
द्वादशाङ्गुलमायामं चतुरश्रं समन्ततः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सेधो भाग उद्दिष्टः ब्रह्मस्थानस्य कारयेत्।
तस्य पश्चिमभागे तु पितृस्थानं प्रकल्पयेत्।।

द्वादशाङ्गुलमायाममुन्नतं गोलकं भवेत्।
शूर्पाकारं तु कृत्वा तु दक्षिणाग्रं प्रकल्पयेत्।।

उत्तरे सोममुद्दिश्य स्थानं वृत्तं समाचरेत्।
द्वादशाङ्गुलमायाममुन्नतं गोलकं भवेत्।।

वेदिप्रमाणं कर्तव्यं सीवनीक्षतचन्द्रवत्।
अक्षिमोचनमुद्दिश्य चैवमौपासनं चरेत्।।

वि. २७ . २०५

दक्षिणे अभिमुखे मनोरमे चौपासनाग्निकुण्डं कृत्वा आघारं हुत्वा दद्भ्यः स्वाहाद्यङ्गहोमं, मौलिमालादींश्च जुहुयात्, महाभूतदेवत्यसूक्तं, विष्णुसूक्तं, पुरुषसूक्तं, वैष्णवं श्रीभूमिदेवत्यं, ब्राह्मं, रौद्रं च हुत्वा

स. २८ . ७२ - ७६

[अत्र जयादिहोमः अधिकः।]

ज्ञा. ६० . १०४ ; नि. २८

क्रि. ६ . ८६

[देवेन सह मुख्यपरिवाराणामक्ष्युन्मोचने तेषां पृथक् पृथक् होमः न करणीय इत्युच्यते इति विशेषः]

अ. १५

आघारं पूर्ववत्कृत्वा वैष्णवं च सुहूयते।।
विष्णुसूक्तं तथा हुत्वा पुरुषसूक्तं च हूयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्राह्मं चैव ततो हुत्वा आग्नेयं वारुणं यजेत्।।

वायव्यं भूमिदैवत्यं सौरं चैव सुहूयते।
तदग्नौ वैष्णवं हुत्वा व्याहृत्यन्तं सुहूयते।।

अङ्गहोमं च कृत्वा तु अङ्गस्पर्शनमेव च ।

खि. १६ . १८३ - १८५

आघारं विधिवत्कृत्वा मथितेनैव वह्निना।
अङ्गहोमं च हुत्वा कापिलेन घृतेन वै।।

तदलाभेऽन्यगव्येन माहिषाजाविकं विना।
मूर्धादि पादपर्यन्तमङ्गं प्रत्येकमुच्चरन्।।

स्वाहान्तं योजयित्वा तु देवेशं मनसा स्मरन्।
विष्णुसूक्तं च जुहुयाद् व्याहृत्यन्तमतः परम्।।

वा. ८

देवस्याङ्गं स्पृशन् हुत्वा मौलिमालादिपूर्वकम्।।

तथा देव्यौ च हुत्वा तु दद्भ्यः स्वाहादिना पृथक्।
विमानं च नवं चैव स्तूप्यादीनि यजेत्क्रमात्।।

वैष्णवं विष्णुसूक्तं च धातादींश्च सुहूयताम्।
स्विष्टाकारं ततो हुत्वा गव्यादीन् प्रोक्षयेद् बुधः।।

प्र. ११ . ७६ - ७८

य. २३ . ४१ - ४४

औपासनाग्नौ विधिवत्प्रतिष्ठाप्य च पावकम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आघारं वैष्णवं हुत्वा तस्य पश्चिमपार्श्वतः।
स्थण्डिलं कारयित्वा तु नववस्त्रेण चास्तरेत्।।

आदाय देवं संस्थाप्य स्थण्डिले प्राङ्मुखं प्रभुम्।
वैष्णवं विष्णुसूक्तं च ब्राह्मं रौद्रं क्रमाद् बुधः।।

श्रीभूसूक्तं च हुत्वान्ते मौलिमालादिकं क्रमात्।
हुत्वा गुरुस्तन्मन्त्रान्ते तत्तदङ्गं स्पृशेद् बुधः।।

५.९.१४ वर्णयुक्तध्रुवबेरस्याक्ष्युन्मोचनप्रकारः

स. २८ . ८१ - ८६

नवेनाथ पटेनाथ प्रच्छाद्याभिमुखं हरेः।
सुवर्णेनैव कृत्वा तु पात्रं तूलीसमन्वितम्।।

अक्षिप्रसाधकं वर्णं तस्मिन् प्रक्षिप्य तेन वै।
देवस्य दक्षिणे स्थेयादाचार्यश्चोत्तरामुखः।।

हिरण्यगर्भमित्युक्त्वा रुद्रमन्यं त्रियम्बकम्।
एवमेव क्रमेणैव अङ्गहोमं समाचरेत्।।

पक्ष्म वर्म च रक्तं च श्वेतं कृष्णं च तैजसम्।
षण्मण्डलानि चैतेषां महाभूतानि पञ्च च।।

परमात्मा च तान् देवान् स्मृत्वा षण्मण्डलानि च।
रुक्मपात्रस्थवर्णेन हेमतूलिकया तथा।।

पौरुषं सूक्तमुच्चार्य दक्षिणे नयने तथा।
अतो देवादिनान्ये च कारयेदक्षिमोचनम्।।

नि. २८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खि. १६. १८७ - १९४

[अत्र पक्ष्मादीनां षण्मण्डलानां पृथिवी आपः, तेजः, वायुः आकाशः, परमात्मा चेति षण्मण्डलाधिपाः अधिकतया निर्दिश्यन्ते इति, विष्णुसूक्तेन अक्ष्युन्मोचनं ज्योतिर्मण्डलं चाचरेदिति कथ्यते इति च विशेषः।]

अ. १५

[अत्र तद्विष्णोरिति मन्त्रेण ज्योतिर्मण्डलं योजयेदित्युच्यते इति विशेषः।]

क्रि.६. ७२

[अत्र वर्णे महीं तत्पात्रे दिवाकरम्, तूलिकायां चन्द्रमर्चयेदित्यधिकतया दृश्यत इति विशेषः।]

ज्ञा. ६०. १०४, १०५

यजमानेन वस्त्राङ्गुलीयाभरणाद्यैरलङ्कृत्याभिपूजितो गुरुः पादौ प्रक्षाल्याचम्य सुवर्णेन कृतं पात्रं तूलिकामप्यादाय तत्पात्रे वर्णं गृहीत्वाऽभ्यर्च्य देवस्य दक्षिणस्यामुत्तराभिमुखः स्थित्वा देवाभिमुखे प्रच्छन्नपटं कृत्वा महीसूक्तेन वर्णमभिमृश्य देवं ध्यायन् पुरुषसूक्तेन दक्षिणे नयने वामे च एकाक्षरादिना महाभूतपरमात्माधिदैवतानि पक्ष्मवर्मरक्तशुक्लकृष्णज्योतिर्मण्डलानि यूकाचित्रेण वर्णेन कृत्वाक्ष्युन्मेषयेत्। गोदानसूक्तेन देवस्य तां गां दर्शयित्वा 'श्रिये जात' इति श्रीदेव्याः मेदिन्यादिना महीदेव्याश्च अन्यदेवानां तत्तन्मन्त्रेणाक्ष्युन्मेषणं तथैव कृत्वा पुण्याहं वाचयेत्।

य. २३ . ५० - ५६, ६१, ६२

शङ्खकाहलसंयुक्तं वेदघोषसमायुतम्।
नववस्त्रेण देवाग्रे प्रच्छन्नमुदगाननम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृत्वा चाभ्यन्तरे धीमानुत्तराभिमुखः स्थितः।
प्राणायामं च कृत्वा तु देवेशं मनसा स्मरन्।।

हेमरूप्यां प्रहरिणीं दशाङ्गुलसमायताम्।
मूलादग्रं कृशं वृत्तमाहरेत्ताडनीं शुभाम्।।

भागाङ्गुलायतां सूचीं नवनाहसमायताम्।
तौ समादाय हस्ताभ्यां 'प्रतिद्विष्णु'रिति ब्रुवन्।।

विष्णुसूक्तेन सव्यं तु अपसव्यं यथा तथा।
नरसूक्तेन नयने मोचयेन्मतिमान् गुरुः।।

पक्ष्म वर्म च रक्तं च शुक्लं चामिततैजसम् ।
पृथिव्यादीन् क्रमात्तस्मिन्नधिपान् मनसा स्मरन्।।

समीक्ष्य देवदेवेशं प्रणम्यैवानुमान्य च ।

ध्रुवाक्षिमोचने विद्वान् तत्तद्वर्णेन हाटके।
पात्रेऽभ्यर्च्य महीं देवीं पक्ष्मादीन्मोचयेत्तथा।।

धात्रादिपरिषद्देवांस्तत्तन्मन्त्रेण मोचयेत्।
विशेषोऽयं समं चान्यदधिवासं समारभेत्।।

वा. ८

उलिकां ताडनीं पश्चात् गृहीत्वा मन्त्रपूर्वकम्।
'विष्णुस्त्वां रक्ष' इत्युक्त्वा स्वस्तिसूक्तं समुच्चरन्।

पटस्य चान्तर्देवस्य मूर्धादीन् स्पर्शयेद्बुधः।
विष्णुगायत्रीमुच्चार्य तत्र कर्म समाचरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवीभ्यां सहितं कुर्यात् तत्तन्मन्त्रं जपेत्स्पृशन्।
पश्चात्पात्रं च सूचीं च गृहीत्वा चाक्षिमोचनम्।।

षण्मण्डलानि संस्मृत्वा अधिदेवपुरस्सरम्।
महाभूतं परमात्मेति दैवमेतत्क्रमं विदुः।।

पक्ष्मं च रक्तवर्णं च श्वेतं कृष्णं च तेजसः।
एतैस्तु मण्डलं ध्यात्वा दृढीकृत्यात्वरः क्रमात्।।

पुरुषसूक्तं जपित्वैव दक्षिणे नयने न्यसेत्।।

तथैव वामनेत्रे तु सूक्तमेकाक्षरं जपेत्।

वि. २७ . २०६, २०७

जयशब्दैः स्तोत्रैश्च, संस्तूय स्तुत्य नृत्तगेयवाद्यैर्घोषयित्वा देवाभिमुखे निधाय प्रच्छन्नपटं कृत्वा आचार्यश्चोत्तराभिमुखः प्राणायामं कृत्वा 'विष्णुर्मां रक्ष' (वै. म. प्र. ८) त्विति उच्चार्य दिव्यरूपं ध्यायन् सुवर्णसूचीदृढकरीभ्यामेव पक्ष्मवर्मरक्तशुक्लकृष्णज्योतिर्मण्डलानि यथाक्रमेण पृथिव्यादिमहाभूत-परमात्माधिदैवतानि स्मृत्वा अतो देवादिना दक्षिणे नयने सहस्रशीर्षादिना वामे च अक्ष्युन्मोचनं कारयेत्।

५.९.१५ वर्णरहितानां ध्रुवबेरादीनामक्ष्युन्मोचनप्रकारः

ज्ञा. ६० . १०५

ध्रुवबेरस्य वर्णहीनस्य च नवकौतुकबिम्बादीनां च वर्णं विना सुवर्णसूचीदृढकरीभ्यामेव पक्ष्मादीनि सङ्कल्प्याक्ष्युन्मेषणं कुर्यात्।

क्रि.६. ८३, ८४ ; अ.१५ ; वा. ८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.९.१६ ध्रुवार्चाबेराक्ष्युन्मोचने विशेषः

य. २३ . ६३ , ६४

ध्रुवार्चा चेद्विशेषेण कौतुकोक्तपदे गृहे।

पीठसङ्घातवच्चात्र कृत्वा रत्नोपरि स्थितम्।।

तत्राक्षिमोचनं कृत्वा गर्भगेहे विशेषतः।

५.९.१७ श्रीदेव्यादिबेराणामक्ष्युन्मोचनम्

ज्ञा. ६० . १०५

'श्रिये जात' इति श्रीदेव्याः 'मेदिन्या' दिना महीदेव्याश्च अन्यदेवानां तत्तन्मन्त्रेणाक्ष्युन्मेषणं तथैव कृत्वा पुण्याहं वाचयेत्।

स. २८. ८६, ८७ ; अ. १५ ; क्रि. ६ . ८५, ८६ ; य.२३. ६२ ; खि. १६. १९२ - १९४ ; नि. २८ ; वि. २७. २०७ ; प्र. ११. ७७

५.९.१८ बलिबेरादीनामक्ष्युन्मोचनम्

वा. ८

बलिबेरोत्सवं चैव स्नपनं च त्रिधा भवेत्।

सहैव देवान् संस्थाप्य विधिना चाक्षिमोचनम्।।

पीठं सुघट्य मतिमान् प्रत्येकं तत्र कारयेत्।

स. २८. ८७

[अत्र कौतुकबेरस्याक्षिमोचनमधिकतया कथ्यते इति विशेषः]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.९.१९ अक्ष्युन्मोचनोत्तरं दर्शनीयद्रव्याणां प्रदर्शनम्

वा. ८

गोदानसूक्तमुच्चार्य गवादीनि स्पृशेत्क्रमात्।।

पश्चात्पटं विसृज्यैव गवाद्यादीन् प्रदर्शयेत्।
गवादिद्रव्यमादाय आचार्याय प्रदीयताम्।।

कृत्वा चैवाक्षिमोचेन अधिवासत्रयात्परम्।
मन्त्रेण प्रोक्षयेन्नेत्रे शयने शाययेद्धरिम्।।

आवाह्य कृतमन्त्रज्ञः कारयेदिति केचन।

स. २८ . ८९, ९० ; नि. २८ ; प्र. ११ . ७८, ७९

क्रि. ६ . ७८ - ८२

जप्त्वा 'शुद्धा इम' इति गोसावित्रीमनुस्मरन्।
पूजयेत्तत्तदङ्गेषु तदुक्तादेवता अपि।।

अत्र गावो हिम ति गोसक्तेमाभि र्घयते।
तृणमुष्टिं प्रदायास्मै गोसूक्तेनाभिमृश्य च।।

अत्र 'गावो हिम' इति गोसूक्तमभिधीयते।
'इमा ओषधय' इत्युक्त्वा तिलधान्ये च दर्शयेत्।।

आज्यं सामादिमन्त्रेण यजुर्वेदादिना दधि।
मधु 'अग्निमील' इत्युक्त्वा क्षीरं 'शन्न' इति ब्रुवन्।।

गोदानसूक्तमुच्चार्य 'आगोदाना' त्पठेदिति।
सवत्सां चैव गामुक्तां दर्शयित्वाऽतिसुन्दरीम्।।

देव्योश्च दर्शनीयानां दर्शयेच्च पृथक् पृथक्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. १५

-------------------------प्रच्छन्नपटमुद्धरेत्।
गां पूर्वं दर्शयित्वान्ते 'आगोदाना' दिति ब्रुवन्।।

द्विजान् प्रदर्शयेत्तत्र 'ब्रह्मजज्ञान' मन्त्रतः।
'अग्न आयाहि' मन्त्रेण घृतं चापि सुदर्शयेत्।।

'शन्नो देवी'रिति क्षीरं 'अग्निमीले' तथा मधु।
'इषे त्वोर्जेत्वे'ति दधि सिद्धार्थकमतः परम्।।

'इमा ओषधये' त्युक्त्वा 'इदं विष्णि्व'ति धान्यकम्।
'श्रियै जाते' ति चोक्त्वा तु अङ्गनायाश्च दर्शनम्।।

जपन् 'तन्त्वेक्षस' श्च(?) गायत्र्या च तिलं बुधः।
दर्शयेत्तत्तन्मन्त्रेण देव्यादीनां पृथक्पृथक्।।

अङ्गहोमं च कृत्वान्ते जलाधिवासमाचरेत्।

खि. १६ . १९७ - २०१

पटमुत्सार्य काले तु जयशब्दसमन्वितम्।।

वाद्यघोषसमायुक्तं देवेशं सम्प्रणम्य च।
दर्शयेद्देवदेवस्य द्रव्यं द्रव्यं समाहितः।।

जप्त्वा गोदानसूक्तं तु सवत्सां कांस्यदोहनाम्।
स्वर्णशृङ्गां रौप्यखुरां सवस्त्रां गां प्रदर्शयेत्।।

आचार्यं पूजयित्वा तु वस्त्राभरणकुण्डलैः।
शिष्यांश्च पूजयेत्तद्वद्वस्त्रयुग्माङ्गुलीयकैः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिरण्यपशुभूम्यादि गुरवे दक्षिणां ददेत्।
ब्राह्मणान् भोजयित्वा तु तर्पयेद्दक्षिणादिभिः।।

ज्ञा. ६० . १०५ ; वि. २७ . २०६

य. २३ . ५७ - ६०

प्रच्छन्नपटमुद्धृत्य गां तत्सूक्तेन दर्शयेत्।।

मरुतः परमात्मेति धान्यं च तिलतण्डुलान्।
तत्तद्वेदादिमन्त्रेण घृतादीन् दर्शयेद् बुधः।।

'ब्रह्म जज्ञान'मित्युक्त्वा ब्राह्मणान् दर्शयेत्तथा।
देवीभ्यां सह चेद्धीमान् तथा सर्वं च कारयेत्।।

स्नपनोत्सवबेरादीन् सह चेत्तान् पृथक् पृथक्।
सम्भृत्य दर्शयेद्विद्वानेकहोमे च कारयेत्।।

तद्विमानं नवं चेत्तु प्रतिष्ठोक्तं च कारयेत्।

क्रि. ६ . ८२, ८६

[अत्र 'पात्रेषु दर्शयेत् तेषां पञ्चगव्यं पृथक् पृथक्' इति परिवाराणां प्रदर्शनीयं द्रव्यं कथ्यत इति विशेषः]

५.९.२० अक्ष्युन्मोचनानन्तरं ध्रुवबेरशोधनम्

वि. २७ . २०७, २०८

ध्रुवबेराक्ष्युन्मोचनान्ते तद्बेरशुद्ध्यर्थं आढकपूर्णान् खण्डस्फुटितकालरहितान् नवकलशानाहृत्य तन्तुना परिवेष्ट्य अद्भिः प्रोक्ष्य नादेयैराधावैः सुगन्धैरुत्पूतैरापूर्य अक्षताश्वत्थकूर्चानि पुण्यपुष्पाणि शमीपलाशदूर्वाग्रं नवरत्नानि स्वर्णशकलान्वा प्रणवेनाऽऽक्षिप्य प्रत्येकं वस्त्रमावेष्ट्य देवाभिमुखे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शालिव्रीहिभिः स्थण्डिलं कृत्वा नवभागं विभज्य मध्यमादिनवपदेषु नवकलशान् विन्यस्य च आचार्यस्तेषां दक्षिणे चोत्तराभिमुखो ब्रह्मासनमास्थाय मध्यमादिक्रमेण तत्तत्कूर्चेन 'इदमापः शिवा' (वै. म. प्र, ९) विष्णुगायत्री (वै. म. प्र. ८) 'अग्निमीले' (ऋ. सं.१.१.१) 'इषे त्वोर्जेत्वा' (वै. स १.१.१) 'अग्न आयाहि' (सा. स. १.१.) 'शन्नो देवी' (अथ १.१.१) 'आप उदन्तु, वैष्णवं आपोहिष्ठा' (ऋ. सं ७ - ६) दिना अभ्युक्षणं कृत्वा पुण्याहं वाचयेत्।

स. २९ . १ - ९

दारुसङ्ग्रहमारभ्य यावन्नेत्रनिमीलनम्।
यथोक्तं बेरसंस्कारं कारयेच्छिल्पिना बुधः।।

शिल्पिस्पर्शविशुध्यर्थमक्ष्युन्मेषादनन्तरम्।
कुम्भं सूत्रेण वस्त्राभ्यां वेष्टितं पूतवारिणा।।

पूरयित्वाथ देवाग्रे शालिराश्युपरि न्यसेत्।
ब्राह्ममासनमास्थाय कुम्भदक्षिणपार्श्वतः।।

शमीपलाशपत्राणि दूर्वाग्राणि शुभानि च ।
अक्षतांश्च कुशाग्रं च पुण्यपुष्पाणि काञ्चनम्।।

वदन्वै विष्णुगायत्रीं सर्वमेतत् पृथक् क्षिपेत्।
इषे त्वोर्जेत्यादिजपन्नाप उन्दन्तु चैव हि।।

तत्तु तन्तुभिरावेष्ट्य मन्त्रानपि च वैष्णवान्।
कूर्चेनैव तु तत्तोयमभिमृश्य समाहितः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदम्बुना कुशाग्रेण तप्तचामीकरेण च ।
आपो हिरण्यवर्णादिपवमानादिभिस्त्रिभिः ।।

शन्नो देवीरभीत्युक्त्वा पुरुषसूक्तैश्च वैष्णवैः ।
शुद्ध्यर्थं प्रोक्षयेद् बेरं पुण्याहमपि वाचयेत् ।।

एवं चित्रप्रतिष्ठायां चित्राभासे च कारयेत् ।

क्रि. ६ . ८७ - ९३

[अत्र दारुसङ्ग्रहम् इत्यस्य स्थाने शूलग्रहणमिति सकाञ्चनेन कूर्चेन इत्यधिकमिति च विशेषः ।]

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०. ध्रुवबेराद्यधिवासः

५.१०.१ ध्रुवबेराद्यधिवासस्यावश्यकता

वि. २८ . २०८

अधिवासं कृत्वैव स्थापनं करोति। अनधिवासितं बेरं यत्र स्थापितं चेत् तद्ग्रामयजमानस्थापकादीनामाशु विनाशाय भवति।

५.१०.२ ध्रुवबेराद्यधिवासफलम्

स. २५ . २६ - २९

अधिवासं पुनः कुर्यात् बिम्बशुध्यर्थमेव तत्।।

सान्निध्यकरणायैवं प्रतिमानां तु तद् भवेत्।
अधिवासं च कृत्वैव मन्त्रैर्हुत्वा विधानतः।।

बिम्बे संस्थापिते तत्र सान्निध्यं कुरुते हरिः।
पश्चात् संस्थापयेद्विद्वान् स्थापनोक्तविधानतः।।

तत्स्थापको लभेत् कामानिहामुत्र न संशयः।

५.१०.३ ध्रुवादिबेराणामधिवासकालः

वि. २७ . २०७

कौतुकादिबेराणामक्ष्युन्मोचनान्ते बेराधिवासादीनि[1] कारयेत्।

खि. १६. ११३

---

1. बेराधिवासादीनीति ध्रुवादिबेराणामधिवासादीन्युच्यन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१०.४ ध्रुवबेराद्यधिवासत्रैविध्यं पञ्चगव्य-क्षीर-जलाधिवासभेदेन

वा. ८

अथ वक्ष्ये विशेषेण त्रिधा चैवाधिवासनम्।
पञ्चगव्यं तु पूर्वं स्यात् क्षीरं चैवाप्यनन्तरम्।
जलेनाप्यधिवासं च त्रिधा चैव प्रचोदितम्।

वि. २८ . २१० ; स. २८ . ६३, ६४

अ. १६ ; नि. २८

५.१०.५ ध्रुवबेराद्यधिवासस्य त्रैविध्यं जल-पञ्चगव्य-कुशोदाधिवासभेदेन

खि. १६. १०३, १०७, ११२

नदीतटाकवापीषु देवागारसमीपतः।
जलेऽधिवासनं कृत्वा रक्षां सर्वत्र कारयेत्।।

पश्चाद्देवेशमादाय पञ्चगव्येऽधिवासयेत्।
जलद्रोणीं पूरयेच्च पञ्चगव्यप्रयोगतः।।

----

[1]पश्चाद्देवेशमादाय कुशोदे शाययेत्तथा।।

स.२८. ६०, ६१ ; नि. २८ ; ज्ञा. ६१. १०५

५.१०.६ ध्रुवबेराद्यधिवासस्य कालव्याप्तिः

स. २८ . ६१, ६२

जलाधिवासमेकाहमेकाहं पञ्चगव्यके।।

---

1 पञ्चगव्याधिवासानन्तरम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहोरात्रं दिवा चैकं कुशोदे चाधिवासितम्।

अ. ११

वि. २८. २१०

त्रयाणामधिवासानां प्रत्येकमहोरात्रं दिवा चैकं वा अधिवासयेत्।

खि. १६. ११२

द्व्यहं तथैवमेकाहं पञ्चगव्येऽधिवासयेत्।

५.१०.७ ध्रुवबेराधिवासकालावधिः अशक्तविषयः

क्रि. ६ . १०८, १०९

एवं कर्तुमशक्तश्चेत् त्रिदिनं केवले जले।।

दिनमेकमहर्वाथ यामं वा कालमेव वा।

मन्त्रवद्बिम्बशुध्यर्थमधिवासं समाचरेत्।।

स. २८ . ६२, ६३ ; ज्ञा. ६१ . १०६ ; नि. २८

५.१०.८ पञ्चगव्याद्यधिवासस्य व्याप्तिकालानुरोधेन नवविधत्वम्

वा. ८

प्रत्येकमधिवास्यैव त्रियहं चोत्तमोत्तमम्।।

द्वियहं चाधिवास्यैव उत्तमे मध्यमं भवेत्।

एकाहं चाधिवास्यैव उत्तमाधममीरितम्।।

दिनार्धस्याधिवास्यैव मध्यमोत्तममुच्यते।

तदर्धं चाधिवास्यैव मध्यमे मध्यमं भवेत्।।

तदर्धं चाधिवास्यैव ज्ञात्वा चेन्मध्यमाधमम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशनाडिकाधिवासं च अधमोत्तममीरितम्।।

तदर्धं चाधिवास्यैव अधमे मध्यमं भवेत्।

त्रिनाडिकाधिवासं च अधमाधमसंज्ञितम्।।

मुहूर्तं चाधिवास्यैव इति कालस्य निश्चयः।

५.१०.९ पञ्चगव्याद्यधिवासस्य निर्दिष्टकालालाभे कर्तव्यक्रमः

वि. २८ . २१०

[1]एवमसम्भवे पूर्वे अहनि चेत्, पूर्ववत् पञ्चगव्याधिवासं क्षीराधिवासं जलाधिवासं च पृथगेव सङ्कल्प्य, देवं वस्त्रोत्तरीयाद्यैरलङ्कृत्य, अभिषिच्य, प्रत्येकं याममात्रमधिवासयेत्।

सद्यश्चेत् पृथक् पृथक् मुहूर्तं यथालाभकालं वा अधिवासयेत्। अलाभे त्रीन् कुम्भान् द्रव्यैर्जलैरापूर्य, पृथक् पृथक् सङ्कल्प्य, अभिषेचयेत्। एकहोमे सर्वं तन्त्रयित्वा एकदा बलिं निर्वाप्य, कारयेत्। होमं बलिं च विना सर्वत्र जलाधिवासनमेवं कारयेदिति विज्ञायते।

५.१०.१० देव्यादिबेराणामधिवासस्य कालव्याप्तिः

अ. १६

देवीभ्यामन्यदेवांश्च शाययित्वाथ पूर्वतः।

त्रियहं द्वियहं वापि एकाहं वा समाचरेत्।।

1.दिनत्रयालाभे प्रतिष्ठादिवसात् अव्यवहितपूर्वस्मिन् अहनि कर्तव्यश्चेदधिवास इति भावः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१०.११ अधिवासाद्यर्थं मण्डपस्य कल्पनम्

खि. १६ . ९४

मण्डपं वा प्रपां वाथ विमानाभिमुखे तथा।
कारयेदधिवासार्थमक्ष्युन्मेषाय कर्मणे।।

५.१०.१२ अधिवासार्थं पञ्चगव्यमेलनक्रमः

अ. १६

पञ्चगव्यक्रमं वक्ष्ये सर्वेषामपि कर्मणाम्।
गोमूत्रं गोमयं चैव पयो दधि घृतं क्रमात्।।
गोमूत्रं नीलवर्णायामापतद्गवि संहरेत्।
कृष्णायां गोमयं पश्चात् पतिते भूतले सति।।
क्षीरं वै ताम्रवर्णायाः सद्यो दुग्धमपक्वकम्।
श्वेताया दधि सङ्ग्राह्यं शुद्धं दोषविवर्जितम्।।
कपिलाया घृतं चैव क्षारकाभं सुपक्वकम्।
भागमार्गं प्रवक्ष्यामि गृह्णीत द्रव्ययोरधः।।

षड्भागं षोडशांशस्य गोमूत्रं गोमयं ततः।
चतुरंशं ततः क्षीरं त्रियंशं द्विगुणं दधि।।

एकभागं घृतं तस्य द्रव्यानेतानसङ्करम्।
हेमादिकलशेष्वेकं समापूर्य पृथक् पृथक् ।।

एवमेवमशक्तश्चेत् श्वेतायां गवि च बुधः।
आहरेद्दुर्बलो गव्यान् यथायोगं क्रमं चरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विहस्तायतविस्तारं भागमात्रोदयं क्रमात्।
धान्यैश्च स्थण्डिलं कृत्वा धान्यैरुक्तैर्विचक्षणः।।

नवभागं विभज्यात्र तस्मिन् वस्त्राणि चास्तरेत्।
मध्ये प्रधानकुम्भं तत्प्राच्यां गोमूत्रकं न्यसेत्।।

आग्नेय्यां गोमयं पश्चात् दधि याम्ये तु पश्चिमे।
घृतं वै चोत्तरे क्षीरं न्यसेदभिमुखाद्धटम्।।

वस्त्रयुग्मेन तत्कुम्भमन्यानेकेन वेष्टयेत्।
तेषु कूर्चान्विनिक्षिप्य पञ्चरत्नानि पञ्चसु।।

सुवर्णवर्णचिह्नानि आयुधानि विशेषतः।
मध्ये प्रधानकुम्भे तु सन्न्यस्यैवार्चयेत्ततः।।

तस्य दक्षिणपार्श्वे तु चोत्तराभिमुखासनः।
नववस्त्रोत्तरीयाद्यैर्भूषितोऽर्चनमाचरेत्।।

गोमूत्रे चैव ऋग्वेदं गोमये तु बृहस्पतिम्।
क्षीरेप्यथर्वणं, दध्नि यजुः, साममथो घृते।।

एकादशोपचारेण, तेषु वै दिक् क्रमेण च ।
ध्यात्वा यथोक्तमभ्यर्च्य पुनरेतान् सुयोजयेत्।।

तत्तन्मन्त्रेण चादाय गोमूत्रादीन् ततो घटे।
आचार्यः सुप्रसन्नात्मा देवदेवमनुस्मरन्।।

'गायत्रिया' चैव गोमूत्रं 'गन्धद्वारे' ति गोमयम्।
'आप्यायस्वे' ति च क्षीरं 'दधिक्राव्ण्णो' दधि क्रमात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'तेजोवत्स्यावो' (?) घृतं पश्चात् शिष्टं तोयेन पूरयेत्।
मर्दयेत्समिदग्रेण शिवं तत्र समर्चयेत्।।

स्पृष्ट्वा पुरुषसूक्तेन जपन्मन्त्रैस्समाहितः।
पश्चात्तेनैव मन्त्रज्ञो विनियोगानि कारयेत्।।

प्रोक्षणे प्राशने चैवाभिषेकाधिवासने।
तस्माद्धटाद् गृहीत्वैव कारयेद्वा यथोचितम्।।

श्वभ्रेऽधिवासने तत्र कुम्भान् प्रक्षिप्य मन्त्रवित्।
शेषं तत्कुम्भतोयेन पूरयित्वाधिवासयेत्।।

क्रि. ६ . ९६ - ९८

आज्यं 'शुक्रमसी' त्युक्त्वा षोडशांशं प्रगृह्य च ।
'दधिक्राव्ण्ण' इत्युक्त्वा क्षिप्त्वा तद्द्विगुणं दधि।।

'आप्यायस्वे' ति मन्त्रेण त्रिगुणं क्षीरमाहरेत्।
'गन्धद्वारे' ति मन्त्रेण गोमयञ्च चतुर्गुणम् ।।

षडगुणं चैव गोमूत्रं गायत्र्या तत्र निक्षिपेत्।
'वसोः पवित्र' मित्युक्त्वा तेनापूर्यावटं पुनः।।

वा. ८

५.१०.१३ पञ्चगव्यस्य ग्राह्याग्राह्यविवेकः

अ. १६

पञ्चगव्याधिवासोऽयं तस्मिन् कालेऽधिवासितम्।।

अपक्कं शिष्टमृत्पात्रे पूरयेद् गव्यवासितम्।
त्रियहं चापि न ग्राह्यं गव्यं चापि विशेषतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिनं प्रत्यधिपं तस्मात् पूजयेत्तस्य शुद्धये।
अर्चितं चापि न ग्राह्यं गव्यं तत्रवदाचरेत्(?)।।
द्विदिनाद्वाथ तं केचित् विसृज्यान्यं समाहरेत् ।

५.१०.१४ ध्रुवबेरस्य पञ्चगव्याधिवासनम्

वि. २८ . २०८, २०९

देवालयस्य उत्तरे, पुरस्ताद्वा, प्रपां, कूटं वा कृत्वा तन्मध्ये तद्-बिम्बार्धाधिकायामविस्तारां बिम्बदघ्ननिम्नां जलद्रोणीं, भूम्यामवटं वा, कृत्वा संशोध्य वितानध्वजदर्भमालातरङ्गस्तम्भवेष्टनाद्यैरलङ्कृत्य परितः प्रावरणं कृत्वा पञ्चगव्यानि यथायोगं संयोज्य'वसोः पवित्र' मिति पञ्चगव्यैरापूर्य अधिदेवमीशानमभ्यर्च्य नववस्त्राण्यास्तीर्य तत्प्राच्याम् औपासनाग्निकुण्डं कृत्वा आघारं हुत्वा तस्योत्तरे देवेशं सप्तभिः कलशैः संस्नाप्य पुण्याहं वाचयित्वा नववस्त्रोत्तरीयाद्यैरलङ्कृत्य अभ्यर्च्य 'विष्णोर्नुकादीन्' जपन् तिष्ठन् तस्मिन् प्राक्शिरः शाययित्वा अग्निं परिस्तीर्य 'विष्णवे विश्वेशाय, जनार्दनाय, सर्वभूतात्मने, अव्यक्ताय, अचलाय, देवेभ्यो, भूतेभ्यो नागेभ्यो देवेभ्यो लोकपालेभ्यः विमानपालेभ्यः, स्वाहे'ति व्याहृत्यन्तं हुत्वा वैष्णवं ब्राह्मं रौद्रं, प्राजापत्यं वारुणं वैघ्नं गारुडं वैष्वक्सेनं दिग्देवत्यं च हुत्वा अग्निं विसृज्य तद्रात्रौ तदालयगतदेवेभ्यस्सर्वेभ्यो मौद्गिकं बलिं निर्वाप्य

स.२८ . ५९, ६० ; वा. ८

ज्ञा. ६१ . १०५

[अत्र 'आपो हिरण्यपवमानैः बिम्बं प्रमार्ज्य, अवटे वरुणं सम्पूज्य पञ्चशयनानि आस्तीर्य' इत्यधिकम्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. १६

[उत्तरे पुरस्ताद् वा इत्यस्य स्थाने 'दक्षिण' इति विशेषः।]

क्रि. ६ . ९४, ९५ ; ९९, १००

[अत्र पञ्चगव्ये शिवमर्चयेत् इति 'वारीश्वतन्त्र' इति बिम्बमभिषिच्य इति चाधिकम्।]

खि. १६ . १०७ - १११

[अत्र उत्तरे पुरस्ताद् वा इत्यस्य स्थाने आलयाद् दक्षिणे पार्श्वे उत्तरे वा इति विशेषः।]

नि. २८

५.१०.१५ ध्रुवबेरस्य क्षीराधिवासनम्

वि. २८ . २०९

प्रभाते स्नात्वा, आलयमावेश्य अधिवासगतं देवमुद्धृत्य सप्तभिः कलशैः संस्नाप्य, वस्त्रोत्तरीयाद्यैरलङ्कृत्य, अभ्यर्च्य, द्रोणीमवटं वा संशोध्य, नववस्त्राण्यास्तीर्य, 'शं नो देवी' रिति गव्येन क्षीरेणापूर्य, अधिदैवमथर्ववेदमभ्यर्च्य, पुण्यपुष्पाणि निक्षिप्य, क्षीरं क्षीरोदधिरिति स्मृत्वा, तस्मिन् देवं [1]पूर्ववच्छाययेत्, पूर्ववद्धोमं हुत्वा, तद्रात्रौ पूर्ववद् बलिं निर्वाप्य

क्रि. ६. १०१ - १०५ ; वा. ८ ; नि. २८

ज्ञा.६१ . १०५

[अत्र समुद्रवतीशृङ्गे इति प्राक्छिरः शाययेत् इति अधिकम्। पुण्यपुष्पाणि इत्यस्य स्थाने पद्मोत्पलादिपुण्यपुष्पाणि इति च दृश्यते।

1.पञ्चगव्याधिवासे इव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१०.१६ जलाधिवासस्य कालव्याप्तिः

खि. १६. १०६

पञ्चाहं त्रियहं वापि एकाहमथवा तथा।।

अ. १६ ; ज्ञा. ६१. १०६ ; नि. २८

५.१०.१७ मन्त्रोदकप्रोक्षणपूर्वकं ध्रुवबेरस्य जलाधिवासनम्

य. २४. १ - १५

अथातो ध्रुवबेरस्य शुद्ध्यर्थमधिवासनम्।
प्रवक्ष्यामि विशेषेण ध्रुवार्चायाः सपार्षदम्।।

द्वात्रिंशत्प्रस्थसम्पूर्णं खण्डस्फुटितवर्जितम्।
प्रत्येकं कुम्भमादाय तन्तुना परिवेष्ट्य च ।।

प्राक्षाल्याभिमुखे कुम्भं द्रोणधान्योपरि क्रमात्।
सन्न्यस्यैवाद्भिरापूर्य हेमरत्नादिना सह।।

प्रक्षिप्य कुशकूर्चांश्च सूक्ष्मवस्त्रेण वेष्टयेत्।
ब्राह्ममासनमास्थाय दक्षिणे चोत्तरामुखः।।

ध्यात्वा तीर्थान्समावाह्य कुम्भेऽम्भसि जले क्रमात्।
अधिदैवं समभ्यर्च्य प्रणम्यैवानुमान्य च ।।

ध्रुवं पश्चात् समभ्यर्च्य पुण्याहमपि वाच्य च।
संयुक्तमेतदुच्चार्य कुम्भेन सह मन्त्रवित्।।

सम्बन्धकूर्चं विन्यस्य तेनैवाऽप्यम्भसा बुधः।
प्रोक्ष्यैवाम्भः स्थितान् देवान् बुद्ध्या तस्मिन्निवेशयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शीतोदधिमिति ध्यात्वा देवीभ्यां च पृथक् पृथक् ।
देवदेवस्य देव्योश्च एककुम्भेऽथवा चरेत्।।

धात्रादिपरिषद्देवान् पृथगेव सहापि वा।
त्रिदिनं द्विदिनं वाथ चैकाहं वाऽधिवासयेत्।।

गृहपिण्ड्या ध्रुवार्चा चेत्कृत्वा नेत्रविमोचनम्।
तदधो याज्ञिकैर्वृक्षैर्यष्टिं कृत्वा सलक्षणम्।।

वृक्षक्रमेण तत्पादान् कृत्वा बेरोदयं यथा।
आग्नेयादिषु कोणेषु वेदानामादिमन्त्रतः।।

स्थापयित्वा तदूर्ध्वे तु यष्ट्यां शेषं समर्च्य च ।
गायत्रीमुच्चरन् यष्टिमुदगन्तं न्यसेत्पुनः।।

तत्रैव कुम्भान् सङ्गृह्य ब्रह्मपार्श्वे विशेषतः।
सुसूक्ष्मं सुषिरं कृत्वा तन्तुना वेष्टयेत्क्रमात्।।

शुद्धतोयैः समापूर्य रत्नादीन् सन्न्यसेत्क्रमात्।
तस्मिन् जले समभ्यर्च्य यष्टिकोपरि सन्न्यसेत्।।

वारुणं मन्त्रमुच्चार्य देवीभ्यां सह चेत्पृथक्।
मौलौ सदेवं ? संस्राव्याविच्छिन्नमधिवासयेत्।।

अ. १६

नदीतटाकवापीषु देवागारस्य पूर्वतः।
नद्यादीनामलाभे तु जलद्रोणीं च कारयेत्।।

जलद्रोण्या अलाभे तु भूमिस्थं वापि शाययेत्।
आलयस्योत्तरे कुर्यात् श्वभ्रं चैव ततो नयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिम्बादध्यर्धमायामं विस्तारं तु तदर्धकम्।
तदर्धनिम्नसंयुक्तं स्निग्धमेव प्रकल्पयेत्।।

पूरयित्वा जलेनैव कूर्चाक्षतसमायुतम्।
वितानाद्यैरलङ्कृत्य दर्भमालाभिरावृतम्।।

धूपदीपसमायुक्तं रक्षां तत्र सुकारयेत्।
क्षीरोदधिरिति स्मृत्वा देवेशस्यानुशायिनः।।

वस्त्रेणैव तु संयोज्य प्राक्च्छिरः शाययेद्धरिम्।
यद्वैष्णवेति मन्त्रेण उत्तराच्छादनं भवेत्।।

गेयनृत्तसमायुक्तं सर्ववाद्यसमायुतम्।
शाययित्वात्र देवीभ्यां देवेशेन सहाभवेत्।।

स. २८ . ५६ - ५९ ; अ. ११

क्रि. ६ . १०५ - १०८

[अत्र रक्षार्थं जालकाकृतिपञ्जरकल्पनमधिकम्।]

खि. १६ . १०३ - १०६

[अत्र वस्त्रेणैव इत्यस्य स्थाने वस्त्रयुग्ममिति विशेषः।]

नि. २८

य. २४ . १६ - २५

जलाधिवासनार्थाय नद्यादिषु मनोरमे।
वितानाद्यैरलङ्कृत्य नववस्त्राणि चास्तरेत्।।

समलङ्कृत्य देवेशं ग्रामे वा चालयेऽथ वा।
कृत्वा प्रदक्षिणं पश्चात्तीरं तत्सम्प्रविश्य च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संस्नाप्य नववस्त्रेण समाच्छाद्याभिपूज्य च।
पुण्याहं वाचयित्वान्ते गुरुं सम्यक् प्रपूजयेत्।।

हस्ताभ्यां देवमादाय स्थानं सम्यक्प्रदक्षिणम्।
गत्वा प्रवेश्य तन्मध्ये स्थापयेत्पश्चिमामुखम्।।

पश्चा'द्धिरण्यशृङ्गे' ति वरुणं सम्प्रणम्य च।
तस्मिन् जलेशमर्घ्यान्तं समभ्यर्च्य समाधिना।।

'यद्वैष्णवं' समुच्चार्य देवीभ्यां च समायुतम्।
प्राक्छिरश्शाययेद्देवं शयने च विचक्षणः।।

शिरोपधानं दत्वान्ते वस्त्रेणैव पृथक् पृथक्।
आच्छाद्य तद्गलाधस्तात्पूजयेत्तान् क्रमात् स्थले।।

सेनाधिपं प्रपूज्यैव प्राच्यां शङ्खं समर्चयेत्।
गदां याम्ये समभ्यर्च्य प्रतीच्यां शार्ङ्गमर्चयेत्।।

खड्गं वामे समभ्यर्च्य ऊर्ध्वायां चक्रमर्चयेत्।
अजस्रदीपं सन्दीप्य परितः प्रावरणं चरेत्।।

त्रिदिनं द्विदिनं वाथ चैकाहमधिवास्य च।
पश्चात्समर्च्य देवेशं प्रविशेदालयं तथा।।

वा. ८

नदीसरिद्ध्रदं चैव तटाके वाथ कारयेत्।
समुद्रे वाधिवास्यैव इति पूर्वजशासनम्।।

प्रपां चैवाऽत्र कुर्वीत वितानाद्यैरलङ्कृताम्।
तत्तीरे देवमानीय पावकं तत्र कल्पयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैष्णवं च ततो हुत्वा पायसं सघृतैर्युतम्।
उदुत्यं मन्त्रमुच्चार्य हुत्वा तद्देशिकोत्तमः।।

योगेश्वराय मन्त्रेण शेषपर्यङ्कशायिने।
शब्दब्रह्मेति मन्त्रेण समुद्रेभ्यस्तथैव च ।।

पर्वतेभ्यश्च देवेभ्यो ऋषिभ्यश्च तथैव च ।
पितृभ्यश्चैव नागेभ्यः सर्वभूतेभ्य एव च।
एतान् मन्त्रान् समुच्चार्य हुत्वा तच्छास्त्रपारगः।।

'इदमापश्शिवे' त्युक्त्वा तज्जलं चाभिमन्त्रयेत्।
पुण्याहमपि संवाच्य ब्रह्मघोषणपूर्वकम्।।

वारुणं चैव पुण्यं च शिवं पुण्यं तथैव च।
एतैर्मूर्तिभिरावाह्य आधावे चैव चार्चयेत्।।

तत्पश्चात्पञ्चवस्त्रेण चास्तरेन्मन्त्रपारगः।
देवेशं समलङ्कृत्य पूजयेत्तु समाहितः।।

विष्णुसूक्तं समुच्चार्य वैष्णवं मन्त्रमुच्चरन्।
जले देवं समानीय प्राक्छिरस्तत्र शाययेत्।।

देवस्य परितोऽभ्यर्च्य पूजादीनि यथाक्रमम्।
न्यक्षं विवस्वानमभ्यर्च्य मित्रं चैव महीधरम्।।

धर्मं ज्ञानं च वैराग्यम् ऐश्वर्यं प्रथमेऽर्चयेत्।
तद्बहिश्चैव चाभ्यर्च्य चक्रं शङ्खं तथैव च ।।

गदापद्मयुतं चैव खड्गं मुसलमेव च ।
धनुश्च वनमालां च द्वितीयावरणेऽर्चयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्बहिश्चैव चेन्द्रादीनर्चयित्वाष्टविग्रहैः।
देवस्य परितोभ्यर्च्य शेषं तत्रैव चार्चयेत्।।

विप्रैस्सर्वजनैर्भक्तैः अन्यैर्वापि जनैरपि।
तत्कालेऽभ्युक्षणं यत्तत् सर्वपापं व्यपोहति।।

इष्टान् कामानवाप्नोति सायुज्यं पदमश्नुते।
तस्मात्सर्वप्रयत्नेन तज्जले चैव मज्जयेत्।।

नित्यकर्म समाप्यैव पश्चादग्निं परिस्तरेत्।
धात्रादि पञ्चवारुण्यं मूलहोमं सुहूयताम्।।

स्विष्टकारं च हुत्वैव तमग्निं संव्यपोह्य च ।
पश्चाद्रात्रिं समासाद्य बलिं सर्वत्र चार्पयेत्।।

उत्सवोक्तक्रमेणैव राजवीथ्यादिनाचरेत्।
महावीथीषु वीथी च नाराचेत्यत्र निर्गमे।।

चैत्यस्थाने प्रपायां च सर्वदेवालयाग्रतः।
गोवासे च सभास्थाने प्राज्ञस्याथ गृहं प्रति।।

एतैः स्थानबलिं दत्वा रात्रिशेषं नयेत्क्रमात्।

ज्ञा. ६१ . १०५, १०६

वि. २८ . २०९ , २१०

प्रभाते स्नात्वा, विष्णोर्नुकादीनि जप्त्वा बिम्बमुद्धृत्य, सप्तभिः कलशैः संस्नाप्य, नववस्त्रोत्तरीयाद्यैरलङ्कृत्य, अभ्यर्च्य नदीं, ह्रदं, शुद्धतटाकं वा, आश्रित्य तज्जले प्रपां कूटं वा कृत्वा, वितानध्वजदर्भमाला-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धूपदीपाद्यैरलङ्कृत्य, परितः प्रावरणं कृत्वा, तत्तीरे अग्निशालां कृत्वा अग्निं निधाय, परिस्तीर्य, परिषिच्य, वैष्णवं हुत्वा, पश्चात्सघृतं पायसमादाय, 'योगेशाय शेषपर्यङ्कशायिने शब्दब्रह्मणे समुद्रेभ्यः पर्वतेभ्यो देवेभ्य ऋषिभ्यः पितृभ्यो नागेभ्यो भूतेभ्यः स्वाहे' ति हुत्वा, तत्तीर्थम् 'इदमापः शिवा' इत्यभिमृश्य अधिदैवं 'वरुणं, पुण्यतीर्थं (शिव) पुण्यं, देवावास' मिति चतुर्भिर्मन्त्रैरर्घ्यान्तमभ्यर्च्य, नववस्त्राण्यास्तीर्य, देवं नववस्त्रोत्तरीयाद्यैरलङ्कृत्याभ्यर्च्य, वैष्णवैर्मन्त्रैः प्राक्शिरः शाययित्वा, अग्निं परिस्तीर्य, धात्रादिपञ्चवारुणं मूलहोममाग्नेयं च हुत्वा, ततः परिषेकं कृत्वा, तद्रात्रौ प्रभूतं बलिमाहृत्य, मुद्गनिष्पावतिलतिल्वलाजमाषापूपसंयुक्तं कटाहे प्रक्षिप्य, पूर्ववत्तदालये ग्रामे च प्रदक्षिणक्रमेण दिग्देवताभ्यो बलिं निर्वाप्य, रात्रिशेषं व्यपोह्य,

५.१०.१८ अधिवासगतध्रुवबेरानयनम्

वि. २८. २१०

प्रभाते स्नात्वा देवमुत्थाप्य, शुद्धोदकैः संस्नाप्य, गन्धोदकैरभिषिच्य, अग्निं विसृज्य, नववस्त्रोत्तरीयाद्यैरलङ्कृत्य, अभ्यर्च्य, यानमारोप्य, ग्राममालयं वा प्रदक्षिणं कारयित्वा, आलयमाविश्य, आलयाभिमुखे यज्ञालयस्य पश्चिमे वा देवं संस्थापयेत्।

वि. ३१. २२० ; य. २५. ३६ - ३९ ; प्र. १२. १ - ४

स. ३०. २३ ; ज्ञा. ६३. १०९, ११०

वा.१०

अतोऽर्ध्वे वक्ष्यमाणं च निशि कर्मक्रमं बुधाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रदोषकाले धर्मात्मा जलस्थं देवमुद्धरेत्।।

स्नानद्रव्याणि चाहृत्य देवान् संमार्ज्य मन्त्रवित्।
क्षौमपट्टादिनाच्छाद्य मणिमुक्तादिहैमकैः।।

कुण्डलाङ्गदहारादीन् यथार्हं बन्धयेत्क्रमात्।
विविधैः पुष्पमालादीन् दर्शनीयमलङ्कृतम्।।

यानमारोप्य तत्काले ग्रामादेश्च प्रदक्षिणम्।
स्वस्तिसूक्तं समुच्चार्य तोयधारापुरस्सरम्।।

श्वभ्रस्य पश्चिमे देवान् स्थापयेद्देशिकोत्तमः।

५.१०.१९ बृहद्ध्रुवबेराद्यधिवासने विशेषः

वा. ८

महाबेरं यदि स्यात्तु विशेषं चात्र वक्ष्यते।।

गर्भागारं प्रविश्याथ सूत्रस्य पदमाचरेत्।
पूर्वान्तमुत्तरान्तं च पञ्चसूत्रं प्रसार्य च।।

षोडशं तु पदं कल्प्य विपरीतं न कारयेत्।
मध्ये चतुष्पदं ग्राह्यं ऊर्ध्वे पीठं प्रकल्पयेत्।।

उत्करत्नं तु सन्न्यस्य देवमादाय चात्वरः।
स्वस्तिसूक्तं समुच्चार्य सर्ववाद्यानि घोषयेत्।।

यन्त्रे देवं समारोप्य शनैर्गत्वा समाहितः।
पीठमध्ये तु संस्थाप्य 'भूरसी'त्यादिमुच्चरन्।।

सुस्थितं चापि देवेशं शिल्पिभिस्सार्धमाचरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शिल्पशास्त्रोक्तमार्गेण चाष्टबन्धं प्रकल्पयेत्।।

पूर्वोक्तेन क्रमेणैव कृत्वा चैवाक्षिमोचनम्।
गव्यादीन् प्रतिदृश्यैव देवेशानम्य मन्त्रवित्।।

पञ्चगव्यं प्रगृह्यैव प्रोक्षयित्वा विचक्षणः।
शन्नो देवीरभीत्युक्त्वा तेन कर्म समाचरेत्।।

अथादर्शं प्रगृह्यैव देवस्याग्रे निधाय च।
'देवस्य त्वे' ति मन्त्रेण तत्र कार्यं समाचरेत्।।

दर्पणान्तं समाराध्य प्रोक्ष्य शेषाभिषेचनम्।
दीपान्तमर्चयेद्विद्वान् जले वाप्यधिवासयेत्।।

वर्णयुक्तं ध्रुवं बेरं वर्णहीनमथापि वा।
दर्पणं दर्शयित्वैव विधिना चाधिवासयेत्।।

विष्ण्वादि पञ्चमूर्तीनां देव्योश्च सहितं पुनः।

प्र. ११ . ८२ - ८७

[अत्र 'वसोः पवित्र' मित्युक्त्वा तत्र कार्यं समाचरेत्।
पश्चात् क्षीरं समादाय प्रोक्षयित्वा समाहितः।।
इत्यधिकम्।]

क्रि. ६ . ११० , १११

अशक्यमधिवासाय गौरवात् बिम्बमत्वरः।
पञ्चगव्यैश्च क्षीरेण कुशोदैश्च पृथक् पृथक् ।।

शतमष्टोत्तरं कुम्भान् पूरयित्वात्र देवताः।
पूर्ववत्पूजयित्वैव मन्त्रैरेवाभिषेचयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१०.२० कौतुकादिबेराधिवासे विशेषः

प्र. ११ . ८६, ८७

----------------- चान्यबेरेषु वै पुनः।
पञ्चगव्याधिवासं च तथा क्षीराधिवासनम्।।

एतद्द्वयं विना तत्र कुर्यात्तोयाधिवासनम्।
ग्रामे सर्वत्र तद्रात्रौ प्रभूतं निक्षिपेद् बलिम्।।

५.१०.२१ अन्यदेवबेराधिवासनम्

अ. १६

देवानन्याधिवासं च पृथगेव समाचरेत्।
पृथगेवावताराणामन्येषां पार्षदानि च ।।

त्रीणि बेरस्य चक्रं च बलिरेवं समाचरेत्।

५.१०.२२ रामकृष्णध्रुवबेराधिवासनम्

वा. ८

रामं च लक्ष्मणं चैव वायुसूनुं तथैव च।।

सीतायुक्तं यदि स्याच्चेत् पूर्वोक्तेनैव कारयेत्।
कृष्णं च सत्यभामां च रुक्मिणीं च खगाधिपम्।।

अधिवासाक्षिमोचं च बलिबेरोक्तवच्चरेत्।
पृथक् प्रतिष्ठोक्ता कर्तव्या सर्वमन्त्रं पृथक् चरेत्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

११. वास्तुहोमः

५.११.१ आचार्येण पञ्चगव्यप्राशनम्

अ. १६

प्राशनेऽत्र विशेषोऽस्ति भागमार्गे विचक्षणाः।
गोमूत्रं षोडशांशं स्यात् द्विभागं गोमयं जलम्।।

एकभागं ततः क्षीरं दशभागं ततो दधि।
द्विभागमेकभागं स्यात् घृतं वै प्राशने क्रमात्।।

एवं संयोज्य पूर्वोक्तं समभ्यर्च्योक्तमन्त्रतः।
पादौ प्रक्षाल्य चाचम्य गायत्रीं च समुच्चरन्।।

गृहीत्वा पद्मपत्रेण तं पिबेत् प्रातरेव तु।
प्रस्थमात्रमशक्तश्चेत् प्रस्थं पाददहीनकम्।।

मुच्यते सर्वपापेभ्यो भोजने सुखचेतनः।
आचार्यादौ विशेषेण पूर्वतः सर्वकर्मसु।।

प्राशयित्वा यथामार्गं पुनः कर्माणि चाचरेत्।

५.११.२ गोब्राह्मणैः विमानशोधनम्

खि. १६ . १२२ - १३२

अथ शुद्धिक्रियामार्गं वक्ष्ये देवविमानयोः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विमानशुद्धिं वक्ष्यामि प्रथमं विधिना बुधाः।।

श्वेतश्लक्ष्णसुधाक्षोदैः स्थूलं स्थाने तु पूर्वतः।
आलेपनं प्रकुर्वीत बालस्थाने मृदा तथा।।

शिल्पिकर्मसमाप्तिं च शिल्पशास्त्रक्रमेण तु।
कृत्वा च शिल्पिनं पूज्य विमानं चाङ्कणं तथा।।

संशोधयेत्पुनस्तत्र गोभिः शुद्धिं च कारयेत्।
विमानाङ्कणमाक्षिप्य दूर्वाग्रान् सतृणानपि ।।

पलालं चापि निक्षिप्य पात्रणि सजलानि च।
पञ्चरात्रं त्रिरात्रं वा एकरात्रमथापि वा।।

समतीते दशाहे तु धेनूनां निकरैर्गवाम्।

देवालयाङ्कणे चैव शुद्ध्यर्थं शोधयेत्तदा।।

रात्रौ देवालयस्थानां गवां दुग्धं न चाहरेत्।
दुग्धपानादिसन्तृप्तैः वत्सकैः कृतवल्गितैः।।

वत्सपीतस्तनाग्रेभ्यः संसृतक्षीरबिन्दुभिः।
गोरोमभिः सफेनैश्च गोशकृन्मूत्रसञ्चितैः।।

शुद्धं भवति तत्स्थानं गावः शुद्धाश्शुभा मताः।
गोभिः शुद्धिं च कृत्वा तु कुर्याद् ब्राह्मणभोजनम्।।

गर्भगेहे बहिर्वापि ब्राह्मणान् भोजयेत्तदा।
चतुर्विंशति पञ्चाशच्छतं वाप्यधिकं ततः।।

पवित्रमिति सम्प्रोक्तं तत्स्थाने भोजयेत्ततः।
भोजनानन्तरं तेषामुच्छिष्टं परिशोधयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.११.३ प्रतिष्ठाङ्गभूतहोमाय अग्निमथनम्

वि. २९ . २१४, २१५

अग्निमथनार्थं यज्ञागारे चाऽऽग्नेय्यां गोमयेनोपलिप्य, पञ्चवर्णैरलङ्कृत्य, (तन्मध्ये) मण्डलं कृत्वा, दर्भानास्तीर्य, तत्राऽरणिं प्राङ्मुखं सन्न्यस्य अरण्यां महीं, मन्थे विष्णुम् उत्तरे पट्टिकायामग्निमभ्यर्च्य, आचार्यः प्राङ्मुखः 'अग्न आयाहि' इत्यरणिं सन्न्यस्य 'आयुर्दा' इति मन्थदण्डं संस्थाप्य, 'अग्निं दूत' मिति मन्थे रज्जुं समावेष्ट्य, 'अग्निर्मूर्धे' ति उत्तरपट्टिकां संयोज्य, 'जातवेदो भुवनस्ये' त्यग्निं मथित्वा उत्पन्नमग्निम् 'आयुर्दा' इति प्रणम्य 'उपावरोहः' (वै. म. प्र.१) इति गोकरीषैः समुज्ज्वाल्य 'घृतप्रतीक' (वै.म . प्र.१) इति पात्रिकायामादाय, 'अग्निरिन्द्रे' त्यभिवादनं कृत्वा अप्रमादं निधाय,

ज्ञा. ६१. १०७ ; वा. ९

क्रि. ६. ११६ - १२१

[अत्र मौञ्जीरज्जौ वासुकिमभ्यर्च्य 'अयं त इध्म' इतीन्धनानि प्रक्षिपेदिति चाधिकम् इति विशेषः।]

अ.१४

[अत्र 'दण्डायामं चतुर्विंशं नाहं तु द्वादशाङ्गुलम्' एवं तु अरणिं कृत्वा इत्यधिकतया दृश्यते।]

खि. १६ . १४८ - १५५

आलयात्पुरतो वापि उत्तरे वा मनोरमे।।

स्थण्डिलं चोपलिप्यैव वर्णालङ्कारमाचरेत्।
धान्यराशिं च संस्तीर्य दर्भानुपरि संस्तरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अरणी द्वे सुसन्यस्य पूजयेत्तु यथाविधि।
अर्चयेदधरारण्यां हरिणीं विष्णुवल्लभाम्।।

विष्णुमभ्यर्चयेद्दण्डे ऊर्ध्वारण्यां हुताशनम्।
आचार्यः प्राङ्मुखः स्थित्वा योजयित्वाऽथ मन्त्रवित्।।

रज्जुं मौञ्जीमयीं कृत्वा त्रिवृतां शेषमर्चयेत्।
'जातवेद' इति प्रोच्य मन्थनं सम्यगाचरेत्।।

जपन् वैश्वानरं सूक्तमरण्यां मन्थनं चरेत्।
यावदग्निसमुत्पत्तिः तावद्वै मन्थनं भवेत्।।

उत्पन्नमग्निमादाय 'अयन्त' इति चोच्चरन्।
परितस्तु करीषाद्यैः योजयित्वाथ युक्तितः।।

इन्धनानि सुनिक्षिप्य जातमग्निं सुरक्षयेत्।

स. ३० . १ - ६

५.११.४ मथिताग्न्यलाभे ग्राह्योऽग्निः

क्रि. ६. १२२

अथवा श्रोत्रियागारात् अग्निमाहृत्य वै तथा।
तत्र वैश्वानरं सूक्तं यजेदिति च केचन।।

अ. १९

स.३०. २८

अलाभे मथितस्याग्नेराचार्यागारतो हरेत्।
यजमानगृहाद्वाथ श्रोत्रियागारतोऽथवा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.११.५ वास्तुहोमाचरणस्य कालः

खि. १६ . २०२

प्रतिष्ठोक्तदिनात्पूर्वं द्वितीये वा तृतीयके।
आलयस्योत्तरे पार्श्वे वास्तुहोम उदीरितः।।

५.११.६ वास्तुपुरुषद्वयस्वरूपम्

खि. १६ . २०३ - २०८

(वास्तुहोमप्रसङ्गे तु वास्तुपूरुष उच्यते)
कल्पयेद्वास्तुपुरुषं दशतालेन मानतः।।

आलये गोपुरे चैव मण्डपे चाङ्कणेऽपि वा।
यावान् विस्तार उद्दिष्टः तावांस्तस्याङ्गमुच्यते।।

द्वौ वास्तुपुरुषौ ज्ञेयौ चलाचलविभेदतः।
प्राक्छिरोऽधोमुखो मुख्यः भूमिस्थस्य तु सर्वदा।।

स स्थाणू रुद्रदेहात्मा शर्व इत्यभिधीयते।
तस्योपरि च यश्शेते चलस्सर्वप्रभुर्वरः।।

मध्याह्ने प्राक्छिराश्शेते स सायं दक्षिणाशिराः।
निश्यर्धे पश्चिमशिराः प्रातरुत्तरदिक्छिराः।।

सदाम्बरमुखो भूत्वा सङ्क्रमेत्सङ्क्रमक्रमात्।
एवं विज्ञाय मनसा वास्तुहोमं समाचरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.११.७ वास्तुहोमे कुण्डप्रकल्पनम्

अ. १७

----------- मृद्भिर्वा सिकताभिर्वा।।

द्वादशाङ्गुलमुत्सेधं द्वात्रिंशद्विस्तरायतम्।
चतुरश्रं समं कृत्वा मध्ये निम्नं च कारयेत्।।

तावद्गाढं च कृत्वैव द्वादशाङ्गुलमुच्यते।
तस्मात्ततो बहिर्वेदिं चत्वारिंशत्तलाधिकम्।।

विस्तारं मध्यवेद्याश्च उत्सेधं तु द्विगोलकम्।
तस्माद्बहिरधो वेदिः ततः पञ्चदशाङ्गुलम्।।

उत्सेधं भागमुद्दिष्टं तिसृभिर्वेदिभिर्युतम्।
तस्य दक्षिणभागे तु ब्रह्मस्थानं प्रकल्पयेत्।।

षोडशाङ्गुलमायामम् उत्सेधं चतुरङ्गुलम्।
चतुरश्रं समं कृत्वा अन्तरं भागमेव च।।

तस्य पश्चिमभागे तु पितृस्थानं प्रकल्पयेत्।
द्वादशाङ्गुलमायाममुन्नतं गोलकं भवेत्।।

शूर्पाकारं च कृत्वा तु दक्षिणाग्रं प्रचक्षते।
उत्तरे सोममुद्दिश्य षोडशाङ्गुलमायतम्।।

समवृत्तं च कृत्वा तु भागं चैवोन्नतं भवेत्।
वेदित्रयं च कर्तव्यं सीवनीक्षयचन्द्रवत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खि. १६. २०९ - २१३

आलयस्योत्तरे कुर्याद्वास्तुकुण्डं विचक्षणः।
मण्डपे मध्यमे कुर्याद् गोपुरे च तथैव च।।

प्रासादस्योत्तरे कुर्यात् स्थण्डिलं चतुरश्रकम्।
गोमयेनोपलिप्यैव वर्णालङ्करणं चरेत्।।

वास्तुपूरुषरूपं तु कल्पयित्वा विचक्षणः।
कुण्डं श्रामणकं तस्य पूर्वोक्तेन विधानतः।।

कुक्षिप्रदेशे कुर्वीत धनधान्यविवृद्धये।
बाहुप्रदेशे कुर्वीत पुत्रपौत्राभिवृद्धये।।

नाभेरधः प्रदेशे तु वास्तुकुण्डं न कारयेत्।
कुण्डमेवं कल्पयित्वा --------------।।

स. ३०. २०, २१

[अत्र ऊरु प्रदेशे कुर्याच्चेत् वीर्यविवर्धनम्, मुखप्रदेशे चेत् पुत्रपौत्रविवर्धनम् इति विशेषः।]

५.११.८ वास्तुहोमप्रकारः

खि. १६. २१३ - २३०

---------------------साधितेनैव चाग्निना।।

आघारं विधिवत्कृत्वा अदितेन्वादिभिः क्रमात्।
परिस्तीर्य तु मन्त्रज्ञः पश्चादग्निं प्रणम्य च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिद्भिर्मूलमध्याग्रघृताक्ताभिर्यजेत्ततः।
'भूमियज्ञाय स्वाहे' ति 'यज्ञदेवे' ति च क्रमात्।।

'मेदिनी देवी' 'समुद्रेति शृङ्गे वायुपरी' ति च ।
व्याहृत्यन्तं च हुत्वा तु उल्कया चाग्निमाहरेत्।।

अहमग्नेऽग्निमित्युक्त्वा मूलबिम्बस्य पार्श्वतः।
गर्भालये च सर्वत्र तथा चैवार्धमण्डपे ।।

स्नपनालये च कुर्वीत गोपुरे च तथैव च ।
प्राकारादिषु सर्वत्र प्रादक्षिण्यक्रमेण वै।।

दर्शयित्वा विधानज्ञः पश्चादग्निं विसर्जयेत्।
पञ्चगव्यं समादाय मृत्पात्रे तु विशेषतः।।

प्रोक्षयेत्कुशकूर्चेन 'अणोरणीया' निति मन्त्रतः।
मूलबिम्बस्य परितः दर्शयित्वा च सर्वशः।।

पुनः कृत्वा तु पुण्याहं तत्र प्रोक्षणमाचरेत्।
पश्चादग्निं समासाद्य परिस्तीर्य च पावकम्।।

' ये ते शत - मुदुत्तम - मयाश्चाग्ने' ति च क्रमात्।
'आपस्सृजन्त्वि' ति चत्वारो हूयन्ते वारुणाः स्मृताः।।

' विश्वेदेवस्य' इत्युक्त्वा ' विश्वे अद्य' ततः परम्।
वैश्वदेवं च हुत्वा तु वैष्णवं च सुहूयताम्।।

'अतो देवा' ' इदं विष्णुः' ' त्रीणि पदा विचक्रमे' ।
' विष्णोः कर्माणि' ' तद्विष्णोः' ' तद्विप्रास' इति ब्रुवन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुद्रमन्यं च हुत्वा तु त्र्यम्बकं च ततः परम्।
' ब्रह्म जज्ञान' मित्युक्त्वा हिरण्यगर्भ इति ब्रुवन्।।

' मिश्रवासस' इत्युक्त्वा युवमेतानि हूयताम्।
'अग्नीषोमाविमं' प्रोच्य 'आन्यं दिव' इतीरयन्।।

हुत्वा बृहस्पतिरिति बृहस्पतिस्सोममित्यपि।
'बृहस्पते अति यदी ' ति 'उपायमे' ति हूयताम्।।

त्रातारादींस्ततो हुत्वा ऐन्द्रमन्त्रांस्त्रयोदश।
'यमो दाधार - नमस्ते' ति यममन्त्रो हुनेत्तथा।।

'मित्रस्य चर्षणी' ति 'मित्रो जनानि' ति ब्रुवन्।
'प्रसमित्रे' ति हुत्वा तु व्याहृत्यन्तं पृथक् पृथक्।।

एवं हुत्वा विधानेन अन्ततः परिषेचयेत्।

य. २५ . ४६ - ५२

तद्भोजनान्ते धर्मात्मा साधयेत्पावकं बुधः।।

मथितं लौकिकं वाथ समाहृत्य च पावकम्।
पश्चाद्रात्रौ विशेषेण वास्तुहोमं समारभेत्।।

आलयस्योत्तरे वाथ शालायाश्चोत्तरेऽथवा।
कुण्डं श्रामणकं कल्प्य आघारं पूर्ववच्चरेत्।।

'वास्तोष्पते' ति मन्त्रौ द्वौ भूमियज्ञद्वयं क्वचित्।
पश्चाद्भूम्याश्च दैवत्यं व्याहृत्यन्तं च हूयते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'अहमग्ने' ति मन्त्रेण उल्कयाऽग्निं प्रगृह्य च ।
'दहनादशुन्धः शुन्धे' ति पर्यग्निं कारयेद् बुधः।।

विश्वतश्च विशेषेण पुण्याहमपि वाचयेत्।
पश्चादग्निं परिस्तीर्य वारुणान्तं च वैष्णवम्।।

सह व्याहृतिभिर्हुत्वा अन्तहोमं तथाचरेत्।

क्रि. ६ . ११५, ११६ ; वि. २९ . २१५ ; प्र. १२.४

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२.आघारहोमः

५.१२.१ ऋत्विङ्नियोजनम्

वि. ३१ . २१९, २२०

अथ गुरुर्यजमानम् 'अणोरणीयानि' त्यभ्युक्ष्य सघृतं पयः प्राशयित्वा, द्विजं मन्त्रवद् गृह्णीयात्। वर्णात् परं मन्त्रमृते शिष्यत्वेनाहरेत्। तेन शिष्यः पापात्प्रमुच्यते। ऋत्विजश्चाहूय 'अथावनीदम्' (वै. म. प्र.३) इति मण्डलान्युपलिप्य 'अस्त्वासनम्' (वै. म. प्र.३) इत्यासनानि सदर्भयवानि निधाय तेष्वासीनांस्तान् देववत्स्मृत्वा पवित्रं यज्ञसंयुक्तम् 'अग्निमील' (ऋ. स. १.१.१) इति दधि प्राशयित्वा आचामेत्। आचार्यस्तान् पूर्वेद्युरपराह्णे यथाकर्मणि नियुञ्जीत।

क्रि. ६ . ११२ - ११४

५.१२.२ आघारहोमार्थमग्निप्रणयनम्

वि. ३१. २२०

आलयं संशोध्य पश्चाद्वैखानससूत्रोक्तविधिना गार्हपत्याग्निकुण्डे आघारं हुत्वा आघारान्ते तमग्निं वर्धयित्वा तस्मादन्वाहार्याग्निकुण्डे 'जातवेदो भुवनस्ये' (वै. म. प्र. १) त्यग्निं प्रणीय पश्चादाहवनीयाग्निकुण्डे 'अग्न आयाही' (सा. स. १.१.१) ति मन्त्रेणाग्निं प्रणीय पश्चादावसथ्याग्निकुण्डे 'अयं ते योनि' रित्यग्निं प्रणीय ततस्सभ्याग्निकुण्डे 'मयि गृह्णामी' (वै. म. प्र. १) त्यग्निं प्रणीय ततः पौण्डरीकाग्निकुण्डे 'तत्प्रतीक' (वै. म. प्र.१) इत्यग्निं प्रणीय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्येषु 'जातवेद' (वै. म. प्र. १) इत्यग्निं प्रणयेत्।

स. ३०. २६ ; ज्ञा. ६३ .११०

य. २५. ५२ - ५६

ततस्तद् गार्हपत्याग्नौ पूर्वोक्तविधिना बुधः।।

हुताशनं प्रतिष्ठाप्य वर्धयेदनलं गुरुः।
गुरुणा वर्धयित्वान्ते समाहूताश्च ऋत्विजः।।

प्रणीयुर्गार्हपत्याद्यां तदाश्रयणमन्त्रवत्।
यमेन्द्रयक्षराजेषु(?) मध्येऽग्नौ दिक्षु वै कृते।।

'जातवेदोऽग्न आयाहि अयन्ते मयि' चैव हि।
'घृत प्रतीक' इत्येतैर्मन्त्रैरग्निं निधापयेत्।।

पश्चिमादनलान्मन्त्री गृहीत्वा स्थण्डिले क्रमात्।
प्रणीय सर्वहोमानामाघारादौ विशेषतः।।

वा.१०

मथिताग्निं समादाय गार्हपत्ये प्रतिष्ठितम्।।

आघारं विधिवत्कृत्वा वैष्णवान्तं समाचरेत्।
एषोऽग्निस्सर्वदेवानां निधायाघारपूर्वकम्।।

ततश्चाहवनीयार्थं प्रगृह्याग्निं निधाय च ।
ततोन्वाहार्यकुण्डे तु अग्निमादाय मन्त्रवित्।।

पश्चात् सभ्ये तु संस्थाप्य आवसथ्ये ततः परम्।
पद्मकुण्डे तु संस्थाप्य पूर्ववद्देशिकोत्तमः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सूत्रोक्तेन विधानेन सर्वमाघारमाचरेत्।

प्र.१२. ५, ६

मथित्वाग्निं प्रगृह्णीयात् वास्तुहोमाग्निमेव वा।
संस्कृत्य विधिनाऽदाय प्रणयेद्गार्हपत्यके।।

त्रिस्संस्कृतो लौकिकोऽग्निः मथिताग्निसमो भवेत्।

क्रि. ६ . १३७

सर्वाग्नीनां प्रणयनं प्रकुर्याद् गार्हपत्यतः।

५.१२.३ गार्हपत्यादिपञ्चाग्निष्वाघारहोमः

स.३०. २७ , २९ - ५०

मथिताग्निं समुज्ज्वाल्य शुष्कैरेवेन्धनैर्भृशम्।
वर्धयित्वा शरावे तं पृथगेव प्रगृह्य च ।।

अद्भिः करकमापूर्य दक्षिणेऽग्नेर्निधाय च।
दर्भेष्वन्यांश्च सम्भारान् सम्भृत्योत्तरपार्श्वतः।।

एतोन्विन्द्रादिमन्त्रैश्च प्रोक्षणोल्लेखनादिकम्।
कुर्यात् कुण्डे निधायाग्निं प्रज्वाल्यैव च मन्त्रतः।।

पश्चिमाभिमुखासीनं ध्यात्वैवाग्निं प्रणम्य च।
वैखानसेन सूत्रेण सर्वमाघारमाचरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशेषं सम्प्रवक्ष्यामि पञ्चाग्नीनां पृथक् पृथक्।
षट्त्रिंशदङ्गुलैः कूर्चैर्द्वितीयस्यां तथैव च।।

वेद्यामग्निं परिस्तीर्य परिधींश्च निधाय च ।
ऊर्ध्वाग्रौ समिधौ न्यस्य चोर्ध्ववेद्यां यथाविधि।।

पुष्पाद्यैर्विग्रहैरेवं तथार्घ्याचमनान्तकैः।
इन्द्रादीनपि दिग्देवान् अभ्यर्च्याष्टौ च दक्षिणे।।

पार्श्वे ब्रह्माणमभ्यर्च्य सोमं चोत्तरतोऽर्चयेत्।
प्रणिधी द्वे निधायैव चोत्तरप्रणिधौ जले।।

अग्न्यादिसर्वदेवांश्च आवाह्यैव ततः परम्।
गार्हपत्याग्निमित्युक्त्वा गार्हपत्ये विशेषतः।।

यज्ञदैवतविश्वेति चों भूः पुरुषमित्यपि।
तथैवाच्युतमित्युक्त्वा देवतावाहनं चरेत्।।

अन्वाहार्याग्निमित्युक्त्वा चान्वाहार्ये तथैव च।
यज्ञदैवतविश्वेति चों भुवः पुरुषं तथा।।

सत्यमूर्तिमिति प्रोच्य देवतावाहनं स्मृतम्।
आहवनीयाग्निमित्युक्त्वा यज्ञदैवतमित्यपि।।

ओं सुवः पुरुषं चेति पुरुषं चाधिदैवतम्।
एवमाहवनीयाग्नावावाहनमथाचरेत्।।

आवसथ्याग्निमित्युक्त्वा यज्ञदैवतमित्यपि।
ओं महः पुरुषं चेति देवमप्यनिरुद्धकम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्येवमावसथ्याग्नावावाहनमुदीरितम्।
सभ्याग्निं यज्ञदेवेति ओं जनः पुरुषं तथा।।

विष्णुदेवं तथा सभ्ये ह्यावाहनमथाचरेत्।
आवाहनक्रमेणाज्यनिर्वापं कारयेद् बुधः।।

तत्क्रमेण स्रुवेणाज्यं गृहीत्वाज्याहुतीर्यजेत्।
जुहुयात्पञ्चधा तेषु पञ्चाग्निषु विशेषतः।।

चतुरङ्गुलिसंस्रावा अविच्छिन्ना घृताहुतीः।
अङ्गुष्ठपर्वमात्रं तु गृहीत्वान्नाहुतीः स्मृताः।।

आघारे पौण्डरीकाग्नेर्विशेषः सम्प्रवक्ष्यते।
पौण्डरीकाग्निमित्युक्त्वा यज्ञदैवतमित्यपि।।

ओं तपः पुरुषं चेति वासुदेवमतः परम्।
ओं सत्यं पुरुषं चेति नारायणमिति ब्रुवन्।।

एवमावाहनं कृत्वा निरूप्याज्यं जुहोति वै।
औपासनाग्निमित्युक्त्वा यज्ञदैवतमित्यपि।।

औपासनाग्निमित्येवमावाह्याज्यं निरूप्य च।
अग्निं श्रामणकं चेति श्रामणाग्निमुदीर्य च ।।

तथाज्यं जुहुयादेवमित्याघारक्रमं विदुः।

य. २६ . १ - ९ ; वा. १०

क्रि. ६ . १२५ - १३६

पूर्वं तु गार्हपत्याग्नौ आघारं तेन वह्निना।
'गार्हपत्याग्नि' मित्युक्त्वा 'यज्ञदैवत' मित्यपि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'तत्रों भूः पुरुषं' चेति 'अच्युतं' चेति कीर्तयन्।
आवाह्य जुष्टाकारं च स्वाहाकारं च कारयेत्।।

तस्मादग्निं समादाय दक्षिणाग्नौ ततः परम्।
'जातवेद' इति प्रोच्य प्रणीयाग्निं यथाविधि।।

'अन्वाहार्याग्नि' मित्युक्त्वा यज्ञदैवतमित्यपि।
ओं भुवः पुरुषं सत्यं कुर्यादावाहनादिकम्।।

अग्निं तु गार्हपत्याग्रेः 'अग्न आयाहि' मन्त्रतः।
प्रणीयाहवनीयाग्नौ वदन् आहवनीयकम्।।

'यज्ञदैवत' मित्युक्त्वा ओं सुवः पुरुषं त्विति।
उच्चरन् पुरुषं चेति कुर्यादावाहनादिकम्।।

'अयं ते योनि' रित्यग्निम् आवसथ्ये प्रणीय च ।
आवसथ्याऽग्निमित्युक्त्वा 'यज्ञदैवत' मित्यपि।।

'ओं महः पुरुषं ' चेति देवमप्यनिरुद्धकम्।
इत्येवमावसथ्याग्नौ कुर्यादावाहनादिकम्।।

'मयि गृह्णामि' मन्त्रेण सभ्ये चाग्निं प्रणीय च।
सभ्याग्निं 'यज्ञदेवेति' ओं जनः पुरुषं तथा।।

विष्णुमावाहयामीति सभ्यस्यावाहनादिकम्।
'घृत प्रतीक' इत्यग्निं पौण्डरीके प्रणीय च।।

पौण्डरीकाग्निमित्युक्त्वा 'यज्ञदैवत' मित्यपि।
'ओं तपः पुरुषं' चेति वासुदेवमतः परम्।।

'ओं सत्यं पुरुषं' चेति नारायणमिति ब्रुवन्।
एवमावाहनं कृत्वा निरुप्याज्याहुतीर्यजेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि. ३१ . २२०, २२१

अग्निकुण्डानामूर्ध्ववेद्यामिन्द्रादिदिग्देवान् तत्तत्स्थाने दक्षिणवेद्यधस्तात् ब्रह्माणम् , उत्तरे सोममभ्यर्च्य गार्हपत्योत्तरप्रणिधौ अग्न्यादिदेवानाम् आवाहनान्ते गार्हपत्ययज्ञं यज्ञदेवतविश्वान्देवान् ॐ भूः पुरुषमच्युतमिति ; अन्वाहार्ये अन्वाहार्ययज्ञं यज्ञदेवतविश्वान् देवान्, ॐ भुवः पुरुषं सत्यमिति ; आहवनीये आहवनीययज्ञं यज्ञदेवतविश्वान् देवान् ॐ सुवः पुरुषं पुरुषमिति, आवसथ्ये आवसथ्ययज्ञं यज्ञदैवतविश्वान् देवान् ॐ महः पुरुषमनिरुद्धमिति, सभ्ये सभ्ययज्ञं यज्ञदेवतविश्वान् देवान् ॐ जनः पुरुषं विष्णुमिति, पौण्डरीके पौण्डरीकयज्ञं यज्ञदैवतविश्वान् देवान्, ॐ तपः पुरुषं वासुदेवमिति, श्रामणके श्रामणकाग्नियज्ञं यज्ञदैवतविश्वान् देवान् 'ॐसत्यं पुरुषं नारायणमित्यावाह्य परिवाराणां होमेषु औपासनं यज्ञं यज्ञदेवतविश्वान् देवान् आवाहयामीत्यावाह्य, तथैवाज्यं निरूप्याऽहुतीर्हुत्वा, षड्होमेषु वैष्णवं हुत्वा, एवमेव आघारं जुहुयुः।

खि. १६ . २७० - २७२

ज्ञा. ६३. ११०

पञ्चाग्नीनामाघारविशेषो वक्ष्यते। श्रीवैखानससूत्रोक्तौपासनाग्न्याघारविधिना सर्वं कृत्वा गार्हपत्यं गार्हपत्ययज्ञदैवतम् ॐ भूः पुरुषम् अच्युतमिति गार्हपत्यस्य, अन्वाहार्यमन्वाहार्ययज्ञदैवतम् ॐ भुवः पुरुषं सत्यमित्यन्वाहार्यस्य, आहवनीयमाहवनीयज्ञदैवतम् ॐ सुवः पुरुषं पुरुषमित्याहवनीयस्य, आवसथ्यम् आवसथ्ययज्ञदैवतम् ॐ महः पुरुषमनिरुद्धमित्यावसथ्यस्य, सभ्यं सभ्ययज्ञदैवतम् ॐ जनः पुरुषं विष्णुमिति सभ्यस्य इत्येवमावाहनजुष्टाकारस्वाहाकारैः विशेषमाघारं विभज्य पञ्चस्वग्निषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चधैव जुहुयात्। 'पञ्चधाऽग्नीन् व्यक्रामत्, विराट् स्रष्टे' ति श्रुतेः। पौण्डरीकाग्नेराघारक्रमेणैवाघारं जुहुयात् । एतस्याघारं भगवान् ऋषिः सूत्रे वैखानसेऽवोचत् । पूर्ववदौपासनवत्सर्वं कृत्वा पौण्डरीकं पौण्डरीकयज्ञदैवतम् ॐ तपः पुरुषं वासुदेवं सत्यं पुरुषं नारायणमिति पौण्डरीकस्य आवाहनाद्याघारान्तं जुहुयादित्यत्रिः। सभ्यादिषु षट्सु च देवं ध्यायन् आज्यमुपजुह्वाऽऽदाय वैष्णवं हुत्वा चरुं दर्व्याऽभिघार्याऽदाय जुह्वा च वैष्णवं यजेत् । अन्येषु स्रुवेणाज्यं जुहुयात्।

५.१२.४ एकाध्वर्युपक्षे अन्तरा गमने निषेधः

वि. ३१ . २२१

आघारान्ते पक्वहोमात्पूर्वं तेषामन्तरं न व्रजेत्। अध्वर्यूणामभावे चैकाध्वर्युश्चेत् 'प्रासावी' रित्यन्तैः प्रवहणं कृत्वा पुनः परिस्तीर्य होममाचरेत्, अस्य प्रायश्चित्तं वैष्णवं यजेत्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३. होमेषु साधारणा अंशाः

५.१३.१ होमद्रव्यपरिमाणम्

क्रि. ६ . १४९, १५०

चतुरङ्गुलिसंस्रावाप्यविच्छिन्ना घृताहुतिः।
अङ्गुष्ठपर्वमात्रा तु गृहीतान्नाहुतिः स्मृता।।

अन्नमक्षप्रमाणं स्यात् लाजं मुष्टिमितं भवेत्।
तिलसर्षपसक्तूनां शुक्तिमात्राहुतिर्भवेत्।।

अ. ९

आघारान्ते सुहोतव्यं सप्तजिह्वासु वैष्णवम्।
चतुरङ्गुलसंस्राव्यमविच्छिन्नं घृताहुतिः।।

षोडशाङ्गुलसंस्राव्यं जुहुयाद्दैविके तथा।

५.१३.२ समिदादीनां होमक्रमः

य. २६ . २९ - ३४

आग्नेयं सौरदैवत्यमनामिकाङ्गुष्ठयोर्गतम्।
आचार्यः समिदाधानं कुर्यादग्नौ विधानतः।।

वासवं मारुतं हित्वा स्रुवमध्ये घृतानिलम्।
चतुरङ्गुलमादाय ध्यायन्नग्नौ विनिक्षिपेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिलसर्षपयोर्होमे विहायेन्द्राङ्गुलिं बुधः।
शुक्तिमात्रक्रमेणैव हुनेदन्नमथाक्षवत्।।

लाजं मुष्टिप्रमाणेन स्मारं स्मारमथाधिपम्।
जिह्वायां तत्र तत्रैव स्वाहान्तं जुहुयात् सुधीः।।

अदिते अनुमन्यस्व इति पूर्वं कथं भवेत्।
स्वस्थाग्नेरुन्मुखार्थाय कृतः शास्त्रेषु निश्चयः।।

अदिते अन्वमगग्स्था इति होमे हुते सति।
अग्नेः स्वास्थ्यविधानाय कृतमन्ते विसर्जयेत्।।

खि. १७ . १७८, १७९

मध्येऽङ्गुष्ठानामिकयोः समाङ्गुल्योः स्रुवं तथा।
प्रदेशिनीमध्यमे च स्रुवस्याधः प्रसार्य च।।

कनिष्ठाङ्गुलिं विसृज्यैव गृह्णीयाद्धोमकर्मणि।
चतुरङ्गुलप्रमाणं च यथाऽच्छिन्नं स्रुवं तथा।।

क्रि. ७. ११६, ११९

५.१३.३ हविःप्रक्षेपप्रकारः

खि. १७. १८० - १८३

घृतं स्रुवेण सङ्गृह्य मन्त्रमुच्चार्य सर्वकम्।
'स्वाहे' त्युक्त्वा हुनेदग्नौ तं तं देवं हृदा स्मरन्।।

अङ्गुष्ठानामिकाभ्यां च तथा मध्यमया सह।
घृताक्तां समिधं गृह्य प्रागग्रं जुहुयाद्विधिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रान्ते पूर्ववद्धोमं जुहुयाज्ज्ञातवेदसि।
न्यग्रोधफलमात्रं तु गृह्णीयात् सघृतं चरुम्।।

जुहुयाद्विधिना वह्नौ पूर्वोक्तेन क्रमेण वै।

क्रि. ६. १६१
वैष्णवं जुहुयात् जुह्वा चरुणाग्निषु षट्स्वपि[1] ।
आज्यमप्यग्निकुण्डेषु स्रुवेण जुहुयादिति।।

५.१३.४ समिदादिहोमद्रव्याणां देवताः

य. २६ . २२ - २४
समिधामृषयस्सर्वे लाजापूपतिलोदनैः।।

अपूपसमिधोरीशो लाजस्य च रविर्भवेत्।
आज्यसर्षपयोरग्निः पितरस्तिलदैवतम्।।

चरोः समस्तजन्तूनामपि निर्माणकर्मणि।
विधाता दैवतं साक्षाद्द्विदण्डः कर्तुमञ्जसा।।

५.१३.५ अग्नेः कर्णाद्यवयवस्थानानि

य. २६ . ३६ - ३९
अग्निं वदन्ति देवानामाननं श्रुतयः सुखम्।
'अग्निं दूतं वृणीमह' इत्याद्या बहुशोऽभवन्।।

यत्र यत्र च काष्ठानि तत्र कर्णं विदुर्बुधाः।

1.गार्हपत्य- दक्षिणाग्नि आहवनीय - आवसथ्य - सभ्य - पौण्डरीकाख्येषु षट्सु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धूमः स्वल्पतरो यत्र नासिकामपि तद्विदुः।।

मन्दप्रज्वलनं यत्र तत्र नेत्रं प्रचक्षते।
अङ्गारपुञ्जमग्नेस्तु शिरश्शंसन्ति पण्डिताः।।

महाप्रज्वलनं यत्र मुखं तत्र विशिष्यते।
ज्वालाजिह्वाशतयुतं ध्यायन्नेवं हुनेत्सुधीः।।

अ. ९

५.१३.६ अग्नेः सप्तजिह्वाः

य. २६ . १७ - २०

------ ततो जिह्वालक्षणं वच्मि शक्तितः।।

हिरण्या कनका रक्ता कृष्णा चापि वसुप्रभा।
अतिरक्ता तथा चैव बहुरूपेति सप्तधा।।

हिरण्या श्यामरक्ता च कृष्णा पीतातिरक्तका।
शङ्खाभवर्णा स्थानानि ईशेन्द्राग्नियमा अपि।।

वारुणं मारुतं मध्ये जिह्वानां नियतिः क्रमात्।

अ. ९ ; क्रि. ६ . १४३, १४४

५.१३.७ अग्निजिह्वायां होमनियमः

य. २६ . २५ , २६

कर्णे यदि हुते व्याधिर्नासिकायां महद्भयम्।
चक्षुष्यन्धो भवेत्किन्तु मस्तके सर्वनाशनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यैः कराद्यैर्दारिद्र्यं तस्मादन्यैर्विचार्य च ।
शरोऽङ्गारेण सम्मन्त्र्य जिह्वाग्रे जुहुयात्सुधीः।।

अ. ९

५.१३.८ अग्निजिह्वाभेदेन होमद्रव्यभेदः

क्रि. ६ . १४४ - १४७

आघारान्ते तु होतव्यं सप्तजिह्वासु वैष्णवम्।।

हिरण्यायां समिद्धोमं कनकायां यजेत् घृतम्।
सर्षपांश्चैव रक्तायां कृष्णायां लाजमेव च ।।

वसुप्रभायां देवं तं ध्यात्वाऽपूपं जुहोति च ।
ह्रोतव्यमतिरक्तायां तिलं सर्वामरप्रियम्।।

अन्यानि बहुरूपायां जुहोति मनसा स्मरन्।

अ. ९

५.१३.९ ज्वलितेऽग्नौ होमः प्रशस्तः

खि. १७ . १७५ - १७७

समिच्चरुघृताद्यैश्च ज्वलितेऽग्नौ स्मरन् हुनेत्।।

अशब्दं भिद्यमानेषु दीप्तेष्वग्निकणेषु च ।
यदा हुते घृते वह्निः स्वयमेवोद्‌गताऽर्चिषा।।

समुज्ज्वलति निर्धूमे हुनेदाहुतिरुत्तमा।
एवं सर्वत्र होमेषु ध्यायन्नग्निं हुनेद्धविः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१३.१० मन्त्रेण होमक्रमः

स. ३३ . ७०, ७१

मन्त्रान्तर्वर्तिनं विष्णुं भगवन्तमनुस्मरन्।

स्वाहान्तं सर्वमन्त्रांश्च जुहुयात् तदनुक्रमात्।।

(इदं तु विष्णवे हव्यं न ममेति वदन् पुनः।

मन्त्रोक्तदेवतायाश्च चतुर्थ्यन्तं च केचन) ।।

५.१३.११ होमविशेषेषु अग्नेरवस्थानभेदाः

य. २६ . २७, २८

इध्महोमे तु तिष्ठन्तमासीनं चरुणा हुतौ ।

समिदाज्याहुतौ देवं शयानं शान्ततेजसम्।।

सुखासीनं तिलापूपहोमादिषु च केवलम्।

एवं ध्यायन् घृतादीनि होमयेद्विधिवद् बुधः।।

अ. ९ ; क्रि. ६ . १४७, १४८

५.१३.१२ स्वाहाध्यानम्

य. २६ . ४०

वसन्तीं श्यामकौशेयां धृतकाञ्चनशोभिनीम्।

लक्ष्मीमिवापरां देवीं स्वाहां ध्यायीत मन्त्रवित्।।

अ. ९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१३.१३ स्वधाध्यानम्

य. २६ . ४१

नवदूर्वादलश्यामां रक्तकौशेयवासिनीम्।
सुखभोगासनासीनां स्वधामेवं विभावयेत्।।

अ. ९

५.१३.१४ अग्निध्यानम्

य. २६. १० - १७

अथ होमाधिदेवस्य पावकस्य महात्मनः।
ध्यानं वक्ष्ये यथापूर्वं यथाशक्ति यथाविधि।।

अथ किंशुकपुष्पाभं शुकपिञ्छाम्बरान्वितम्।
सर्वाभरणसंयुक्तं ज्वालामालासमाकुलम्।।

एवं तं माहिषास्येन तं तथा जातवेदसम्।
द्विशीर्षं च चतुःशृङ्गं द्विश्रोत्रं च द्विनासिकम्।।

चतुर्णेत्रं सप्तहस्तमेकायतनचेतसम्।
त्रिपादं मेखलोपेतं दण्डकृष्णाजिनान्वितम्।।

अत्यन्तसूक्ष्मबिसिनीसमयज्ञोपवीतिनम्।
स्वाहास्वधाभ्यामासीनमासने दर्भसंस्तरे।

कपिध्वजं मेषारूढं सर्वदेवगणावृतम्।।
कुण्डमध्ये तथाऽसीनं ब्रह्मासनसुखोचितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तहस्तं तु जटिलं पश्चिमां दिशमास्थितम्।
हस्ते तु दक्षिणे शक्तिं वरदं स्रुक्स्रुवावपि।।
वामे जुहूमुपजुहूं गदां बिभ्रन्तमादरात्।
एवं ध्यात्वा --------------------।।

अ. ९

[अत्र कूर्चध्वजं, शङ्खं बिभ्रन्तमिति च विशेषः।]

क्रि. ६. १३७ - १४२

ब्राह्ममानसमासीनं कुण्डमध्ये हुताशनम्।।
प्रत्यङ्मुखं रक्तवर्णं तरुणादित्यसन्निभम्।
स्वाहास्वधाभ्यामासीनं सर्वदेवात्मकं परम्।।
एकं वै हृदयं तस्य त्रयः पादाश्शिरो द्वयम्।
चतुश्शृङ्गं चतुर्नेत्रं सप्तजिह्वं द्विनासिकम्।।
दक्षिणाऽस्ये चतस्रस्तु तिस्रो जिह्वास्तथोत्तरे।
सप्तहस्तं स्मरन्नग्निं सर्वाभरणभूषितम्।।
कृष्णाजिनोत्तरासङ्गं मौञ्जीदण्डसमन्वितम्।
स्रुक्स्रुवाक्षस्त्रजशशक्तिं दधतं दक्षिणैः करैः।।
चामरं व्यजनं चाऽज्यपात्रं वै वामबाहुभिः।
बिम्बं च यज्ञमूर्तेस्तु ध्यायेदेवमिति श्रुतिः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खि. १७. १७२ - १७४

[अत्र द्विभुजं तु तदा ध्यायेत् इति विशेषः।]

५.१३.१५ अग्निमध्ये भगवद्ध्यानम्

अ. ९

अग्निमध्ये स्थितं देवं नारायणमहर्द्युतिम्।।

शङ्खचक्रधरं देवं पीतवाससमच्युतम्।

कालमेघनिभश्यामं भक्तानुग्रहकारकम्।।

एवं ध्यात्वा विधानेन गन्धाद्यैः पूजयेदजम्।

५.१३.१६ अग्निजिह्वायां विहितस्यानुच्छिष्टत्वम्

य. २६. ३५

जिह्वायां विहितं यत्तु तदुच्छिष्टमिहोच्यते।

तत्र किं स्यान्न दोषाय वदन्ति ब्रह्मवादिनः।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१४. कुम्भपूजा

५.१४.१ कुम्भपूजोपक्रमः

स. ३१. २ - ४

यजमानस्तथाचार्यं वस्त्राद्यैरभिपूजयेत्।
स्नात्वाचार्यः प्रसन्नात्मा श्वेतगन्धानुलेपनैः।।

ऊर्ध्वपुण्ड्रैर्द्वादशभिः कश्यपाद्युक्तमार्गतः।
नववस्त्रोत्तरीयाभ्यां हेमपुष्पविभूषणैः।।

उपवीताङ्गुलीयाद्यैर्विभूष्याचम्य सत्कृतः।
तत्काले कुम्भमादाय कुम्भपूजां समाचरेत्।।

क्रि. ७ . २, ३ ; खि. १६ . २७६ ; य. २६ . ४७ - ४९

प्र. १२ . १६, १७

[अत्र स्रग्गन्धैर्वेष्टितो धृत्वा मुखस्योष्णीषबन्धनम् इत्यधिकम्।]

वा. ११

[अत्र प्रकीर्णाधिकारवत्।]

५.१४.२ कुम्भपूजायां कुम्भलक्षणम्

वि. ३१ . २२१ , २२२

द्वात्रिंशत्प्रस्थसम्पूर्णं सौवर्णं राजतं ताम्रं मृण्मयं वा, मृण्मयं चेत् खण्डस्फुटितकालरहितं पक्वालर्कफलाकारं सम्यग्दग्धं नवकुम्भं समादाय।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. ३१ . ५, ६ ; ज्ञा. ६४ . ११० ; क्रि. ७ . ३, ४

खि.१७ . १, २ ; प्र. १२ . ८

य. २७. १, २ ; वा. ११

अ. २०

बिम्बफलाकारं कृष्णमण्डलवर्जितम्।
सुषिरं भिन्नहीनं च वर्जितं च शुभं भवेत्।।

५.१४.३ कुम्भसंस्कारः

वि. ३१ . २२२

यज्ञालये वायव्ये सम्भारस्थाने प्राङ्मुखमास्थाय 'इषेत्वोर्जेत्वा' दि (यजु. स.१.१.१.) जपन् त्रिवृतेनैकेन वा सूत्रेण तिलान्तरं, यवान्तरमङ्गुल्यन्तरं वा परिवेष्ट्य शुची वो हव्य (ऋ. सं. ५.४ . २४) इति प्रक्षाल्य

स. ३१ . ६, ७ ; ज्ञा. ६४ . ११० ; अ. २०

क्रि. ७ . ४, ५ ; प्र. १२ . ९

य. २७ . ३, ४

[अत्र उत्तराभिमुख इति विशेषः।]

वा. ११

इन्द्रं नरो न इत्युक्त्वा स्वस्तिदा विश उच्चरन्।
तन्तुना परिसंवेष्ट्य यवान्तरमनुक्रमात्।।

प्रादक्षिण्यक्रमेणैव तत्र कार्यं समाचरेत्।
'शुची वो हव्य' इत्युक्त्वा कुम्भप्रक्षालनं चरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मान्मृद्घटमादाय धूपयित्वा विचक्षणः।

गुग्गुलं श्वेतसाम्राणि कर्पूरं चन्दनं घृतम् ।
भस्ममेकं युगं लोहं यमं षट् सप्त वासरम्।।

एतैर्द्रव्यैश्च संधूप्य ' इमे धूपे' ति च ब्रुवन्।

खि. १७ . ४

[अत्र नादेयजलेन शोधयेत् इति विशेषः।]

५.१४.४ कुम्भपूजार्थं जलाहरणम्

य. २६ . ४२ - ४७

आचार्यः शिष्यमाहूय पूर्वाह्णे तु विशेषतः।
प्रधानकुम्भपूजार्थं गृह्णीयात्तत्पदे स्थलम्।।

ततः स पुण्यतीर्थेषु नद्यादिषु विशेषतः।
सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।।

गत्वा चोदङ्मुखो भूत्वा शिरसा धारयन् घटम्।
धारासु सप्त इत्युक्त्वा अर्चनोक्तं जलं हरेत्।।

गृहीत्वा पूर्ववच्छिष्यः सन्न्यसेदुत्तरामुखः।
संभारवेद्यां मध्ये तु कुशेनोत्पूय मन्त्रतः।।

एलाचन्दनगन्धादींस्तस्मिन्सन्न्यस्य बुद्धिमान्।
तं पिधाय शरावेण समाच्छाद्य च वस्त्रतः।।

सम्भारानथ चाहृत्य परितः सन्न्यसेत्क्रमात्।

अ. २०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रि. ७ . १

[अत्र उत्तरामुख इत्यस्य स्थाने प्राङ्मुखः इति विशेषः।]

वा. ११

स. ३१ . १

'धारासु सप्त' इत्युक्त्वा प्राङ्मुखो वाप्युदङ्मुखः।
नद्यां तोयं दिवा शुद्धं शुद्धपात्रे समाहरेत्।।

ज्ञा. ६४ . १११

वि. ३१ . २२२

[अत्र नद्यां जलग्रहणं रात्रौ चेदग्निसन्निधावेव इत्यधिकम्।]

५.१४.५ कुम्भे जलपूरणम्

स. ३१ . ७ - ९

----------- 'इदमापः शिवा' इति।।

नवेनाहतवस्त्रेण सर्वगन्धसमायुतम्।
नादेयं तोयमुत्पूतं कुशेनोत्पूय मन्त्रतः।।

'आप उन्दन्त्वि' ति जपन् कुम्भं तोयेन पूरयेत्।
'आपो वे' त्यभिमृश्यैव तोये गन्धसमायुते।।

क्रि. ७ . ६ , ७

[अत्र आपो वा इत्यस्य स्थाने आपोहिष्ठेति मन्त्र इति विशेषः।]

य. २७ . ६, ७

'इदमापः शिवे' त्युक्त्वा नववस्त्रेण तज्जलम्।
उत्पूय पूरयेत्कुम्भं 'धारास्वि' ति च मन्त्रतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आपो वे' त्यभिमृश्यैव गन्धतोयसमायुतम्।

वि. ३१ . २२२ ; अ. २०

खि. १७ . ४, ५; प्र. १२ . १०

ज्ञा. ६४ . १११

वस्त्रेणोत्पूय 'इदमापश्शिवा' इत्यभिमृश्य सर्वगन्धयुतेन तज्जलेन 'विश्वतश्चक्षुः नमस्मुलोमी' ति कुम्भमापूर्य

५.१४.६ कुम्भे रत्नादिपूरणम्

खि. १७ . ५ - १२

न्यसेत्पुष्पाक्षतादीनि नवरत्नानि च न्यसेत्।।

पद्मरागं च वज्रं च वैढूर्यं मौक्तिकं तथा।
प्रवालेन सहैतानि पञ्चरत्नानि निर्दिशेत्।।

पुष्यरागं मरतकं गोमेदं चेन्द्रनीलकम्।
पञ्चरत्नैश्च पूर्वोक्तैर्नवरत्नानि निर्दिशन्।।

नवरत्नयुतं तोयं देवेशस्यास्पदं यतः।
अष्टमङ्गलसंयुक्तं गजतार्क्ष्यसमायुतम्।।

कूर्मरूपसमायुक्तं पञ्चायुधसमन्वितम्।
ब्राह्मणानां हितार्थं तु स्रुक्स्रुवौ च कमण्डलुम्।।

अन्यानि यज्ञभाण्डानि स्युः सुवर्णकृतानि तु।
अङ्कुशं क्षत्रजातानामस्त्रशस्त्रसमन्वितम्।।

छत्रचामरसंयुक्तं ध्वजं कनकनिर्मितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्यानां तु तुलां कुर्यात् शूद्राणां युगलाङ्गले।।

सुवर्णेनैव कृत्वा तु कुम्भपूजार्थमाहरेत्।

वि. ३१ . २२२

[अत्र नवरत्नेषु प्रवालस्थाने चन्द्रकान्तस्य निर्देशः, कुम्भप्रक्षेप्यद्रव्येषु मेघविद्युल्लताया अधिकतया निर्देश इति च विशेषः।]

स. ३१ . १० - १२

[अत्र गायत्रीं वैष्णवीं जपन् रत्नादीनां निक्षेपणमुच्यत इति विशेषः।]

ज्ञा. ६४ . १११

[अत्र कुशकूर्चाश्वत्थपल्लवानि इत्यधिकम्।]

अ. २०

[अत्र अश्वत्थं चूतं वा, पल्लवं वा परिभूषयेत् इति, वृषभं सिंहं च सुवर्णेन कुर्यादित्यधिकम्।]

क्रि. ७ . ८ - १०

[श्वेतच्छत्रम् अधिकतयोक्तमिति विशेषः।]

य.२७ . ८ - ११

[अत्र विष्णुगायत्र्या द्रव्यनिक्षेपणं, शंनो मित्र इति मन्त्रजपश्च कार्य इत्यधिकम्।]

वा. ११

एलाकक्कोलकर्पूरैरुशिरं गन्धसाक्षतम्।
अन्यद् गन्धयुतं पुष्पं वासयित्वा समाहितः।।

सुवर्णरत्नधातूनां न्यसित्वा मन्त्रवित्तमः।
विष्णुगायत्रिमुच्चार्य प्रतिद्रव्यं च निक्षिपेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गोवालं च कुशं दर्भकृतं कूर्चं निधाय च ।
अथवा केवलं दर्भकृतं कूर्चं विनिक्षिपेत्।।

'इदमापश्शिवे'त्युक्त्वा तज्जलं चाभिमन्त्रयेत्।

प्र. १२ . ११ - १३

५.१४.७ कुम्भे रत्नादिपूरणस्यावश्यकता

क्रि. ७ . १२ - १४

अस्थि रत्नं सिरास्तन्तुर्मांसं मृत्स्ना प्रकीर्तिता।
शोणितं रक्तमृत्तत्र, जलं मेदस्तथैव च ।।

शुक्लं तु कूर्चमित्युक्तं चर्म स्याद्वेष्टनाम्बरम्।
सप्तधातव इत्येते कुम्भेषु कलशेषु च ।।

एतेष्वेकं विहीनं चेत् नास्ति तत्रास्य सन्निधिः।

प्र. १२ . १३ - १५

स. ३१ . १४ - १६

[अत्र शुक्लं तु कूर्चमित्युक्तं इत्यस्य स्थाने ' नारिकेलं शिरः स्मृत्वा' इति विशेषः।]

५.१४.८ कुम्भालङ्करणम्

स. ३१ . १३ , १४

कौशेयक्षौमवस्त्राभ्यां कुम्भमावेष्टयेद् गुरुः।
सूक्ष्मकार्पासवस्त्राभ्यामुत्तमाभ्यां तु वा पुनः।।

पुष्पदामभिरश्वत्थपल्लवैरभिभूषयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रि. ७ . १० , ११

[अत्र दूर्वाङ्कुराणि न्यसेत् इत्यधिकम्।]

ज्ञा. ६४ . १११

[अत्र अहताभ्यां दुकूलाभ्यामन्यच्छ्वेतवस्त्राभ्यां वा कुम्भस्य कण्ठमावेष्ट्य इति विशेषः।]

प्र. १२ . १० ;   य. २७ . ७ ;   अ. २०

वा. ११

[अत्र 'तेजोवत्सव' इति मन्त्रेण वस्त्रयुग्मवेष्टनं कथ्यत इत्यधिकम्।]

वि. ३१ . २२२

खि. १७ . १२, १३

[अत्र कूर्चं च निक्षिपेत् इत्यधिकम्।]

५.१४.९ कुम्भाधारस्य धान्यस्य परिमाणम्

य. २७ . ५

भारं वाथ तदर्धं वा पादं वा व्रीहिभिः क्रमात्।
गुरोः प्रमुखे विन्यस्य कुम्भं चोपरि विन्यसेत्।।

वि. ३१ . २२२

धान्यराशिस्त्रिविधो भवति - उत्तमं मध्यमम्, अधमम्। षड्द्रोणमुत्तमम्। द्रोणत्रयं मध्यमम्। द्रोणद्वयमधयम्।

क्रि. ७ . १४, १५

रत्निमात्रायते रम्ये तालोत्सेधे त्रिवेदिके।।
देवस्य पुरतः कुम्भं धान्यपीठे तु सन्न्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. २०

आलयाभिमुखे कुर्यात् मण्डलान्युपलिप्य च ।
शालिपीठं प्रकल्प्यैव तदर्धं तण्डुलोपरि।।

तण्डुलार्धं तिलं प्रोक्तं पद्माकारं तु कारयेत्।

५.१४.१० कुम्भस्थापनस्थानम्

खि. १७. १२ - १४

कुम्भं वेद्यां विनिक्षिप्य वस्त्रयुग्मेन वेष्टयेत्।।

पल्लवैः पुष्पमालाभिरलङ्कारैश्च भूषयेत्।
कूर्चं च तत्र निक्षिप्य कुम्भं संसाधयेद् बुधः।।

देवस्याभिमुखे न्यस्य धान्यवेद्युपरि क्रमात्।

अ. २०

वि. ३१ . २२२

आलये बालागारे देवाग्रे धान्यराशौ कुम्भं सन्न्यस्य।

ज्ञा. ६४ . १११

देवस्याभिमुखे धान्यराशौ तत्कुम्भं सन्न्यस्य ध्यानमारभेत ।

स. ३१ . १७ ; क्रि. ७ . १५

प्र. १२ . १६

[अत्र देवस्य दक्षिणे पार्श्वे इति विशेषः।]

वा. ११

[अत्र प्रकीर्णाधिकारवत्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१४.११ कुम्भपूजायां कुम्भाभिमन्त्रणम्

वा. ११

कुम्भस्य दक्षिणे पार्श्वे प्राङ्मुखोदङ्मुखोऽपि वा।
स्वस्तिकासनमास्थाय ऋजुकायस्समाहितः।।

ललाटादिद्वादशे स्थाने केशवादीन् प्रणम्य च ।
अकाराद्यक्षरं सर्वं न्यसित्वा सर्वसन्धिषु।
अङ्गुष्ठादिकनिष्ठान्तं करन्यासं समाचरेत्।।

बाहुमूले तु सन्न्यस्य चक्रशङ्खं विचक्षणः।
सूर्यसोमौ न्यसेन्नेत्रे हृदि बीजाक्षरं न्यसेत्।।

हृच्छिरसि शिखा चैव कवचास्त्रादिपञ्चकम्।
एतन्न्यासक्रमं चैव नित्यपूजोक्तवच्चरेत्।।

पश्चात् कुम्भं तु संस्पृश्य क्रमात्सूक्तादिकं जपेत्।
आत्मसूक्तं ततो जप्त्वा पुरुषसूक्तमतः परम्।।

सूक्तमेकाक्षरं जप्त्वा विष्णुसूक्तमतः परम्।
श्रीभूसूक्तं ततो जप्त्वा सहस्रं शीर्षमुच्चरन्।।

वैष्णवं तु ततो जप्त्वा ध्यायेत्सम्यक् समाहितः।
वायुधारणमाविश्य निश्चलं सम्यगाचरेत्।।

प्राणायामं ततः कृत्वा रेचपूरककुम्भकैः।
----------------------------------।।

दिवा सोमस्य नाथाद्यैः ध्यायेत्सम्यक् समाहितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्कुम्भस्य जले स्मृत्वा वारुणं मण्डलं बुधः।।

अर्धचन्द्राकृतिं स्मृत्वा तत्र बीजाक्षरं न्यसेत्।
तमोङ्कारेण संवेष्ट्य बिन्दुयुक्तं सुनिश्चलम्।।

प्र. १२ . १७ - २२, २५ , २६

य. २७ . ११ , १८ - २२

'शं नो मित्रे' ति शान्तिं च जप्त्वा ध्यानं समारभेत्।।

बीजं तद्धृदये न्यस्य प्रणवेन च वेष्टयेत्।
अकारं चादिबीजं तदुकारं कुटिलं भवेत्।।

मकारं चैव नादान्तमेवं प्रणवमुच्यते।
वारुणं मण्डलं ध्यात्वा कुम्भेऽम्भसि (च) सुमध्यमे।।

आदिबीजं सुसन्न्यस्य प्रणवैरपि वेष्टयेत्।
आत्मानमभिमृश्यैव आत्मसूक्तं जपेत्ततः।।

सहस्रशीर्षं चेति ततो नारायणीयकम्।
श्रीसूक्तं च महीसूक्तं जप्त्वा प्रणवशतान्यपि।।

समाहितमना भूत्वा ध्यानं सम्यक् समाचरेत्।

खि. १७ . १४ - १७

कुम्भस्य दक्षिणे पार्श्वे उपविष्टस्सुखासने।।

उदङ्मुखस्सन्नाचार्यो ध्यानमाविश्य यत्नतः।
विष्णुसूक्तं जपन्नेव कुम्भे रत्नादि विन्यसेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पादौ भूमिस्पृशौ कृत्वा स्वस्तिकेनैव बन्धयेत्।
वाममुत्तानकं कुर्यात्करं पश्चाच्च दक्षिणम्।।

एवं ब्रह्माञ्जलिं कृत्वा --------------।

वि. ३१ . २२३

आचार्यस्तस्य दक्षिणे चोत्तराभिमुखो भूत्वा, ब्राह्ममासनमास्थाय, 'विष्णुर्मां रक्षत्वि' (वै.मं.३) त्यात्मसूक्तं जप्त्वा समाहितो ध्यानमारभेत। ------
----

प्राणायामं योगशास्त्रोक्तमार्गेण कृत्वा, हृदये बीजाक्षरं न्यस्य प्रणवेन वेष्टयित्वा, कुम्भजले अर्धचन्द्राकारं शुद्धस्फटिकसङ्काशं मध्ये अष्टदलोपेतं पद्मं तन्मध्ये श्यामवर्णं द्विभुजं इकारबीजान्वितं माहेन्द्रं मण्डलं ध्यात्वा तन्मध्ये पद्मे सितोत्पलवर्णं द्विभुजं पद्मधरं वकारबीजं वरुणमण्डलं ध्यात्वा तन्मध्ये तप्तहाटकसङ्काशं चतुर्भुजं शङ्खचक्रधरं आदिबीजं सन्न्यस्य, दिक्ष्वष्टसु प्रणवैरावेष्ट्य, सर्वान् एकप्रणवेन वेष्टयेत्। विष्णुसूक्तं, प्रणवशतं, सहस्रशीर्षमिति च, जप्त्वा, समाहितो ज्ञानयोगमार्गेण ध्यानमारभेत।

स. ३१ . १७ - २३

'शं नो मित्रे' ति शान्तिं च गायत्रीं वैष्णवीं जपन्।।
हृदये प्रणवैर्युक्ते चादिबीजं च सन्न्यसेत्।
आत्मसूक्तं जपेच्चाथ पौरुषं सूक्तमेव च।।

अर्धचन्द्राकृतिश्श्वेतं शुद्धस्फटिकसन्निभम्।
वारुणं मण्डलं ध्यायेत्पूर्णकुम्भस्थवारिणि ।।

अतो देवादिनाधावं प्रणवैरभिमन्त्रयेत्।
आदिबीजं सुवर्णाभं सर्वकारणकारणम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदाधावे तु सन्न्यस्य प्रणवैरपि वेष्टयेत्।
'सहस्त्रशीर्षं देव' मिति जप्त्वा समाहितः।।

गुरूपदेशसंसिद्धो नित्यध्यानपरायणः।
आचार्यः सुप्रसन्नात्मा ध्यानकर्म समारभेत्।।

भूमावुदङ्मुखो भूत्वा कुर्यात्स्वस्तिकमासनम्।

ज्ञा. ६४ . १११ ; क्रि. ७ . १५ - २०

५.१४.१२ ध्यानाङ्गभूतस्य स्वस्तिकासनस्य विधानम्

वि. ३१ . २२३

स्वस्तिकासनं कुर्यात्, दक्षिणपादमूर्ध्वं वामपादमधश्च कृत्वा जान्वन्तरे तदङ्गुष्ठौ निगूह्य, शिश्नवृषणावपीडयन्, निवातगतदीप इव ऋजुकायः किञ्चित् उन्नमितवक्त्रो, दन्तैर्दन्तानसंस्पृशन्, नासाग्रस्थेक्षणश्चैवाऽऽसनमासीनो यथाबलं प्राणायामं कुर्यात्।

य. २७ . १२ - १४

स. ३१ . २३ - २७

दक्षिणं पादमूर्ध्वं च वामपादमधस्तथा।।

जान्वन्तरं तदङ्गुष्ठौ द्वौ च सम्यङ् निगृह्य च ।
तथा दृढात्मा शिश्नं च वृषणावप्यपीडयन्।।

अङ्के वामे न्यसेत्पाणिमन्यं चोत्तानमूर्ध्वतः।
ऋजुकायो निवातस्थ प्रदीप इव निश्चलः।।

किञ्चिदुन्नमितमुखो दन्तैर्दन्तानसंस्पृशन्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अव्यग्रो व्यग्रमक्षिभ्यामनिमील्य निमील्य च ।।

एवं स्वस्तिकमासीनो नासाग्रस्थापितेक्षणः।

क्रि. ७. २१ - २३

५.१४.१३ कुम्भपूजायां ध्यानाङ्गप्राणायामस्वरूपम्

स. ३१. २८, २९

प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः।
यश्चैवाधः प्रणिश्वासः स रेचक इति स्मृतः।।

ऊर्ध्वनिश्श्वसनः प्रोक्तः पूरकः पुण्यकर्मभिः।
निश्वासस्य निरोधो यः स कुम्भक इति स्मृतः।।

क्रि. ७ . २४

वि. ३१. २२३

त्रिविधः प्राणायामः रेचक-पूरक-कुम्भक इति। निश्वासविसर्गो रेचकः, निश्वासध्यानं पूरकः, निश्वासनिरोधः कुम्भकः।

य. २७. १५ - १७ , ३३ , ३४

प्राणायामं च कुर्यात्तत्रिधा भवति संज्ञया।
रेचकं पूरकं चेति कुम्भकं चेति तत्क्रमात्।।

निःश्वासविसृजं यत्तद्रेचकं चेति कथ्यते।
आत्मपूरकनिःश्वासः पूरकं तद्विदुर्बुधाः।।

निश्वासस्य निरोधं यत् तत्कुम्भकमिति स्मृतम्।
प्राणायामं च कृत्वैव यथाशक्ति यथाबलम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गायत्रीं सशिरस्कां च तत्सव्याहृतिकां क्रमात्।।
पठेत् त्रिरायतप्राणः प्राणायामः स कथ्यते।

५.१४.१४ प्राणायामफलम्

वा. ११

वायुधारणमाविश्य निश्चलं सम्यगाचरेत्।
प्राणायामं ततः कृत्वा रेचपूरककुम्भकैः।।

विशेषमत्र वक्ष्यामि वायुधारणमेव च।
अत्रैवाद्य मया प्रोक्तं विज्ञाप्यैव विचक्षणः।।

देवस्य पुरतासीनो रेचपूरककुम्भकैः।
प्राणायामैर्व्यपोह्यैवम् आत्मानं शोधयेत्पुनः।।
अथवा घ्नन्ति मुनयः प्राणायामं तु धारयेत्।।

अहोरात्रकृतं पापं तत्क्षणादेव नश्यति।
कर्मणा मनसा वाचा रात्रौ च कृतमेव च।।

तिष्ठन्वै पूर्वसन्ध्यायां प्राणायामैर्व्यप्रोह्य तु ।
कर्मणा मनसा वाचा यदहः कृतमेनसः।।

आसीनः पश्चिमासन्ध्यां प्राणायामैर्व्यपोह्य तु।

प्राणायामैर्व्यपोहन्ति आत्मानं शोधयेत्पुनः।।

ज्ञानाज्ञानकृतं पापं तत्क्षणादेव नश्यति।
पावमानैश्च सुस्नानं यः कुर्यादघमर्षणम्।।

अथाश्वमेधक्रतुभिः सर्वपापप्रणाशनः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हविष्यभुक्तातास्सम्यक् प्राणायामास्तु षोडश।।

भ्रूणहापापकर्माणः पुनन्त्यहरहः कृताः।

न च तीव्रेण तपसा न स्वाध्यायेन चेज्यया।।

अपक्रमफलं सम्यक् प्राणायामैर्यथा भवेत्।

तस्मात्पापापकर्षणं रेचपूरककुम्भकैः।।

क्रियते यत्तद्द्रव्याणामशुचित्वापनोदनात् अग्निः कल्पितः तथा प्राणायामाः पापकर्षकाः तत्र रेचकात् पापस्य दाहः क्रियते। पूरकात्तदामृताप्यायकम्। कुम्भकात् अमृतत्वं मया स्मृतम्। तस्मात् पूर्वं रेचयेत्, ततः पूरककुम्भकौ, तत्र शरीरस्थस्य वायोः पापयुक्तस्य रेचकात्, पापापकर्षणात् तस्मात् भवेत्तस्मादनन्तरम् अन्तश्शारीरपापस्थं वायुं पापसमन्वितम् एवं ध्यात्वा विपापेन सह वायुसमन्वितम्, इडया पिङ्गलया नाड्या बहिर्निष्क्रमः सूर्यमण्डलम्। पिङ्गलया योर्निं प्रशमय्य सूर्यसोमोष्मणापि च स्वदेहस्थं सर्वकल्मषं दहेत्। पूरककालेप्यमृतप्लावनं चिन्तयेत्। चन्द्रमण्डलादमृतं वायुना सह इडाख्यानाड्यन्तः पूरयेत्। ततोऽमृतवासितत्वं, शरीरस्य कुम्भककाले चिन्तयेत्। द्विजश्चेत् कुम्भककाले गायत्रीं प्रणवान्वितां सव्याहृतिकां सशिरस्कां त्रिःकृत्वा पठेत्।

मूलमन्त्रं जपेत्तत्र तस्मादेवं प्रजापतेः।

प्राणायामेन आत्मानं देवबिम्बं च शोधयेत्।

प्र. १२. २२ - २४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१४.१५ द्वासप्ततिसहस्रनाडीनां दशवायूनां च स्वरूपम्

वा. १२

देवमावाहयेत्तत्र पूर्वं नाडीचक्रस्य मध्ये ध्यायेत्। प्रणवं सप्राणानां नाभिकन्दं भवेद्यथा। कुमुदोत्पलयोर्मूलनालकन्दमाश्रमं तथैव च । नाभिर्नाड्याश्रयस्थानं तस्मान्नाभेरेव तस्याः। तदा नाड्यस्थानमित्युक्तम्।

द्विसप्ततिसहस्रं च नाडयः परिकीर्तिताः।
तिर्यगूर्ध्वमधश्चापि देहं संव्याप्य तिष्ठति।।

आग्नेयाश्च सौम्याश्य सौम्याग्नेया इति त्रिधा नाभेः। ऊर्ध्वमुखास्सर्वे आग्नेयाः। अधोमुखाः सौम्यास्तिर्यग्गता सौम्याग्नेया इति स्मृताः। अथवा, मूलमन्त्रं वा सर्वं जपेयुः, तस्मादेवंभूतः, प्राणायामैरात्मानं, देहं बिम्बं च शोधयित्वैव, देवमावाहयेत्, तत्र पूर्वनाडीचक्रं ध्यायेत् स प्रणवः। नाडी वा नाड्याधिकं भवेत्। यथा कुमुदोत्पलयोः मूलनालकन्दमाश्रयन्ति तथैव नाभिम्। नाडीभिर्नाडिनामाश्च। योतःस्थानं तस्मान्नाभिरेव च। तस्य स्थानात् यः अत्युत्तरम्। सप्तति सहस्रधारयः परिकीर्तिताः। तिर्यगूर्ध्वमधश्च देहे व्यवस्थिताः। आग्नेयाः, सौम्याः, आग्नेयसौम्याः इति त्रिधा। भिन्ना ऊर्ध्वमुखास्सर्वा आग्नेयाः अधोमुखाः सौम्याः। तिर्यगूर्ध्वगता सौम्याग्येयाः। शतद्वयमष्टोत्तरं षष्टिश्च प्रतिदिशं स्थिताः। नासान्ता दशनाड्यः प्रधानाः स्थाननामानि वक्ष्यन्ते। इडा, पिङ्गला, सुषुम्रा, गान्धारी,हस्तिजिह्वे, सुयशाह्वे, पूषास्त्वलम्बुसा, कुहूशङ्खिनी चेति। इडासुषुम्ने पिङ्गलया सहोर्ध्वमुखे नासापुटस्थिते। वर्णं च शुक्लरक्तौ। गान्धारी हस्तिजिह्वा पूषासहिते अधोमुखे वस्तिदेशं समाश्रित्य स्थिते। वर्णतः पीतकृष्णे। अलम्बुसासुयशे दक्षिणतः स्थिते वर्णतो बभ्रुश्यामे। शङ्खिनी कुहूश्च वामपार्श्वे समाश्रिते अञ्जनारुणे। एवं स्वदेहे नाडीचक्रं ध्यात्वा प्राणादींश्चिन्तयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायवश्च दशप्रोक्ता यथासङ्ख्यक्रमेण तु। प्राणापानव्यानोदानसमान-नागकूर्मकृकरदेवदत्तधनञ्जया इति प्राणा दश। तत्र प्राणापानौ राजमणिप्रभौ, अपानकूर्मौ इन्द्रगोपप्रभौ, समानकृकरकौ श्यामवर्णौ, व्यानधनञ्जयौ फेनवर्णौ, उदानदेवदत्तौ किञ्जल्कसदृशप्रभौ, एतान् दशवायून् नाड्यो वहन्ति।

तत्र क्रमेण वक्ष्यते।इडा प्राणं वहति, तथाऽपानं गान्धारी। समानमलम्बुसा, कुहूर्व्यानं, सुषुम्ना उदानं, पिङ्गला नागं, हस्तिजिह्वा देवदत्तं, पूषा कूर्मं, सुयशा कृकरम्, शङ्खिनी धनञ्जयमिति क्रमेण नाड्यो वायून् वहन्ति। एतेषां दशानां मध्ये हृत्पद्मं तिष्ठति। तत्रेडासुषुम्नयोः क्रमेण चरति। इडा चान्द्रमसी नाडी। पिङ्गला सूर्यनाडी। इडा वामनासापुटे स्थिता। पिङ्गला दक्षिणनासापुटे स्थिता। अयने द्वे सङ्क्रान्ती विषुवे चात्र भवन्ति । यदा प्राणः इडायां वर्तते तदा दक्षिणायनं भवेत्। यदा पिङ्गलायां तदोत्तरायणम्। तस्मात् नासापुटाभ्यां हरन् यदा वायुः प्रयाति अकाले सकालं सङ्क्रान्तियुक्तं। यस्मिन् उभाभ्यां पुटाभ्यां समं याति तत्कालं विषुवं वदन्ति। अयने दक्षिणे स्नानादि जलकर्म कुर्यात्। सङ्क्रान्त्यां दानकर्माणि येन कुर्यात्। विषुवे यज्ञकर्मणि येन कुर्यात्। एवं नाडीकाल उक्तः।

५.१४.१६ प्राणायामे वायुरोधनक्रमः

वा. १२

कन्दमध्योक्तमिडायास्त्रिविधः। ते प्रत्येकं त्रिविधा भिन्ना। तत्र षण्डसात्रिकर्मन्दं मन्दा द्विगुणं मध्यमाद्विगुणं मध्यमाद्विगुणमुक्तम्। तत्र रेचक-पूरक-कुम्भान् कुर्यात्। इडायां वायुः पूर्यते। पिङ्गलायां कुम्भते। सुषुम्नायां रेचते। वामे-ङ्गुष्ठेन दक्षिणनासापुटं पिधाय वामेन पुटेन पूरयेत्। कुम्भकं केवलं कुर्यात्। ना ततो नासापुटं दक्षिणेनाङ्गुष्ठेन पिधाय दक्षिणेन पुटेन रेचयेत्। मात्रावशेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मात्रातिक्रमेण मरुद्विषमत्वं कुरुते। यथाक्रमं विपर्यासे च विषमं कुरुते। तस्मान्मात्रा ज्ञातव्या। तस्या लक्षणमुच्यते। न द्रुतं, न विलम्बितं, जानं कृत्वा प्रदक्षिणम् अङ्गुलिस्फोटनं कुर्यात् सा मात्रा। तत् त्रिमात्रया।

पूर्वमिडया पूर्यते । द्वितीया तृतीयाभ्यां पिङ्गलया पूर्यते। चतुर्थया सुषुम्ना पूर्यते। पञ्चम्या गान्धारी पूर्यते। षष्ठी सप्तमीभ्यां पूषा पूर्यते। अष्टम्या हस्तिजिह्वा। नवम्या अलम्बुसा। दशम्या सुयशा। एकादश्या शङ्खिनी। द्वादश्या कुहूरिति क्रमेण पूर्यते। कुम्भकेन कर्मणा स्तम्भिता। एते वायवः क्रमात् द्विगुणमात्राः। चक्रं सर्वत्र भ्रमति। चक्रभ्रमणवेगेन नाभिदेशे हुताशनः। उत्थितो निर्दहेद्दोषान् सर्वान् शरीरगान् तदा।।

तत्र वह्निमारुतैः शोधयित्वा नाड्यश्शुद्धिमायान्ति। कुम्भकमात्रामतीत्य रेचकं कुर्यात्। तत्र द्वाभ्यां मात्राभ्यां कुहूः वायुना मुच्यते। तृतीयचतुर्थाभ्यां च सिनीवाली मुच्यते। पञ्चमी षष्ठाभ्यां तु सुयशा। सप्तमाष्टमीभ्यामलम्बुसा। नवमीदशमीभ्यां हस्तिजिह्वा। एकादशीद्वादशीत्रयोदशीचतुर्दशीमात्राभिः पूषा मुच्यते। पञ्चदश्या इला मुच्यते। एवं क्रमेणोत्तराभिर्मात्राभिः पिङ्गला मुच्यते। शेषाभ्यां सुषुम्मा मुच्यते। नाड्यःनाभिस्थिताः प्राणादयः वायवः। पूरके क्षोभमायान्ति। कुम्भके भ्रमन्ति। रेचके तु भूलया उच्यन्ते। नागकूर्मकृकरदेवदत्तधनञ्जयाः पञ्च वायवः । पूरककाले जिताः क्रमेण प्राणादिषु लयं यान्ति। कुम्भककाले अपानपूर्वकाश्चत्वारो वायवः प्राण एव लयं यान्ति। तत्रान्तः करणचतुष्टयेन्द्रियाण्यपि प्राण एव समायान्ति। तत्र पूरके सर्वासु सन्धिषु वायुना पूरितासु हत् पद्ममष्टदलमूर्ध्वनालमधोमुखं विकासमुपयास्यात्र कुम्भककाले हृदयपद्मं विकास्योर्ध्वमुखं भवेत्। तस्मिन् हृदयपद्मे विकसिताष्टपत्रसकर्णिके स्थिते। कर्णिकामद्युपुर्यष्टकाख्यं पिङ्गलं तिष्ठति देवं ध्यायेत्। तन्मध्ये तद्ध्यानप्रकृतिश्च। प्राणान्तःकरण-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुष्टयशक्तयो भूषणाश्च प्रकृत्याशयक्रमेण बहिस्तिष्ठन्ति। प्रकृतिरेतेषां आश्रयभूता भवति। प्रकृतिमधिष्ठाय पुरुषस्तिष्ठति। पुरुषार्थपुरुषस्सदा विष्णुश्शाश्वतो नारायणःसदात्मानं सङ्कोचयन्नास्ते। अणोरणीयानत्यन्त-शालिशूकाग्रास्यपिञ्जरस्तस्येश्वरस्यैश्वर्यावे तच्चक्रं प्रवर्तते। स एतैस्तत्क्षेत्रं वहति पूजयति च। एवं ध्यायेत् एवं रेचकपूरककुम्भकैः प्राणायामैरात्मानं विशोध्य मन्त्रन्यासं कारयेत्।

पश्चादक्षरन्यासः। तस्यादिमन्त्रे च बिम्बे च बिम्बवशादेव न्यासं कुर्यात्। तत्र स्थिते स्थितिन्यासं कुर्यात्, आसीने सृष्टिन्यासं, शयने संहृतिन्यासम्। अथवा प्रातः सृष्टिन्यासं, मध्याह्ने स्थितिन्यासम्, अपरे संहृतिन्यासम् इति केचित्। अन्यत्सर्वत्र स्थानकासनशयानके तृतीयानां स्थितिन्यासं कुर्यादिति विशेषः।

एवं क्रमेण आत्मनो वायून् विचिन्तयेत्। तत्र पूरकादित्रयमात्मनि कुर्यात्। एवं पूरककुम्भकाले कुर्यात्। पूर्ववत् पूरककुम्भकौ कृतौ हृत्पद्मं ध्यात्वा पुर्याष्टकाख्यं विचिन्त्य मन्त्रन्यासं कृत्वा प्रतिमारूपं ध्यात्वा तत्र रक्षां विधाय बहिर्निधाय मूलस्थानं प्रविश्य देवमावाहयेत्।

५.१४.१७ कुम्भे ध्यानस्यावश्यकता

खि. १७. १७ - ३१

एवं ब्रह्माञ्जलिं कृत्वा देवदेवमनुस्मरन्।
निवातगतनिष्कम्पप्रदीप इव निश्चलः।।

नयने नासिकाग्रे च विन्यसेत् सुसमाहितः।
प्रणवो धनुश्शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।
द्वे तत्त्वे ब्रह्मणस्स्यातां मूर्तं चामूर्तमेव च ।।

क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते।
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्।।

यथा सर्वगतस्याग्नेररण्यां सन्निधिर्भवेत्।
मन्थनेन तथा विष्णोः ध्यानात्कुम्भे तु सन्निधिः।।

एकधा बहुधा तद्वत् शतधा च सहस्रधा।
प्रादुर्भावात्तु दृश्येत सोपाधिस्तु मणिर्यथा।।

उपरागवशाद्यद्वत् विशुद्धस्फटिको मणिः।
भिन्नरूपाणि भजते तथा विष्णुस्सनातनः।।

यथाऽग्निरिन्धनैरिद्धो महान् भूत्वा प्रकाशते।
तथा ध्यानेन्धनेद्धो विष्णुस्सर्वगतः प्रभुः।।

व्योमाकारस्तथा चान्यदृक् स्वरूपं भजेत्तथा।
निर्गुणं गुणभाक्त्वेन कल्पयन्तीह केचन।।

निस्सङ्गो निर्गुणश्चैव चित्स्वभावो ह्ययोनिजः।
निरौपम्यो निगूढात्मा काष्ठेऽग्निरिव हि स्थितः।।

एको व्यापी समश्शुद्धो निर्गुणः प्रकृतेः परः।
जन्मवृद्ध्यादिरहितः आत्मा सर्वगतोऽव्ययः।।

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः।
अभेदव्यापिनो वायोस्तथा तस्य महात्मनः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शकुनीनामिवाकाशे जले वारिभुवामिव।
पदं तस्य न दृश्येत तत्त्वज्ञानविदो विदुः।।

भ्रान्तचित्तस्य चात्माऽपि तथैकस्सन् पृथक् पृथक्।
नीलपीतादिभेदेन यथैकं दृश्यते नभः।।

एवं सञ्चिन्त्य मनसा ध्यायेत्साकारमात्मनः।

५.१४.१८ कुम्भजले ध्यानावाहने

स. ३१ . ३१ - ४४

विषयेभ्यश्च सर्वेभ्यः प्रत्याहृत्येन्द्रियाणि च।
यत्र यत्र मनो याति निवर्त्य च मनस्ततः ।।

एकाग्रं च मनः कृत्वा ततः पश्येत्समाधिना।
पद्मकोशप्रतीकाशं विश्वस्यायतनं महत्।।

हृदयेऽग्निशिखामध्ये परमात्मा व्यवस्थितः।
नारायणः परं ब्रह्म परमात्मेति वै श्रुतिः।।

ध्यानात्संदृश्यते यस्तु तत्सूक्ष्मं परमव्ययम्।
निवात इव दीपार्चिर्विद्युल्लेखेव चाम्बरे।।

ईश्वरस्यात्मनो ज्योतिर्यदेष पुरुषः परः।
अक्षरं तत्परं ब्रह्म शुद्धज्ञानस्वरूपकम्।।

यदोङ्कारमयं ब्रह्म सम्यग्घृदि निधाय च ।
तच्चिन्तनपरं ध्यानं तद्ब्रह्मार्पणमुच्यते।।

ब्रह्मभूते च देवेऽस्मिन् दृढं स्यादात्मनोऽर्पणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्राचलं मनः कृत्वा धारणां संप्रपद्य च ।।

अशरीरः शरीरेषु व्याप्य तिष्ठति शाश्वतः।
बहुधा सर्वभूतेषु देवदेवो व्यवस्थितः।।

शुद्धेन ज्ञानदीपेन परमात्मा च दृश्यते।
अणोरणीयान्महतो महीयांश्च गुहास्थितः।।

एवं तं श्रुतिरप्याह परमात्मानमव्ययम्।
सुसूक्ष्मत्वादनिर्देश्यः सदसदित्यभिधीयते।।

अग्राह्य इन्द्रियैः सर्वैरव्यक्तो व्यक्त उच्यते।
अव्यक्तः प्रकृतेर्मूलः प्रधानः परमोऽव्ययः।।

अनादिनिधनः स्रष्टा पाता हर्ताऽखिलस्य च ।
नित्योऽचिन्त्योऽप्रमेयश्च निर्गुणोऽतीन्द्रियः परः।।

परं ज्योतिः परं धाम सर्वकारणकारणः।
सर्वदेवमयो देवः सर्ववेदमयो विभुः।।

सर्वज्ञानमयो विष्णुः सर्वधर्ममयो हरिः।
सर्वेशः सर्वभूतात्मा सर्वाधारः सनातनः।।

तेन सृष्टमिदं सर्वं तेन व्याप्तमिदं जगत्।
तेनेदं पूर्णमित्याह श्रुतिस्तद्रहितं न च ।।

एवं सम्यग्विदित्वैव जित्वा सर्वेन्द्रियाणि च ।
निर्गुणं निर्मलं नित्यमक्षरं सर्वकारणम्।।

निष्कलं सकलं देवं तेजोभासुरभाविनम्।
विष्णुं तं मनसा ध्यायेद् भक्त्यैव परया मुदा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तं रुक्मवर्णं रक्तास्यं रक्तनेत्रं सुखोद्वहम्।
किरीटहारकेयूरलम्बयज्ञोपवीतिनम्।।

कौस्तुभोद्भासितोरस्कं श्रीवत्साङ्कं चतुर्भुजम्।
दक्षिणेनैकहस्तेन भक्तानामभयप्रदम्।।

वामेनाप्यन्यहस्तेन स्वकट्यामवलम्बितम्।
कराभ्यामितराभ्यां च शङ्खचक्रधरं परम्।।

शुकपिञ्छाम्बरधरं सर्वाभरणभूषितम्।
एवं तं परमात्मानं प्रणवात्मकमव्ययम्।।

एकाग्रमनसा भक्त्या ध्यायेद्देवं परात्परम्।
कुम्भेऽम्भसि ततो भक्त्या देवमावाहयेद् गुरुः।।

आवाह्यैव तथा तत्र ध्यायेत्सम्यक् समाधिना।
रुक्माभं स्वप्नधीगम्यं विद्यादित्याह वै मनुः।।

नाराख्यास्वयनादप्सु नारायण इति स्मृतः।
तस्मादप्सु हरेर्ध्यानमद्भिरावाहनं स्मृतम्।।

विश्वव्यापनशीलत्वाद्विष्णुरित्येव कीर्त्यते।
सर्ववस्तुनिवासत्वात् वासुदेव इति स्मृतः।।

ज्ञा. ६४. १११ ; क्रि. ७. २४ - ३६

वि. ३१. २२४

[अत्र ‘ देव्यादि सर्वपरिषद्युक्तं ध्यात्वा मनसा कुम्भेऽम्भसि समावाह्य पुष्पाद्यर्घ्याचमनान्तैः अर्चयति’ इति विशेषः।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

य. २७. २४ - २८

[अत्र विमानार्चनाकल्पवत्।]

खि. १७. ३१ - ५०

तत्र सर्वमिदं प्रोतमोतञ्चैवाखिलं जगत्।।

ततो जगत् जगत्तस्मिन् स जगच्चाखिलं तथा।
क्षराक्षरमयो विष्णुः बिभर्त्यखिलमीश्वरः।।

आत्मानमस्य जगतो निर्लेपमगुणामलम्।
ध्यायेच्च कौस्तुभमणिं सुरूपं हरिवक्षसि।।

श्रीवत्ससंस्थानवरमनन्तञ्च समाश्रितम्।
प्रधानं बुद्धिमप्यस्य गदारूपं समाहितम्।।

भूतादिमिन्द्रियादिं च द्विधाऽहङ्कारमीश्वरे।
ध्यायेद्वै शङ्खरूपेण शार्ङ्गरूपेण च स्थितम्।।

चलस्वरूपमत्यन्तं जवेनान्तरितानिलम्।
चलस्वरूपं च मनो ध्यायेद्विष्णुकरे स्थितम्।।

पञ्चवर्णा तु या माला वैजयन्तीति चक्रिणः।
तां भूतहेतुसङ्घातं भूतमालां विचिन्तयेत्।।

यानीन्द्रियाणि शिष्टानि बुद्धिकर्मात्मकानि वै।
शररूपाण्यशेषाणि तानि ध्यायेज्जनार्दने।।

बिभर्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्मलम्।
विद्यामयं तु तत् ज्ञानमविद्याक्रमसंज्ञितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्त्रभूषणसंस्थानं स्वरूपं रूपवर्जितम्।
मायारूपं तथा ध्यायेच्छ्रेयसे प्राणिनां हरेः।।

कलाकाष्ठानिमेषादि दिनर्त्वयनहायनैः।
कालस्वरूपरूपं तं ध्यायेद्विष्णुं समाहितः।।

भूर्भुवस्स्वर्महश्चैव जनोलोकस्तथैव च ।
तपस्सत्यमिति ध्यायेल्लोकमूर्तिधरं हरिम्।।

देवमानुषपश्वादिस्वरूपं प्रभुमव्ययम्।
भूतमूर्त्तिधरं ध्यायेत् सर्वाधारं सनातनम्।।

ऋचो यजूंषि सामानि तथैवाथर्वणानि च।
इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः।।

वेदाङ्गानि समस्तानि मन्वादिगदितानि च ।
शास्त्राण्यशेषाण्यास्थानान्यनुवाकाश्च वै क्वचित्।।

काव्यालापाश्च ये केचिद्गीतकान्यखिलान्यपि।
शब्दमूर्तिधरस्यैतद्वपुर्ध्यायेन्महात्मनः।।

यानि मूर्तान्यमूर्तानि यान्यत्रान्यत्र च क्वचित्।
सन्ति वै वस्तुजातानि तानि सर्वाणि तद्वपुः।।

यत्र सर्वं यतस्सर्वं यस्सर्वं सर्वतश्च यः।
सर्वगत्वादनन्तस्य स एवाहमिति स्थितिः ।।

मत्तः सर्वमहं सर्वं मयि सर्वं सनातने।
अहमेवाक्षयो नित्यः परमात्मा न संशयः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं सञ्चिन्तयेद्विष्णुमभेदेनाऽऽत्मनो गुरुः।
तन्मयत्वमनुप्राप्य आत्मसूक्तं जपेत्क्रमात्॥

५.१४.१९ कुम्भे भगवदावाहनक्रमः

खि. १७. ४१, ४२

आवाहनक्रमेणैव तत आवाहनं चरेत्।
देव्यौ च पारिषद्यांश्च [1]तत्रैवावाहयेत्क्रमात्॥

नवबेरप्रतिष्ठा चेदेवं वै कारयेद्बुधः।

वा. ११

आदित्यमण्डलान्तस्थं देवं तत्रैव चाह्वयेत्।
नित्यपूजोक्तमार्गेण सकलं तत्र च स्मरेत्॥

आदिबीजं सुवर्णाभं प्रणवेनैव वेष्टयेत्।
पश्चाद्देवं समभ्यर्च्य अर्घ्यान्तं चैव पूजयेत्॥

प्र. १२ . २६, २७

५.१४.२० पुनः प्रतिष्ठायां कुम्भे आवाहनक्रमः

खि. १७ . ५२, ५३

पुनः प्रतिष्ठा चेद्विद्वान् कुम्भं संसाध्य पूर्ववत्॥
पुराणबिम्बात्तच्छक्तिं ध्यात्वा कुम्भे सुसन्न्यसेत्।

---

1. कुम्भे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१४.२१ आवाहनशब्दार्थः

स. ३१ . ५९ - ६९

क्षीरे सर्पिस्तिले तैलं पुष्पे गन्धः फले रसः।।

यथायसि महासारः काष्ठेऽग्निरिव संस्थितः।
कुत आवाह्यते देवः कुत्र चोद्वास्यते पुनः।।

तस्मादावाहनं विष्णोरयुक्तमिति मन्यते।
तथापि पूजनामार्गे मन्त्रैरावाहनं स्मृतम्।।

अन्यथाऽभ्यर्चितुं देवं देवानां च न शक्यते।
सर्वत्र व्यापिनस्तस्य श्रीविष्णोः परमात्मनः।।

एकत्र स्मरणं यत्तदावाहनमितीरितम्।
भक्तानुकम्पया सोऽपि विभूतिं स्वां सुविस्तृताम्।।

संक्षिप्यैकत्र भवति कलापीव कलापकम्।
अरण्यां व्यापितो वह्निरेकत्र ज्वलितो यथा।।

तथा ध्यानेन भक्तस्य हृदि विष्णुः प्रकाशते।
मार्कण्डेयो महातेजाः प्राह चैवं महामुनिः।।

अस्माभिश्च हरेस्तस्य माहात्म्यं नावबुध्यते।
मन्त्रैरावाहिते बेरे स्थले कूर्चे जलेऽथवा।।

भक्तानुकम्पया स्थित्वा पूजां गृह्णाति पूजितः।
अथवा हरिमर्कस्य मण्डलान्तर्गतं परम्।।
पीताम्बरधरं दीप्तं चतुरङ्गुलमात्रकम्।
ध्यानगम्यं किरीटादिभूषणैः परिभूषितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुक्माभं स्वप्नगम्यं च तस्मादावाहयेत्तथा।

ज्ञा. ६४ . १११ ; क्रि. ७ . ३७ - ३९

य. २७ . २२ - २४; २८, २९ ; वि. ३१ . २२४

५.१४.२२ बालालयेऽर्चिताद् बेराद् कुम्भजले आवाहनक्रमः

य. २७ . ३० - ३६

एवमादिप्रतिष्ठा चेत् बालधाम्नि विशेषतः।
प्रविश्य बालधाम तं देवदेवं प्रणम्य च ।।

शुद्धतोयैः सुसंस्नाप्य जीवस्थाने सुसन्न्यसेत्।
समभ्यर्च्य विशेषेण हविः सम्यङ्निवेदयेत्।।

'क्षमस्वेति' प्रणम्यैव कुम्भपूजां समाचरेत्।
उत्तराभिमुखो भूत्वा दक्षिणे कौतुकस्य च।।

प्रमुखे धान्यराशौ तु कुम्भं सन्न्यस्य मन्त्रवित्।
तथाऽभिमन्त्र्य तत्कुम्भं स्नपनोत्सवयोरपि।।

आरोप्य कौतुके शक्तिं पश्चाद्देवं प्रणम्य च।
कुम्भेऽम्भसि च पद्मे तु ध्यात्वा देवं सलक्षणम्।।

मण्डलान्युपरि ध्यात्वा तस्मिन् देवेशमव्ययम्।
तद्बिम्बसंस्थितां शक्तिं मन्त्रेणावाहयेत्क्रमात्।।

ततः कुम्भजले ध्यात्वा अर्घ्यान्तं पूजयेद्धरिम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. २०

[अत्र कूर्चेनावाहयेत्कुम्भे इति विशेषः।]

स. ३१. ७०, ७१

[अत्र अर्चनाधिकारवत्।]

५.१४.२३ बहुभूमिविमानप्रतिष्ठायां कुम्भसङ्ख्या

खि. १७. १०३

बहुभूमिप्रतिष्ठा चेत्प्रत्येकं कुम्भमाहरेत्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५. ध्रुवबेरादीनां कलशस्नपनम्

५.१५.१ कुम्भपूजानन्तरं ध्रुवबेरादीनां सप्तभिः कलशैः स्नपनम्
वि. ३१ . २२४, २२५

[1]ततो देवं कुम्भं च समादाय सर्वालङ्कारसंयुक्तं शकुनसूक्तं जप्त्वा, यज्ञालये स्नानश्वभ्रे देवं प्रतिष्ठाप्य, दक्षिणे धान्यराशौ कुम्भं सन्न्यस्य देवस्य दक्षिणे श्रियं, वामे हरिणीं च संस्थाप्य; पुरस्तात् व्रीहिभिः तण्डुलैर्वा दण्डवत् पङ्क्तिं कृत्वा, दक्षिणाद्युत्तरान्तं देव्योश्च पृथक् पङ्क्तिं कृत्वा तस्यां सप्तकलशान् विन्यस्य, क्षीरघृतमधुसिद्धार्थोदकाऽक्षतोदककुशोदकचन्दनोदकसम्पूर्णान् कलशान् उत्तरादीन् सन्न्यस्य, अन्तरेषूपस्नानकलशान् शुद्धोदकसम्पूर्णान् सन्न्यस्य, क्षीरे अथर्ववेदम्, उपस्नानेऽश्विनौ, घृते सामवेदम्, उपस्नाने वत्सरान्, मधुनि यजुर्वेदम्, उपस्नाने वायुं, सर्षपोदके चाऽऽदित्यम्, उपस्नानेऽप्सरसः, अक्षतोदके काश्यपम्, उपस्नाने मरुतः, कुशोदके मुनीन्, उपस्नाने तक्षं, चन्दनोदके ऋतून्, उपस्नाने बृहस्पतिं च एकादशोपचारैः अभ्यर्चयेत्। अथवा जलपुष्पैरेवार्चयेत्। देवेशं प्रतिद्रव्यं पाद्याद्यैरर्चयेत्। 'शं नो देवी' रिति क्षीरेण, 'अग्न आयाहीति' घृतेन, अग्निमील इति मधुना, पूतस्तस्य इति सर्षपोदकेन इमाश्चोषधय (वै. म. प्र ८) इति अक्षतोदकेन 'अभि त्वा शूर ' (ऋ. सं.५. ३. २१) इति कुशोदकेन 'चत्वारि शृङ्गे' (ऋ. सं. ३. ८. २०) ति गन्धोदकेन च संस्नाप्य, 'वारिश्चतस्रे' (वै. म. प्र. ८) ति

1. ध्यानानन्तरमित्यर्थः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वोपस्नानैस्संस्नापयेत्। (द्रव्यं प्रति पूर्वं कुम्भं समभ्युक्ष्य ?) 'आपोहिष्ठाद्यै' रुष्णोदकेन च संस्नाप्य, शुद्धोदकैश्चाभिषिच्य, प्लोतेन विमृज्य, नववस्त्रोत्तरीयाद्यैरलङ्कृत्य, अभ्यर्च्य, नैर्ऋते विष्टरे देवीभ्यां सह देवं कुम्भं च संस्थाप्य, स्नपनोत्सवबलिबेराणि च पृथगेवं संस्नाप्याऽर्चयेत्।

ज्ञा. ६४ . ११२

[औत्सवादिबंहुबेरैः सह प्रतिष्ठा चेत् स्नपनं पृथगेव विधीयते। भिन्ने गर्भालये तदलाभे च कुम्भपूजनस्नपनशयनानि यथोक्तहोमं च पृथगेव कुर्यात् इति विशेषः।]

अ. २०

स्नपनोत्सवबिम्बानां स्नपने च पृथक्पृथक्।।

चक्रं च शैषिकं चैव लोहबिम्बकृते घने।
पृथक् पृथक् स्नपनं वस्त्रादीनर्चयेत् क्रमात्।।

य. २७ . ४३ - ५६

[अत्र चन्दनोदकस्थाने फलोदक इति दृश्यते। फलोदके मुनीन्, कुशोदे तक्षकवासुकिम्, उपस्नाने ऋतून् अर्चयेदिति विशेषः।]

स. ३१ . ७८ - ८२ ; ३२. १ - १५

तथा सकलरूपं तं कुम्भे विष्णुं विचिन्त्य च।
वदन् शकुनसूक्तं वै बिम्बं कुम्भं समानयेत्।।

कौतुकं च तथा देव्याश्चोत्सवं स्नपनं क्रमात्।
सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।।

नृत्तगीतसमायुक्तं स्तोत्रध्वनिसमन्वितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यः शिरसा कुम्भं धारयन्नग्रतो व्रजेत्।।

स्थापकाः बिम्बमादाय गच्छेयुरनु तस्य वै।
श्वभ्रमध्ये तु तं देवं विष्णुसूक्तेन संन्यसेत्।।

श्वभ्रस्य दक्षिणे पार्श्वे न्यसेत्कुम्भं समीपतः।
देव्योरप्यौत्सवं बिम्बं स्नपनं च तथा न्यसेत्।।

धान्यैस्तु प्रमुखे पङ्क्तिं दक्षिणाद्युत्तरान्तकाम्।
कल्पयित्वा तु कलशानुत्तरादि च संन्यसेत्।।

क्षीरेणैकं घृतेनैकं मधुनैकं प्रपूर्य च।
सिद्धार्थकोदकेनैकमक्षतोदेन च क्रमात्।।

गन्धोदेन कुशोदेन कलशौ सम्प्रपूर्य च।
अष्टाढकादहीनानि सिद्धार्थादीनि निक्षिपेत्।।

प्रधानान् सप्त विन्यस्य शुद्धोदैः सप्त पूरितान्।
उपस्नानांश्च कलशान् तत्तत्पार्श्वे सुसंन्यसेत्।।

अथर्वं सामवेदं च यजुर्वेदमनन्तरम्।
आदित्यं काश्यपं चैव मुनिं चैव ऋतून् पुनः।।

अयनान् वत्सरांश्चैव वायुमप्सरसस्तथा।
मरुतस्तक्षकं चैव बृहस्पतिमिति क्रमात्।।

एतान् देवान् समाराध्य पुष्पाद्यैरष्टविग्रहैः।
पश्चादाचमनं दद्यात् देवेशं सम्प्रणम्य च ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'शं नो देवी ' ति मन्त्रेण क्षीरेण स्नापयेद्धरिम्।
'अग्न आयाहि' मन्त्रेण घृतेन स्नापयेद्विभुम्।।

'अग्निमीले' ति मन्त्रेण मधुना स्नापयेत्तथा।
'पूतस्तस्ये' ति मन्त्रेण स्नापयेत्सर्षपोदकैः।।

'इमा ओषधय' इत्युक्त्वा स्नापयेदक्षतोदकैः।
'अभित्वा शूर' इत्युक्त्वा स्नापयेद्गन्धवारिणा।।

'चत्वारि वागि' ति जपन् कुशोदेनाभिषेचयेत्।
'वारीश्चतस्र' इत्युक्त्वा सर्वोपस्नानमाचरेत्।।

द्रव्यं प्रति च देवेशं पाद्यार्घ्याचमनैस्तथा।
'इषेत्वोर्जेत्वा' दि जपन् 'आप उन्दन्त्वि' ति ब्रुवन्।।

उष्णोदकेन संस्नाप्य द्रव्येणाम्लादिना क्रमात्।
शोधयित्वा सुगन्धेन तोयेन स्नापयेत्तथा।।

श्वभ्रादादाय देवेशं पीठे संस्थाप्य नैरृते ।
प्लोतवस्त्रेण संमृज्य नवेनोत्तमवाससा ।।

नवेनैवोत्तरीयेण भूषणैरपि शक्तितः।
माल्यैर्गन्धैश्च देवेशमलङ्कुर्यात्प्रयत्नतः।।

क्रि. ७ . ४७ - ६८

वदन् शकुनसूक्तं तु कुम्भं बिम्बं समानयेत्।।

कौतुकं पूर्वतो देव्यौ औत्सवं स्नापनं क्रमात्।
आचार्यश्शिरसा कुम्भं धारयन्नग्रतो व्रजेत्।।
स्थापका बिम्बमादाय गच्छेयुरनु तं गुरुम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुसूक्तेन देवेशं श्वभ्रमध्ये निवेश्य च ।।

श्वभ्रस्य दक्षिणे धान्यपीठे हस्ततलायते।
षडङ्गुलसमुत्सेधे न्यसेत् श्वभ्रसमीपतः।।

देव्यावप्यौत्सवं बिम्बं स्नापनं च तथा न्यसेत्।
पङ्क्तिं तदग्रतो धान्यैः दक्षिणाद्युत्तरान्तकम्।।

कुर्यात् हस्तत्रयायामां हस्तविस्तारसंयुताम्।
उत्तरादिन्यसेत् तत्र कलशान् तन्तुवेष्टितान्।।

क्षीराज्यमधुसिद्धार्थाक्षतोदकुशचन्दनैः।
पूरितांश्च सकूर्चांश्च सोपस्नानान्यथाक्रमम्।।

तदर्धपादहीनानि[1] सिद्धार्थादीनि निक्षिपेत्।
दध्याज्यमधुदुग्धानाम् आढके सति दुर्लभे।।

त्रिपादमर्धहीनं वा पादार्धं वा यथोदयम्।
सन्न्यसेदुत्तराद्येव देवेशाभिमुखांस्तथा।।

तदुपस्नानकलशान् तत्तत्पृष्ठे च सन्न्यसेत्।
अथर्वसामऋग्वेदाः आदित्यः काश्ययपस्तथा।।

ऋतवो मुनयश्चैव सप्त द्रव्याधिदेवताः।
अश्विनौ वत्सराः वायुः अप्सरा मरुतस्तथा।।

तक्षको वायवश्चैव सप्तोपस्नानदेवताः।
त्रयोदशोपचारैस्तांस्तत्तन्नामभिरर्चयेत्।।

1.दशाष्टांशादहीनानि इति पाठः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'शन्नो देवीरग्र आयाह्यग्निमील' इति क्रमात्।
पूतस्तस्येमा ओषधय अभित्वा शूर इत्यपि।।

'चत्वारि वागि'ति जपन् स्नापयेत् सप्तभिश्च तैः।
'वारीश्चतस्र' इत्युक्त्वा सर्वोपस्नानमाचरेत्।।

द्रव्याणि प्रोक्ष्य चादाय गायत्र्या प्रणवेन वा।
स्वललाटान्तमुद्धृत्य त्रिस्सकृद्वा प्रदक्षिणम्।।

तत्तन्मन्त्रावसाने तु स्नापयेत् पञ्चमूर्तिभिः।
पूर्वं कुम्भं च सम्प्रोक्ष्य तत्तद्रव्यैः पृथक् पृथक्।।

सर्वेषामवताराणां देव्योः परिषदामपि।
तत्तत्प्रधानमन्त्रान्ते तत्तन्मूर्तिभिराचरेत्।।

'इषे त्वोर्जेत्वे' ति जपन् आप 'उन्दन्त्वि' ति क्रमात्।
शोधयेद् गन्धतोयेन स्नापयेच्च यथाविधि।।

श्वभ्रादादाय देवेशं पीठे संस्थाप्य नैर्ऋते।
'मित्रस्सुपर्ण' इत्युक्त्वा प्लोतेन विमृजेत्पुनः।।

नवाम्बरोत्तरीयस्रग्भूषणैरपि भूषयेत्।
देव्योश्चैवौत्सवादीनां तत्तद्देव्योरपि क्रमात्।।

सर्वेषां परिवाराणां स्नापनं पृथगेव वा।
मध्ये चोष्णोदकस्नानं प्रवदन्ति महर्षयः।।

क्षीराज्यादीनि संशोध्य स्नाप्यालङ्कारमर्पयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१५.२ द्वादशभिः कलशैः ध्रुवबेरादीनां स्नापनम्

खि. १६. २६१ - २७४ ; १७. ५३ - ६९

द्वारं तोरणसंयुक्तं पूर्णकुम्भसमन्वितम्।
क्रमुकैः कदलीभिश्च इक्षुकाण्डैरलङ्कृतम्।।

एवं सुसाध्य यत्नेन गृहीत्वा कलशानि च।
संशोध्याऽम्लादिना शुद्धतोयेनाऽवेष्ट्य तन्तुना।।

पूरयित्वा ततो द्रव्यैः शरावैश्च पिधाय वै।
संसाध्यैवमलङ्कारैः पश्चात्संस्थापयेद्बुधः।।

द्रव्यपूर्णानि कलशान्यादाय विनयानतः।
उभाभ्यामपि हस्ताभ्याम् उक्तस्थानेषु सन्न्यसेत्।।

ऐशान्ये पञ्चगव्यन्तु ईशानेन्द्रान्तरे घृतम्।
इन्द्राग्न्योरन्तरे चैव न्यसेन्मधु यथाविधि।।

दधि न्यसेदथाग्नेय्यां यमाग्न्योरन्तरे पयः।
यमनीलान्तरे गन्धं नैर्ऋत्यामक्षतोदकम्।।

नीलवारुणयोर्मध्ये स्थापयेत्तु कुशोदकम्।
वरुणोदानयोर्मध्ये सन्न्यसेच्च फलोदकम्।।

रत्नोदकञ्च वायव्ये जप्योदं वायुसोमयोः।
ईशानसोमयोर्मध्ये न्यसेत्सर्वौषधीजलम्।।

उपस्नानानि सर्वेषां तत्तद्वामे सुसन्न्यसेत्।
एवं विन्यस्य कलशान्यधिदेवांत्समर्चयेत्।।

वस्त्रैरावेष्ट्य कलशान्यूर्ध्वं पुष्पाणि निक्षिपेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यागस्थानं समासाद्य कुण्डेष्वैन्द्रादिषु क्रमात्।।

आघारं विधिवत्कृत्वा मथितेनैव वह्निना।
परिवाराग्निषु तथा सर्वेष्वाघारमाचरेत्।।

एवं कृत्वा विधानेन पश्चात्कार्यं समाचरेत्।
अधिवासगतं देवमासाद्यैवानुमान्य च।।

पूर्वालङ्कृतवस्त्रादीन् समुद्धार्याप्रमादतः।
तत उद्धृत्य देवेशमाम्लेन परिशोधयेत्।।

वस्त्रैराभरणैस्स्त्रग्भिरलङ्कृत्यार्चयेत्क्रमात्।

सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।।

स्तोत्रध्वनिसमायुक्तं शकुनसूक्तसमन्वितम्।
कुम्भं सङ्गृह्य शिरसा आचार्यः पुरतो व्रजेत्।।

पश्चाद्देवं समादाय व्रजेयुर्मूर्तिधारकाः।
धामप्रदक्षिणं कृत्वा गत्वा वै स्नपनालयम्।।

श्वभ्रमध्ये प्रतिष्ठाप्य विष्णुसूक्तं समुच्चरन्।
श्वभ्रस्य दक्षिणे पार्श्वे न्यसेत्कुम्भं यमान्तरे।।

शिष्टानि सर्वकार्याणि यथोक्तानि समाचरेत्।
शङ्खे वा शुक्तिकायां वा तोयं संसाध्य मन्त्रतः।।

प्रोक्षयित्वा तु कलशानधिदेवान् समर्चयेत्।
पाद्याद्यर्घ्यान्तमभ्यर्च्य देवेशं मनसा स्मरन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यः शिष्यसहितो वस्त्राभरणभूषितः।
'वसोः पवित्र' मित्युक्त्वा स्नापयेत्पञ्चगव्यकैः।।

'अग्न आयाहि' मन्त्रेण घृतेन स्नापयेद्विभुम्।
'अग्निमीले' ति मन्त्रेण मधुना स्नापयेद्धरिम्।।

'इषे त्वोर्जेत्वे' ति जपन् दध्ना संस्नापयेत्तथा।
'शन्नो देवी' ति मन्त्रेण क्षीरेण स्नापयेत्ततः।।

'अभित्वा शूर' इत्युक्त्वा गन्धोदेन समाचरेत्।
'इमा ओषधय' इति स्नापयेदक्षतोदकैः।।

'जपन् द ' त्वेति मन्त्रेण स्नापयेत्तु फलोदकैः।
'चत्वारि वा' गिति जपन् कुशोदेनाभिषेचयेत्।।

'तत्पुरुषाये' ति मन्त्रेण रत्नयुक्तेन वारिणा।
'पूतस्तस्ये ' ति मन्त्रेण जप्योदेन ततः परम्।।

सर्वौषध्युदकेनैव चत्वारीति समुच्चरन्।
यैर्द्रव्यैः स्नापयेद्देवं पूर्वं तैः प्रोक्षयेद्घटम् ।।

उपस्नानेषु सर्वेषु 'वारीश्चतस्रः' उच्चरेत्।
प्रतिद्रव्यं विशेषेण पाद्याद्यर्घ्यान्तमर्चयेत्।।

पश्चात्प्लोतेन विमृजेन्मित्रस्सुपर्ण उच्चरन्।
नववस्त्रैरलङ्कृत्य भूषयेदपि भूषणैः।।

दिव्यगन्धैरलङ्कृत्य नाभेरूर्ध्वञ्च सर्वतः।
हेमपुष्पैरलङ्कुर्यान्मुक्तादामभिरन्वितैः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नानावर्णसमायुक्तैः भूषयेत्पुष्पदामभिः।
पाद्याद्यर्घ्यान्तमभ्यर्च्य प्रणम्यैवानुमान्य च।।

प्र. १२. २८ - ३०; वा. १०

[अत्र चतुर्दशकलशस्नपनमुच्यत इति विशेषः]

५.१५.३ देवबिम्बस्य यागशालानयनसमये ग्रामसन्धिषु प्रभूतबलिनिर्वापः

खि. १७ . ७० - ८२

पन्थानं शोधयित्वाऽद्भिः सलाजैः कुसुमैस्तिलैः।
अलङ्कुर्यात्पताकाभिः विविधैः पुष्पदामभिः।।

सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।
समुच्छ्रितैः ध्वजैः छत्रैः धूपाद्यैस्सुसमायुतम्।।

यन्त्रारूढाश्च नृत्येरन् अप्सरोवत् स्त्रियोऽग्रतः।
द्रोणं द्रोणार्धकं वापि आढकं वा स्वशक्तितः।।

माषद्वयसमायुक्तं कुलुत्थनिष्वापसंयुतम्।
पाचयित्वा विधानेन कटाहे निर्वपेद्बुधः।।

लाजैश्च तिलचूर्णैश्च अपूपैस्सक्तुभिस्सह।
पुष्पतोयसमायुक्तं कूर्चयुक्तं सहाक्षतम्।।

प्रभूतबलिमाहृत्य प्रक्षिपेत्सर्वसन्धिषु।
चतुष्कोणे त्रिकोणे च द्विकोणे चैव सर्वतः।।

भूतयक्षपिशाचेभ्यो नागेभ्यो राक्षसैस्सह।
मध्यादि चोत्तरान्तं च निर्वपेदिति शासनम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तोयं दत्वाऽथ पूर्वं तु पश्चात्पुष्पं तथैव च।
बलिं दत्वा गुरुर्धीमान् ततस्तोयं समावपेत्।।

सन्धौ सन्धौ च सर्वत्र एवमेव प्रदापयेत्।
पश्चाद्देवं समादाय याने त्वारोप्य यत्नतः।।

'रथन्तरं' समुच्चार्य रथमारोपयेद्धरिम्।
आरोप्य शिबिकायां वा वैष्णवं मन्त्रमुच्चरन्।।

भक्तैः परिवृतो गच्छेच्छाकुनं सूक्तमुच्चरन्।
पश्चाद् ग्रामं प्रविश्यैव कुर्याद् ग्रामप्रदक्षिणम्।।

पश्चादालयमाविश्य यागस्थाने सुसन्न्यसेत्।
एवं कर्तुमशक्तश्चेत्कुर्याद्धामप्रदक्षिणम्।।

बिम्बगौरवमुद्दिश्य नाचरेद्वा प्रदक्षिणम्।
यन्त्रेण योजयित्वा तु देवागारं प्रवेशयेत्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६.शयनाधिवासः

५.१६.१ शयनाधिवासे प्रतिसरबन्धः

य. २७. ६५ - ७०

चूलिकां हेमपात्रं तु तण्डुलैराढकैरपि।।

पूरयित्वाऽग्रतो न्यस्य सौवर्णं तान्तवं तु वा।
तस्मिन्नुपरि सन्न्यस्य आलयं तत्प्रदक्षिणम्।।

कृत्वैवाभिमुखे न्यस्य पुण्याहमपि वाचयेत्।
सूत्रोक्तविधिना विद्वान् 'कृणुष्व पाज' इति ब्रुवन्।।

'महागम् इन्द्रो नृपे' त्युक्त्वा 'त्रातार' मिति मन्त्रतः।
तथापि 'वाऽग्निरायुष्मानि' त्युक्त्वाऽथ पुनर्गुरुः।।

'स्वस्तिदा' इति मन्त्रेण पूर्वहस्ते प्रदक्षिणम्।
बन्धयेन्मतिमान् देव्योस्तत्तन्मन्त्रेण च क्रमात्।।
वामहस्ते च बध्नीयात्तथा कुम्भे च मन्त्रतः।

वि. ३१ . २२५, २२६

आचार्यः स्थापकाद्यैस्सहितः पुण्याहं वाचयित्वा, सौवर्णं, राजतं, ताम्रं कांस्यं वा पात्रं द्रोणार्धैराढकैर्वा तण्डुलैः प्रत्येकमापूर्य तस्मिन् सौवर्णं प्रतिसरं विन्यस्य अलाभे क्षौमकार्पासतन्तुना त्रिवृतं वा 'कृणुष्व पाज' (ऋ.सं. ३.४.२३.) इति स्वस्तिसूक्तेनाभिमृश्य, 'स्वस्तिदा विशस्पत' (वै. म . प्र. ३) रिति वदन् देवस्य दक्षिणहस्ते देव्योस्तत्तन्मन्त्रेण वामकरे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बध्नीयात्। तथैव स्नपनोत्सवबलिबेराणां च कृत्वा ध्रुवबेरेऽपि पूर्वमेव प्रतिसरं बध्वा

स. ३२ . ३१ - ३४ ; ज्ञा. ४६ . ११२, ११३

खि. १७ . ९५ - १०१

सौवर्णं तान्तवं वाथ कृत्वा प्रतिसरं बुधः।।

हेमादिपात्रे सन्न्यस्य शालितण्डुलपूरिते।
वाद्यघोषसमायुक्तं स्वस्तिसूक्तसमन्वितम्।।

देवालयं परीत्यैव देवस्य पुरतो न्यसेत्।
पुण्याहं वाच्य तत्काले विधिवन्मन्त्रपूर्वकम्।।

स्वस्तिसूक्तं समुच्चार्य स्पृशेत्प्रतिसरं तथा।
उच्चरन् 'स्वस्तिदा' मन्त्रं कुर्यात्कौतुकबन्धनम्।।

ध्रुवोऽस्ति चेद्विमानस्थः बध्नीयात्पूर्वमेव तत्।
देव्योश्च वामकरयोः बध्नीयाद्विधिवत्ततः।।

विमानं प्रथमं यत्र बध्वा प्रतिसरं ततः।
सूत्रं त्रिवृतमादाय पादमूले विशेषतः।।

दर्भमालां च परितः प्रादक्षिण्यक्रमेण वै।

अ. २०

वा. १०

तण्डुलैः पूर्णपात्रे च गृहीत्वात्र विशेषतः।
सौवर्णं राजतं वापि कृतं सूत्रं तु निक्षिपेत्।।

अथवा तन्तुमाहृत्य न्यसित्वा देशिकोत्तमः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ताम्बूलसहितं पात्रं देवस्याग्रे प्रतिष्ठितम्।।

ऋत्विजो वरयेत्पश्चात् सूत्रोक्तेन विधानतः।
पुण्याहं वाच्य तत्काले स्वस्तिसूक्तं समुच्चरन्।।

देवस्य दक्षिणे हस्ते सूत्रमादाय बन्धयेत्।
स्वस्तिदा इति मन्त्रेण तत्र कार्यं समाचरेत्।।

देव्योश्च तत्तन्मन्त्रेण वामहस्ते तु बन्धयेत्।
चन्दनादिसुगन्धैश्च ललाटे चोर्ध्वपुण्ड्रकम्।।

'तद्विप्रासेति' मन्त्रेण तत्र कार्यं समाचरेत्।

प्र.१२ . ३१ - ३५

क्रि. ७ . ८१ - ८७, ९०

पूरितं च न्यसेत्पात्रम् आढकाहीनतण्डुलैः।
सौवर्णं तान्तवं वाथ तत्र प्रतिसरं न्यसेत्।।

'कृणुष्व पाज' इत्युक्त्वाभिमृश्य 'स्वस्तिदे' ति च ।
बध्नीयात् कौतुकं हस्ते देवदेवस्य दक्षिणे।।

वामहस्ते च बध्नीयात् देव्योः प्रतिसरं क्रमात्।
स्नापने चौत्सवे बिम्बे बलिबेरे तथैव च।।

ध्रुवे च बन्धयेत्पूर्वं क्रमेणैव समाचरेत्।
'स्वस्तिदा' इति मन्त्रेण 'विष्णुस्त्वा' मिति मन्त्रतः।।

एताभ्यां देवदेवस्याप्याचार्यस्यर्त्विजामपि।
तत्तन्मन्त्रेण देव्योश्च बन्धयेत् वामहस्तके।।

आचार्यस्यर्त्विजां चैव बन्धयेत् दक्षिणे करे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिष्ठायाम् उत्सवे वा कुर्यात् कौतुकबन्धनम्।
रक्षाबन्धनहीने च सर्वं कार्यं विनश्यति।

ध्रुवबेरे तु बध्नीयात् कौतुकं तद्वदेव हि।।

५.१६.२ शयनाधिवासविधिः

स. ३२. १६ - ३०, ३५ - ३८

शय्यावेद्यास्तु मध्ये च बिम्बात्तालाधिकायताम्।
अर्धविस्तारसंयुक्तां यमयुक्तोच्छ्रयान्विताम्।।

एवं बिल्वद्रुमकृतां तत्रैव फलकां न्यसेत्।
तदूर्ध्वं चर्मजादीनि 'वेदाह' मिति मन्त्रतः।।

धान्यानां तण्डुलादीनां राशिमास्तीर्य च क्रमात्।
षड्द्रोणसंमितं धान्यं तदर्धं तण्डुलानि च ।।

मुद्गानि च तदर्धं तु तिलानि च तदर्धकम्।
तदर्धं यवमित्युक्तमुपर्युपरि चास्तरेत्।।

उत्तमं चैव षड्द्रोणं मध्यमं तु तदर्धकम्।
तदर्धमधमं ज्ञेयं राशीनां च यथाक्रमम्।।

यथालाभं प्रगृह्यैव यजमानस्य शक्तितः।
शयनानि पृथक् पञ्च प्रवक्ष्यन्ते क्रमेण वै।।

चर्मजै रोमजैश्चैव मुण्डजैरण्डजैस्तथा।
वामजैश्च सुसम्पन्नं शयनं यत्तदुच्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्याघ्रादिचर्मणा कृत्यं चर्मजं समुदाहृतम्।
आविकाद्यैश्च रोमैस्तु कृतं तद्रोमजं स्मृतम्।।

कार्पासेन कृतं यत्तन्मुण्डजं तद्विदुर्बुधाः।
अण्डजं चेति जानीयात् पक्षिपिच्छैः प्रकल्पितम्।

कौशेयं क्षौमसंयुक्तं वामजं च विधीयते।
एवं पञ्च समास्तीर्य शयनानि तदूर्ध्वतः।।

अलाभे चर्मजादीनां पञ्च वस्त्राणि वा हरेत्।
तत्तत्प्रतिनिधिं ध्यात्वा समास्तीर्य पृथक् पृथक्।।

उपधानद्वयोपेतं शयनं कल्पयेद् गुरुः।
अङ्कुरान् पूर्णकुम्भाश्च दीपांश्च परितो न्यसेत्।।

पश्चाद्देवं समादाय कुम्भेन सहितं क्रमात्।
जपन् शकुनसूक्तं च तोयधारापुरःसरम्।।

शय्यावेदिं सुसम्प्राप्य देवेशमुपवेशयेत्।
देव्यौ तत्र भवेतां चेत् क्रमाद्दक्षिणवामयोः।।

स्नपनं चोत्सवं चापि न्यसेद्दक्षिणवामयोः।
देववच्च स्मरन् कुम्भं भक्त्या देवाग्रतो न्यसेत्।।

'यद्वैष्णवोह' मुच्चार्य शयने शाययेद्धरिम्।
तत्तन्मन्त्रेण देव्यौ च शाययेत्पार्श्वयोः क्रमात्।।

स्नपनं चोत्सवं बिम्बं शाययेत्पार्श्वयोस्तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राग्द्वारे देवतागारे देवोऽपि प्राक्छिरा भवेत्।।

दक्षिणादिदिशि द्वारे यतो द्वारं ततः शिरः।
उत्तराच्छादनं कुर्यादहतेनैव वाससा।।

गलादधस्तात्सर्वत्र समास्तीर्य प्रयत्नतः।
शिरसः पादपर्यन्तं समास्तीर्याथवा पुनः।।

क्रि. ७. ६८ - ८०, ८७ - ९०

शय्यावेद्यास्तु मध्ये च 'वेदाह' मिति मन्त्रतः।।

तिलतण्डुलशालीनां राशिं कृत्वा विपर्ययात्।
(शय्या वितर्दिकान्तस्था तद्बिम्बार्धाधिकायता।
अधः खट्वाङ्गसंयुक्ता चोर्ध्वे पट्टीसमायुता।।

शाण्यादिरज्जुसंयुक्ता खट्वा शय्या प्रकीर्तिता।
एतल्लक्षणसंयुक्ता बिल्वादिफलका यदि।।
शय्याख्यफलका प्रोक्ता यथालाभं समाहरेत्।)
तदूर्ध्वे चर्मजादीनि 'वेदाह' मिति मन्त्रतः।।

व्रीहीणां तण्डुलानां च राशिमास्तीर्य चोर्ध्वतः।
शयनानि समास्तीर्य क्रमेणैवं पृथक् पृथक्।।

चर्मजैः रोमजैश्चैव मुण्डजैरण्डजैस्तथा।
वांमजैश्च ससम्पन्नं शयनं तत्प्रचक्षते।।

व्याघ्रादिचर्मणा क्लृप्तं चर्मजं शयनं स्मृतम्।
रोमभिश्चाविकादीनां कृतं तद्रोमजं स्मृतम्।।

कार्पासेन कृतं यत्तत् मुण्डजं त्वभिधीयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पक्षिपिञ्छैः कृतं यत्तत् अण्डजं परिकीर्तितम्।।

कौशेयं क्षौमसङ्क्लृप्तं वामजं त्वभिधीयते।
अलाभे चर्मजादीनां पञ्चवस्त्राणि वा तथा।।

शयनं कल्पयेदेवं धान्यराश्युपरि क्रमात्।
शिरः पादोपधाने द्वे देव्योश्चापि पृथक् पृथक्।।

पूर्णकुम्भाङ्कुरान् दीपान् मङ्गलान् परितो न्यसेत्।
शयने पूजयेच्छेषं फणामण्डलमण्डितम्।।

मित्रादींश्च जयादींश्च प्रागाद्यभ्यर्च्य वै बहिः।
देवं शकुनसूक्तेन स्थापयेच्छयनोपरि।।

दक्षिणे च श्रियं देवीं स्थापयेद्वामतो महीम्।
स्नापनं चौत्सवं चापि न्यसेद्दक्षिणवामयोः।।

शयनं त्वेकवेद्यान्तु पृथगास्तृणुयात्तयोः।
देववच्च स्मरन् कुम्भं भक्त्या देवाग्रतो न्यसेत्।।

अष्टोपचारैरभ्यर्च्य देवं कुम्भं च वै पृथक्।
आचार्यः स्थापकैर्युक्तः पुण्याहमपि वाचयेत्।।

यद्वैष्णवं समुच्चार्य शयने शाययेद्विभुम्।।

तत्तन्मन्त्रेण देव्यौ च शाययेत्पार्श्वयोः क्रमात्।
स्नापनं चौत्सवं चैव शाययेत्पार्श्वयोस्तथा।।

प्राग्द्वारे देवतागारे देवोऽपि प्राक्छिरा भवेत्।
दक्षिणादिषु दिक्ष्वेवं यतो द्वारं ततश्शिरः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तराच्छादनं कुर्यादहतेनैव वाससा।

कौतुकार्चौत्सवाख्यानां तत्तद्देव्योस्तथैव च।
एककुम्भे सहध्यानं न स्नानं पृथगेव हि।।

शयनं चैकवेद्यान्तु स्नापनौत्सवयोः पृथक्।

ज्ञा. ६४ . ११२ , ११३

[अत्र व्याघ्रादिचर्म इत्यस्य स्थाने सिंहव्याघ्रादिचर्म इति विशेषः।]

खि. १७ . ८३ - ९५ , १०१ - १०३

यागस्थानस्य मध्ये तु स्थण्डिले शयनं चरेत्।
मण्डलं चोपलिप्यैव वर्णैस्संस्कृत्य पञ्चभिः।।

व्रीहिभिस्तण्डुलैश्चापि परिपूर्य समन्ततः।
तस्योपरि विधानेन बैल्वं फलकमाक्षिपेत्।।

अण्डजैर्मुण्डजैश्चैव लोमजैश्चर्मजैस्तथा।
वामजैश्च क्रमेणैव उपर्युपरि संस्तरेत्।।

अण्डजं तु विजानीयात् पक्षिणां पिच्छसम्भवम् ।
कार्पासशाल्मलादीनि मुण्डजं तु विदुर्बुधाः।।

आविकं तु मृगाणां तु रोमजं रोमजं स्मृतम्।
सिंहव्याघ्रादिजन्तूनां चर्म चर्मजमुच्यते।।

पट्टवस्त्रादिनिचयं वामजं परिकीर्तितम्।
अलाभे त्वण्डजादीनां प्रत्येकं वस्त्रमास्तरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवं संस्तीर्य मन्त्रज्ञो 'वेदाहं' मन्त्रमुच्चरन्।
ऐन्द्राद्यैशान्यपर्यन्तं श्रीवत्सादीन् न्यसेत्क्रमात्।।

पूर्णकुम्भांश्च परितस्त्वङ्कुरांश्च विशेषतः।
दीपांश्च परितो न्यस्येत् धान्यपीठे विचक्षणः।।

आयुधानि न्यसेत्तद्वत् धान्यपीठे समन्ततः।
ततः सङ्कल्प्य शयनं पश्चाद्देवं प्रणम्य च ।।

सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।
ब्रह्मघोषसमायुक्तं शकुनसूक्तसमन्वितम्।।

पूर्ववत्कुम्भमादाय देवेशसहितं क्रमात्।
शयने देवमारोप्य कुम्भं चात्रैव स्थापयेत्।।

देव्यौ च स्थापयेत्पश्चात् दक्षिणोत्तरयोः क्रमात्।
कुम्भं च पुरतो न्यस्य वैष्णवं मन्त्रमुच्चरन्।।

पाद्याद्यर्घ्यान्तमभ्यर्च्य देवेशं मनसा स्मरेत्।

यद्वैष्णवं समुच्चार्य शयने शाययेद्धरिम्।।

यद्दिग्द्वारं विमानं स्यात्कुर्यात्तद्दिशि वै शिरः।
कृत्वोपधानं शिरसः तथा कृत्वा च पादयोः।।

उत्तराच्छादनं कुर्याद्वासोभिरभितस्तथा।

अ. २०

सभ्यस्य पश्चिमे भागे शयनं सम्प्रकल्पयेत्।
चतुरश्रं समं कृत्वा चतुर्हस्तप्रमाणतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुरङ्गुलोन्नतं व्रीहिः तदर्धं तण्डुलोपरि।
तण्डुलार्धतिलं प्रोक्तं दर्भानुपरि विन्यसेत्।।

अण्डजैर्मुण्डजैश्चैव तथा रोमज वामजैः।
चर्मजैश्चैव पञ्चैतैः पञ्चभिः शयनं भवेत्।।

शिरोपधानं कृत्वा तु पादधारणमेव च ।
अण्डजादीनामलाभे प्रत्येकं वस्त्रमाहरेत्।।

स्नपनोत्सवबिम्बानां देवीभ्यां शयनं भवेत्।
श्वभ्राच्चैवोद्धृतं बिम्बं तत्कुम्भं पुरतो गतः।।

धामप्रदक्षिणं चैव प्रासादे वा प्रदक्षिणम्।
शयनस्थं प्रवेश्यैव देवेशं शयने न्यसेत्।।

तत्कुम्भं पुरतो न्यस्य देवीभ्यां शयने न्यसेत्।
स्नपनोत्सवचक्रादीन् शयने तत्र विन्यसेत्।।

द्वारादिमौलिनं तत्र शयने शाययेत्ततः।।

द्वे द्वे दत्वोपधाने तु प्रणम्यैवानुमान्य च।
उत्तराच्छादनं तत्तद्देवीभ्यां च सहैव तु।।

वा. ११

अत ऊर्ध्वं प्रवक्ष्यामि शयनास्तरणक्रमम्।
वेदिं सम्प्रोक्ष्य मन्त्रज्ञः आशास्विति समुच्चरन्।।

पञ्चवर्णैरलङ्कृत्य अण्डजादीनि चास्तरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अण्डजं मुण्डजं चैव रोमजं वामजं तथा।
चर्मजं चात्र पञ्चैते पृथग्वक्ष्ये यथा शृणु।
अण्डजं पक्षिपिञ्छं च कार्पासं मुण्डजं भवेत्।।

आविकाद्यादिरोमं च कृतं कम्बलमेव च।
कौशेयाविकृतं सर्वं वामजं परिकीर्तितम्।।

पुण्डरीकस्य चर्दं च चर्मजं परिचक्षते।
एतद्द्रव्यं तु सङ्ग्राह्य उपर्युपरि चास्तरेत्।।

एवं कर्तुमशक्तश्चेत् पञ्चवस्त्राणि वास्तरेत्।
तस्याधस्ताच्च कर्तव्यं शयनास्तरणं भवेत्।।

षड्द्रोणं च तदर्धं वा चास्तरेद्देशिकोत्तमः।
शिरोपधानं कर्तव्यं ऊर्ध्वेऽनन्तं समर्चयेत्।।

देवदेव्यौ समानीय यद्दिग्द्वारं ततश्शिरः।
शयने शाययेद्विद्वान् 'यद्वैष्णव'मिति ब्रुवन्।।

देव्यादिभ्यस्तथा कुर्यात् तत्तत्सूक्तं जपेत्क्रमात्।
उत्तराच्छादनं कुर्यात् गलान्तं तत्र निक्षिपेत्।।

जलाधिवासमार्गेण देवस्य परितोऽर्चयेत्।

प्र. १२ . ३५ - ४०

[अत्र देव्यादिभ्य इत्यस्य स्थाने देव्योश्च इति, षड्द्रोणं धान्यं तदर्धं वा, तदर्धं तण्डुलं, तदर्धं तिलम्, तदर्धं यवम्, तदर्धं तिल्वं च वेदिकोपरि आस्तरेदिति च अधिकम्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वि. ३१ . २२६, २२७

शय्यावेदिं समभ्युक्ष्य, षड्द्रोणादहीनैः शालिधान्यैः, तदर्धयवतण्डुलैः तिलैर्वा उपर्युपर्यास्तीर्य, साग्रान् कुशान् प्रागग्रानास्तीर्य 'वेदाह' (तै. आ. प्र.३ अ. १३) मिति चर्मजं तल्पं प्रथमं विन्यस्य, द्वितीयं रोमजं विन्यस्य, तृतीयं मुण्डजं, चतुर्थमण्डजं, पञ्चमं वामजं क्रमेणैवोपरि विन्यस्य, उपरिवेष्टनं श्वेतं नववस्त्रेण कृत्वा उपधानद्वयं शिरोपधानं च विन्यसेत्। चर्मजं सिंहव्याघ्रादिचर्मकृतम्। रोमजमजाऽऽविकादिरोमकृतं, मुण्डजं कार्पास-शाल्मल्यादिफलमूलकृतम्। अण्डजं पक्षिपिच्छैः कृतम्। वामजं कौशेयक्षौमादिना कृतम्। सर्वालाभे यथालाभं वाऽऽहृत्यान्येषां प्रतिनिधिं द्वादशाष्टसप्तहस्तादहीनं नववस्त्रं समाहरेत्। तथैवोपरिवेष्टनमुपधानद्वयं च सङ्कल्प्य, प्रणवेनाभ्युक्ष्य, तुलसीपुष्पगन्धाद्यवकीर्य, अगरुधूपैः कर्पूर-दीपैस्सहाङ्कुराऽष्टमङ्गलानि पञ्चायुधानि परितो विन्यस्य, वितान-ध्वजदर्भमालातरङ्गस्तम्भवेष्टनमुक्तादामाद्यैरलङ्कृत्य, सर्ववाद्यसमायुक्तं शकुनसूक्तं समुच्चार्य, आचार्यः स्थापकैस्सार्धं देवेशं शयने समारोप्य, 'यद्वैष्णव' (वै. म. प्र.) मिति मन्त्रेण देवं देव्यौ तत्तन्मन्त्रेण सहैव शाययेत्। यद्दिग्द्वारं विमानं तद्दिङ्मौलिं कृत्वा उत्तराच्छादनं गलादध-स्तादाच्छाद्य देवेशस्य दक्षिणे पूर्ववत्कुम्भं सन्यस्य स्नपनोत्सवबलिबेराणां चैकवेद्यां प्रत्येकम्, एवं शयनं सङ्कल्प्य तथैव शाययेत्। तत्परितः प्रावरणं कृत्वा

य. २७ . ५७ - ६५ , ७० - ७४

ततो 'वेदाह' मित्युक्त्वा शयनं प्रोक्ष्य मन्त्रवित्।
षड्द्रोणं शालिधान्यं च तदर्धं तण्डुलं तिलम्।।
उपर्युपरि तदर्थं च समास्तीर्योपरि क्रमात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अण्डजं प्रथमं तल्पं द्वितीयं मुण्डजं तथा।।

तृतीयं रोमजं तल्पं चतुर्थं चर्मजं तथा।
पञ्चमं वामजं तल्पं क्रमादुपर्युपरि च।।

समास्तीर्य गुरुर्धीमान् श्वेतवस्त्रोपवेष्टनम्।
कृत्वात्र चोपधाने द्वे विन्यस्यैव ततो बुधः।।

पुष्पाक्षतान् विकीर्यैव 'वेदाह' मिति मन्त्रतः।
पश्चाद्देवं समादाय कुम्भेन सहितं क्रमात्।।

शकुनसूक्तं समुच्चार्य शय्यावेद्यां सुमध्यमे।
सहैव देवं देवीभ्यां स्थापयेद्वैष्णवं वदन्।।

संस्थाप्य परितो धीमान् मङ्गलान्यायुधान्यपि।
प्रदक्षिणक्रमेणैव सन्न्यस्यैव समर्च्य च।।

कुम्भवेद्यां सुसन्न्यस्य पुष्पाद्यैः सम्यगर्चयेत्।
शयनान्यथवाऽऽस्तीर्य श्वभ्रादादाय मन्त्रवित्।।

शयनोपरि संस्थाप्य कुम्भेन सह पूजयेत्।

आचार्य ऋत्विग्भिस्सार्धं गर्भगेहं प्रविश्य च।।

न्यस्तकुम्भान् विसृज्यैव ध्रुवं सम्यक् समर्च्य च।
स्थापकैः सह पूर्वोक्तं पुण्याहमपि वाच्य च।।

ततश्शालां प्रविश्यैव देवदेवं प्रणम्य च।
'यद्वैष्णव' मिति मन्त्रेण देवीभ्यां सह शाययेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्दिग्द्वारं विमानं स्यात्तद्दिग्द्वारं च मौलिकम्।
उत्तराच्छादनं कृत्वा गलाधस्ताद्विशेषतः।।

तथैव वेद्यां देवस्य पार्श्वयोः स्नपनोत्सवौ।
शाययेद्बलिबेरं च सार्धं पूर्वोक्तमन्त्रतः।।

५.१६.३ शयनाधिवासनिमित्तम्

स. ३२ . ४३

भिन्ने गर्भालये चैव तलभेदे तथैव च।
पृथक् सर्वं च कर्तव्यमिति प्रोवाच पूर्वजः।।

५.१६.४ यागशालां परितः सर्वदेवार्चनम्

वि. ३२. २२७, २२८

यज्ञशालां महावेदिं वा, परितः सर्वान् देवान् समभ्यर्च्य महावेद्युपरिष्टात् प्रागादिचतुर्दिक्षु ध्रुवकौतुकयोरावरणत्रयदेवान् गर्भालयाधिपान् दक्षिणे ब्रह्माणं मार्कण्डेयम्, उत्तरे शङ्करं ख्यातीशं, द्वारेषु धात्रादिद्वारपालान् विमानपालादीन् सर्वान् देवान् प्रथमावरणाद्यावरणक्रमेण तत्तद्दिक्षु समर्चयेत्। अथवा इन्द्रं न्यक्षं श्रियं हविःपालमग्निं भौमं जगद्भुवं विवस्वन्तं यमं दुर्गां सप्तरोहिणीः सप्तमातॄः, नीलं च महाकालिं, पुरुषं, वरुणं, मित्रं, बुधं, ज्येष्ठं, पुष्पेशं, वायुं, शुक्रं, सप्तर्षीन्, गङ्गां, धन्यं, क्षत्तारं, निशाकरं, पाञ्चभौतिकं, शान्तम्, ईशानं, वह्निरक्षकं, वाग्देवीं च, एवं पूर्वादिप्रदक्षिणं, प्राङ्मुखे श्रीभूतगरुडचक्रध्वजशङ्खयूथाधिपविष्णुभूतान् यथाक्रमेण एकादशोपचारैरभ्यर्च्य, तत्तन्नाम्नार्चयेदिति केचित्। प्रभूतबलिमाहृत्य बलिनिर्वापं च कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. ३२. ६७ - ८०

आवाहितेषु सर्वेषु देवांस्तान् स्थापकास्तथा।
परितो यागशालायामर्चयेयुश्चतुर्दिशम्।।

एकादशोपचारैश्च ब्रह्माणं मध्यमेऽर्चयेत्।
कल्पिते द्वारदेशे तु धात्रादीन् षट् समर्चयेत्।।

द्वारे तु द्वारपालांश्च तत्तन्नामभिरर्चयेत्।
रुद्रं पवित्रं वाग्देवीं रविं शक्रं श्रियं तथा।।

हवीरक्षकमग्निं च प्राच्यामैशान्यपूर्वकम्।
अग्निकोणान्तमभ्यर्च्य पश्चिमाभिमुखान् क्रमात्।
भौमं जगद्ध्रुवं दुर्गां यमं मन्दं च रोहिणीम्।।

मातॄश्चैवार्चयेत्तत्र पार्श्वे वै दक्षिणे तथा।
प्रागादिपश्चिमान्तं च पूजयेदुत्तरामुखान्।।

निर्ऋतिं च महाकालं पुरुषं वरुणं तथा।
बुधं ज्येष्ठां च पुष्पेशं वायुं वै प्राङ्मुखान् क्रमात्।
पूजयेत् पश्चिमे पार्श्वे दक्षिणाद्युत्तरान्तकम्।।

शुक्रं मुनींश्च भृग्वादीन् गङ्गां धन्यं निशाकरम्।
पञ्चभूतानि शान्तं च प्रागन्तं पश्चिमादिकम्।।

उदक् पार्श्वेऽर्चयेद्देवान् क्रमाद्वै दक्षिणामुखान्।
प्राच्यां बहिस्तथा न्यक्षं विवस्वन्तं च दक्षिणे।।

मित्रं च पश्चिमे पार्श्वे उदक्पार्श्वे महीधरम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वारस्य दक्षिणे पार्श्वे बहिर्विकटमर्चयेत्।।

उत्तरे च तथा पार्श्वे नागराजं समर्चयेत्।
द्वारस्याभिमुखे स्थाने श्रीभूतं सम्यगर्चयेत्।।

वीशं चक्रध्वजाम्भोजभूतांश्च प्रमुखे क्रमात्।
प्रागन्तमर्चयेदेतान् यथाप्रोक्तक्रमान्वितम्।।

यस्यां दिशि विमानं स्यात् द्वारं तत्र प्रकल्पितम्।
दक्षिणान्तं प्रतीच्यन्तमुत्तरान्तं च पूर्ववत्।।

श्रीभूतवीशपूर्वांश्च क्रमादेवं समर्चयेत्।

य. २८. १ - १२

अथातः परिवाराणां सर्वेषामपि च क्रमात् ।
यथोक्तविधिना विद्वान् होमाद्यं च तथा चरेत्।।

महावेद्युपरिष्टात्तु शिवादीनर्चयेद्बुधः।
ब्रह्माणं दक्षिणे धीमानुत्तरे शङ्करं तथा।।

मार्कण्डेयं भृगुं चैव दक्षिणोत्तरयोरपि।
पूजयेद्विधिना विद्वान् ध्यात्वा पूर्वोक्तमार्गतः।।

द्वारे द्वारे च षड्देवान् प्रागाद्यमभिपूज्य च।
मणिकं च तथा सन्ध्यां प्राग्द्वारे सम्यगर्चयेत्।।

ईशं बलीशं वाग्देवीमर्कं शक्रं श्रियं तथा।
आग्नेये पावकं प्राच्यामीशाद्यान् पश्चिमामुखान्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भौमं जगद्भुवं दुर्गां धर्मं मन्दं च रोहिणीम्।
मातृृंश्च दक्षिणे पार्श्वे पूजयेदुत्तरामुखान्।।

नीलं चैव महाकालीं पुरुषं वरुणं क्रमात्।
बुधं ज्येष्ठां च फुल्लं च वायुं वै प्राङ्मुखांस्तथा।।

शुक्रं मुनींश्च भृग्वादीन् गङ्गां धन्यं निशापतिम्।
पञ्चभूतानि शान्तं च प्रागन्तं दक्षिणामुखान्।।

समभ्यर्च्य च न्यक्षादीन् प्रागाद्यं चोत्तरान्तकम्।
विकटं नागराजं च प्राग्द्वारे क्रमशोऽर्चयेत्।।

द्वारस्याभिमुखे बाह्ये अनपायिगणान् क्रमात्।
ध्यात्वैव पूर्ववन्मन्त्री पूजयेदष्टविग्रहैः।।

यस्यां दिशि विमानं स्याद्द्वारं तत्र प्रकल्पितम्।
तत्तद्दिश्यवसानं स्यात् स्थानं तदनपायिनाम्।।

भूतादिपूजयेत्तत्र तत्तद्ध्यानसमायुतः।
तत्तद्दिगवसानं च नाम्ना वै अनपायिनाम्।।

खि. १७ . १९३ - २२२

पश्चात्समर्चयेद्देवान् स्वनामपदपूर्वकम्।।

विष्णुं पूर्वं समभ्यर्च्य श्रीभूमिसहितं क्रमात्।
दक्षिणे मार्कण्डेयं च वामे ख्यातीशमेव च।।

दक्षिणे भित्तिमाश्रित्य स्थितं ब्रह्माणमर्चयेत्।
उत्तरे भित्तिमूले च ईश्वरं च समर्चयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कवाटदेवान् धात्रादीनर्चयेत्क्रमतः पृथक्।
धातारं दक्षिणे भागे विधातारञ्च वामतः ।।

(भृतिं च वामभागे तु पतङ्गं दक्षिणे तथा)
ऊर्ध्वे पतङ्गमभ्यर्च्य भुवङ्गञ्चाधरेऽर्चयेत्।।

पतिरं दक्षिणे स्तम्भे वरणं चोत्तरेऽर्चयेत्।
द्वारे च प्रथमे पालं मणिकं मुनिमर्चयेत्।।

द्वारवामेऽर्चयेत् देवीं मणिकस्य प्रभावतीम्।
द्वितीयद्वारपालौ च तापसं दक्षिणेऽर्चयेत्।।

वामे सिद्धिदमभ्यर्चेत् किञ्चिद्द्वारसमीक्षकौ।
अथवा शङ्खचक्रे च केषाञ्चित् पक्ष उच्यते।।

यत्र यत्र तु यो द्वारः भविष्यति कवाटवान्।
तत्र तत्र कवाटेशान् धात्रादीन् षट् समर्चयेत्।।

सोपानमध्ये श्रीभूतं प्राङ्मुखं सम्यगर्चयेत्।
इन्द्रं रुद्रं श्रियं चैव शैलूषं चाग्निमेव च ।।

एतान् देवान् समभ्यर्चेत् पश्चिमाभिमुखान् क्रमात्।
अङ्गारकं गुहं चैव दुर्गां वै यममेव च ।।

शनैश्चरं रोहिणीश्च सप्तमातॄरपि क्रमात्।
एतान् दक्षिणतः कुर्यादुत्तराभिमुखान् क्रमात्।।

नैर्ऋते निर्ऋतिं चैव बृहस्पतिमतः परम्।
धात्रीं विष्णुं च वरुणं बुधं ज्येष्ठां तथैव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुष्परक्षकवायू वै पश्चिमे सम्यगर्चयेत्।
एतानभ्यर्चयेद्यत्नात् प्राङ्मुखानेव सर्वथा।।

शुक्रं सप्त ऋषींश्चैव गङ्गां चैव विशेषतः।
पञ्च भूतांश्चार्चयेत्तु विष्वक्सेनं ततः परम्।।

एतानुत्तरपार्श्वे तु पूजयेद्दक्षिणामुखान्।
ईशानं चैव दण्डं च सिद्धिं चैव तथाऽर्चयेत्।।

ऐन्द्रद्वारस्य वामे तु पश्चिमाभिमुखान् क्रमात्।
ईशानं बलिरक्षं च तथा देवीं सरस्वतीम्।।

ऐन्द्रद्वारस्य वामे तु अर्चयेत्पश्चिमामुखान्।
प्राच्यां न्यक्षं समभ्यर्च्य विवस्वन्तं च दक्षिणे।।

मित्रं वै पश्चिमे भागे उत्तरे च महीधरम्।
विमाने कल्पयेदेतान् तत्तदाशामुखान् क्रमात्।।

गोपुरागारयोर्मध्ये वाहनं सम्यगर्चयेत्।
गोपुरस्य बहिः प्राच्यां वक्रतुण्डं तु दक्षिणे।।

वामेऽर्चयेन्नागराजमिति धर्मो व्यवस्थितः।
गोपुरात्तु बहिः प्राच्यां चक्रं चैव समर्चयेत्।।

ध्वजं पश्चात्समभ्यर्च्य शङ्खं चैव ततः परम्।
यूथाधिपं समभ्यर्च्य तत्स्थाने च यथाक्रमम्।।

भूतस्थाने द्वितीये तु विष्णुभूतं समर्चयेत्।
मूलस्थानप्रतिष्ठा चेत् पारिषद्यसमन्वितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथवा पूजयेद्विद्वान् पारिषद्यान् पृथक् पृथक्।
उत्तमं वस्त्रसंयुक्तं पूजनं तु पृथक् पृथक्।।

हविरन्तं तथा तेषां पूजनं मध्यमं भवेत्।
अर्घ्यान्तमधमं प्रोक्तमिति वेदानुशासनम्।।

अथवा यागशालायाः परितः सम्प्रपूजयेत्।
एवमेव प्रकुर्वीत पूर्वद्वारे विशेषतः।।

सत्यादि दक्षिणे द्वारे पश्चिमे त्वच्युतादिकम्।
उत्तरे चानिरुद्धादि योजयित्वा तु बुद्धिमान्।।

एवं कृत्वा विधानेन प्रतिद्वारं विशेषतः।
स्थानं प्रदक्षिणीकृत्य प्रयतेनान्तरात्मना।।

शयानं देवमासाद्य प्रणम्यैवानुमान्य च।
'सुवर्भुवर्भूस्थ' इति मूर्धानं नाभिमेव च ।।

पादौ च देवदेवस्य संस्पृशेत्क्रमविद्बुधः।

क्रि. ७ . १२३ - १३४

[अत्र त्रयोदशोपचारैश्च पृथक् पूजयेत् इति विशेषः।]

अ. २१

ततः प्रभाते धर्मात्मा यजमानयुतो गुरुः।।

स्नात्वा स्नानविधानेन देवालयमुपाव्रजेत्।
प्रदक्षिणं ततः कृत्वा शयनस्थं प्रवेशयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शयनाच्चोत्थितं चैवमर्चयित्वा विधानतः।
शयनात्पश्चिमे भागे धान्यवेदिं प्रकल्पयेत्।।

गर्भागारक्रमं कृंत्वा प्रथमावरणं भवेत्।
द्वितीयावरणं चैव सर्वदेवार्चनं भवेत्।।

विष्णुं पूर्वं समभ्यर्च्य शिवादीन् परितोऽर्चयेत्।
श्रीदेवीं दक्षिणे चैव वामे चैव वसुन्धराम्।।

दक्षिणे पङ्क्तिपार्श्वे तु ब्रह्माणं च समर्चयेत्।
उत्तरे पङ्क्तिपार्श्वे तु ईश्वरं च समार्चयेत्।।

कुड्यकौतुकयोर्मध्ये सम्यक् भित्तितलेऽपि वा।
भृगुं चोदङ्मुखं चैव मार्कण्डेयं तु दक्षिणे।।

वामे ख्यातीशमभ्यर्च्य धात्रादिद्वारदेवताः।
परिषदाद्यं समभ्यर्च्य मण्टपद्वारबाह्यतः।।

दक्षिणे वक्रतुण्डं च नागराजं च वामतः।
सोपानमध्ये श्रीभूतं प्राङ्मुखं च समर्चयेत्।।

विमानस्य बहिः पार्श्वे न्यक्षादीनां चतुर्दिशम्।
अर्चयित्वा यथान्यायं बहिर्मुखांश्च समर्चयेत्।।

विमाने दिग्देवतानां च इन्द्रमीशान्तरं तथा।
नरसिंहं प्रजापतिं चैव पुरुषादीनथापि वा।।

इन्द्रं हयमुखं वापि महाविष्णुं प्रजापतिम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रमेण ग्रीवामध्ये तु पुरुषादीनथापि वा।।

परिमण्डलविमानं तु देवाश्च शिखरं तथा।
पूजयेन्मूर्तिमन्त्रेण महाविष्णुं विचक्षणः।।

अष्टासु शिखरं मन्त्री दिशास्वेतास्तथार्चयेत्।
विदिशासु वेदरूपाश्च न्यक्षादिस्वमलादि वा।।

अग्निं च निरृतिं चापि वायुमीशानमेव वा।
पूजयेद्विदिशास्वष्टकोणे छन्दोविशेषतः।।

गरुडं वा मृगेन्द्रं वा प्रतिवर्गतलोपरि।
कोणेषु पूजयेन्मन्त्री तत्तद्दिङ्मुखमेव च।।

यथोक्तं पूजयेत्सर्वान् मूर्तिमन्त्रेण मन्त्रवित्।
भूम्यां प्रागुत्तरे देशे न्यस्तपीठोर्ध्वमेव वा।।

गोपुराद्दक्षिणे भागे इन्द्रं चैव समर्चयेत्।
चैत्रादि षट्सु मासादि पश्चिमाभिमुखं भवेत्।।

अङ्गारकं गुहं चैव दुर्गां चैव यमं तथा।
शनैश्चरस्य रोहिण्या मातॄणां चोत्तरामुखम्।।

निरृतिं बृहस्पतिं चैव धात्रीं विष्णुं च वारुणम्।
बुधज्येष्ठा पुष्परक्षा वायुः पश्चिमतो भवेत्।।

शुक्रः सप्तर्षयश्चैव तथा सोमश्च वामतः।
नर्मदा करकं चैव रुद्रं चैव तु चोत्तरे ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईशाने बलिपालं च धिषणं च तथैव च।
सूर्यो निर्गमवासोत्तत् प्राग्भागे पश्चिमामुखम्।

वामे च नागराजं स्यात् बहिः प्राङ्मुखमर्चयेत्।
चक्रं शङ्खं ध्वजं चैव यूथाधिपतिसंयुतम्।।

विष्णुभूतयुतं चैव सप्तविंशतिरर्चयेत्।
पूर्वस्यां देवर्षीश्चैव आग्नेय्यां दैत्यदानवाः।

पितॄन् भूतांस्तु याम्यायां राक्षसासुरनैर्ऋते।
वारुणे नागाप्सरसः वसवोपि च रोहिणी ।।

यक्षगन्धर्वसौम्ये च पितृपैशाचवीशतः।
विमानस्य बहिः प्राच्यां अनावृष्टिभ्योर्ध्वमुखम्।।

अथोङ्मुखमभ्यर्च्य(?) अर्चयित्वा यथाक्रमम्।
नवद्वयगणेऽभ्यश्च सप्तविंशतिरर्चयेत्।।

प्र. १२. ४१ - ४९

शय्यावेद्यास्तु परितः सर्वान् देवान् समर्चयेत्।
ईशानादिक्रमाद्देवान् बल्यन्तं तु समर्चयेत्।।

शङ्करं बलिरक्षं च वाग्देवीं बलिशक्रकौ।
अग्निं पवित्रं शैलूषं प्राच्यां प्रत्यङ्मुखान् क्रमात्।।

भौमं गुहं च दुर्गां च यमं मन्दं च नैर्ऋतिम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रोहिणीं सप्तमातॄंश्च दक्षिणे चोत्तरामुखान्।।

पश्चिमे नैर्ऋताद्यादीन् अर्चयेत्तदनुक्रमात्।
वैष्णवीं पुरुषं चैव बुधं ज्येष्ठां तथैव च।।

पुष्परक्षकवायू च प्राङ्मुखांश्च समर्चयेत्।
वायव्यादीशपर्यन्तं दक्षिणाभिमुखान् क्रमात्।।

शुक्रं चैव भृगुं शान्तं तथा सप्त ऋषीनपि।
भागीरथीं कुबेरं च चन्द्रं भूतानि चार्चयेत्।।

द्वारे द्वारे च धात्रादीन् द्वारदेवान् समर्चयेत्।
विमानं परितोऽभ्यर्च्य न्यक्षादीनर्चयेत्क्रमात्।।

देवस्याग्रे प्रसन्नात्मा पूजयेदनपायिनः।
भूतद्वयं तथा तार्क्ष्यं तथा चैवामितं बुधः।।

चक्रशङ्खारविन्दानि देवस्याग्रेऽर्चयेद्बुधः।

ज्ञा. ६५. ११४

[अत्र पश्चिमायाम् अर्चनीयाः निर्ऋतिमहाकालीविष्णुवरुणबुधज्येष्ठा-पुष्परक्षकवायुदेवताः नाम्ना निर्दिष्टा इति, सप्तविंशतिविग्रहैः त्रयो-दशैर्वार्चयेयुरिति च अधिकम्।]

वा. १३

[अत्र ज्ञानकाण्डवत्।]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१६.५ बिम्बाच्छादनम्

य. २७. ७५, ७६

ततः प्रावरणं विद्वान् परितः समलङ्कृतम्।
सम्भारवेद्यामास्तीर्य धान्यं वस्त्रोपरि क्रमात्।।

हेमादिपात्रे रत्नादीन् सन्न्यस्यैवाधिदैवतम्।
अधिवास्य विष्णुमभ्यर्च्य नववस्त्रेण छादयेत्।।

ज्ञा. ६४. ११३

[अत्र कण्ठादधः प्रच्छाद्य इत्यधिकम् ।]

प्र. १२. ५०, ५१

[अत्र विष्णुसूक्तं समुच्चार्य इत्यधिकम्।]

वि. ३१ . २२७

[अत्र विष्मुसूक्तेनाधिवासनं कृत्वा, उत्तराच्छादनं निच्छिद्रं कृत्वा इत्यधिकम् ।]

५.१६.६ अधिवासनाङ्गं वेदाध्ययनम्

य. २७. ७७, ७८

यज्ञालयस्य परितः प्रागाद्यं च यथाक्रमम्।
वेदान्सूत्रपुराणाद्यानध्यापनमथाचरेत्।।

स्तोत्रैश्च स्तुतिभिश्चान्यैर्वाद्यैश्च विविधैरपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रमुखे गेयनृत्ते च कारयेद्विधिना बुधः।।

प्र. १२. ७८, ७९ ; वि. ३१ . २२७

वा. १४

ऋग्वेदं पूर्वभागे तु दक्षिणे तु यजुस्तथा।।

सामं तु पश्चिमे भागे अथर्वस्योत्तरे क्रमात्।
एवमध्ययनं प्राह ऋचां प्राचीरिति श्रुतिः।।

तस्मात्सर्वप्रयत्नेन ऋग्वेदादिक्रमं चरेत्।
विपरीतं चरेच्चैव निष्फलं तदुदाहृतम्।।

एवमध्ययनं कुर्यात् सर्वशास्त्रेण निश्चयः।
स. ३२ . ६५, ६६ ; ज्ञा. ६४ . ११३ ; क्रि. ७ . १००

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७. प्रतिष्ठाङ्गहोमाः

५.१७.१ होमप्रतिष्ठयोर्निषिद्धः कालः

वा.९

अथ वक्ष्ये विशेषेण सर्वमन्त्रक्रियाक्रमम्।
दिवा होमं न कुर्वीत स्थापनं न च रात्रिषु।।

तस्मात् सर्वप्रयत्नेन रात्रौ होमं समाचरेत्।
दिवैव स्थापनं तत्र कारयेद् गुरुरत्वरः।।

विपरीतं चरेद्विद्वान् तद्ग्रामयजमानयोः।
राजराष्ट्रादिकं सर्वं विनश्यति न संशयः।।

५.१७.२ हौत्रशंसनम्

प्र.१२. ५२ - ६०

पश्चाद्धोतारमाहूय यथोक्तगुणसंयुतम्।
पादौ प्रक्षाल्य चाचम्य कूर्चयुक्तं समाहितम्।।

अलङ्कुर्याच्च पुष्पाद्यैः पञ्चाङ्गोचितभूषणैः।
सभ्यस्य पूर्वभागे तु पश्चिमाभिमुखः स्थितः।।

सभ्याध्वर्युं समीक्ष्यैव होता प्रणवमुच्चरेत्।
'होतरेहि' पदे उक्ते ततो होता समुच्चरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'अध्वर्यो देवते' त्युक्त्वा पादौ प्रक्षाल्य चाचमेत्।
पूर्ववत् तत्र च स्थित्वा 'ओं नमः प्रवक्त्रे' ब्रुवन्।।

होता च नाम शर्मान्तं संयोज्यैव समुच्चरेत्।
'भूते भविष्यती' त्युकत्वा ब्रूया 'द्धिं' कारपूर्वकम्।।

'भूर्भुवस्सुव' रित्येव प्राङ्मुखश्च प्रदक्षिणम्।
आदध्यात् समिधोऽध्वर्युः प्रत्योङ्कारं ततोऽनले।।

होत्रा 'ऽग्ने महा' मित्युक्ते प्रभोः प्रवर इष्यते।
राज्ञो वा राजपत्न्या वा तथाऽमात्यस्य वा भवेत्।।

ग्रामश्चेद्यजमानस्तु वसिष्ठप्रवरं वदेत्।
अथ वा कारयेद्विद्वान् काश्यपप्रवरं वदन्।।

वैश्यादन्यत्र जातीयो यजमानो भवेद्यदि।
तस्य तु प्रवरं हित्वा काश्यपप्रवरं वदेत्।।

अ. २१

[अत्र ब्राह्मणो यजमानश्चेत् तदीयं प्रवरं, ग्रामो यजमानश्चेत् काश्यपप्रवरं, क्षत्रियादयो यजमानश्चेत् पुरोहितप्रवरं , त्रैवर्णिकानाम् आचार्यप्रवरं वा वदेत् इति निर्दिश्यते।]

खि. १७. १०८ - ११५ ; वा. १२

क्रि. ७. १०० - ११२

होतारं समलङ्कुर्यात् वस्त्रपुष्पाङ्गुलीयकैः।
सोत्तरीयैः यथाशक्ति सोपि होता सुपूजितः।।

सभ्यात् प्रत्यङ्मुखः प्राच्यां हौत्रमेवं प्रशंसति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अध्वर्युः 'होतरेही' ति होतारमभिसंवदेत्।।

'अध्वर्यो देवताश्च' ति सोऽध्वर्युं प्रतिभाषते।
पश्चादायम्य कूर्चं च गृहीत्वा पश्चिमामुखः।।

'नमः प्रवक्त्र' इत्यादि तिष्ठन्नुच्चैः समुच्चरेत्।
एव 'मो' मिति मन्त्रान्ते होता शर्मान्तमेव च ।।

स्वकं नाम द्वितीयान्तम् 'अमु' मित्येव योजयेत्।
'भूते भविष्यति' च 'हिं भूर्भुवः सुवरो' मिति।।

वदन् स प्राङ्मुखो भूत्वा 'प्रवो वाजे' त्यृचं वदेत्।
'प्रवो वाजे' त्यृचं चादौ 'आजुहोते' ति चान्ततः।।

त्रिधा वाच्ये ततोऽन्यास्तु प्रणवेन समं ततः।
होत्रा तेनोक्तमोङ्कारं श्रुत्वाध्वर्युर्विशेषतः।।

'ओं स्वाहे' ति वदन् इध्ममाज्याक्तं जुहुयाद्बुधः।
सामिधेनीः तथा शंसेत् होता सप्तदश क्रमात्।।

'ब्राह्मण भारते' त्यन्तम् उक्त्वैवाग्निं च बोधयन्।
यजमानस्य गोत्रं च प्रवदेत् प्रवरं क्रमात्।।

'देवेद्धोमन्विद्ध' इति पुनराह तथैव च।
ग्रामस्तु यजमानश्चेत् काश्यपप्रवरं वदेत्।।

पुरोहितस्य प्रवरं ब्रूयात् कर्ता नृपो यदि।
(आचार्यप्रवरं ब्रूयात् वैश्यशूद्रादिकर्तृके।
तमेव प्रवरं ब्रूयात् अस्ति चेत् क्षत्रवैश्ययोः)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यप्रवरं वाथ काश्यपप्रवरं तु वा।
ब्राह्मणव्यतिरिक्तानां सर्वेषामिति केचन।।
होता हौत्रक्रमेणैव हौत्रमेवं प्रशंस्य च।

स.३२. ५० - ६० ; ज्ञा. ६५. ११३, ११४ ;

य. २८. १३ - १९ ;

वि. ३२. २२८, २२९

पश्चाद्धोतारमाहूय वस्त्रोत्तरीयाभरणैरभिपूजयेत्। स होता सभ्यस्य पुरतस्तिष्ठेत् सभ्याध्वर्युरग्निं प्रज्वाल्य 'होतरेही' ति वदेत्। स होता 'अध्वर्य्वोर्देवते' त्युक्त्वा आचम्य प्रणवपूर्वं 'नमः प्रवक्त्र' (वै०. म०. प्र०.८) इति वदन् तिष्ठन्सोच्चं (उच्चैः) वैखानससूत्रोक्तविधिना हौत्रं प्रशंसयेत्। अध्वर्युस्तेनोक्तं ओङ्कारं श्रुत्वा सप्तदशपलाशेध्मान् पद्ममुकुलाग्रान् घृताक्तान् गृहीत्वा, अग्नौ 'ओं स्वाहेति' क्षिपेत्, होता 'ब्राह्मण भारते' (वै०. म०. प्र०. ८) त्यन्तमुक्त्वा यजमानस्य गोत्रप्रवरं क्रमेण वदेत्। ग्रामो यजमानश्चेत् काश्यपप्रवरं वदेत्।

५.१७.३ सर्वदेवतावाहनपूर्वकहोमः

खि. १७. ११५ - १७२

अध्वर्युणा नियुक्तस्तु होताऽऽवाहनमाचरेत्।
'आयातु भगवा' नुक्त्वा विष्णुमावाहयेत्ततः।।
क्रमाद्देव्यौ पारिषद्यान् नाम्नैवावाहनं चरेत्।
आवाहने चतुर्मूर्तिविधिरेवं प्रपठ्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'विष्णुं च पुरुषं सत्यमच्युतं चानिरुद्धकम्'।।

'श्रियं धृतिं पवित्रीं च प्रमोदादायिनी' मिति।
'हरिणीं चैव पौष्णीं च क्षोणीमिति मही' मिति।।

'ब्रह्माणं प्रजापतिं च पितामहमिति क्रमात्।
हिरण्यगर्भ' मित्युक्त्वा विधिनाऽऽवाहयेत्तदा।।

'रुद्रं चोमापतिं चैव गोपतिं शर्व' मित्यपि।
'मार्कण्डेयं च पुण्यं च पुराणममितं' तथा।।

'पद्मापितरं धातृनाथं ख्यातीशं भृगुमेव च।
'धातारं दम्भिनं चेति सनिलं गन्धर्वं' तथा।।

'विधातारं च कीनाशं मुरुण्डं न्यर्ण' मेव च।
'भृतिं भुवङ्गमुत्सङ्गं पीठं' चैव समाह्वयेत्।।

'पतङ्गमुत्करं चेति अपदानं कपर्दिनम्'।
'पतिरं बलिदं चेति मध्यगं वङ्करं' तथा।।

'वरुणं तेजिनं चेति दंशिनं च तरस्विनम्'।
'मणिकं महाबलं चेति विमलं द्वारपालकम्'।।

'सन्ध्यां प्रभावतीं चेति ज्योतीरूपां दृढव्रताम्'।
'तापसं सिद्धिराजं च सर्वदोषविवर्जितम्।।

सहस्राश्वमेधिन' मिति तापसं सम्यगाह्वयेत्।
'वैखानसं तपोयुक्तं सिद्धिदं सर्वदर्शिनम्'।

'किष्किन्धं बहुमर्दं च बहुसेनं दृढव्रतम्'।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'तीर्थमुद्वाहकं चैव सर्वयोग्यमुदावहम्'।।

'श्रीभूतं श्वेतवर्णं च वैष्णवं मुखपालिनम्'।
'इन्द्रं शचीपतिं चेति पुरुहूतं पुरन्दरम् '।।

'अग्निं जातवेदसमिति पावकं च हुताशनम्'।
'यमं च धर्मराजं च प्रेतेशमिति च ब्रुवन्।।

मध्यस्थ' मिति चोक्त्वा तु धर्मराजं समाह्वयेत्।
'आरम्भाधिपतिं चेति निर्ऋतिं नील' मेव च।।

'सर्वरक्षोधिप' मिति निर्ऋतिं च समाह्वयेत्।
'वरुणं प्रचेतसमिति रक्ताम्बरमिति क्रमात्।।

यादस्पति' मिति गुरुर्वरुणं सम्यगाह्वयेत्।
जवनं भूतात्मकं वायुमुदानं' च समाह्वयेत्।।

'कुबेरं धन्यं पौलस्त्यं यक्षराज' मिति क्रमात्।
'ईशानमीश्वरं चैव देवं चेति भवं' तथा।।

'आदित्यं भास्करं चैव सूर्यं मार्ताण्डमेव च ।
'विवस्वन्त' मिति प्रोच्य भास्करं सम्यगाह्वयेत्।।

'अङ्गारकं च वक्रं च रक्तं चैव धरासुतम्'।
'सूर्यपुत्रं च मन्दं च रैवत्यं च शनैश्चरम्'।।

'पीतवर्णं गुरुं तैष्यं बृहस्पति' मिति क्रमात्।
'बुधं श्यामं च सौम्यं च श्रविष्ठाज' मिति क्रमात्।।

'शुक्रं च भार्गवं काव्यं परिसर्पिण' मित्यपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'नलिनीं जाह्नवीं चैव गङ्गां वै लोकपावनीम्'।।

'वसिष्ठं सोमं यज्ञाङ्गमिन्दुं चन्द्र' मिति क्रमात्।
'भवं च शर्वमीशानं क्रमात् पशुपतिं तथा।।

उग्रं रुद्रं च भीमं च महादेव' मितीरयेत्।
'जगद्भुवं यजद्भुवं विश्वभुवमिति क्रमात्।।

रुद्रभुवं ब्रह्मभुवं भुवद्भुव' मुदीर्य च ।
'पुरुषं सत्यमित्युक्त्वा अच्युतं चानिरुद्धकम्।।

'धात्रीं महोदरीं रौद्रीं महाकाली' मिति क्रमात्।
'भूर्ज्येष्ठायिनीमिति च भुवर्ज्येष्ठायिनीमिति।।

सुवर्ज्येष्ठायिनीमिति कलिराजायिनीमिति।
कलिपत्नी' मिति तथा ज्येष्ठां वै सम्यगाह्वयेत्।।

'रौद्रीं कात्यायनीं चैव वैष्णवीं विन्ध्यवासिनीम्'।
'कुण्ठिनीं नन्दिनीं चैव धरित्रीं रजतप्रियाम्'।।

'ग्रन्थिनीं वेगिनीं चैव प्रजयां च प्रबर्हिणीम्'।
'कृच्छ्रिणीं शाखिनीं चैव वाहिनीं योक्त्रिणी' मिति ।।

'कुष्ठिनीं जारिणीं चैव छर्दिनीं च प्रवाहिणीम्'।
'विकारिणीं दामिनीं च बैसिनीं विद्युता'मिति ।।

'दद्रुणीमिन्दुकरीं चैव सौमनसीं प्रविद्युताम्।
'इन्द्रियविकारिणीं चैव अर्वन्तीं च समाह्वयेत्।।

गङ्गावाणीं सृजन्तीं च चतुर्मूर्तिभिराह्वयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'पद्मापितरं धातृनाथं ख्यातीशं भृगुमेव' च।।

'संभूतीशं मरीचिं च शोचिष्मन्तमिति क्रमात्।
पौर्णमासभृतं ' चेति मरीचिं सम्यगाह्वयेत्।।

'क्षमाधवं च पुलहं कर्दमाद्यं महाधृतिम्'।
'पुलस्त्यं प्रीतिभर्तारं वशङ्करमिति क्रमात्।।

दान्तो निराज ' मित्युक्त्वा चाह्वयेच्च विधानतः।
'सिद्धिराजं निष्कसूनुं सन्नतीशं क्रतुं' तथा।।

'ऊर्जापतिं राजपूर्वं वसिष्ठं वाक्पतिं' तथा।
'अत्रिं नियामकं चैव सत्यनेत्रगुरुं तथा।।

अनसूयापतिं' चेति चतुर्मूर्तिभिराह्वयेत्।
'गविष्ठं त्रैष्टुभं चेति गुह्यमाकाश'मेव च।।

'असुं समीरणं चेति वायुं च पृषदश्वकम्'।
'वीतिहोत्रमाभुरण्यं शुद्धमग्नि' मितीरयेत्।।

'पवित्रममृतं तोयं गह्वरं' चेति वै क्रमात्।
'हरिणीं च तथा पौष्णीं क्षोणीमथ मही' मिति।।

'सिद्धिं वाणीं ब्रह्मपत्नीं सरस्वतीम्' इति चाह्वयेत्।
'श्रियं धृतिं पवित्रीं च प्रमोदा (धा) यिनीम्' इति ।।

'न्यक्षं दधित्यकं चैव पीवरं चार्यकं' तथा।
'विवस्वन्तं च भरतं विश्वकर्माणमि' त्यपि।।

'मरीचिमन्त' मित्युक्त्वा आह्वयेत विचक्षणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'मित्रमित्वरमित्युक्त्वा राजिष्मन्तं रमणकम्' ।।

'महीधरं च क्षत्तारमुर्वरोहं च शेवधिम्'।

'हविरक्षकमाग्नेयं शैलूषं पचनं' तथा।।

'सर्वेश्वरं जगन्नाथं चामुण्डं सर्वतश्चरम्।
'ब्रह्माणीं पिङ्गलां चेति गौरीं वै सर्वतोमुखीम्' ।।

'सरित्प्रियां विश्वरूपामुग्रां चैव गणेश्वरीम्'।
'वैशाखिनीं खण्डिनीं च गायत्रीं षण्मुखीम्' इति ।।

'विश्वगर्भां विषोर्मिणीं कृष्णां च द्रुहिणीम्' इति।
'वाराहीं वरदामुर्वीं विषहां वेदधारिणीम् '(?) ।।

'पुष्परक्षकं हरितमधिवासं च फुल्लकम्'।
'बलिरक्षकं च दण्डं च सर्वज्ञं सम' मेव च।।

'विष्वक्सेनं च शान्तं च हरं चैवामितं' तथा।
'वक्रतुण्डमेकदंष्ट्रं विकटं च विनायकम्'।।

'गरुडं पक्षिराजं च सुपर्णं च खगाधिपम्'।
'नागराजं सहस्रशीर्षमनन्तं शेष' मित्यपि।।

'सुदर्शनं च चक्रं च सहस्रविकचं तथा।
अनपायिन' मिति च सुदर्शनमथाऽह्वयेत्।।

'जयमत्युच्छ्रितं धन्यं ध्वज' मित्याह्वयेद् ध्वजम्।
'पाञ्चजन्यं च शङ्खं च अम्बुजं विष्णुप्रिय' मिति।।

'यूथाधिपं नित्यमुग्रं महाभूताख्य' मेव च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'पाकोऽर्जुनं हस्तमगम् अक्षहन्तं तथैव च।।

विष्णुभूतं' चेति देवानाह्वयेद्विधिवद्बुधः।
सभ्याध्वर्युश्च तत्काले दक्षिणप्रणिधौ जले।।

विष्णुमूर्त्यादिरुद्रान्तं चतुर्मूर्तिविधानतः।
'आवाहयामी' त्युक्त्वा तु तत्तद्देवमनुस्मरन्।।

आवाहयेत् ततः पश्चादुत्तरप्रणिधौ जले।
धात्रादिविष्णुभूतान्तान् देवानन्यान् समाह्वयेत्।।

आवाहयेदन्यदेवान् तत्तद्धोमेषु च क्रमात्।
आवाहनक्रमेणैव चतुर्थ्यन्तेन वै पृथक्।।

जुष्टाकारं तथा कुर्यात्तत्क्रमेणाहुतीर्यजेत्।

वि. ३२ . २२९

'आया (वै.म.प्र.८) त्वि'ति मन्त्रान्ते विष्ण्वादिमहाभूतान्तम् 'आवहे'ति वदेत्। तथैवाध्वर्युः आदिमूर्त्यादिशर्वान्तं दक्षिणे प्रणिधौ धात्रादिमहाभूतान्तम् उत्तरप्रणिधौ समावाह्य आवाहनक्रमेण जुष्टाकारं कृत्वा तत्क्रमेणाज्याहुतीर्जुहोति।

अ. २१ ; वा १२ ; ज्ञा. ६५ . ११३, ११४

य. २८ . १९ - २२

'आयातु भगवानि' ति मूर्तिमन्त्रैरनुक्रमात्।।

'विष्णुमावाहयामी' ति भूतपर्यन्तमेव च।
आवाहयेत्तथा होता चतुर्भिर्मूर्तिभिः क्रमात्।।

निर्वापं च तथाध्वर्युः स्वाहाकारं च कारयेत्।
प्रज्वाल्य वैष्णवं पश्चाद्यजेद्व्याहृतिभिः सह।।

आदौ निश्चित्य पूजायां नवधोक्तं यथाबलम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथोक्तपरिषदां केचित् काले वा सम्प्रशंसयेत्।।

प्र.१२ . ६१, ६२

स. ३२ . ६० - ६४

'आयात्वि' ति समुच्चार्य मूर्तिमन्त्रैरनुक्रमात्।।

तं देवमावहेत्यग्निमध्वर्युं च प्रयोजयेत्।
आदौ विष्णुं समावाह्य देवानावाहयेत्ततः।।

अध्वर्युरपि तत्काले दक्षिणप्रणिधौ जले।
आदिमूर्त्यादिशर्वान्तं मूर्तिमन्त्रैर्यथाक्रमम्।।

आवाहयामीत्यावाह्य चोत्तरप्रणिधौ पुनः।
धात्रादिविष्णुभूतान्तान् देवानावाहयेत्तथा।।

आवाहनक्रमेणैव स्रुवेणाज्यं च निर्वपेत्।
मूर्तिमन्त्रक्रमेणाज्यं देवेभ्यो जुहुयात् पुनः।।

क्रि. ७ . ११२ - ११५

वा. ५

अथ वक्ष्ये विशेषेण सर्वदेवार्चनक्रमम्।
हौत्रान्ते सर्वदेवानां नामाद्येवं पृथक् पृथक्।।

विष्णुं श्रियं महीं पूर्वं पृथङ्नामान्तमाह्वयेत्।
अन्यांश्च पुरुषादींश्च सप्तत्येकोत्तरं भवेत्।।

ब्रह्माणं शङ्करं चैव मार्कण्डेयं मया[1] सह।
एतान् देवान् समभ्यर्च्य मूलद्वारे तु अर्चयेत्।।

---

1. भृगुणा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धातारं च विधातारं भुवङ्गं च पतङ्गकम्।
पतिरं वरुणं चैव प्रतिद्वाराधिदैवतम्।।

इन्द्रं चाग्निं यमं चैव निर्ऋतिं वरुणं तथा।
वायुं कुबेरमीशानम् आशान्तादि यथाक्रमम्।।

गरुडं दिवाकरं चन्द्रम् अङ्गारं बुधमेव च।
बृहस्पतिं च शुक्रं च मन्दं गङ्गाधरं तथा।।

स्कन्दं च पुरुषं धात्रीं ज्येष्ठां चैव महीधरम्।
कुमारं कुण्ठिनीं दुर्गां ग्रन्थिनीं कृच्छ्रिणीं तथा।।

कुण्ठिनीं विकारिणीं च दद्रुणीं च तथैव च।
इन्द्रियस्य विकारिणीं मां चैव च मरीचिनम्।।

पुलस्त्यं पुलहं चैव क्रतुमत्रिं वसिष्ठकम्।
गविष्ठं समीरणं चाभुरण्यं पवित्रकम्।।

हरिणीं च ततः सिद्धिं श्रियं न्यक्षं तथैव च।
विवस्वन्तं मित्रकं च क्षत्तारं हविरक्षकम्।।

ब्रह्माणमनिलं चैव गणेशं चैव षण्मुखम्।
वैष्णवीम् इन्द्रियविकारिणीं वाराहीं कालिनीं तथा।।

विष्वक्सेनं च पुष्पेशं बलिवालिं प्रजापतिम्।
कपिलं तु मृगव्याधं शर्वं भवपिनाकिनौ।।

हवनम् ईश्वरं स्थाणुं कापालीं निर्ऋतिं यमम्।
अजा एकपदं चैव अहिर्बुध्न्ययुतं तथा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धातारार्यमणं मित्रं वरुणं च भगं तथा।
इन्द्रं विवस्वत्पर्जन्यम् आर्षेण्यं त्वष्टारमेव च ।।

विष्णुं जघन्यजं तु तथा तं ध्रुवं सोममेव च।
आपोनिलं च वह्निं च प्रत्यूषं च तथैव च।।

प्रसहं तु तपः सत्यं दस्रं च मणिकं तथा।
सन्ध्यां च तापसं सिद्धिं किष्किन्धं तीर्थमेव च।।

विघ्नेशं नागराजं च चक्रं शङ्खं दिवाकरम्।
चन्द्रं धनपतिं चैव यमराजं गुहं तथा।।

चण्डं प्रचण्डं श्रीभूतं गरुडं चक्रं ध्वजं तथा।
शङ्खं यूथाधिपं चैव अक्षहन्तारमेव च।।

पुरुषाद्यक्षहन्तारं प्रत्येकं मूर्तिभेदकम्।
काश्यपाद्यादिना प्रोक्तं परिषट्कं समाह्वयेत्।।

पूर्वमावाहनं कुर्यात् जुष्टाकारमतः परम्।।

स्वाहाकारं तृतीयं स्यात् कृत्वा तद्देशिकोत्तमः।

५.१७.४ सर्वदेवावाहनपूर्वकहोमफलम्

वा.५

चतुरः पञ्च षट् सप्त नामभेदं समुच्चरन्।।

चतुर्वर्गसमृद्ध्यर्थं चतुर्वेदसमृद्धिदम्।
धर्मादिमोक्षसिद्ध्यर्थं च चातुराश्रमसिद्धिदम्।।

शान्त्यर्थं पौष्टिकार्थं च चातुर्वर्ण्यसमृद्धिदम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१७.५ सर्वदेवार्चनम्

ज्ञा. ६५. ११४

यागशालायां परितः सर्वान् देवानेतानर्चयेयुः। शङ्करबलिरक्षक - सरस्वतीरविशक्राग्निपवित्रशौलूषान् प्राच्यां प्रत्यङ्मुखान्, भौमगुहदुर्गाय - ममन्दसप्तरोहिणीसप्तमातॄरुत्तरमुखान् दक्षिणस्यां, निर्ऋति महाकाली- विष्णुवरुणबुधज्येष्ठापुष्परक्षकवायून् प्राङ्मुखान् पश्चिमस्यां, शुक्रं भृग्वादिसप्तर्षीन् गङ्गाकुबेरचन्द्रमहाभूतेशान् दक्षिणाभिमुखान् उत्तरस्यां, द्वारेषु द्वारपालान् विमाने न्यक्षादीनभिमुखे श्रीभूतगरुडध्वजशङ्खमहाभूतान् सप्तविंशतिविग्रहैः त्रयोदशैर्वा अर्चयेयुः।

५.१७.६ सहस्राहुतिहोमः

वा. १३

अथ वक्ष्ये विशेषेण सभ्यादींश्चापि हूयते।।

सहस्राहुतिपूर्वं स्यात् पद्माग्रयन्तं पृथक् शृणु।
सभ्याग्निं च परिस्तीर्य प्राणायामादिपूर्वकम्।।

स्वस्ति चैवेति हुत्वा तु तथा चैव प्रजापतेः।
अग्निर्धीमतयेत्युक्त्वा आदित्येभ्यस्तथैव च।।

विश्वेदेवेभ्य हुत्वा तु मरुद्गणेभ्यस्तथैव च।
भूरग्नये भुवो वायुः सुवरादित्यभूर्भुवः।।

दशकैः शतशो हुत्वा सहस्राहुतिरुच्यते।
एवं हुत्वा ---------------------।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रि. ७ . १३५ - १३९

[1]शयानं देवमासाद्य प्रणम्यैवानुमान्य च ।
'सुवर्भुवर्भू' रित्युक्त्वा मूर्धनाभिपदान् स्पृशन्।।

सभ्याग्निं परिषिच्याथ तां सहस्राहुतिं यजेत्।
'स्वस्ति चैवेह स्वाहे' ति 'प्रजापतय' इत्यपि।।

अग्निर्धीमतये चैवम् 'आदित्येभ्य' इति ब्रुवन्।
'विश्वेभ्यो देवेभ्य' इति 'गणेभ्यो मरुता' मिति।।

मन्त्रैरेतैर्यजेदाज्यं महाव्याहृतिभिः सह।
शतकृत्वो यजेदेतैः यजेद्व्याहृतिभिः पुनः।।

वैष्णवं विष्णुसूक्तं च सूक्तं पौरुषमेव च।
श्रीसूक्तं च 'श्रिये जाता'भूसूक्तं भूमिदैवतम्।।

प्र. १२ . ६३ - ७०

सभ्याग्निं च परिस्तीर्य प्राणायामादिपूर्वकम्।
'स्वस्ति चैवे ति' हुत्वा तु तथा चैव प्रजापतेः।।

'अग्निर्धीमतये' त्युक्त्वा आदित्येभ्यस्तथैव च।
विश्वेभ्यो देवेभ्यश्चैव मरुद्गणेभ्य एव च ।।

'भूरग्नये' चैवमाद्याश्चतस्रो व्याहृतीर्यजेत्।
दशभिः शतशस्त्वेतैः सहस्राहुतिरुच्यते।।

स्रुवेण स्रावयन् विद्वान् अविच्छिन्नं समाचरेत्।

1.शयनाधिवासे शायितम् इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णुसूक्तं समुच्चार्य सूक्तं पौरुषमेव च।।

श्रीसूक्तं भूमिदैवत्यम् 'अतो देवा' दि वैष्णवम्।
एकाक्षरादिसूक्तं तु विष्णुगायत्रिया युतम्।।

एतैस्तु सप्तभिः सूक्तैः चतुरावर्त्य हूयताम्।
एतत् कर्तुमशक्तश्चेत् सकृद्वात्र समाचरेत्।।

अष्टाक्षरेण मन्त्रेण द्वादशाक्षरकेण वा।
वैष्णवं विष्णुगायत्रीं जुहुयादिति केचन।।

ततश्चाहवनीयाग्निकुण्डे सम्यग्यथाक्रमम्।
यजेत् पुरुषसूक्तं तु षोडशावर्त्य यत्नतः।।

वि. ३२ . २२९

सभ्याग्निं परिषिच्य पालाशेध्मान् गृहीत्वा मूलाग्राभ्यां घृतं स्पर्शयित्वा देवं ध्यायन् विष्णुगायत्र्या जुहोति। अग्निहोत्रहवण्या आज्यं गृहीत्वा अतो देवादिना हुत्वा पश्चादुपभृताऽऽज्यमादाय विष्णुसूक्तैश्च हुत्वा जुह्वा पक्वं समादाय वैष्णवं षोडशद्वादशपर्यायतो जुहोति। स्रुवेणाज्यमादाय पञ्चवारुणं मूलहोमं यद्देवादिकूष्माण्डं च सकृत् हुत्वा पश्चात् 'स्वस्ति चैवेह स्वाहा, प्रजापतये स्वाहा, आदित्येभ्यः स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, मरुद्गणेभ्यः स्वाहा, भूरग्नये च पृथिव्यै च महते च स्वाहे' त्यन्तैर्मन्त्रैः दशभिः शतशो जुहुयात्। एषा सहस्राहुतिः एनाम् उपांशु यजेत। वैष्णवं, विष्णुसूक्तं, पुरुषसूक्तं, ध्रुवकौतुकयोः पुरुषाद्यावरणत्रयदेवानां वैष्णवं, तत्तन्मन्त्रैः जुहुयात्।

खि. १७ . २२२ - २२८

अध्वर्युरथ तत्काले सभ्याग्निं परिषिच्य च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहस्राहुतिमन्त्रैस्तु घृतेन जुहुयात्ततः।
'स्वस्ति चैवे' ति जुहुयात् प्रजापतय इत्यपि।।

'अग्निर्धीमतये' चेति आदित्येभ्यश्च होमयेत्।
'विश्वेभ्यो देवेभ्य' इति 'मरुद्‌गणेभ्य' इत्यपि।।

षड्भिरेतैर्होममन्त्रैर्महाव्याहृतिभिः सह।
दशमन्त्रैः समाहृत्य शतवारं हुतैर्भवेत्।।

सहस्राहुतिसंज्ञोऽयं होमः सर्वार्थसाधकः।
एवं ह्यसङ्कुलैर्मन्त्रैरावर्त्य शतशः क्रमात्।।

व्याहृत्यन्तं च जुहुयात् देवेशं मनसा स्मरन्।
विष्णुमुद्दिश्य यत्नेन विष्णुसूक्तं हुनेत् तदा।

'अतो देवा' दिभिर्हुत्वा जुहुयात् पारमात्मिकम्।
एवं हुत्वा तु मन्त्रज्ञो ध्यायेद्वै विष्णुमव्ययम्।।

ज्ञा. ६५ . ११४

स. ३३ . १ - ११

सभ्यमग्निं तथाऽध्वर्युः परिषिच्य विधानतः।
पालाशेध्मांश्च सङ्गृह्य घृताक्तानग्रमूलयोः।।

'नारायणाय विद्मे' ति निर्धूमेऽग्नौ जुहोति वै।
षड्भिश्च वैष्णवैराज्यं यजेदुपभृता बुधाः।।

पक्कं साज्यं ततो जुह्वा वैष्णवैर्जुहुयात् पुनः।
स्रुवेणाज्यं समादाय देवदेवमनुस्मरन्।।

विष्णोर्नुकाद्यैर्मन्त्रैश्च सप्तभिश्चापि बुद्धिमान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रैः सहस्रशीर्षाद्यैरष्टाभिर्दशभिस्तथा।।

अतो देवादिभिः षड्भिर्जुहुयाद्भक्तिसंयुतः।
'हिरण्यवर्णा'मित्युक्त्वा भूमिर्भूम्नेति च क्रमात्।।

यजेत् षोडशकृत्वस्तु मन्त्रैरेतैरनुक्रमात्।
तथा द्वादशकृत्वस्तु दशकृत्वोऽथवा यजेत्।।

शयानं देवमासाद्य प्रणम्यैवानुमान्य च।
सुवर्भुवर्भूरित्युक्त्वा मूर्ध्नि नाभौ हृदि स्पृशन्।।

स यजेत् स्वस्ति चैवेति प्रजापतय इत्यपि।
अग्निर्धीमतये स्वाहा चादित्येभ्य इति ब्रुवन्।।

विश्वेभ्यो देवेभ्यश्चेति मरुद्गणेभ्य इति ब्रुवन्।
भूरग्नये च इत्यादि महाव्याहृतिभिः सह।।

शतकृत्वो यजेदेषः सहस्राहुतिरिष्यते।
पञ्चवारुणमप्येवं जयाद्यपि तथैव च।।

अभ्यातानांश्च जुहुयाद्राष्ट्रभृद्भिस्ततः परम्।
यद्देवाद्यैश्च कूष्माण्डैर्जुहुयात्तदनुक्रमात्।।

क्रि. ७ . १४६ - १५१ ; य. २८ . २३ - २६

५.१७.७ आहवनीयादिषु होमाः

स. ३३. ५६ - ६४

तथैवाहवनीयादीन् जुहुयात् परिषिच्य च।
सहस्रशीर्षकाद्यैश्च तथाष्टादशभिः क्रमात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहुयादाहवनीयाऽग्नौ भक्त्या देवमनुस्मरन्।
ध्यायन् विष्णोर्नुकाद्यैश्च सप्तभिस्तदनुक्रमात्।।

जयादींश्च ततो हुत्वा ब्राह्ममन्त्रं जुहोति च।
ब्राह्मं पुनश्च होतव्यमन्वाहार्ये विशेषतः।।

'अतो देवा' दिभिः षड्भिः 'श्रियै जातः श्रिये'ति च।
'मेदिनी देवी'त्युक्त्वा च गार्हपत्ये सुहूयताम्।।

एकाक्षरादिमन्त्रैश्च चतुर्भिर्दशभिः क्रमात्।
रौद्रमन्त्रद्वयेनापि कौबेरं चावसथ्यके।।

तथैव षोडशावृत्या जुहुयाद्वै विशेषतः।
चतुरग्निषु चैतेषु मन्त्रैरेतैर्यथोदितैः ।।

आज्यं षोडशकृत्वश्च जुहुयुस्ते पृथक् पृथक्।
तथा द्वादशकृत्वोऽथ दशकृत्वोऽथवा पुनः।।

पयोदधिघृतैर्युक्तैरुपजुह्वा यथाक्रमम्।
जुहुयाद्विष्णुसूक्तेन पञ्चाग्निषु सलाजकम्।।

आज्यं स्रुचा गृहीत्वैव यजेयुर्वैष्णवैरपि।

क्रि. ७ . १५३ - १६० ; य. २८ . ३० - ३५

क्रि. ७ . १४३ , १४४

जुहुयात् पौरुषं सूक्तं प्राच्यामाहवनीयके।
अन्वाहार्ये सुहोतव्यं विष्णुसूक्तं यथाविधि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गार्हपत्ये सुहोतव्यं ब्राह्ममेकाक्षरादिकम्।
आवसथ्ये सुहोतव्यं 'त्वमग्ने रुद्र' इत्यपि।।

खि. १७ . २७८ - २८०

वि. ३२ . २३३

आहवनीये पुरुषसूक्तं, भृगुमार्कण्डेययोर्मन्त्रम्, ऐन्द्रम्, आग्नेयम्; अन्वाहार्ये विष्णुसूक्तं, ब्राह्मं, याम्यं , नैर्ऋतं; गार्हपत्ये 'अतो देवा' इति वैष्णवं, श्रीभूमिदेवत्यं, वारुणं, वायव्यम्; आवसथ्ये एकाक्षरादिसूक्तं, रौद्रं, कौबेरम्, ईशानदेवत्यं द्वादशाऽष्टचतुरो वा पर्यायतो जुहोति।

वा. १४

अत ऊर्ध्वं प्रवक्ष्यामि आहवनीयादिषु क्रमम्।
यजेत् पुरुषसूक्तं तु षोडशावर्त्य कारयेत्।।

सकृज्जयादीन् हुत्वा तु केचिदाहवनीयके।
अन्वाहार्यस्य कुण्डे तु विष्णुसूक्तं सुहूयताम्।।

ब्राह्मं तु व्याहृतीश्चैव जयादीन् जुहुयात् क्रमात्।
वैष्णवांश्च जयादींश्च जुहुयाद् गार्हपत्यके।।

अथवाष्टाक्षरं मन्त्रं द्वादशाक्षरसंयुतम्।
वैष्णवं विष्णुगायत्रीं जुहुयादिति केचन।।

आवसथ्ये विशेषेण वैष्णवं रुद्रसंयुतम्।
अथवा कारयेद्विद्वान् सूक्तमेकाक्षरादिकम्।।

विष्ण्वादि चाक्षहान्तां तु सर्वमूर्तीः सुहूयताम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आहवनीयोक्तमन्त्रसङ्ख्यामावर्त्य हूयताम्।।
विपरीतं चरेद्विद्वान् विनश्यति न संशयः।

स. १४ . ११ - १४ ; ज्ञा. ६५ . ११५

प्र. १२ . ७१ - ७३

अन्वाहार्याग्निकुण्डे तु विष्णुसूक्तं सुहूयताम्।
ब्राह्मं च व्याहृतीश्चैव जयादीन् जुहुयात् क्रमात्।।

श्रीसूक्तं वैष्णवं चैव जुहुयाद् गार्हपत्यके।
आवसथ्ये विशेषेण वैष्णवं रुद्रसूक्तकम्।।

महीसूक्तं च जुहुयात् सूक्तमेकाक्षरादिकम्।

क्रि. ७ . १६२ - १६९

अथवा हौत्रशंसान्ते वैष्णवैः पञ्चवारुणैः।
जयादिभिश्च कूष्माण्डैः हुत्वा तत्परिषद्गणान्।।

समभ्यर्च्य यथामार्गं सप्तविंशतिविग्रहैः।
त्रयोदशोपचारैर्वा पश्चाद्धोमं समाचरेत्।।

सभ्यमग्निं परिस्तीर्य तां सहस्राहुतिं यजेत्।
अब्जाग्नौ विष्णुगायत्र्या घृताक्तं श्वेतपङ्कजम्।।

शतकृत्वो यजेदाज्यं जुहुयात् पारमात्मिकम्।
यजेदाहवनीयाग्नौ पौरुषं सूक्तमेव च।।

अन्वाहार्ये विष्णुसूक्तं ब्राह्मं व्याहृतिसंयुतम्।
वैष्णवं गार्हपत्याग्नौ चावसथ्ये तु वैष्णवम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहुयाद्रुद्रसूक्तं च देवदेवमनुस्मरन्।
यजेत् षोडशकृत्वस्तु तेनैव चतुरग्निषु।।

जयादींश्च सकृद्धुत्वा ऐन्द्रादीनामथाग्निषु।
एकविंशतिकृत्वस्तु तत्तन्मन्त्रैर्जुहोति च।।

वीशशैषिकयोर्मन्त्रैः शतमष्टोत्तरं यजेत्।
एतेषां मूर्तिमन्त्रैश्च जुहुयात् सकृदग्निषु।।

अ. २९

आज्यमाहृत्य विधिना कापिलेन घृतेन वै।
कपिले चेष्टगव्यं वा आजमाहिषवर्जितम्।।

ततो बिल्वपलाशांश्चापामार्गाश्वत्थमेव च।
औदुम्बरीं शमीं चैव खादिरैश्च घृतेन वै।।

अष्टोत्तरशतं गृह्य होमे प्रति प्रति।
सहस्रं चाष्टसंयुक्तं सभ्याग्नौ सम्प्रकीर्तितम्।।

साग्रं पलाशमाहृत्य समिधश्च घृताप्लुताः।
करसम्पूर्णमादाय समभ्यर्च्य विधानतः।।

तत्काले लोकपालांश्च पूजयेच्च ततोध्मकम्।
षष्टिं शतेति चोक्त्वा तु समिधो समिधोर्चयेत्।।

'अयं ते इध्म' इत्युक्त्वा समिधानां च हूयते।
तदन्ते वैष्णवे हुत्वा मूलहोमं च हूयते।।

स्वाहा व्याहृतिभिर्वापि मूलहोमं च हूयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१७.८ पारमात्मिकहोमः

ज्ञा. ६५ . ११४ , ११५

पौण्डरीके शतं पद्ममाहृत्य कपिलाघृते समाप्लुत्य विष्णुगायत्र्या प्रत्येकं हुत्वा पद्मालाभे बिल्वपत्रेण वा आज्येन विष्णुः सर्वेषां, सुसूक्ष्मः ज्योतिर्वा पारमात्मिकं, ईशो यस्मात् , रायामीशो, यो ब्रह्मशब्दो, यो वा त्रिमूर्तिः यद्वा कृतं, कं कोशं, यं यज्ञैः - यो वा गविष्ठो, यो वा वायुः , त्वमग्ने त्रिगुणः, त्वं जीवस्त्वं, भूमेर्वितन्वन्, मनस्त्वं भूत्वा, त्वं बुद्धिर्भूनां, यः सूक्ष्मान् ता यस्या वा भयात्, यन्त्वां सर्वं यस्त्वं भूत्वा, कामो भूत्वा, अङ्गादङ्गात् , यो मोहयन्, यो द्वादशात्मा, यो ब्रह्मा ब्रह्मविदां, सारस्वतो वा, यो वा परं ज्योतिः, यो दोषो यस्यैताः वाको वा, द्वावेतौ द्वौ वा आयुः, यो वा तेजः , सा सम्पायात्, यो वा संयोगः, सहस्रं वा, स्वातिगा गुप्तयः, सत्यं वा, सत्यो ज्योतिः सत्यं पुण्यं, सत्योद्योगः, कामीमिमां, आरिणी वा, तत्सत्त्वो वा विष्णुः, तद् भूर्भूस्थम् आपो वा, आपः, त्रयी वा कामं, द्वौ वा मुख्यौ, स एकैकः साधारःस्वयमादिः यत् स्वयं सृष्टं, स्वौजसा सर्वं, क्ष्मामेकां, यः कुन्धरमाणो, यो वा पृथां, यां गामुशन्तीं, प्रजापते न त्वत्, यो धूर्धुरं, यो वा व्यहिंसीत् तपोनिधिं, यो वा नृसिंहो, रयिः ककुद्मान्, राकामहं, वेदाहमेतं, दिग्दोषा यस्य, पद्मास्य वक्षो, यः पुण्डरीको, रयीणां पतिं, रायां पतत्रे, यत्सारभूतं, फलो वा एषः, धूर्णो वहन्तां, विश्वं बिभर्षि, सो वा स्वरूपो, भूर्भुवो, वा, दाक्षायण्याम् आशाः समस्ताः यो जङ्गमानां, यो वा दशानां चत्वारो दोषाः, वक्षो वसत्यस्य, अणोरणीयान्, विष्णुर्वरिष्ठः, अब्जो जुषन्तो, मामात्मगुप्तां, यं चिन्तयन्तः, पुण्यां च, पुण्यः, सो नो भूतः, सत्वेव नित्यं या गा वरिष्ठा, वाय्वन्तरात्मा,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वोपरिष्टात्, तमः, सर्वभूतं, ज्योतिर्ज्योतिषां, सत्त्वं सत्त्वात्मकम्, अनिर्भिण्णं, यस्येच्छा, यो वेदादिः, यो वा व्यक्तं यो वा भूतेः, सत्यः सत्यस्थः, ऋतं सत्यम् अं राजिमन्तं, मामात्मगुप्ता' मिति परमात्मिकं देवेशं ध्यायन् जुहुयात्।

स. ३३. ६४ - ६७

जुहुयात् पौण्डरीकाग्ना 'वतो देवादि' वैष्णवम्।।
श्वेताब्जाष्टोत्तरशतं घृतगव्यसमायुतम्।
आप्लुत्याप्लुत्य जुहुयाद् गायत्रीं वैष्णवीं ब्रुवन्।।

रक्ताब्जं बिल्वपत्रं वा श्वेताब्जानामलाभके।
आज्यं तु विष्णुसूक्तेन पुरुषसूक्तेन हूयताम्।।

पारमात्मिकमन्त्रैश्च देवं ध्यायन् जुहोति वै।

क्रि. ७. १४५

पारमात्मिकमब्जाग्नौ वैष्णवं विष्णुसूक्तकम्।
व्याहृत्यन्तं च जुहुयात् अथवा मुनिसत्तमाः।।

वि. ३२ . २३३

पौण्डरीके विष्णुगायत्र्याऽब्जं, बिल्वपत्रं वा घृताक्तम् अष्टाशतं जुहुयात्। विष्णुसूक्तं, ब्राह्मं, 'विष्णुः सर्वेषा' मित्यादि पारमात्मिकं वैष्णवान्तं जुहुयात्।

वा. १४

अथ वक्ष्ये विशेषेण पौण्डरीकाग्निकुण्डके।।

मन्त्रद्रव्यक्रियादीनां सर्वं कृत्वा विचक्षणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सितं रक्तं वा पद्मं च लब्धमानीय चादरात्।।

कापिलेन घृताप्लुत्य सितं रक्तमथापि वा।
अब्जाग्निं तु परिस्तीर्य प्रज्वाल्यैव विचक्षणः।।

अथवा चरुणाज्येन पौरुषेण समन्वितम्।
रुद्रसूक्तं ततो हुत्वा सूक्तं गोदानकैर्युतम् ।।

आत्मसूक्तं यजेच्चैव वैष्णवं सूक्तमेव च।
एवं सूक्तं सकृद्धुत्वा --------------।

प्र. १२. ७३ - ७७

पौण्डरीके तु जुहुयात् पारमात्मिकसंयुतम्।।

रक्ताब्जं बिल्वपत्रं च श्वेताब्जानामसम्भवे।
घृतेनाप्लुत्य जुहुयात् विष्णुगायत्रिया बुधः।।

समिदाज्यं चरुर्लाजाः सर्षपाश्च यवास्तथा।
तिलं तिल्वं तथा मुद्गाः माषाः सक्तुर्गुडं तथा।।

मध्वपूपा दधि क्षीरं होमद्रव्यमितीरितम्।
एतैः सप्तदशद्रव्यैः वैष्णवं जुहुयाद्बुधः।।

जुह्वा चैवोपजुह्वा च विष्णुसूक्तं सुहूयताम्।

अ. २९

पौण्डरीकं च हुत्वा तु श्वेतपद्मदलेन वै।।

अष्टोत्तरशतेनैव घृताक्तेनैव हूयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैष्णवं चैव हुत्वा तु पर्यायाष्टदशेन तु।।

व्याहृत्यन्तं च हुत्वा तु पूर्वोक्तसमिदाहुतिः।
लाजापूपं चरुं सक्तु तिलमाषाज्यमिश्रकम्।।

वैष्णवं चैव हुत्वा तु 'श्रियै जाते' ति हूयते।
महाव्याहृतिभिर्हुत्वा व्याहृत्यन्तं सुहूयते।।

५.१७.९ सर्वदैवत्यहोमः

स. ३३. १२ - ५५

चिरायुषं यमित्युक्त्वा पुण्यौघेति समुच्चरन्।
पद्मापित्र इतीत्युक्त्वा भृगवे मुनये इति।।

ब्रह्म जज्ञानं हिरण्यगर्भ इति द्वौ ब्रह्मणः स्मृतौ।
रुद्रमन्यं त्रियम्बकमिति रौद्रं प्रकीर्तितम्।।

द्यावापृथिव्यो यस्याः श्री तस्थुषो धृत्य इत्यपि।
य एष वितत्य विश्वं योनोभिद्वारदेवताः।।

मुनीन्द्र ब्रह्मन्नित्याय सन्ध्यायै इति वै ब्रुवन्।
तथा च तापसायेति वैखानसायाच्युतेति च।।

किष्किन्धाय च इत्युक्त्वा तथा तीर्थाय वै पृथक्।
एतान् वै द्वारपालांश्च जुहुयात् तदनुक्रमात्।।

त्रातारमिन्द्रमित्याद्या ऐन्द्रमन्त्रांस्त्रयोदश।
अग्निर्मूर्धायमग्निश्च मन्त्रावग्नेरिति स्मृतौ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यमो दाधार नमस्तेति मन्त्रौ याम्यौ प्रकीर्तितौ।
वसवः सहस्राक्षेति मन्त्रौ द्वौ नैर्ऋतौ मतौ।।

ये ते शतमुदुत्तममयाश्चाग्नेति च क्रमात्।
आपः स्रजन्तु चत्वारो वारुणाः सम्प्रकीर्तिताः।।

मरुतः परमात्मेति मारुतौ मिश्रवाससः।
एतौ च मन्त्रौ कौबेरौ तौ च सौम्यौ प्रकीर्तितौ।।

ईशानेति च ईशेति द्वावेतावीशदेवतौ।
उदुत्यं जातवेदेति चित्रं देवेति भास्करौ।।

ममाग्नेत्यहमग्नेति अग्न आयाहि वीतये।
इति त्रयः क्रमादुक्ताः मन्त्रा अङ्गारकस्य वै।।

प्रभुर्देवो ग्रहाधिप इति शानैश्चराविमौ।
बृहस्पतिर्देवानां बृहस्पतिः सोममित्यपि।।

बृहस्पते अतियदुपयाम गृहीतेति च ।
बार्हस्पत्यास्तु चत्वारो मन्त्रा एते समीरिताः।।

श्रविष्ठजो य तद्विष्णोस्तद्विप्रास इति त्रयः।
बुधस्य मन्त्राः सम्प्रोक्ताः क्रमान्मन्त्रविशारदैः।।

प्रजापते सुभूः स्वयंभूरिति शौक्रौ मतावुभौ।
भूभामिनीष्टगामिनीति गाङ्ग्यौ सम्प्रकीर्तितौ।।

सोमयास्तेम यातेति सौम्यौ मन्त्रावुभौ मतौ।
रुद्रमन्यं त्रियम्बकमिति रौद्रौ प्रकीर्तितौ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जगद्भुवं जगद्भुवो सुब्रह्मण्य इति क्रमात्।
सुब्रह्मण्यो रुद्रभुवो जगद्भुव इति क्रमात्।।

जगद्भुवो यो यजद्भुवः कौमाराः षडिमे मताः।
अतो देवा इदं विष्णुरिति ज्ञेयौ तु पौरुषौ।।

या ब्रह्मचारिणी सा चारु महाकाल्याः प्रकीर्तितौ।
एषामराणां याम्येति ज्येष्ठामन्त्रौ मतावुभौ ।।

जातवेदस इत्याद्याः दुर्गामन्त्राः षडीरिताः।
नन्दिन्यापो विवेशेति नन्दिन्यौ सम्प्रकीर्तितौ।।

शाखाभूतेति च ततो देवी प्रवाहिनीति च।
मन्त्राविमौ तु ग्रान्थिन्यौ मन्त्रविद्भिरुदाहृतौ।।

बिसिनीभूता प्रविद्युता शाखिन्यास्तु मतावुभौ।
गङ्गा वाणी च विद्यां नो प्रवाहिण्याः प्रकीर्तितौ।।

माताह्वयामहं चेति विकारिण्याः प्रकीर्तितौ।
ययासतः प्रसविण्येति दद्रुण्याः सम्प्रकीर्तितौ।।

याम्यो या मानसेत्येतौ गङ्गावाण्योः प्रकीर्तितौ।
यतस्स्वमासीदस्मेति भार्गवौ सम्प्रकीर्तितौ।।

कस्याङ्गिरा विस्मापयती मारीचमन्त्रकौ।
व्यावर्तते यो सस्मार इति द्वौ पौलहौ स्मृतौ।।

य एषोऽदान आनन्दरो पौलस्त्यौ सम्प्रकीर्तितौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रप्रायशो ये निष्यन्ता क्रतोरित्यनुभाषितौ।।

यो नो वसिष्ठः सप्तेति वासिष्ठौ सम्प्रकीर्तितौ।
य आनसूये य एष इत्यात्रेयौ सम्प्रकीर्तितौ।।

स एको भूर्यस्त्रैष्टुभश्चेत्याकाशस्य प्रकीर्तितौ।
प्रक्रम्या यो मातरिश्वा मन्त्रौ तौ वायवौ मतौ।।

वृषाकपेरोजोभीति वैतिहोत्रौ मतावुभौ।
आपो विश्वं चातुर्यं च तोयमन्त्रौ प्रकीर्तितौ।।

तया आदित्या तत्रीणि महीमन्त्रौ प्रकीर्तितौ।
पावका नः महोर्णेति मन्त्रौ सारस्वतावुभौ।।

शंसानि यच्छद्भूय आत्मेति लक्ष्म्याः प्रकीर्तितौ।
य उत्तमोऽग्रेः पथा यं न्यक्षमन्त्राविती‌रितौ।।

यमर्पयन्ति यः संहरेति वैवस्वताविमौ।
ऋचामधीशो नीतं धृतमिति मैत्राविति स्मृतौ।।

येनेष्टेर समूह्येति मन्त्रौ क्षत्तुश्च संस्मृतौ।
चरुं पचेच्छुल्यां च शैलूषस्य स्मृतावुभौ।।

चतुर्मुखी या लोकेति ब्राह्मया देव्याः प्रकीर्तितौ।
त्रिणेत्रधारी चिह्नेति गणेश्वर्याः प्रकीर्तितौ।

ज्वालामाला च बालेति कौमार्याः सम्प्रकीर्तितौ।।
युगे युगे सर्वरमा वैष्णव्याः संमतावुभौ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्पेष्वन्तेष्विति तथा वाराह्यस्तौ प्रभाषितौ।
सा सर्वदेवमालेति तथेन्द्राण्याः प्रकीर्तितौ।।

चण्डीहरीति मोहीति द्वौ तु काल्याः प्रकीर्तितौ।
धातास्य विश्वफुल्लेति पुष्परक्षकदैवतौ।।

विश्वान् बले सौर्य इति बलिरक्षकदैवतौ।
आग्नेय प्रैषाम इति वैष्वक्सेनौ तु कीर्तितौ।।

शतधारं कदापीति गारुडौ च प्रकीर्तितौ।
धर्मोघमादौ योगन्धर इति वैनायकौ मतौ।।

यमर्पयन्ति शं नोनि शेषस्य परिकीर्तितौ।
भूमाननोऽग्रे वन्ध्योन इति सौदर्शनौ स्मृतौ।।

आसाग्र ओजो बलेति ध्वाजौ तौ परिभाषितौ।
तन्मा यशोऽग्र अस्मादुप इति शाङ्गौ स्मृताविमौ।।

भूतानां भूतो भूतेति मन्त्रौ यूथाधिपस्य तु।
अक्षहन्तेति ये भूता विष्णुभूताधिदैवतौ।।

सर्वेषां जुहुयादेतैर्मन्त्रैः परिषदां क्रमात्।
हूयतां मूर्तिमन्त्रैश्च मन्त्रौ यस्य न विद्यते।।

वैष्णवैर्विष्णुसूक्तेन मिन्दाहुत्या तथैव च।
विच्छिन्नाहुतयश्चापि महाव्याहृतिभिस्तथा।।

नारायणाय विद्मेति हुत्वा षड्वैष्णवैरपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतैर्मन्त्रैश्च जुहुयात् प्रत्येकं तु यथाक्रमम्।।

ज्ञा. ६६ . ११६ - ११८ ; क्रि. ७ . १५१ - १५३ ; वा. १३

वि. ३२ . २३० - २३२

' श्रिये जाता, हिरण्यवर्णा ' मिति श्रियै ; ' मेदिनी देवी, भूमिर्भूम्ने'ति मह्यै ; ' ब्रह्म जज्ञानं हिरण्यगर्भम् ' इति ब्रह्मणे ; ' रुद्रमन्यं त्र्यम्बक ' मिति रुद्राय ; ' चिरायुषाय पुण्यौघनिष्ठाये' ति मार्कण्डेयाय; ' पद्मापित्रे भृगव' इति भृगवे ; ' द्यावापृथिव्योः, यस्याः श्रिया तस्थुषो धृत्या, य एष बिभ्रति, वितत्य विश्वः यो नोऽभिरक्षती' ति षट् च द्वारदेवतायाः ; 'मुनीन्द्र ' मिति मणिकाय ; ' सन्ध्याये' ति सन्ध्यायै 'तापस' मिति तापसाय ; 'वैखानसाये' ति विखनसे; ' किष्किन्धाय तीर्थाय' इति तीर्थाय ; 'त्रातारमिन्द्रं, महाँ इन्द्रः, महाँ इन्द्रो नृवत्, भुवस्त्वम्, एन्द्रसानसिं, प्रससाहिषम्, अस्माकम्, इन्द्रो भूतस्य, इन्द्रो द्यौः, इन्द्रं प्रणवन्तम्, इन्द्रो वृत्रम्, इन्द्रो बभूवुः , इन्द्रोऽस्माक ' मिति त्रयोदश इन्द्राय ; ' अग्निर्मूर्धा, अयमग्नि' रित्यग्नये; 'यमो दाधार, नमस्ते निर्ऋते' इति द्वौ याम्यौ ; 'वसवः प्रथम, सहस्राक्ष' इति निर्ऋतये; ' ये ते शतं वरुणः, उदुत्तमम्, अयाश्चाग्ने, आपः सृजन्तु स्निग्धानी'ति चत्वारो वरुणाय; 'मरुतः परमात्मा, मरुतो गणाना' मिति वायवे; ' मिश्रवासस, एतान् घ्नतैता ' निति द्वौ कुबेराय; ' ईशानः, ईश ईशते ' इति द्वावीशानाय; 'उदुत्यं चित्र ' मित्यादित्याय; 'ममाग्ने, अहमग्ने, अग्न आयाही' ति त्रयो भौमाय; 'प्रभुर्देवो गृहाधिपति 'रिति शनैश्चराय; 'बृहस्पतिर्देवानां, बृहस्पतिः सोमो, बृहस्पतेऽतियत्, उपयाम गृहीत' इति चत्वारो बृहस्पतये; 'श्रविष्ठजो यः, तद्विष्णोः परमं, तद्विप्रास' इति (त्रयः) बुधाय; 'प्रजापते न त्वत्, सुभूः स्वयंभूः' इति द्वौ शुक्राय; 'भूगामिनी,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इष्टगामिनी ’ ति द्वौ गङ्गायै; ‘ सोमयास्ते, या ते धामानी’ ति चन्द्राय ; ‘रुद्रमन्यं त्रियम्बक ’ मिति द्वौ रुद्राय ; ‘जगद्भुवं, जगद्भुवोऽधिपतिः, सुब्रह्मण्यो, रुद्रभुवो जगद्भवो यायज’ इति षट् कुमाराय; ‘ अतो देवा, इदं विष्णु’ रिति द्वौ पुरुषाय ; ‘ या ब्रह्मचारिणी, सा चारुजन्मनी ’ ति द्वौ धात्र्यै; ‘येषामराणां याम्ये ’ ति द्वौ ज्येष्ठायै; ‘ जातवेदसे, तामग्निवर्णाम्, अग्रे त्वं पारया, विश्वानि नो, पृतनाजितं, प्रत्नोषिक’ मिति षट् दुर्गायै; ‘नन्दिन्यामूल, आपो विवेश, शाखाभूत, देवी प्रवाहिनी, बिसिनीभूता, प्रविद्युता, गङ्गावाणी, विद्यां नो, माता ह्यमेया, आयामहं त्वां, ययासतीः सत्यं, प्रसव्यनंगे, याम्यो हि यो मानसा’ इति चतुर्दशमन्त्रान् रोहिणीभ्यः ; यतस्त्वमासीत्, तस्मादस्मा’ दिति भृगवे; ‘कस्याङ्गिरोऽभूत्, विस्मापयती ’ ति मरीचये ; ‘व्यावर्धते यो सस्मारे ’ ति पुलहाय; ‘ य एषोदानम्, आनन्दरोद’ इति पुलस्त्याय; ‘प्रप्रायशो, पेनिष्पंता’ इति क्रतवे; ‘यो नो वसिष्ठः सप्तोत्तमा’ इति वसिष्ठाय; ‘ य आनसूयेशः, य एष विभूद्यः’ इत्यत्रये; ‘ स एकोऽभूत्, यत् त्रैष्टुभश्चे’ त्याकाशाय; ‘प्रक्रम्या, यो मातरिश्वे’ ति वायवे; ‘वृषारतोऽजोऽभिमानी ’ त्यग्नये ; ‘ आपो विश्वं, चातुर्य’ मिति तोयाय; ‘ तयादित्या, तन्त्रोण्येषे’ ति पृथिव्यै; ‘पावकानो, महोऽर्ण’ इति सरस्वत्यै; ‘ शंसानि यच्छ, भूयाम’ इति श्रियै; ‘ य उत्तमः, अग्रेः पन्थाय’ मिति न्यक्षाय; ‘यमर्पयन्ति, यः संहरती ’ ति विवस्वते; ‘ऋचामधीशो, नीतिं धृत’ मिति मित्राय; ‘येनायुष्टे, समूह्यतेऽम्बे’ ति महीधराय;‘ चरुं पचेद्यश्चुल्यां ही ’ ति हवीरक्षकाय; ‘चतुर्मुखी, या लोके ’ ति ब्रह्माण्यै;‘ त्रिणेत्रधारी चिह्नं चे’ ति गणेश्वर्यै; ‘ज्वालामाला बालान् हरी ’ ति षण्मुख्यै; ‘युगे युगे सर्व रमे’ ति वैष्णव्यै ; कल्पेषु अन्तेष्वि ’ ति वाराह्यै; ‘ सा सर्वदेवेषु, मालाधरी’ ति इन्द्राण्यै ; ‘चण्डी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मोही ’ ति काल्यै; ‘धातास्य फुल्लानी ’ति पुष्परक्षकाय; ‘विश्वान् बले, सौरी ’ति बलिरक्षकाय; ‘आग्रेयी, प्रेक्षामधीश’ इति विष्वक्सेनाय; ‘शतधारं कदा विसृजते’ ति गरुडाय;‘धर्मोघमादौ, योगन्धर’ न्निति विघ्नाय; ‘यमर्पयन्ति, शन्न’ इत्यनन्ताय;‘भूमाननोऽग्रे, वन्ध्यान’ इति सुदर्शनाय; ‘आसाग्र ओजोबलाये’ ति ध्वजाय; ‘तं मा यशोग्रे, अस्मादुपास्य’ इति शङ्खाय; ‘भूतानां भूतो भूतेष्वि ’ति महाभूताय ; ‘अक्षहां तु ये, भूता’ इति विष्णुभूताय, हुत्वा व्याहृतीर्जुहोति। यस्य देवस्य स्वको मन्त्रो न विद्यते तस्य नाममन्त्रं वैष्णवान्तं जुहोति।

खि. १७ . २२९ - २७८

य. २८ . २७ - २९

‘ब्रह्म जज्ञान’ मित्यादि ‘ये भूते’ त्यवसानकम्।
खिलोक्तं जुहुयान्मन्त्रान् सर्वदैवत्यमेव च।।

अथवा तद्विमानोक्तनवमार्गस्थपार्षदान्।
मन्त्रांस्तान् जुहुयान्मन्त्री घृतेन विधिना क्रमात्।।

वैष्णवैर्मूर्तिभिश्चात्र मन्त्रो यस्य न विद्यते।
जुहुयात् तस्य तस्यैव नारायणमनुस्मरन्।।

क्रि. ७ . १४० - १४२ , १७० -१७२

यजेच्च सर्वदैवत्यं व्याहृत्यन्तं पृथक् पृथक्।
अथवा नवधा मार्गे यन्मार्गमवलम्बते।।

तन्मार्गे परिषद्देवान् आवाह्य परितोऽर्चयेत्।
विनैव सर्वदैवत्यं तत्तन्मन्त्रैस्तथा यजेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहुयात् पौरुषं सूक्तं विष्णुसूक्तमतः परम्।
यद्देवाद्यैस्ततो हुत्वा वैष्णवं च सुहूयताम्।।

सभ्ये तु सर्वदैवत्यं हुत्वा वै वैष्णवं यजेत्।
विष्णुसूक्तं च जुहुयात् मिन्दाहुतिसमन्वितम्।।
'आश्राविता' दिमन्त्रैश्च जुहुयादिति काश्यपः।
सभ्याग्निहोममाचार्यः स्वयमेव समाचरेत्।।
(अन्यथा जुहुयाच्चेत्तु सर्वमाशु विनश्यति)।
नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं[1] नयेत् बुधः।।

अ. २९

सभ्यं चैव ततो हुत्वा सर्वदेवाहुतीर्भवेत्।
ऐन्द्रादीशानपर्यन्तं तद्दैवत्यं सुहूयते।।

सप्तत्येकोत्तरं देवम् उत्तराग्नौ सुहूयते।
नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं नयेत् क्रमात्।।

५.१७.१० अष्टाशीतिहोमः

वा. १४

अथ वक्ष्ये विशेषेण अष्टाशीतिक्रमं त्वहम्।
आद्यन्तं प्रतिमन्त्रेण स्मृत्वा देवं द्विजोत्तमाः।।
आदावन्ते सकृद्धुत्वा व्याहृतीरिति केचन।

1. प्रतिष्ठादिनात् पूर्वरात्रिम् (शयनाधिवासरात्रिशेषम्)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विष्णवे, विष्णवे स्वस्तिदाय, विष्णवे सर्वंधराय च। विष्णवे सर्वगोप्त्रे च विष्णवे सर्वात्मनेऽपि च। विष्णवे सर्वदेवात्मने विष्णवे सर्ववेदात्मने विष्णवे मुनीनामन्तरात्मने। विष्णवे योगसन्धारणाय। विष्णवे सर्वप्रतिष्ठाय च।

एतैश्च दशभिर्हुत्वा देवदेवमनुस्मरन्।।

नारायणाय, नारायणात्मने, नारायणाय सर्वदेवात्मने, नारायणायेन्द्ररूपाय, नारायणाय संयमनाधिपतये, नारायणाय सम्भोगाधिपतये, नारायणाय सर्वतृप्तिप्रदाय, नारायणायानन्तात्मने, नारायणाय ब्रह्मेशात्मने, नारायणाय प्रजापतये, नारायणायानन्तशयनाय।

एवमेकादशैर्हुत्वा देवमानम्य मन्त्रवित्।

पुण्यनारायणाय, त्रिदशाधिपतये, पुण्यनारायणाय वटपत्रशायिने। पुण्यनारायणाय वटाक्षवासिने, पुण्यनारायणाय पादार्चिषे। पुण्यनारायणाय बालरूपिणे, पुण्यनारायणाय मायारूपिणे, पुण्यनारायणाय प्रबोधिने, पुण्यनारायणाय सर्वाधिष्ठानाय। पुण्यनारायणाय सर्वप्रहरणाय। पुण्यनारायणाय मूर्ध्निस्थानाय। एवं दशभिर्मन्त्रैर्हुत्वा सम्यग्ध्यानपरायणः।

बालाय, बालाय वटपत्रशायिने -एवं मन्त्रद्वयं हुत्वा केशवं मनसा स्मरन्। सत्याय, सत्यनिष्ठाय, सत्यात्मने, सत्यनित्याय, सर्वे त्वं हि सत्ये सत्यं प्रतिष्ठिताय, सत्याय सर्वलोकप्रवर्तिने, सत्यात्मदेवाय, सत्यमोदाय, सत्यसोपानाय, त्वं हि सत्यं सत्यात्मन् , सत्यनिष्ठोद्भवाय, एतैश्च दशभिर्हुत्वा देवदेवं जानार्दनम्।

पुरुषाय पुरुषसंस्तुताय, पुरुषसमधीताय, पुरुषनिष्ठाय, पुरुषात्मने, पुरुषपुरुषाय, पुरुषाय जगन्मित्राय, पुरुषाय जगदाधाराय, पुरुषाय जगत्प्रवर्तिने, पुरुषाय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जगद्धेतवे, एवं हुत्वा दशभिश्च स्मृत्वा देवं जगद्गुरुम्। विष्णुक्रीडात्मने, भूमिसङ्क्रीडात्मने, जगन्मोदाय, जगद्धिताय, निखुर्यपाय, काय, कस्मै, कतमस्मै, सर्वस्मै, विष्णवे, विष्णवे मन्त्रसन्द्दहणाय, ध्रुवरूपिणे, संवृतात्मने, सम्प्रीतिकरा, सर्वशुभप्रदाय, अशुभनाशाय, शुभसम्बर्हणय।

एवं सप्तदशैर्मन्त्रैः अच्युतं मनसा स्मरन्।

पुण्याय, पुण्याय बलोर्जिताय, पुण्याय जयसमृद्धाय, पुण्याय कामानन्दजननाय, पुण्याय सर्वानन्दाय, पुण्याय समृद्धाय, पुण्याय श्रीनिधानाय, पुण्याय ब्रह्मसन्द्रहणाय, पुण्याय वरस्थानाय, पुण्याय लोकसम्भावनाय, पुण्यायाद्भुताय, पुण्यायानादिनिधनाय, पुण्यायामितमहिम्रे, पुण्यायात्यन्तहिताय, पुण्याय सर्वप्रतिष्ठाय, पुण्याय सर्वलोकप्रतिष्ठाय, पुण्याय सर्वलोकशुभावहाय, पुण्याय सर्वात्मने

एवमष्टादशैर्मन्त्रैः जुहुयाद्देशिकोत्तमः।
एवमेव क्रमेणैव अष्टाशीतिक्रमं स्मृतम्।।

५.१७.११ महाशान्तिहोमः

खि. १७ . १८६ - १९३ , २८७ - २९३

---- पौण्डरीके महाशान्तिरथोच्यते।।

सर्वदोषोपशमनी सर्वकर्मसमृद्धिदा।
दधि क्षीरं च लाजांश्च कापिलं च घृतं तथा।।

समभागान् सुसङ्गृह्य हुनेत् पद्मानले गुरुः।
वैष्णवं विष्णुसूक्तं च पौरुषं सूक्तमेव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निहोत्रहवण्या तु जुहुयात् पुरुषं स्मरन्।
सर्वान् कामानवाप्यैव सायुज्यं प्राप्नुयान्नरः।।

इन्द्रादीशानपर्यन्तमालयं परितः स्थितान्।
ध्वात्वा दिग़ीशान् मनसा तत्तन्मन्त्रैः पृथक् पृथक्।।

व्याहृत्यन्तं तु जुहुयात् प्रत्येकं विंशतिं गुरुः।
सभ्याध्वर्युस्तु तत्काले परिषिच्य च पावकम्।।

पञ्च वारुणमन्त्रांश्च चित्तादींश्च यथाक्रमम्।
अभ्यातानान् राष्ट्रभृतः यद्देवादीन् विशेषतः।।

जुहुयाद्विधिवत् सर्वान् व्याहृत्यन्तं पृथक् पृथक्।

यज्ञशालां ततो गत्वा देवेशं सम्प्रणम्य च ।।
पश्चादब्जाग्निमासाद्य परिषिच्य च पावकम्।
श्वेताब्जानां शतं गृह्य कापिलेन घृतेन वै।।

आप्लुत्य विष्णुगायत्र्या जुहुयात् भक्तिसंयुतः।
रक्ताब्जं बिल्वपत्रं च पूर्ववज्जुहुयाद्बुधः।।

हुत्वा पुरुषसूक्तेन वैष्णवं जुहुयात्ततः।
'यद्देवादीन्' ततो हुत्वा ब्राह्ममैन्द्रं च वारुणम्।।

रात्रिसूक्तं ततो हुत्वा विश्वजित्सूक्तमेव च ।
सारस्वतं च जुहुयान्महाशान्तिरियं भवेत्।।

एवं हुनेत् महाशान्तिं समस्तदुरितापहम्।
सर्वदोषोपशमनं सर्वकामसमृद्धिदम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वद्रव्यैश्च सम्पूर्णा सा क्रिया सुक्रिया भवेत्।

क्रि. ८ . ३४ - ३६

वा. १४

-------------- महाशान्तिरिहोच्यते।

अथवा चेद्विशेषेण होतव्यं मन्त्रपारगाः।।

अपूपसक्तुलाजैश्च तिलचूर्णैः सहैव तु।
आज्येनाप्लुत्य मन्त्रज्ञः प्रत्यग्निं च जुहोति वै।।

वैष्णवं विष्णुसूक्तं च पौरुषेण समन्वितम्।
महाशान्तिरितीत्युक्ता समस्तदुरितापहम्।।

५.१७.१२ परिवारहोमः

ज्ञा. ६५ . ११५

इन्द्रादीनां होमेषु तत्तन्मन्त्रानेकविंशतिकृत्वो वीशशैषिकयोर्मन्त्रान् अष्टोत्तरशतं सकृदेषां मूर्तिमन्त्रैश्च जुहुयात्।

वि. ३२ . २३४

परिवाराणां तत्तद्धोमेषु तत्तन्मन्त्रं वैष्णवं द्वादशाष्टचतुःपर्यायतो जुहोति।

स. ३३ . ६७, ६८

इन्द्रादीनां च होमेषु तत्तन्मन्त्रैः पृथक् पृथक्।।

आज्यं विंशतिकृत्वश्च स्रुवेण जुहुयात् क्रमात्।
तेषां सर्वेषु होमेषु यजेयुर्वैष्णवैः पुनः।।

क्रि. ७ . १६१, १६२ ; य. २८ . ३६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१७.१३ परिवारहोमस्य उत्तमादिभेदेन त्रैविध्यम्

स. २९ . ७७ - ८०

दिग्देवानां च होमस्तु दिशाहोम इतीर्यते।।

सर्वेषां परिवाराणां प्रत्येकं होममुत्तमम्।
दिग्देवतानामष्टानां होमं वै मध्यमं विदुः।।

देवस्य पौण्डरीकाग्निं पञ्चाग्नीनपि कल्पयेत्।
अधमक्रममेनं वै वदन्ति मुनयोऽपरे ।।

विष्वक्सेनस्य वीशस्य होमं सर्वत्र कारयेत्।
एतद्रहस्यमस्मभ्यमुदितं विखनसा पुरा।।

वि. ३२ . २२७

एवं कृत्वा पश्चात् सर्वेषां परिवाराणामालयं परितो होममाचरेत्। अथ वा श्रीभूम्योः ब्रह्मेशानयोर्भृगुमार्कण्डेययोर्वीशशेषयोर्होममधमम्, विमान-पालानामिन्द्रादिलोकपालानामादित्यशेषयोर्होमं मध्यमम्, द्वारपालानां चक्रध्वजशङ्खमहाभूतपाकोर्जुनानां होममुत्तममित्येके।

५.१७.१४ अन्तहोमः

वि. ३२ . २३५

सभ्याग्निं पौण्डरीकाग्निं च विना सर्वेष्वग्निषु अन्तहोमं हुत्वा अग्नीन् विसृज्य नृत्तगेयवाद्यैश्च रात्रिशेषं व्यपोहयेत्।

स. ३३ . ६९ - ७१ ; खि. १७ . २८१ ; प्र. १२ . ७७, ७८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१७.१५ वसोर्धाराहोमः

वा. १५

पश्चात् सभ्यं परिस्तीर्य वसोर्धारां समाचरेत्।
स्रुवं गृहीत्वा हस्तेन पूर्वोक्ताज्यं प्रगृह्य च ।।

स्रुवेण स्रावयेद्विद्वान् अविच्छिन्नं समाचरेत्।
विष्णुसूक्तं समुच्चार्य पुरुषसूक्तमतः परम्।।

श्रीसूक्तं भूमिदैवत्यम् 'अतो देवा' दि वैष्णवम्।
एकाक्षरादिसूक्तं च विष्णुगायत्रिया युतम्।।

एतैश्च सप्तभिः सूक्तैः चतुरावर्त्य हूयताम्।
एवं कर्तुमशक्तश्चेत् सकृद्वा तत्र कारयेत्।।

एवमेव क्रमेणैव रात्रिशेषं व्यपोह्य च।

५.१७.१६ दक्षिणादानम्

वि. ३३ . २३७ , २३८

[1]तस्माच्छक्तिं न वञ्चयेत्। अज्ञानात् अर्थलोभाद्वा शक्तिवञ्चने कृते ते पदार्थिन एव तत्फलमाप्नुयुः, यजमानो रौरवमायाति। --------------- यज्ञस्य दक्षिणा जीवो भवेत्, अल्पदक्षिणायागो यजमानं भ्रूणहत्यां प्रापयति इत्येके। तस्मादवश्यं दक्षिणादानं यथोक्तं कुर्यात्, द्रव्यहीने तद्ग्राम-यजमानस्यापि द्रव्यहानिः, क्रियाहीने पुण्यक्रियाहानिः, मन्त्रहीने

1 शक्तिवञ्चने कृते अनिष्टापत्तेः _

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाध्यायायुष्यहानिः, श्रद्धाभक्तिहीने सर्वहानिर्भवति। तस्मात् शास्त्रं संलक्ष्य यथाविधि समाचरेत्।

ज्ञा.६७ . ११९ ; खि. १७ . ३३५ - ३३८

प्र. १२ . ८८ , ८९

स. ३५ . १३ - १८

यज्ञस्य दक्षिणा जीवः फलवन्तं विदुर्बुधाः।
विष्णुयागो द्विजातीनां विशिष्ट इति कथ्यते।।

तस्मात्तु विष्णुयागस्य यजमानो भवेद्बुधः।
तत्काले दक्षिणां दत्वा भूषणैरपि भूषयेत्।।

कटकाङ्गुलिकाद्यैश्च वस्त्रैर्वा स्वस्वशक्तितः।
आचार्यं पूजयित्वैव यजमानश्च देववत्।।

नत्वा तमनुमान्यैव शेषं कर्म समाचरेत्।
समर्थश्चोत्तमं कर्तुं न कुर्यान्मध्यमाधमौ।।

यदि कुर्यात्फलं तस्य न लभेत न संशयः।
अधमश्चोत्तमो यः स्यादशक्तश्चाधमेऽपि तत्।।

फलं भवत्यसन्देहस्तस्माच्छक्तिं न वञ्चयेत्।
यज्ञकर्मणि मूढात्मा दक्षिणां न ददेद्यदि।।

तेषां पदार्थिनामेव तत्फलं स्यान्न संशयः।
हन्त्यल्पदक्षिणो यज्ञो यजमानं विशेषतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ. २२

आचार्यं पूजयेत्तत्र वस्त्रं चैवोत्तरीयकम्।
हारकुण्डलसंयुक्तं सौवर्णं चोपवीतकम्।।

हेमपुष्पाङ्गुलीयं च वलयं हस्त एव च।
शुक्लगन्धानुलेपं च शुक्लमाल्यैरलङ्कृतम्।।

उष्णीवं चोतरीयं च पादौ प्रक्षाल्य चाचमेत्।
सशिष्यं पूजयेत्तत्र हेमपुष्पाङ्गुलीयकैः।।

वस्त्रं चैवोत्तरीयं तु गन्धैर्माल्यैरलङ्कृतम्।
दैवज्ञं पूजयेत्पश्चात् वस्त्राभरणकुण्डलैः।।

गन्धैर्माल्यैरलङ्कृत्य ------------।

य. २९ . ६ - ११

यागशालां प्रविश्याथ देवदेवस्य सन्निधौ।
यजमान ऋत्विजां चैव यथोक्तं दक्षिणां ददेत्।।

कटकाङ्गुलीयकाद्यैश्च वस्त्रैश्च विविधैरपि।
आचार्यं पूजयित्वैव यजमानोऽथ दैववत्।।

दशनिष्कं च वा दद्यात्सोदकं देवसन्निधौ।
देवपादस्पृशो भूत्वा जपेयुर्ध्यानतत्पराः।।

श्रीसूक्तं च जपेत्पश्चात् तत्तत्पादावनुस्पृशन्।
देवस्य दक्षिणे पार्श्वे चोदङ्मुखमतः परम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अल्पदक्षिणयागस्तद्यजमानस्य नाशनम्।
तस्माद्यथोक्तं दद्यात्तं पूजयोद्विधिचोदितम्।।

दैवज्ञान् वैष्णवानन्यान् वेदाध्ययनपण्डितान्।
सर्वानन्यान् विशेषेण पूजयेत्स्वबलार्हकम्।।

ज्ञा. ६७ . ११९

तत्काले यजमानोऽभिवन्द्य गुरुं स्थापकांश्च वस्त्रोत्तरीयाभरणादिभिरलङ्कृत्य एतेभ्यश्च अध्वर्युप्रभृतिभ्यः सर्वेभ्यः श्रद्धाभक्तियुतो यत्नेन सोदकं दक्षिणां दद्यात्। सुवर्णमेकविंशतिनिष्कं गुरवे स्थापकेभ्यः प्रत्येकं पादाधिकं पञ्चनिष्कं सभ्याग्नेरध्वर्यवे होत्रे पौण्डरीकाग्नेरध्वर्यवे च प्रत्येकमेकैकशः पञ्चनिष्कमाहवनीयादीनां चतुर्णाम् अध्वर्युभ्यः प्रत्येकं त्रिनिष्कं परिवारदेवानाम् अध्वर्यूणाम् अन्येषां च पृथक् पृथक् पादाधिकनिष्कमित्येवम्।

प्र. १२ . ८४ - ८७

[अत्र गुरवे दक्षिणा सपादनवनिष्कम् स्थापकादीनां पञ्चनिष्कम् इति विशेषः।]

वा. १५

५.१७.१७ ऋत्विगादीनां दक्षिणाविभागप्रकारः

वि. ३३. २३७

यजमानो गुरुमभिवन्द्य अनुज्ञाप्य वस्त्रोत्तरीयोष्णीषाभरणैः गन्धमाल्यैश्च अभिपूज्य देवसन्निधौ सोदकं सुवर्णं दद्यात्।

राजा चेत्, चतुष्षष्टिनिष्कं गुरवे, ग्रामश्चेत्, अष्टचत्वारिंशत्, इतरे त्वाढ्या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकविंशतिनिष्कं दद्युः । -------------- स्थापकानां सभ्याध्वर्योर्होतुः पौण्डरीकाध्वर्योश्च आचार्यदक्षिणाचतुर्थांशं, तदर्धम् आहवनीयाध्वर्यूणां, तदर्धम् अन्यपदार्थिनां च दद्यात्।

खि. १७ . १०४ - १०८

यजमानो गुरुं चापि ऋत्विजश्चापि पूजयेत्।।

प्रत्येकं वस्त्रयुग्मेन तथा पञ्चाङ्गभूषणैः।
सुवर्णपशुभूम्यादीन् गुरवे दक्षिणां ददेत्।।

राजा दद्यात्तु गुरवे दक्षिणां विंशतिं शतम्।
ग्रामश्चेत्पादहीनं तु दद्यादाचार्यदक्षिणाम्।।

इतरे दद्युरधमं निष्काणामेकविंशतिम्।
पादाधिकं पञ्चनिष्कं स्थापकानां पृथक् पृथक्।।

अन्येषामृत्विजां दद्यात् निष्कत्रयपथा पृथक्।

स. ३५ . १ - १२

तत् काले यजमानश्च श्रद्धया देवसन्निधौ।
यथोक्तमाचार्यादिभ्यो दक्षिणां सोदकां ददेत्।।

त्रिविधा दक्षिणा प्रोक्ता चोत्तमा मध्यमाधमा।
दातव्या पशुभूमिभ्यामाचार्यायोक्तदक्षिणा।।

सुवर्णस्य चतुः षष्टिनिष्कं दद्याच्च सोदकम्।
आचार्यदक्षिणा प्रोक्ता सोत्तमेति मनीषिभिः।।

द्विचत्वारिंशनिष्कं तु रुक्मं मध्यमदक्षिणा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकविंशतिनिष्कं तु रुक्मं चाधमदक्षिणा।।

दक्षिणां दापयेत्तत्र ग्रामं च नगराणि च ।
वदन्ति केचिद्दृषयोप्यन्यमार्गेण दक्षिणाम्।।

त्रिंशन्निष्कं चोत्तमं स्यान्मध्यमं विंशकं भवेत्।
अधमं दशनिष्कं स्यादाचार्याय समर्पयेत्।।

आचार्यदक्षिणायास्तु चतुर्भागा तु या मता।।

स्थापकेभ्यश्च सा देया दक्षिणा तु पृथक् पृथक्।
एकस्थापकलब्धा या सा सभ्याध्वर्युदक्षिणा।।

होतुश्च पौण्डरीकाग्नेरध्वर्योरपि तत्समा।
तदर्धमाहवनीयादेरध्वर्यूणां पृथक् पृथक्।।

तदर्धं संमिता ज्ञेया दक्षिणान्यपदार्थिनाम्।
गुरोरप्यधिकं वापि समं वा न्यूनमेव वा।।

उपद्रष्ट्रे सदस्येभ्यो निश्चितां दक्षिणां ददेत्।
निष्काधिकं सुवर्णं वा यज्ञकर्मणि दक्षिणा।।

क्रि. ८ .पृ.९९

अ. २२

शतं विंशतिनिष्कं च सुवर्णं दक्षिणां ददेत्।।

यजमानस्त्वशक्तश्चेत् निष्काणामेकविंशतिः।
होत्रध्वर्योस्तु संप्रोक्तं पञ्चनिष्कं पृथक् पृथक्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निष्कत्रयं सुवर्णं तु शेषानन्यान् पृथक् पृथक्।
वस्त्रधान्यादिलोहं च रत्नलोहं च दारुणा।।

यागोपकरणं सर्वम् आचार्याय प्रदापयेत्।
अनुपयोगद्रव्याणि भूम्यां वै स्वावानयेद्बुधः।।

अदक्षिणकृतो यागः निष्फलः सम्प्रकीर्तितः।
तस्मात्सर्वप्रयत्नेन दक्षिणादानमाचरेत्।।

५.१७.१८ दक्षिणादानमशक्तानां नवविधम्

वि. ३३ . २३७

अन्येषामप्यशक्तानां दक्षिणादानं नवधा उच्यते। 'पादाधिकं नवनिष्क - मुत्तमोत्तमम्' तथाष्टनिष्कमुत्तममध्यमम्। तथा सप्तनिष्कमुत्तमाधमम्। पादाधिकं षण्निष्कं मध्यमोत्तमम्। तथा पञ्चनिष्कं मध्यममध्यमम्। निष्कचतुष्टयं मध्यमाधमम्। पादाधिकत्रयनिष्कमधमोत्तमम्। तथा निष्कद्वयमधममध्यमम्। तथैकनिष्कमधमाधमम्।

५.१७.१९ पूर्णाहुतिः

क्रि. ८ . ३७ , ३८ . पृ.९७

सभ्ये तु वैष्णवं विष्णुसूक्तं पुरुषसूक्तकम्।।

एकाक्षरादि हुत्वा तु व्याहृत्यन्तं प्रति प्रति।
समिद्घृताभ्यां चरुणा देवदेवमनुस्मरन्।।

पूर्णाहुतिं प्रकुर्वीत सर्वकर्म समापयेत्।
ततस्तु पौण्डरीकाग्निं विसृजेद्विधिवद्बुधः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खि. १७ . २९३ - २९५

[अत्र पञ्चविंशतिवारकं हुत्वा इति अधिकम्।]

वि. ३३ . २३८

अथाध्वर्युस्सभ्याग्निकुण्डं परिस्तीर्य वैष्णवं व्याहृत्यन्तं चतुष्कृत्वा हुत्वा स्विष्टकृदादि पूर्णाहुतिपर्यन्तं कृत्वा

५.१७.२० नित्यहोमार्थम् अग्निसंरक्षणम्

वि. ३३ . २३८

आलयदक्षिणे प्रथमावरणे महानसे नैर्ऋते पूर्ववत्सभ्याग्निकुण्डं कृत्वा प्रोक्षणोल्लेखनादिकं कृत्वा अग्निं नित्यहोमार्थं निधाय

स. ३४ . ३९ - ४२

ततस्तु पौण्डरीकाग्निं विसृजेद्विधिवद्बुधः।।

सभ्यमग्निं सुसंरक्ष्य नित्यहोमाय विन्यसेत्।
आलयाद्दक्षिणे पार्श्वे कुण्डमौपासनाग्निवत्।।

कुर्यान्महानसे वाथ नैमित्यं निर्ऋते तथा।
कृत्वा तत्र निधायाग्निं नित्यहोमं समाचरेत्।।

तमग्निं सम्प्रणीयैव देवस्योत्सवमाचरेत्।

क्रि. ८ .पृ. ९७

[अत्र अर्चकसद्मनि इत्यधिकम्।]

क्रि. ८ .पृ. ९८

तत्रस्थाग्निषु सर्वेषु यजेयुर्वैष्णवं पुनः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षडग्निकुण्डहोमान्तेऽप्यावसथ्ये ततः परम्।
अन्तहोमं ततो हुत्वा स त्वाचार्यपुरस्सरम्।।

समिध्यग्निं समारोप्यो 'पावरोहे' ति च ब्रुवन्।
समिधं तां समानीय आचार्याय समर्पयेत्।।

समिधं गृहीत्वाप्याचार्यः हुनेदाहवनीयके।
तत्कुण्डेऽप्यन्तहोमान्ते समिध्यारोपयेद् बुधः।।

समिधं तां समानीय आचार्याय समर्पयेत्।
आचार्यस्त्वरितः पश्चात् अन्वाहार्ये जुहोति च ।।

तत्कुण्डेऽप्यन्तहोमान्ते समिध्यारोपयेद् बुधः।
समिधं तां ततो गृह्य आचार्याय प्रदीयताम्।।

समिधं गृहीत्वाप्याचार्यो जुहुयाद् गार्हपत्यके।
तत्कुण्डेऽप्यन्तहोमान्ते समिध्यारोपयेद् बुधः।।

समिधं तां समानीय आचार्याय समर्पयेत्।
तत्कुण्डेप्यन्तहोमान्ते समिध्यारोपयेद्बुधः।।

समिधं तां समानीय आचार्याय समर्पयेत्।
समिधं गृहीत्वाचार्यस्तां जुहुयात्पद्मकुण्डके।।

तत्कुण्डेप्यन्तहोमान्ते समिध्यारोपयेत्सुधीः।
समिधं तां समानीय आचार्याय समर्पयेत्।।

समिधं गृहीत्वाऽऽचार्यस्तां हुनेत्सभ्याग्निकुण्डके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सभ्यमग्निं सुसंरक्ष्य नित्यहोमाय विन्यसेत्।।

क्रि. ८ . पृ. ९८, ९९

नित्यहोमे त्वशक्तस्य विशेषः सम्प्रवक्ष्यते।

नित्यहोमेप्यशक्तिं तां ज्ञात्वाचार्यो यथाक्रमम्।
कुम्भस्योत्थापनात् पूर्वं यजेत्पूर्णाहुतिं बुधः।।

आचार्यः प्रयतो गत्वा अक्षतान् सम्प्रगृह्य च।
साक्षतेनैव हस्तेन 'याते अग्न' इति ब्रुवन्।।

सभ्याग्निं च समारोप्य शक्तिं कुम्भेऽक्षतान् न्यसेत्।
ध्रुवस्यावाहनात्पश्चात् देवेशं सम्प्रणम्य च ।।

कूर्चेनादाय तत्तोयं 'याते अग्न' इति ब्रुवन्।
संस्राव्य बिम्बं परितः ध्रुवेग्न्यारोपणं चरेत्।।

यद्यग्निर्न गृहीतः स्यात् भ्रूणहा भवति ध्रुवम्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१८. प्रतिष्ठाविधानम्

५.१८.१ ध्रुवबेरपीठे रत्नादिन्यासः

स. ३४. १ - ३९

ततः प्रभाते त्वाचार्यः स्थापकाद्या यथाविधि।
स्नात्वा सन्ध्यामुपास्यैव तर्पयित्वा यथाक्रमम्।।

ब्रह्मयज्ञं च कृत्वैव यज्ञशालां प्रविश्य च।
शयानं देवमासाद्य प्रणम्यैवानुमान्य च।।

ततः सुप्तं हरिं किञ्चिदोङ्कारेण प्रबोधयेत्।
भूः प्रपद्य इति प्रोच्य देवदेवं प्रणम्य च।।

विष्णुसूक्तं समुच्चार्य देवमुत्थापयेत्पुनः।
विमोच्य वस्त्रमाल्यादीन् पुनरन्यैर्विभूषयेत्।।

अथ रत्नानि चादाय धातुबीजादिभिः सह।
पुष्पाक्षतानि चादाय गर्भगेहं प्रविश्य च।।

अर्चापीठस्य तन्मध्ये कृतश्वभ्रे यथाक्रमम्।
पञ्चविंशतिसङ्ख्यानि पदानि परिकल्प्य च ।।

रत्नधात्वादिकं सर्वं तमेकेत्यभिमन्त्रयेत्।
श्वभ्रमध्ये त्वनेनैव स्थापयेद्रौक्महस्तिनम्।।

'शतधारे' ति मन्त्रेण सौवर्णं गरुडं तथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मस्थाने ब्रह्ममणिं 'ब्रह्मा देवा' दिमुच्चरन्।।

'इन्द्रं प्रणव'मित्युक्त्वा देवेन्द्रे वज्रमुत्तमम्।
अग्नावग्ने' ति चाग्नेय्यां मौक्तिकं प्रक्षिपेत्ततः।।

'यमोदाधा'दिना याम्ये वैडूर्यं प्रक्षिपेद् गुरुः।
'वसवः प्रथमे'त्युक्त्वा नैर्ऋत्यां शङ्खजं क्षिपेत्।।

'एते शते'ति वारुण्यां कासीसमपि निक्षिपेत्।
'मरुतः परमात्मे' ति वायव्ये पुष्यरागकम्।।

'सोमं राजान'मित्युक्त्वा चन्द्रकान्तं तु सौम्यके।
'ईशाने'ति च मन्त्रेण चैशान्ये नीलमुत्क्षिपेत्।।

श्रीरूपं च श्रियः स्थाने 'श्रिये जात' इति ब्रुवन्।
हरिणीं हरिणीस्थाने 'मेदिन्यादि'समुच्चरन्।।

'शं नो निधत्ता'मिति च वासुकेरमृताश्मकम्।
'धाता धातृणा'मिति च साध्येभ्यो लोहिताश्मकम्।।

'विश्वेदेवस्य' चेत्युक्त्वा विश्वेभ्यश्चोत्पलं मणिम्।
'अधिब्रह्मायतते'ति सिद्धानां तु प्रवालकम्।।

'इमां मूर्धन्यामि'त्युक्त्वा गन्धर्वेभ्यो मनः शिलाम्।
'अप्सरस्सु' ब्रुवन् विद्वानप्सरेभ्योऽथ शुक्तिजम्।

'यं काद्रवेय' इत्युक्त्वा नागेभ्यो विमलं ददेत्।
'अर्यम्ण' इति मन्त्रेण अर्यम्णे कुरुविन्दकम्।

'तत्रीण्येषे'ति च ददेत् भूतेभ्यो नीलमुत्पलम्।
अमृताश्मानि रत्नानि मध्ये चान्तरदिक्षु वै।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'शं नो निधत्ता' मित्याद्यैमन्त्रैर्न्यस्य यथाक्रमम्।
सौवर्णं गैरिकं चैव हरितालं मनः शिलाम्।।

अञ्जनं चैव श्यामाकं कासीसं पारदं तथा।
सौराष्ट्रकं च सङ्गृह्य शुद्धं गोरोचनं तथा।।

पूर्वोक्तैरेव मन्त्रैस्तु बहिर्ब्रह्मादिषु न्यसेत्।
सर्वगन्धयुतं बीजं पदे ब्राह्मे तु निक्षिपेत्।।

ऐन्द्रे तु षष्टिकान् व्रीहिमाषमुद्गकुलुत्थकान्।
ततो गोधूममुद्गैश्च तिलतिल्वैस्ततः परम्।।

यवद्वयं ततः पश्चान्नीवारैः स प्रियङ्गुभिः।
सौम्ये तु मुद्गगोधूमानैशान्ये सर्वबीजकम्।।

पूर्वोक्तैरेव मन्त्रैश्च क्रमेणैतान् बहिर्न्यसेत्।
श्रीवत्साद्यान् सुवर्णेन यथाशक्ति प्रकल्पितान्।।

ब्रह्मस्थानस्य परितो विन्यसेत्तान् क्रमेण तु।
'भूयाम' इति चोक्त्वा तु श्रीवत्सं चैन्द्रके न्यसेत्।।

आग्नेय्यां पूर्णकुम्भं तु 'नमः सुलोमी'ति मन्त्रतः।
याम्ये भेरीं न्यसेत्तत्र स एकोऽभूदिति क्रमात्।।

देवस्य त्वेति नैर्ऋत्यां न्यसेदादर्शनं बुधः।
मत्स्ययुग्मं तु वारुण्या'मतो देवादि'मुच्चरन्।।

वायव्यामङ्कुशं न्यस्य 'क्ष्मामेका'मिति मन्त्रतः।
'तन्मा यशोग्र' इत्युक्त्वा शङ्खं सौम्ये विनिक्षिपेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'ब्रह्मा देवे' ति चैशान्ये चावर्तं विन्यसेत् बुधः।
गदाचक्रासिशक्तीश्च शरं मध्ये च दक्षिणे ।।

'भूमाननोग्र' इत्युक्त्वा प्रत्येकं च सुनिक्षिपेत्।
वामभागे तथा शङ्खं शार्ङ्गखेटकमेव च ।।

'तन्मा यशोग्र' इत्युक्त्वा प्रत्येकं विन्यसेद्बुधः।
ब्राह्मणानां हितार्थाय स्रुक्स्रुवादीनि निक्षिपेत्।।

अन्येषामपि वर्णानां तत्तच्चिह्नानि निक्षिपेत्।
श्रीरूपं च श्रियः स्थाने 'श्रिये जात' इति ब्रुवन्।।

हरिणीं हरिणीस्थाने 'मेदिन्यादि' समुच्चरन्।
'प्रजापति' मिति प्रोक्त्वा कूर्मरुपं हरिं क्षिपेत्।।

यथाशक्ति सुवर्णेन सर्वाण्येतानि कल्पयेत्।
अलाभे सर्वरत्नानां सुवर्णं तत्र दापयेत्।।

अलाभे सर्वधातूनां पारदं तत्र निक्षिपेत्।
अलाभे सर्वबीजानां यवं प्रतिनिधिं हरेत्।।

क्षौमेणाच्छाद्य तच्छ्वभ्रं सुधया परिपूरयेत्।
पीठे पुरातने पूर्वं रत्नादौ सुप्रतिष्ठिते।।

तत्तद्रत्नादिकं बुध्वा मन्त्रांस्तान् समुदीर्य च।
आपोहिष्ठेति तन्मन्त्रैः प्रोक्षयेच्च कुशोदकैः।।

यावत् रत्नादिकं सर्वं तस्मिन् स्थाने न जीर्यति।
कर्तुर्वंशस्य तत् स्थानं तावद्वृद्धिसमृद्धिदम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्मादाहृत्य रत्नादीन् विन्यसेदुक्तमार्गतः।

अ. २२

खि. १७ . २८२ - २८७

[अत्र पीठे द्वादशाङ्गुलायामं चतुरश्रं रत्नन्यासार्थं श्वभ्रं कर्तव्यमित्यधिकम्।]

क्रि. ८ . १ - ३३

प्रातस्स्नात्वा विधानेन जप्त्वा सूक्तानि पूर्ववत्।
प्रविश्य यागशालां च देवदेवं प्रणम्य च ।।

ततस्सुप्तं हरिं किञ्चिदोङ्कारेण प्रबोधयेत्।
प्रणम्य 'भूः प्रपद्ये'ति विष्णुसूक्तेन चोद्धरेत्।।

(कौतुकाद्यधिवासञ्चेत्कौतुके स्नानमाचरेत्।
उत्सवादिषु बेरेषु अधिवासं भवेद्यदि।)

व्यपोह्य वस्त्रमाल्यादीन् पुनरन्यैश्च भूषयेत्।
त्रयोदशोपचारैश्च समभ्यर्च्य यथाविधि।।

रत्नानि धातुबीजानि गृहीत्वाऽन्तः प्रविश्य च।
अर्चापीठेऽवटं कृत्वा सोपपीठपदं तथा।।

उपपीठपदञ्चेति पञ्चविंशत्पदं स्मृतम् ।
'तमेकनेमि' मित्युक्त्वा रत्नादीन्यभिमृश्य च।।

'प्रजापतेः प्रथम' मिति रौक्मं कूर्मन्तु सन्न्यसेत्।
'तमेकनेमि' मन्त्रेण सौवर्णं दन्तिनं न्यसेत्।।

'शतधार' मिति प्रोच्य सौवर्णं गरुडं तथा।
ब्रह्मस्थाने ब्रह्ममणिं 'ब्रह्मा देवा' दिमुञ्चरन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'इन्द्रं प्रणयन्त' मित्युक्त्वा वज्रमैन्द्रे विनिक्षिपेत्।
'अग्नावग्नि' रिति प्रोच्य त्वाग्नेय्यां मौक्तिकं क्षिपेत्।।

'यमो दाधार' मन्त्रेण याम्ये वैडूर्यमाक्षिपेत्।
'वसवः प्रथम' इत्युक्त्वा नैर्ऋत्यां शङ्खजं क्षिपेत्।।

चतुर्भिर्वारुणैर्मन्त्रैः स्फाटिकं वारुणे न्यसेत्।
'मरुतः परमात्मे' ति वायव्ये पुष्यकं क्षिपेत्।।

'सोमं राजान' मित्युक्त्वा चन्द्रकान्तमथोत्तरे।
'ईशानस्सर्व' मन्त्रेण नीलमीशानदिश्यपि।।

'शन्नो निधात्ता' मित्युक्त्वा वासुकेरमृताश्मकम्।
'धाता धातृणा' मिति च साध्येभ्यो लोहिताश्मकम्।।

'विश्वे देवस्य' मन्त्रेण विश्वदेवेभ्य उत्पलम् ।
'अधिब्रह्मा यतते' ति सिद्धानान्तु प्रवालकम्।।

'इमां मूर्धन्या' इत्युक्त्वा गन्धर्वेभ्यो मनश्शिलाम्।
'अप्सरस्सु' ब्रुवन्विद्वानप्सरोभ्योऽथ शुक्तिजम्।।

'यं काद्रवेया' इत्युक्त्वा नागेभ्यो विमलं मणिम्।
'अर्यम्ण' इति मन्त्रेण अर्यम्णे कुरुविन्दकम्।।

'तत्रीण्येषे' ति च वदन् भूतेभ्यो नीलमुत्तमम्।
अमृताश्मकादिरत्नानि मध्येऽवान्तरदिक्ष्वपि।।

'शन्नो निधत्तामि' त्याद्यैर्मन्त्रैः क्षिप्त्वा यथाक्रमम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततो बीजानि धातूंश्च न्यसेन्मध्यपदेऽष्टके।।

सौवर्णं गैरिकं मध्ये हरितालं मनश्शिलाम्।
अञ्जनं श्यामकासीसं रसं सौराष्ट्रकं तथा।।

गोरोचनं चतुर्दिक्षु तत्तन्मन्त्रैश्च सन्न्यसेत्।
सर्वगन्धयुतं सर्वबीजं ब्राह्मे तु सन्न्यसेत्।।

ऐन्द्रे तु षष्टिकान्व्रीहीन्न्यसेन्माषकुलुत्थकौ।
याम्ये गोधूममुद्गौ च तिलतिल्वौ च नैर्ऋतौ।।

यवद्वयं तु वारुण्यां नीवारञ्च प्रियङ्गुकम्।
सौम्ये तु मुद्गगोधूमावीशान्ये सर्वबीजकम्।।

पूर्वोक्तैरेव मन्त्रैस्तु क्रमेणैतान्बहिर्न्यसेत्।
ब्रह्मस्थानस्य परितः विन्यसेदष्टमङ्गलान्।।

'भूयाम' इति मन्त्रेण श्रीवत्सं चैन्द्रके न्यसेत्।
आग्नेय्यां पूर्णकुम्भं तु 'नमस्सुलोमि' मन्त्रतः।।
याम्ये भेरीं न्यसेत्तत्र 'स एकोऽभूदि' ति ब्रुवन्।
नैर्ऋत्यां विन्यसेत्पश्चा 'द्देवस्य त्वे' ति दर्पणम्।।
वैष्णवं मन्त्रमुच्चार्य वारुण्यां मत्स्ययुग्मकम्।
वायव्यामङ्कुशं पश्चात् 'क्ष्मामेका' मिति च ब्रुवन्।।
'तन्मा यशोग्र' इत्युक्त्वा शङ्खं सौम्ये तु निक्षिपेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'ब्रह्मा देवे' ति चैशान्यामावर्तं निदधीत वै।।

गदाचक्रासिशक्तीश्च शरं मध्येऽथ दक्षिणे।
'भूमाननोऽग्र' इत्युक्त्वा प्रत्येकं च विनिक्षिपेत्।।

वामभागे तथा शङ्खं शार्ङ्गं खेटकमेव च ।
'तन्मा यशोऽग्र' इत्युक्त्वा प्रत्येकं च विनिक्षिपेत्।।

स्रुवादिवर्णचिह्नानि तत्तद्वर्णविवृद्धये।
श्रीरूपं च श्रियः स्थाने 'श्रिये जात' इति ब्रुवन्।।

हरिणीं हरिणीस्थाने 'मेदिन्यादि' समुच्चरन्।
'प्रजापतिमि' ति प्रोच्य कूर्मं चोपरि विन्यसेत्।।

यथाशक्ति सुवर्णेन सर्वाण्येतानि कल्पयेत्।
रत्नालाभे सुवर्णं वा बीजानां यवमेव वा।।

धातूनां पारदं वापि तत्तत्प्रतिनिधिं हरेत्।
क्षौमेणाच्छाद्य तच्छ्वभ्रं सुधयोपरि लेपयेत्।।

पीठे पुरातने पूर्वं रत्नादौ सुप्रतिष्ठिते।।

तत्तद्रत्नादिकं बुद्ध्वा मन्त्रांस्तान्त्समुदीर्य च।।

वि. ३३ . २३५ - २३७

ततः प्रभाते स्नात्वा आचम्य सन्ध्यामुपास्य देवादीनद्भिस्तर्पयित्वा ब्रह्मयज्ञं कृत्वा देवालयं प्रविश्य 'प्रतद्विष्णु' रिति सप्तप्रदक्षिणं कृत्वा यज्ञालयं प्रविश्य अर्चापीठे कृतेऽवटे पञ्चविंशतिभागं कृत्वा अधिवासितरत्नान्यादाय तस्मिन् ब्रह्माणं इन्द्रादिदिग्देवांश्चाभ्यर्च्य पुष्पादीन् संशोध्य 'तमेकनेमि'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(वै० मं०. प्रं०. ८) मित्युक्त्वाऽभिमृश्य तेनैव ब्रह्मस्थाने गजं प्रतिष्ठाप्य 'शतधार' मिति गरुडं तस्मिन् 'ब्रह्मा देवाना' मिति ब्रह्मस्थाने ब्रह्ममणिम् (तै०. आ०.८) 'इन्द्रं प्रणवन्त' (वै०.प्र०) मिति ऐन्द्रे वज्रमणिम्, 'अग्नावग्नि' (वै०.प्र०.८) रिति आग्नेय्यां मौक्तिकं, 'यमो दाधारे' (वै०. म०. ६, तै०. आ०.८) ति याम्ये वैडूर्यम्, 'वसवः प्रथम' (वै०. म०. प्र०.८) इति नैर्ऋत्यां शङ्खजं, 'एते शत' मिति वारुण्यां स्फटिकं, 'मरुतः परमात्मे' ति (वै०. प्र०.६) वायव्यां पुष्यकं, 'सोमं राजान' मिति सौम्ये चन्द्रकान्तम् , 'ईशान' (वै०.म०.८) मित्यैशान्यां नीलं च, इन्द्राग्नयोरन्तरे 'शंन्नो निधत्ता' (वै०. प्र०. ८) मिति अमृताश्मकं, 'धाताधातॄणा' (वै०. म०. प्र०.८) मिति यमाग्नयोरन्तरे लोहिताक्षकं, यमनीलयोर्मध्ये 'विश्वेदेवस्ये' (वै०. म०. ३) त्युत्पलमणिं, नीलवरुणयोर्मध्ये 'अधिब्रह्मयतता' (वै०. म०. प्र०.८) मिति प्रवालं, वरुणवाय्वोरन्तरे 'मम अर्धधान्य' (वै०. म०. प्र०.८) मिति मनःशिलां, वायुसोमयोर्मध्ये 'अप्सर' (वै०. प्र०. ८) स्विति शुक्तिजं, सोमेशानयोरन्तरे 'काद्रवेय' (वै०. प्र०. ८) इति विमलमणिम्, ईशानेन्द्रयोर्मध्ये 'अर्यम्णः कुम्भी' (वै०. प्र०. ८) ति मरुतं, सन्यस्य अभ्यन्तरे पदे च एन्द्रादीन्विदिक्षु गैरिक, हरिताल, मनःशिलां, जनश्यामक, सीस, पारत, सौराष्ट्र, गोरोचनान्तं तत्तद्दिगीशानां मन्त्रेणऽसङ्करं सन्यस्य तथा शालि, व्रीहि, यव, निष्पाव, नीवार, षाष्टिका, माष, मुद्ग, तिल, तिल्वादीनां रूपं, सुवर्णेन कृत्वा श्रीवत्सादीनि मङ्गलादीनि च सन्यस्य पञ्चायुधानि मध्ये चतुर्दिक्षु सन्यस्य मध्ये पदे सौवर्णचिह्नानि कूर्मरूपमेघविद्युल्लताश्च विन्यसेत्। एवं कर्तुमशक्तश्चेन्नवरत्नाष्टमङ्गलपञ्चायुधवर्णचिह्नानि सन्यस्य तत् श्वभ्रं दुकूलेनाऽऽच्छाद्य सुधया पूरयित्वा सुदृढं कृत्वा 'विष्णुस्त्वां रक्षत्वि' ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उक्त्वा (वै०. प्र०. ३) अभ्युक्ष्य पौण्डरीकाग्निं विसृज्य, गर्भालयं संशोध्य, उपलिप्य पैष्ट्या भूमिमलङ्कृत्य उपरिष्टाद्विमानपताकमुक्तादामपुष्पमालाद्यैरलङ्कृत्य अधस्तात्कुसुमाक्षतानाकीर्य, अगरुधूपैः कर्पूरदीपैर्द्वारपार्श्वे दीपाङ्कुरोपकुम्भाद्यैरलङ्कृत्य यज्ञशालामागत्य देवेशं प्रणम्य यजमानो गुरुमभिवन्द्य अनुज्ञाप्य वस्त्रोत्तरीयोष्णीषाभरणैर्गन्धमाल्यैश्च अभिपूज्य देवसन्निधौ सोदकं सुवर्णं दद्यात् ।

ज्ञा. ६७ . ११८ , ११९

प्रभाते यजमानेन स्थापकाद्यैश्च युक्तो गुरुर्विधिना कृतस्नानो देवालयं प्रविश्य देवेशं प्रणम्य अधिवासितरत्नादीन्यादाय गर्भालयं प्रविश्य ब्रह्मपदमध्ये चतुरङ्गुलविस्तारोन्नताभिः वेदिभिः तिसृभिः सहितं तालोन्नतं चतुरश्रं भुवङ्गसमं पद्माकारं वृत्तं वा कौतुकस्यार्चापीठं कृत्वा तन्मध्ये भागावगाढविस्तारयुतं श्वभ्रं कृत्वा गोमयेनोपलिप्य पञ्चगव्यैः प्रोक्ष्य श्वभ्रे पञ्चविंशतिपदं परिकल्प्य रत्नादीनभ्यर्च्य 'तमेकनेमि' मित्यभिमृश्य मध्ये पदे तेनैव गजं 'ब्रह्मा देवानामि' ति ब्रह्ममणिञ्च प्रतिष्ठाप्य शूलस्थापनोक्तवत् 'इन्द्रं प्रणवन्त' मित्याद्यैः वज्रादीनैन्द्रादिषु तत्तद्दिगन्तरेषु 'शन्नो निधत्तामि' त्याद्यैरमृताश्मकादीनि च रत्नानि सन्न्यस्य पश्चात्तथैव 'ब्रह्मा देवाना' मित्याद्यैः मध्यादिषु सौवर्णगैरिकादीन् धातूंश्च ततो बीजानि च तथैव सन्न्यस्य इन्द्रादिषु श्रीवत्साद्यष्टमङ्गलानि दक्षिणवामयोः पञ्चायुधान् तत्तन्मन्त्रैः पूर्ववत्प्रतिष्ठाप्य 'ब्रह्म प्रतिष्ठे' ति वर्णचिह्नानि 'ये ते शत' मिति मेघविद्युल्लताश्च ' श्रिये जात' इति श्रीरूपं तेषामुपरि 'प्रजापतिं प्रथममि'ति कूर्मरूपञ्च सन्न्यस्य क्षौमेनाच्छाद्य सुधया परिलेपयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

औत्सवादीनामुक्ते स्थाने यथोचितं पीठं रत्नन्यासं विनैव कुर्यात्। सुवर्णशकलानि न्यसेदिति केचित्।

वा. १५

ततः प्रभाते धर्मात्मा स्नात्वा सूत्रोक्तवत्क्रमात्।
नित्यकर्म समाप्यैव व्रजेद्देवस्य मन्दिरम्।
पादौ प्रक्षाल्य चाचम्य देवमुत्थाप्य मन्त्रवित्।।

पूर्ववस्त्रं विसृज्यैव पुनरन्यं समाचरेत्।
उत्सवोक्तेन मार्गेण सर्वालङ्कारमाचरेत्।।

पश्चादालयमाविश्य सूत्रेण पदमाचरेत्।
पूर्वान्तमुत्तरान्तं च षट्सूत्रं च प्रसार्य च।।

मध्ये पदे विशेषेण पीठं सम्यक्प्रकल्पयेत्।
उक्तबीजं स्थले न्यस्य बिन्दुं प्रणवसम्पुटम्।।

ऊर्ध्वे पीठं प्रकल्प्यैव शिल्पशास्त्रोक्तमार्गतः।
वृत्तं वा चतुरश्रं वा पद्माकारमथापि वा।।

अन्यद्भद्राकृतिं चैव वैनतेययुतं पुनः।
तदूर्ध्वे कल्पयेद्विद्वान् नवभागं विभागशः।।

पूर्वोक्तेन क्रमेणैव रत्नं सम्यक्प्रकल्पयेत्।
सुधया परिपूर्यैव क्षौमेणाच्छादयेत् पुनः।।

वा. ७

देवमादाय तत्पश्चात्पीठमध्ये निधाय च।
'विष्णोर्नुकादि' मन्त्रेण मध्यसूत्रे प्रसार्य च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वान्तमुत्तरान्तन्तु सूत्रं सङ्क्रम्य सर्व च।
'तमेकनेमि'त्युक्त्वा गजन्तत्रैव निक्षिपेत्।।

'शतधार' मिति मन्त्रेण तार्क्ष्यरूपं प्रतिष्ठितम्।
'ब्रह्मा देवानि'तीत्युक्त्वा ब्रह्मरत्नं सुनिक्षिपेत्।।

'इन्द्रं प्रणवन्तमि'त्युक्त्वा वज्ररत्नन्तु निक्षिपेत्।
'अग्नावग्निरि'त्युक्त्वा मौक्तिकं तत्र निक्षिपेत्।।

'यमोदाधार' इत्युक्त्वा वैडूर्यं तत्र निक्षिपेत्।
'वसवः' प्रथमोच्चार्य शङ्खजं तत्र निक्षिपेत्।।

'येते शते'ति मन्त्रेण स्फाटिकं तत्र निक्षिपेत्।
'मरुतः परमात्मे'ति पुष्यकं तत्र चार्पयेत्।।

'सोमं राजान'मित्युक्त्वा चन्द्रकान्तमणिं क्षिपेत्।
'ईशानस्सर्व' इत्युक्त्वा नीलरत्नं तु निक्षिपेत्।।

पुनश्च वासुकीत्यादि क्रमात् स्थानं प्रकल्पयेत्।
ईशानेन्द्रयोर्मध्ये वासुकिं तत्र पूजयेत्।।

'शन्नो निधत्तामि'त्युक्त्वा अर्पयेदमृताश्मकम्।
इन्द्रपावकयोर्मध्ये साध्यस्थानं प्रकल्पयेत्।।

'धाताधातृणामि'त्युक्त्वा लोहिताश्ममणिं क्षिपेत्।
यमपावकयोर्मध्ये विश्वेदेवस्य कल्पयेत्।।

'विश्वेदेवस्य' चोच्चार्य उत्पलाख्यमणिं क्षिपेत्।
यमनैर्ऋतयोर्मध्ये सिद्धस्थानं प्रकल्पयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'अधिब्रह्मे'ति मन्त्रेण प्रवालं तत्र निक्षिपेत्।
वरुणनैर्ऋतयोर्मध्ये गन्धर्वेभ्यः प्रकल्पयेत्।।

'इमामूर्धन्यमि'त्युक्त्वा मनश्शिलां तत्र चार्पयेत्।
वारुणानिलयोर्मध्ये स्थानं तस्याप्सरस्य तु।।

'अप्सरस्वि'तिमन्त्रेण शुक्तिजं तत्र निक्षिपेत्।
वायव्यसोमयोर्मध्ये नागस्थानं प्रकल्पयेत्।।

'यंकाद्रवे'ति मन्त्रेण विमलं च मणिं न्यसेत्।
सोमईशानयोर्मध्ये भूतस्थानं प्रकल्पयेत्।।

'तत् त्रीण्येषे'ति मन्त्रेण कुरुविन्दमणिं क्षिपेत्।
ब्रह्मादीशानपर्यन्तं क्षिप्त्वा धातून्यथाक्रमम्।।

सौवर्णं गैरिकं चैव हरितालं मनश्शिलाम्।
तथैवाञ्जनं श्यामं कासीसं पारदं पुनः।।

गोरोचनं च सौराष्ट्रं एते धातून्न्यसेत् क्रमात्।
तदूर्ध्वे सर्वबीजानि गन्धयुक्तं तु निक्षिपेत्।।

षष्टिकान् व्रीहीनैन्द्रे तु कुळुत्थमाषौ त्वाग्नेये।
याम्ये च मुद्गगोधूमौ तिलकं नैर्ऋत एव च।।

वारुण्यान्तु यवैस्सर्वैर्नीवारैश्च प्रियङ्गुभिः।
वायुस्थाने तु सन्यस्य मुद्गगोधूमधान्यकौ।।

सोमस्थाने तु गोधूमाः सर्वबीजास्त्रिनेत्रके।
तथैव सर्वबीजांश्च ब्रह्मस्थाने तु सन्यसेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मादीशानपर्यन्तं सर्वबीजान्यसेत् क्रमात्।
एवं क्रमेण सर्वत्र धातुबीजानि निक्षिपेत्।।

पूर्वोक्तेनैव मन्त्रेण स्थानं प्रतिसमुच्चरन् ।
पश्चात्सर्वत्र निर्वाप्य मन्त्रद्रव्यमिहोच्यते।।

'भूयात्मवृत्या' इत्युक्त्वा नमस्सुलोमि कथ्यते।
'स एकोऽभूदि' त्युच्चार्य 'देवस्य त्वे'त्यथोच्चरन्।।

'अतो देवादि'षण्मन्त्रैः 'क्ष्मामेकामि'ति चोच्चरन्।
'तन्मा यशे'ति मन्त्रेण 'ब्रह्मा देवा' इति ब्रुवन्।।

'भूमाननोग्र'मन्त्रेण तन्मायश इति ब्रुवन्।
'प्रजापतिः प्रथमे'त्युक्त्वा विष्णुगायत्रिमुच्चरन्।।

'उदुत्यं चित्रमि'त्युक्त्वा 'इदं विष्णु'रिति ब्रुवन्।
श्रीवत्सं पूर्णकुम्भं च भेरीमादर्शनं तथा।।

मत्स्ययुग्माङ्कुशे चैव शङ्खमावर्तकैर्युतम्।
गदां शक्तिं शरं चैव शार्ङ्गं खेटकमेव च ।।

कूर्मरूपं च सन्न्यस्य उक्तमन्त्रानुपूर्वकम् ।
जुहूमुपभृतं चैव सृक्स्रुवं तत्र चार्पयेत्।।

हैमेन ब्राह्मणार्थाय न्यसित्वा देशिकोत्तमः।
नृपराष्ट्रसमृद्ध्यर्थं हयनागरथध्वजम् ।।

क्षिप्त्वा तत्रैव मन्त्रज्ञो विष्णुगायत्रिमुच्चरन्।
तुलारूपं च निक्षिप्य वैश्यानामभिवृद्धये।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'इदं विष्णु' रिति प्रोच्य तत्तद्द्रव्यं क्षिपेद्बुधः।
युगं हलं प्रतोदं च निक्षिपेच्छूद्रवृद्धये।।

रौप्येनैव कृतं सर्वं 'विष्णुगायत्रि' मुच्चरन्।
एवमेव क्रमेणैव रत्नन्यासक्रमं विदुः।।

प्र. १२. ८० - ८३
[अत्र ब्रह्मयज्ञं च कृत्वा तु जपेत् सूक्तानि द्वादश इत्यधिकम्।]

५.१८.२ सद्मप्रदक्षिणपूर्वकं कौतुकादिबेराणां पीठे संयोजनम्
खि.१७.२९५ - ३१२

शय्यास्थं देवमासाद्य प्रणम्यैवानुमान्य च।।

सुप्तं हरिं भक्तियुतः प्रणवेन प्रबोधयेत्।
'उत्तिष्ठ सुमहाबाहो ब्रह्माद्यैरभिवन्दित ।।

प्रजानां रक्षणार्थं त्वं भवस्वेह जनार्दन ।
इत्येवमुक्त्वाऽऽचार्यो वै देवमुद्धृत्य वै तथा।।

विमोच्य वस्त्राभरणजातान्यन्यानि योजयेत्।

भूषणान्यर्पये 'द्भूतो भूतेष्वि' ति समुच्चरन्।।

तत्तत्स्थानेष्वलङ्कृत्य देवमानम्य चादरात्।
पुष्पाद्यैरप्यलङ्कृत्य नानावर्णैः विशेषतः।।

दिव्यगन्धैरलङ्कृत्य नाभेरूर्ध्वञ्च सर्वशः।
चित्रकक्ष्यासमायुक्तवस्त्रैः कुर्यादलङ्क्रियाम्।।

पश्चाद्देवं प्रणम्यैव पाद्याद्यर्घ्यान्तमर्चयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गुरुं सम्पूज्य तत्काले यजमानो मुदान्वितः।।

तथा पदार्थिनस्सर्वान् नमस्कुर्यात्स्वदैववत्।
देवमानम्य च ब्रूयादिमं मन्त्रं स्मरन् हरिम्।।

'क्षमस्व पुण्डरीकाक्ष भक्तस्य मम शक्तितः।
यद्यदिष्टमनिष्टं वा भगवंश्चरितं मया' ।।

इत्युक्त्वा देवदेवेशं प्रणमेच्च पुनः पुनः।
मुहूर्ते समनुप्राप्ते दैवज्ञं पूजयेत्ततः।।

सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।
बार्हिणच्छत्रसंयुक्तमङ्कुरैश्च समन्वितम्।।

पताकाध्वजसंयुक्तमष्टमङ्गलसंयुतम्।
ब्रह्मघोषसमायुक्तं शकुनसूक्तसमन्वितम्।।

आक्ष्वेलितास्फोटिताद्यैर्जयशब्दैश्च संयुतम्।
तोयधारासमायुक्तं पुष्पवृष्टिसमन्वितम्।।

कुम्भं सङ्गृह्य शिरसा आचार्यः 'पुरतो व्रजेत्।
देवं सङ्गृह्य पश्चाद्वै व्रजेयुर्मूर्तिधारकाः।।

देवीभ्याञ्चैव सह चेत् ते नयेद्दक्षवामयोः।
बहुभूमिप्रतिष्ठा चेत्तत्तद्बुद्ध्वाऽथ बुद्धिमान्।।

तत्तत्काले प्रकुर्वीत एवमेव विधानतः।
प्रदक्षिणं ततः कृत्वा देवालयमुपाव्रजेत्।।

विष्णुसूक्तं समुच्चार्य स्थापयित्वा ततः परम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्रुवसूक्तं ततो जप्त्वा पुंसूक्तेन समन्वितम्।।

एकाक्षरादिकं जप्त्वा स्थापयेयुर्विचक्षणाः।

स.३५.२० - २८

ततो मुहूर्ते सम्प्राप्ते यजमानसमन्वितः।।

आचार्यश्च प्रसन्नात्मा ऋत्विग्भिः स्थापकैः सह।
'भूः प्रपद्य' इति प्रोक्त्वा कुसुमाञ्जलिमुत्सृजेत्।।

'क्षमस्व देवदेवे' ति प्रणम्यैवानुमान्य च।
सर्ववाद्यसमायुक्तं सर्वालङ्कारसंयुतम्।।

नृत्तगेयसमायुक्तं छत्रचामरसंयुतम्।
ब्रह्मघोषसमायुक्तं शाकुनं सूक्तमुच्चरन्।।

तोयधारासमायुक्तं पुष्पवृष्टिसमन्वितम्।
कुम्भं सङ्गृह्य शिरसा धारयन्नग्रतो व्रजेत्।।

स्थापका देवमादाय गच्छेयुस्तदनन्तरम्।
प्रदक्षिणं ततः कृत्वा देवागारं प्रविश्य वै।।

पूर्णकुम्भं न्यसेत्तत्र देवदक्षिणपार्श्वतः।
आत्मसूक्तं जपित्वैव देवं ध्यायन् तथैव च।।

भक्तियुक्ताः प्रसन्नाश्च पूर्वोक्ताः स्थापकाः क्रमात्।
'प्रतद्विष्णुस्तवत' इति ब्रह्मस्थाने च कौतुकम्।।

पार्श्वयोरुभयोर्देव्यौ दक्षिणे स्नापनं ततः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

औत्सवं चोत्तरे पार्श्वे स्थापयेयुश्च भक्तितः।।

प्र.१२. ९० - ९७

मुहूर्ते समनुप्राप्ते वाद्यघोषसमन्वितम्।
तोयधारासमायुक्तं स्वस्तिसूक्तं समुच्चरन्।।

आचार्यः कुम्भमादाय व्रजेत्पूर्वं ततः क्रमात्।
नयेयुस्स्थापकाः पश्चाद्देवं देव्यादिसंयुतम्।।

प्रदक्षिणं शनैर्गत्वा देवागारं प्रविश्य च।
पीठस्य दक्षिणे भागे धान्यपीठे प्रकल्पिते।।

आचार्यस्सन्न्यसेत्कुम्भं देवं चादाय चाऽत्वरः।
कौतुकं ब्रह्मस्थाने तु स्थापयित्वा विचक्षणः।।

'भूरसि भू ' रित्युक्त्वा पीठे देवं सुयोजयेत्।
तस्य दक्षिणपार्श्वे तु श्रीदेवीं स्थापयेद्बुधः।।

तथैव वामपार्श्वे तु भूमिं कुर्यात्प्रतिष्ठताम्।
देवस्य वामभागे तु स्थापयेद् बिम्बमौत्सवम्।।

स्नापनं बलिबेरं च दक्षिणे स्थापयेद्बुधः।
विष्णुसूक्तं च जप्त्वैव पुरुषसूक्तयुतं तथा।।

ध्रुवसूक्तं वैष्णवं च देवीभ्यां च पृथक् पृथक्।
श्रीभूसूक्तं पृथक् जप्त्वा ----------------।।

य.२९. १२ - २०

पश्चान्मुहूर्ते धर्मात्मा यजमानसमन्वितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रिभिः स्थापकैः सार्धं 'भूः प्रपद्ये' ति मन्त्रतः ।।

'न्यूनातिरिक्तं यत्सर्वं गृहाण परिपूर्णकम् ।
क्षमस्वे' ति प्रणम्यैव कुसुमाञ्जलिमुत्सृजेत् ।।

वाद्यैश्च विविधैः सर्वैर्ध्वजपिञ्छादिभिः सह ।
आयुधैर्मङ्गलैश्चान्यैर्धूपदीपसमायुतम् ।।

ब्रह्मघोषसमायुक्तं शकुनसूक्तसमायुतम् ।
कुम्भं सङ्गृह्य शिरसा धारयन्नग्रतो व्रजेत् ।।

कौतुकादींत्समादाय कुम्भस्यानुनयेत्क्रमात् ।
कृत्वा प्रदक्षिणं धाम प्रविशेदालयं पुनः ।
ब्रह्मस्थाने प्रतिष्ठाप्य कौतुकं वैष्णवेन तु ।।

पार्श्वयोरुभयोर्देव्यौ स्नापनं दक्षिणे ततः ।
उत्सवं बलिबेरं च स्थापयेच्चोत्तरे तथा ।।

कौतुकप्रमुखे कुम्भं धान्योपरि सलक्षणम् ।
सन्न्यस्य दक्षिणे पार्श्वे चोत्तराभिमुखो बुधः ।।

स्वस्तिकासनमास्थाय प्राणायामं जपेत्पुनः ।
आत्मसूक्तं जपित्वाऽन्ते मातृकां विधिवन्न्यसेत् ।।

ध्यायन्तो विष्णुसूक्तं च नरसूक्तमतः परम् ।

क्रि. ८ . ३९ - ४९

देवं देवीसमायुक्तं सर्वालङ्करणैस्सह ।।

जपन् वै शाकुनं सूक्तं तोयधारापुरस्सरम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यः शिरसा कुम्भं गृहीत्वा पूर्वतो व्रजेत्।।

ततोऽनु देवं देव्यौ च नयन्ति स्थापकास्तथा।
बहुबेरप्रतिष्ठा चेत् तत्तद्बेरं क्रमान्नयेत्।।
बहुभूमिप्रतिष्ठा चेत् तत्तद्बुद्ध्वा समाहितः।
तले तले विधानेन यथोचितमथाचरेत्।।

परीत्य मन्दिरं पश्चात् गर्भगेहं प्रविश्य च।
विष्णुसूक्तं समुच्चार्य स्थापयित्वा ततः परम्।।

ध्रुवसूक्तं ततो जप्त्वा पौरुषं सूक्तमेव च ।
एकाक्षरादिसूक्तं च स्थापयेयुः समाहिताः।।

दक्षिणे ब्रह्मसूत्रस्य बेरमध्यं यथा तथा।
देवदेवं जगद्योनिं स्थापयेद्विष्णुमव्ययम्।।

स्थापयेदन्यदेवांस्तु तद्वामे बेरमध्यमम्।
सूत्रसन्धौ न कुर्वीत सर्वेषां बेरमध्यमम्।।

स्थापितं चेत् तदज्ञानात् सर्वमाशु विनश्यति।
औत्सवं कौतुकाद्वामे दक्षिणे स्नापनं तथा।।

औत्सवं दक्षिणे वामे स्नापनं त्विति केचन।
गर्भालयस्य सङ्कोचे त्वथवा मुखमण्डपे।।

प्रतिष्ठाप्यान्तराले वा पूजयेदिति चाङ्गिराः।
आचार्यः पुरतः कुम्भं धान्यपीठे सुसन्न्यसेत्।।

ज्ञा.६७.११९ , १२०

ततो देवेशं प्रणम्य प्रणवेन बोधयित्वा स्थापकैः सहितो गुरुः तं देवमुत्थाप्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिवन्द्य पूर्ववस्त्रादीनि विमोच्यान्यैः नववस्त्रकक्ष्योत्तरीयाभरणैर्नवैः पुष्पमाल्यैर्गन्धैरलङ्कृत्य पाद्याद्यैरभिपूजयेत्।

ततो मुहूर्ते समनुप्राप्ते सर्ववाद्यैः नृत्तैर्गेयैः छत्रैः पिञ्छैः चामरैः बर्हिणैरन्यैः सर्वालङ्कारैः हृष्टजनैश्च परिवृतो गुरुः तत्कुम्भमुद्धृत्य शिरसा धारयन् पूर्वतो गच्छेत्। स्थापकाश्च हस्ताभ्यां देवमुद्धृत्य शकुनसूक्तं जपन्तोऽनुगच्छेयुः। पूर्वतो जलधारां कारयित्वा शनैरालयं प्रदक्षिणीकृत्य गर्भालयं प्रविश्यार्चापीठे जितेन्द्रिया ध्यानयुक्ताः स्थापकाः 'प्रतद्विष्णु' रिति कौतुकबिम्बं भक्त्या प्रतिष्ठाप्य तद्दक्षिणे श्रियमर्चाञ्च (प्रतिष्ठापयेत्)। कौतुकपूर्वे किञ्चिद्दक्षिणाश्रिते अर्चास्थापनमित्येके। वामे हरिणीमौत्सवञ्च तत्तन्मन्त्रेण स्थापयित्वा देवेशस्य पादौ स्पृशन्तो विष्णुसूक्तं वैष्णवञ्च जपेयुः।

वि.३३. २३८

ततादिवाद्यैर्घोषयित्वा वितानैः, ध्वजैः, छत्रैः, पिञ्छैः, चामरैर्हेमादिपरिच्छदैः, धूपैर्दीपैरष्टमङ्गलैः, पञ्चायुधैः, भक्तैश्च, परितो नृत्तगेयवाद्यसंयुक्तं, शकुनसूक्तं समुच्चार्य, तोयधारापुरस्सरम् आचार्यः शिरसा कुम्भं धारयन्, अग्रतो गच्छेत् ततोऽनुस्थापका देवमादाय पार्श्वयोरुभयोर्देव्यौ स्नपनोत्सवबलिबेराणि च क्रमेणैव आलयं प्रदक्षिणं कृत्वा भक्ताभिर्ब्राह्मणपत्नीभिः दीपाङ्कुरोदकुम्भैः प्रत्युत्थानं कारयित्वा आलयमाविश्य आचार्यो ध्रुवस्य दक्षिणे धान्यपीठे कुम्भं सन्न्यसेत्। स्थापकाः 'प्रतद्विष्णु' रिति कौतुकं ब्रह्मस्थाने प्रक्षिप्य (प्रतिष्ठाप्य) पार्श्वयोरुभयोर्देव्यौ तद्दक्षिणे स्नापनम्, उत्तरे चोत्सवं बलिबेरं च स्थापयेयुः, अथवा दक्षिणे चोत्सवम् उत्तरे स्नापनमित्येके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.३ ध्रुवबेरस्य दृष्टिपाते शुभाशुभविवेकः

वा. ८

पश्चाद्देवं समुद्धृत्य पीठस्योपरि विन्यसेत्।।

विष्णुसूक्तं समुच्चार्य शिल्पिना सह कारयेत्।
ऊर्ध्वाधश्चैव संवीक्षेत् भयं तस्य धनक्षयम्।।

कटाक्षे मरणं चात्र समदृष्टिशुभं भवेत्।
किञ्चिदैशान्यमाश्रित्य पूर्वद्वारस्य देवताः।।

दक्षिणाभिमुखे देवे किञ्चिन्नैर्ऋतमाश्रिते।
तेनैव पश्चिमे कुर्यात् किञ्चिद्वायव्यमीक्षितम्।।

उत्तराभिमुखे देवे किञ्चिदैशान्यमीक्षणम्।
एवं सङ्कल्प्य मतिमान् संताड्यैव दृढीकृतम्।।

वि. १६ . ७५

५.१८.४ महाबेरस्थापनम्

स.१४. २३ - ३०

शिलामयं महद्बेरं करैर्धार्यं न चेत् कृतम्।
बेरशुद्धिक्रियां सर्वां शक्त्या कृत्वा यथोचिताम्।।

तस्मात्प्रतिष्ठाकालात्तु पूर्वमेव स्थिरोदये।
बलवद्भिः सुवासोभिर्भगवद्भक्तिसंयुतैः।।

रज्जुभिः सुदृढैः सम्यग्बध्वा बेरं यथार्हकम्।
समुद्धृत्य च यन्त्रैश्च विमानं प्रविशेत् क्रमात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रविश्यान्तर्विमानं तु ध्रुवस्थानं समीक्ष्य च।
न्यस्तरत्नं समासाद्य तदूर्ध्वस्थं यथा भवेत्।।

मौञ्जीपाशैस्तथान्यैश्च यन्त्रैश्च स्वस्तिकेन तु।
खादिराद्यैस्तु याज्ञीयैर्दारुभिः सारवत्तरैः।।

कृत्वा यन्त्रं यथायोग्यं ध्रुवं तामवनिं तथा।
न स्पृशेत्तु यथाबेरं कुर्यादुपरि बन्धनम्।।

दृढमेवं समास्थाप्य बेरं तत्राप्रमादतः।
पश्चान्मुहूर्ते सम्प्राप्ते त्वाचार्यः शिल्पिना सह।।

तन्महाबेरयन्त्रं च शनैरेव विसृज्य वै।
स्थापयेदप्रमादेन रत्नोपरि यथादृढम्।।

५.१८.५ अष्टबन्धद्रव्याणि

क्रि. ३५. २१ , २२

शङ्खचूर्णं मधूच्छिष्टं लाक्षा त्रिफलमेव च।।

कार्पासं गुग्गुलं चैव चूर्णं रक्तशिलाकृतम्।
माहिषं नवनीतं चेत्यष्टबन्ध इति स्मृतः।।

५.१८.६ पञ्चबन्धद्रव्याणि

क्रि. ३५ . २३

माहिषं नवनीतं च लाक्षाचूर्णं च शर्कराः।
कार्पासं गुग्गुलं चैव पञ्चबन्ध इहेष्यते।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.७ त्रिबन्धद्रव्याणि

क्रि. ३५. २४

माहिषं नवनीतं च लाक्षाचूर्णं च शर्कराः।
एवं त्रिबन्धमित्याहुः विपरीतं न कारयेत्।।

५.१८.८ अष्टबन्धद्रव्याणामधिदेवाः

क्रि. ३५. २५ - २७

शङ्खचूर्णे तु चन्द्रः स्यात् मधूच्छिष्टे तु रोहिणी।
हरीतक्यां हरिश्चैव लाक्षायामग्निरेव च।।

कार्पासे वायुरावाह्यः गुग्गुलौ चण्डदीधितिः।
शिलाचूर्णे स्कन्ददेवो नवनीते यमः स्मृतः।।

द्रव्येष्वेषु समावाह्य क्रमाद् द्रव्याधिदेवताः।
अष्टोपचारैरभ्यर्च्य देवानुद्वासयेत्सुधीः।।

५.१८.९ अष्टबन्धद्रव्यमानम्

क्रि. ३५ . २८ - ३०

शङ्खचूर्णं तथा प्रस्थम् अर्धप्रस्थं च गुग्गुलम्।
लाक्षाचूर्णं च तावन्तं कार्पासं पादमेव च।।

हरीतकीं मधूच्छिष्टं शिलाजं पादमेव च।
एकीकृत्य ततः सर्वं प्रस्थाद्येन च मानयेत्।।

चूर्णस्यैकीकृतस्यार्धं नवनीतं च माहिषम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.१० अष्टबन्धद्रव्यावघातः

क्रि. ३५ . ३० - ३८

पेषयित्वा तु तद्द्रव्यं निक्षिप्योलूखले गुरुः ।।

मुसलं च समादाय चार्चयित्वा विधानतः।
उलूखलेऽर्चयेत्सोमं मुसले च सुदर्शनम्।।

वैष्णवं विष्णुसूक्तं च नरसूक्तं तथैव च।
'सोमं राजान' मित्युक्त्वा 'सोमो धेनु' मिति ब्रुवन्।।

'नन्दिन्या मूल' वत्यादिमन्त्रांश्चैव चतुर्दश।
'इदं विष्णु' रिति प्रोच्य 'अग्निं दूत' मिति ब्रुवन्।।

'मरुतः परमात्मे' ति 'मरुतो गणानां ' जपन्।
'उदुत्यं चित्र' मित्युक्त्वा 'जगद्धुव' मितिं ब्रुवन्।।

'यमो दाधार' इत्युक्त्वा 'नमस्ते निर्ऋते' इति।
एतान् मन्त्रान् जपित्वा तु अवघातं समाचरेत्।।

विष्णुं च चक्रराजं च रोहिणीं च समर्चयेत्।
तद् द्रव्यं पूजयित्वा तु शूर्पे वायुं समर्चयेत्।।

ब्राह्मणांश्च समाहूय यथार्हमवघातयेत्।
ब्राह्मणानामलाभे तु शूद्रान् चक्राङ्कितांस्तथा।।

शुचीन् स्नातान् समाहूय अवघातं च कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.११ अष्टबन्धकल्पनप्रकारः

स. १४ . ३३ - ३६

किट्टवालुकयोरष्टौ लाक्षाशर्करयोश्च षट्।
अश्मनोऽपि च तावन्तौ माषगैरिकयोरुभौ।।

गुग्गुलोरेक एवं स्यादेतान् भागान् प्रपूर्णयेत्।
तैलाज्यनवनीतानि मधूच्छिष्टं च योजयेत्।।

एतत्सर्वं समालोड्य यथापाकं विपाचयेत्।
अष्टबन्धस्त्वयं प्रोक्तः प्रतिमानां मनीषिभिः।।

विधिना स्थापयेद्देवं शिल्पिभिः शास्त्रकोविदैः।
कारयेदक्षिमोक्षान्तं बिम्बं नयनबन्धनम्।।

५.१८.१२ अष्टबन्धद्रव्यनिषेधः

क्रि. ३५ . ३९ - ४१

यदि चेद् द्रव्यलोभेन अन्यदेवालयार्जितम्।
रुद्रकाल्यादिबन्धार्थम् आचितञ्चाष्टबन्धनम्।।

तन्नेष्टमष्टबन्धं तत् विष्ण्वर्थं नैव कारयेत्।
अज्ञानादर्थलोभाद्वा येन केनापि हेतुना।।

शिष्टद्रव्येण कुर्याच्चेत् विनश्यति न संशयः।

५.१८.१३ अष्टबन्धयोजनप्रदेशः

क्रि. ३५ . ३८

बिम्बपीठस्य रन्ध्रे तु योजयेदष्टबन्धनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.१४ अष्टबन्धहानौ दोषः

क्रि. ३५ . १ - ४

अष्टबन्धनहीने तु पूर्वस्मिन् राष्ट्रनाशकृत् ।
आग्नेय्यामग्निना दाहः याम्ये स्याद्व्याधिपीडनम्।।

नैर्ऋत्यां सस्यनाशः स्यात् वारुण्यां वृष्टिनाशनम्।
वायव्यां श्रीविनाशः स्यात् कौबेर्य्यामर्थनाशनम्।।

ऐशान्यां ग्रामनाशश्च सर्वतो राष्ट्रनाशनम्।
बिन्दुकाकृतिभिर्भिन्ने ज्वरमारीप्रबाधनम्।।

अष्टबन्धनहानौ तु पुनस्सन्धानमाचरेत्।।

५.१८.१५ प्रतिष्ठाङ्गसूक्तादिजपः

य. २९ . १८ - २३

कौतुकप्रमुखे कुम्भं धान्योपरि सलक्षणम्।।

सन्न्यस्य दक्षिणे पार्श्वे चोत्तराभिमुखो बुधः।
स्वस्तिकासनमास्थाय प्राणायामं जपेत्पुनः।।

आत्मसूक्तं जपित्वान्ते मातृकां विधिवन्न्यसेत्।
ध्यायन्तो विष्णुसूक्तं च नरसूक्तमतः परम्।।

देवपादस्पृशो भूत्वा जपेयुर्ध्यानसंयुताः।
श्रीसूक्तं च जपेत्पश्चात्तत्तत्पादावनुस्पृशन्।।

ध्रुवस्य दक्षिणे पार्श्वे स्थित्वा चोदङ्मुखो गुरुः।
ध्रुवस्य पादौ स्पृष्ट्वैव ध्रुवसूक्तं तथैव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नरसूक्तं वैष्णवं च देव्योरपि तथैव च ।
परिषदां तत्तन्मन्त्रं च ध्यायन्नेव जपेद् गुरुः ।।

स. ३५ . ३१ - ३३ ; ज्ञा. ६८ . १२०
अ. २२.; खि. १७ . ३१० - ३१२
वि. ३३ . २३८; २३९

५.१८.१६ बेरे व्याहृतिन्यासः

वा. १५

बेरन्यासं प्रवक्ष्यामि शृणुध्वं शास्त्रचोदितम्।
मूर्धादिपादपर्यन्तं न्यासं कृत्वा विचक्षणः।।

आचार्यः सकलं ध्यात्वा सुदृढं विन्यसेद् बुधः।
सुवर्भुवर्भूरित्यादि चाक्षराणां विशेषतः।।

ऋषिच्छन्दोऽधिदेवांश्च क्रमाद्वक्ष्ये विशेषतः।
सुवरिति सुवर्लोकं भुवर्लोकं भुवस्तथा।।

भूलोकं भूरिति प्रोक्तं तस्माल्लोकत्रयात्मकाः।
बिम्बस्य हृदये सम्यङ् न्यसेद्बीजाक्षरं परम् ।।

कुत्सो भृगुस्तथाऽत्रिश्च क्रमाद्वै ऋषयो विदुः।
अनुष्टुबी तृष्टुबीगायत्रीछन्दश्च परिकीर्तितम्।।

गान्धारर्षभषड्जास्तु स्वराश्च परिकीर्तिताः।
सूर्योऽनिलोऽग्निर्दैवत्यः पीतः श्यामस्सितो निभः।।

ऋग्वेदाश्च यजुर्वेदास्सामवेदास्तदुत्थिताः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नपुंसकाश्च पुंलिङ्गा स्त्रीलिङ्गा इति च क्रमात्।।

खड्गदण्डं तथा पद्मम् आयुधं तत्क्रमेण हि।
किरीटं तु जटाबन्धं मुकटं च तथैव च।।

रक्तं श्वेतं तथा श्यामम् अम्बराण्यपि कीर्तिताः।
मूर्ध्नि नाभौ च पादान्तम् एतन्न्यासं स्थितिर्भवेत्।।

नाभौ मूर्ध्नि च पादन्तम् उत्पत्तिन्यास उच्यते।
पादौ मूर्ध्नि नाभ्यन्तं संहतिन्यास उच्यते।।

क्रि. ८ . ५०, ५१ ; प्र. १२ . ९७ - १०२
य. २९ . ४५ - ४७

५.१८.१७ बेरे मातृकान्यासः

य. २९. २४ - ४०

कुशकूर्चं समादाय चोत्तराभिमुखो बुधः।
अकारं पादयोर्मध्ये आकारं गुल्फयोरपि।।

इकारं जान्वन्तरे प्रोक्तं गुह्ये चान्यमतः परम्।
उकारं जठरे पश्चादूकारं हृदयेऽपि च।।

ऋकारं कण्ठमूले तु अन्यं कण्ठाग्र एव च।
ऌकारं दक्षिणे बाहौ वामे चान्यमतः परम्।।

एकारमोष्ठयोर्न्यस्य ऐकारं दन्तयोरपि।
ओकारं नासिकाग्रे तु औकारं दृष्टिमध्यमे।।

अंकारं मध्यमे न्यस्य सविसर्गं च मूर्धनि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नादयुक्तं सुसन्न्यस्य राजमन्त्रेण वेष्टयेत्।।

अकारं मस्तके पश्चादाकारं मुखवृत्तके।
इकारं दक्षिणे नेत्रे ईकारं वामनेत्रके।।

उकारं दक्षिणे कर्णे वामे चान्यं तथैव च।
ऋकारं दक्षिणपुटे नासिकायाश्च वामतः।।

अन्यं तद्‌गण्डयोः पश्चात् लृलॄकारौ क्रमेण तु।
एकारमुदरे न्यस्य ऐकारं मूर्ध्नि एव च।।

दन्तयोरुभयोः पार्श्वे ओकारौकारकौ तथा।
शिरस्यङ्कारमेवं स्याज्जिह्वायां सविसर्गकम्।।

स्वरान् क्रमेण विन्यस्य पश्चात्तद्दक्षिणे करे।
कवर्गमितरे हस्ते चवर्गं सन्धिषु न्यसेत्।।

टवर्गं दक्षिणे पादे वामपादे तवर्गकम्।
पार्श्वयोरुभयोः पश्चात् पकारद्वयमेव च।।

पृष्ठे बकारं जठरे भकारं हृदये ततः।
मकारं कुक्षिमध्ये तु यकारं बाहुमूलतः।।

रकारं तु गले चैव वामबाहौ वकारकम्।
पाणिना स्पृशताधश्च शकारं वक्रदक्षिणे।।

वामभागे षकारं स्याद्धृदयादूर्ध्वतः क्रमात्।
परहस्ते विशेषेण सकारं दक्षिणे पुनः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हकारमितरे हस्ते स्पृशता पाणिना बुधः।
कूर्चस्याग्रेण वा पश्चाल्लकारं जठरे न्यसेत्।।

क्षकारं मस्तके न्यस्य मूर्ध्नि चान्यं न्यसेत्क्रमात्।
वर्णाधिपांस्तान् ध्यात्वैव सनादप्रणवैर्युतम्।।

क्रमेण विन्यसेत्पश्चात् --------------।

अ. २२ ; क्रि. ८ . ५१ ; वा. १६

५.१८.१८ बेरे मन्त्रन्यासः

य. २९. ४० - ४५

-------------- मन्त्रैरङ्गान्सुबन्धयेत्।
एकाक्षरं समुच्चार्य मूर्ध्निमध्ये विशेषतः।।

ललाटे 'विश्वे निमग्ने' ति भ्रुवोः प्राण इति क्रमात्।
वितत्यबाणमित्युक्त्वा चक्षुषोः श्रोत्रयोरपि।।

'त्वं वज्रभृद्भूते' त्युक्त्वा 'धाता' नासिकयोरपि।
'ऋचो यजूंषि' जिह्वायां स एषेति च दन्तयोः।।

हन्वोः 'स सर्ववेत्ते' ति ओष्ठे 'सामैश्च सा' मिति।
'त्वं स्त्रीति' हृदये नाभ्यां 'मित्रश्चे' ति ततः परम्।।

'त्वं विष्णु' रिति गुह्ये च जान्वो 'स्त्वं भूर्भुवे' ति च।
'य एवं नित्य' मित्युक्त्वा गुल्फयोः पादमध्यमे।।

'बुद्धिमतां परां' चेति क्रमेणैव ऋचो न्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.१९ देव्योः परिवाराणां च बीजाक्षरन्यासः

य. २९. ४८, ४९

पार्श्वयोरुभयोर्देव्योस्तथा विन्यस्य मातृकाम्।।

तत्तद् बीजं सुसन्न्यस्य हृदये वेष्टयेत्तथा।

वा. १५

सर्वेषां परिवाराणां हृदये त्वक्षरं न्यसेत्।।

उक्तबीजाक्षरं वाथ तन्नामाद्यक्षरं तु वा।

मार्कण्डेयस्य मकारं भृकारं च भृगोस्तथा।।

मकारं ब्रह्मणस्तद्वत् उकारं शङ्करस्य तु।

इन्द्रस्य तु हकारं वा रकारं पावकस्य तु।।

यकारं यमदैवत्यं पकारं निर्ऋतिमेव च।

वकारं वा यकारं वा वरुणस्य तथैव च।।

वायोर्यकारं राकारं कुबेरस्य तथैव च।

विकारं विष्वक्सेनस्य शकारं शङ्करस्य तु।।

रूकारं वा खकारं वा भास्करस्य विशेषतः।

गकारं गरुडस्याथ चकारं चक्रदैवतम्।।

छकारं च ध्वजस्योक्तं शकारं शङ्खदैवतम् ।

भूकारं भूतदैवत्यं स्मृत्वा बीजाक्षरं न्यसेत्।।

बीजाक्षरो विशषेण यस्य देवस्य नोच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्य बीजाक्षरं प्रोक्तं तस्य नामादिचाक्षरम्।।

यद्देवस्य च यद्वर्णं तद्वर्णं तस्य चाक्षरम् ।

एवं क्रमेण सम्प्रोक्तं शृणुध्वम् ऋषिसत्तमाः।।

५.१८.२० कुम्भस्थदेवस्य ध्रुवबिम्बे आवाहनम्

वि. ३३ . २३९ , २४०

'इदं विष्णु'रिति मन्त्रेण कुम्भस्थमाधवं शक्तियुतं कूर्चेनादाय 'आयातु भगवान्' इति बिम्बस्य मूर्ध्नि विष्णुमावाहयामीति संश्राव्य आवाहयेत्। तत्पीठं परितः पुरुषाद्यावरणत्रयदेवानां तत्तन्नाम्ना समावाह्य श्रीदेव्या दक्षिणे श्रीकारं, वामे भूमेर्लकारं च , हृदये सन्यस्य तत्तन्मन्त्रेणाऽऽवाह्य, ततो ब्रह्मणो मकारं, शङ्करस्य शकारं, पुण्यस्य मकारं, भृगोश्च लकारं बीजाक्षरं सन्यस्य तत्तन्मन्त्रैस्तत्तन्नाममन्त्रं संयोज्याऽऽ (वै.म.प्र. ८) वाहयेत्।'संयुक्तमेतदिति' ध्रुवकौतुकयोस्सम्बन्धकूर्चं प्रक्षिप्य कौतुकादीनां पूर्वोक्तन्यासं च कृत्वा सौवर्णादिपात्रे शङ्खे वा पूतवारिणाऽपूर्य पुष्पाक्षतकुशकूर्चान् विन्यस्य दीपाद्दीपमिव ध्रुवबेरात् शक्तिं प्रणिधिजले तथा ध्यायन्, कौतुके बिम्बे समावाह्य, तद्दक्षिणे देवीं श्रियं वामे हरिणीं चाऽऽवाहयेत् । तथैव स्नपनोत्सवबलिबेरेषु क्रमेणाऽऽवाहयेत्। कुम्भस्थोदकेन कौतुकं परितः सुभद्राद्यावरणत्रयदेवानावाह्य अन्येषु परिवारबिम्बेषु तत्तद् बीजं विन्यस्य तत्तन्मन्त्रैः तत्तन्नाममन्त्रैः संयोज्याऽऽवाहयेत्। आचार्यः स्थापकाद्यैस्सहितः पुण्याहं वाचयित्वा ब्रह्मघोषं च कारयेत्।

ज्ञा.६८ . १२०, १२१ ; अ. २२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खि. १७ . ३१५ - ३२५

[अत्र अब्जाग्निविसर्जनानन्तरं आदित्यनमस्कारः कार्य इत्यधिकम्।]

प्र. १२ . १०२ - १०७

[अत्र

'श्रिये जाते'ति मन्त्रेण श्रियमावाहयेद्बुधः।
'मेदिनीति' च मन्त्रेण हरिणीं सम्यगाह्वयेत्।।

इति श्रियः हरिण्याश्चावाहने मन्त्रप्रतीकं विशिष्य निर्दिश्यत इति विशेषः।]

वा. १६

[अत्रापि प्रकीर्णाधिकारवद् विशेषः।]

स. ३५ . ३६ - ५५

'इदं विष्णु'रिति प्रोच्य कुम्भस्थं शक्तिसंयुतम्।।

कूर्चेनादाय तत्तोयमायातु भगवानिति।
विष्णुमावाहयामीति स्रावयेद्बिम्बमूर्धनि।।

आवाहयेच्चतुर्भिश्च नामभिः पुरुषादिकैः।
एवमावाहनं कुर्यात् ध्रुवबेरे तु पूर्वतः।।

बेरं मन्त्रैर्विधानेन भक्त्या चावाहने कृते।
भक्तानुकम्पया देवो बिम्बं व्याप्यैव तिष्ठति।।

'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः'।
इत्येवं श्रुतिराहेति वदन्ति मुनिसत्तमाः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीकारं तु श्रियो मह्या लकारं हृदये न्यसेत्।
दक्षिणे तु श्रियं देवीं महीं वामे समाह्वयेत्।।

संयुक्तमेतदित्युक्त्वा न्यसेत् सम्बन्धकूर्चकम्।
पूर्वोक्ताक्षरविन्यासं कुर्याद्वै कौतुकादिषु ।।

ध्रुवबेरात्तथा शक्तिं दीपाद्दीपमिव क्रमात्।
ध्यात्वैव कौतुके बिम्बे स्नापने चौत्सवे तथा।।

ध्रुवबेरात्तथाशक्तिं ध्यायन्नावाहयेत्क्रमात्।
प्रतद्विष्णुः स्तवत इति चास्त्वासनमुदीरयन्।।

पुष्पदर्भकुशेष्वेकं पीठान्ते त्वासनं ददेत्।
विश्वाधिकानामित्युक्त्वा स्वागतं च वदेद् बुधः।।

यथैव गार्हपत्याग्नेरन्वाहार्यः प्रणीयते।
तस्मादाहवनीयेऽपि नित्यमग्निः प्रणीयते।।

तथैव ध्रुवबेराद्वै कौतुके स्नपने तथा।
औत्सवे च तथा बिम्बे नित्यमावाह्य चार्चयेत्।।

उभये भित्तिपार्श्वे च ब्रह्मेशौ च समाह्वयेत्।
पुराणस्य भृगोश्चापि धात्रादीनां यथाक्रमम्।।

मणिकस्यापि सन्ध्यायास्तापसस्य तथैव च ।
तपोयुक्तस्य च तथा श्रीभूतस्य ततः परम्।।

गरुडस्य च शान्तस्य न्यक्षादीनां यथाक्रमम्।
इन्द्रादिलोकपालानां चक्रादीनां यथाक्रमात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महाभूतस्यापि तथा क्रमेणावाहनं चरेत्।
एतेषां तु पृथक्कुम्भे बिम्बे हीने तु तत्परः।।

तत्काले देवकुम्भं तं नीत्वा ध्यात्वा च तत्र तान्।
तत्कुम्भस्थजलेनैव ध्यात्वाथावाहयेदिमान्।।

सर्वेषां परिवाराणां हीने बिम्बे च कौतुके।
ध्रुवबेरं प्रतिष्ठाप्य पूर्वपीठे समर्चयेत्।।

ध्रुवबेरेऽपि हीने तु पीठे वा केवलेऽर्चयेत्।
आचार्यःस्थापकाद्यैश्च सहितः सुसमाहितः।।

पुण्याहं वाचयित्वैव ब्रह्मघोषं च कारयेत्।
सर्वान् कुम्भस्थरत्नादीनाचार्याय ददेन्मुदा।।

क्रि. ८ . ५१ - ५८

आत्मसूक्तं ततो जप्त्वा कूर्चेनादाय वै ततः।।

कुम्भात् शक्तियुतं तोयं आयातु भगवानिति।
विष्णुमावाहयामीति स्रावयेत् बिम्बमूर्धनि।।

प्रागादिपुरुषं सत्यमच्युतं चानिरुद्धकम्।
बिम्बमूर्ध्नि समावाह्य पीठे तु परितः क्रमात्।।

तत्तद्दिक्षु समावाह्य पुष्पन्यासोक्तदेवताः।
श्रीदेवीहृदये कृत्वा श्रीवत्सादिकमक्षरम्।।

लक्ष्मीपूर्वाक्षरं मन्त्रं हृदये चैव विन्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सानुस्वारं च विन्यस्य 'श्रिये जात' मिति श्रियम्।।

मेदिन्यादीन् समुच्चार्य महीमावाहयेत्क्रमात्।
गर्भालयस्थितान् देवान् द्वारेशान् द्वारपालकान्।।

विमानेशान् लोकपालान् अनपायिन एव च।
तत्तन्मन्त्रैस्समावाह्य ततो वै कौतुकादिषु।।

कृत्वा मन्त्राक्षरन्यासौ ध्रुवादावाहयेत्क्रमात्।

वा. १६

कूर्चेनादाय तद्भक्त्या ध्यानयुक्तं सुनिश्चलम्।
'इदं विष्णुरि' तीत्युक्त्वा 'आयातु भगवानि' ति।।

कूर्चेनादाय तच्छक्तिं ध्रुवबेरस्य मूर्धनि।
आवाहयेत्तु तच्छक्तिं पञ्चमूर्तिक्रमेण वै।।

अथवाचार्यहस्तेन तोयपुष्पादिनाह्वयेत्।
अचले देवदेवेशं तद्व्याप्तं तिष्ठति श्रुतिः।।

'स ब्रह्मा स शिवश्चे'ति प्रणम्यैवानुमान्य च।
पश्चाद्देव्यौ समावाह्य नमस्कुर्यात्प्रयत्नतः।।

'श्रिये जाते'ति मन्त्रेण श्रियमावाहयेद्बुधः।
'मेदिनी'ति च मन्त्रेण हरिणीं सम्यगाह्वयेत्।।

कौतुकं चोत्सवं चैव स्नपनं च तथैव च।
ध्रुवबेरात्समावाह्य दीपाद्दीपमिव क्रमात्।।

प्रणिधिमुद्धृत्य तत्काले कूर्चेनावाहयेद्बुधः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कौतुकस्य च देव्यादीनौत्सवस्य विशेषतः।।

सम्यक् पूर्ववदाहृत्य चोक्तमन्त्रं समुच्चरेत्।
यथा गार्हपत्यस्यादावाहवनीयादिषु क्रमात्।।

अग्निं प्रणीय हुत्वा तु तथा चैव ध्रुवस्य तु।
कौतुकादीन् समावाह्य विधिना सम्यगर्चयेत्।।

य. २९ . ४९ - ६५

प्राणायामं ततः कृत्वा देवदेवं समीक्ष्य च ।।

पुष्पाञ्जलिं विसृज्यैव प्रणम्यैवानुमान्य च ।
प्रणम्य शक्तिं कुम्भस्था 'मिदं विष्णु' रिति ब्रुवन्।।

'आयातु भगवानि' ति कूर्चेनादाय मन्त्रवित्।
कुम्भाच्छक्तिं ध्रुवे पूर्वं विष्णुमावाहयामि च ।।

इदं जलं मूर्ध्नि सह स्रावयेन्मतिमान् गुरुः।
तस्य पीठस्य परितः प्राच्यां पुरुषं च दक्षिणे।।

सत्यं प्रतीच्यां पूर्वोक्तमच्युतं चानिरुद्धकम्।
उत्तरे सम्यगावाह्य कपिलादीन् यथाक्रमम्।।

पुष्पन्यासोक्तवद्धीमान् मूर्त्या चावाहयेत्क्रमात्।
'श्रियमावाहयामी' ति पार्श्वे तद्दक्षिणे ततः।।

महीं वामे समावाह्य प्रणम्यैवानुमान्य च ।
मकारं हृदये न्यस्य ब्रह्माणमपि पूर्ववत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शकारं हृदये न्यस्य रुद्रमावाहयेत्क्रमात्।
मकारं च भृकारं च हृदि मुन्योर्यथाक्रमम्।।

सन्न्यस्यैव च मूर्त्या वै मूर्ध्नि चावाहयेत्क्रमात्।
'संयुक्तमेत' दित्युक्त्वा न्यसेत्सम्बन्धकूर्चकम्।।

पूर्वोक्तानक्षरान् न्यस्य चोक्त्वा वै 'भूरसी' ति च।
कूर्चं प्रागग्रकं न्यस्य ध्रुवकौतुकमध्यमे ।।

कौतुकादुत्तराग्रं च दक्षिणे स्नपनान्तरे।
उत्तराग्रमुदीच्यन्तं मध्यमे चोत्सवस्य तु।।

एवं गर्भगृहे चोक्तं कूर्चं नैवान्वयोस्तयोः।
ध्रुवबेरात्तथा शक्तिं दीपाद्दीपमिव क्रमात्।।

कौतुके सम्यगावाह्य स्नपने चोत्सवे ततः।
ध्यायन्नावाहयेद्विद्वान् ध्रुवात्तत्क्रमशः सुधीः।।

यथा वा गार्हपत्याग्नेरन्वाहार्ये प्रणीयते।
तस्मादाहवनीये तु नित्यमग्निः प्रणीयते।।

तथैव कौतुकादौ तु सम्यगावाहयेद् ध्रुवात्।
प्रागादिपरितो वेद्यामिन्द्रादीनां स्वनामतः।।

आवाहयेत्तथाऽभ्यर्च्य धात्रादीन् पार्षदान् क्रमात्।
तत्तद्बीजं सुसन्न्यस्य महाभूतान्तमेव च।।

आवाहयेद् गुरुर्धीमान् बीजं नैव स्थले यदि।

अ. २२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.२१ प्रादुर्भावादिध्रुवबेराणामावाहनम्

क्रि. ८ . ५८, ५९

यद्यत्र लौकिकं बेरं प्रादुर्भावादयो ध्रुवाः।।

प्रतिष्ठाप्य क्रमात्तेषां तस्मादावाहयेत् ध्रुवात्।

५.१८.२२ बालालयबिम्बविनियोगः

क्रि. ७ . ४१ - ४७

मूलालयप्रतिष्ठा चेन्नीत्वा बालालयात् हरिम्।
देवं विशेषतोऽभ्यर्च्य हविः सम्यङ् निवेदयेत्।।

तद्बिम्बसंस्थितां शक्तिं कुम्भे कूर्चेन विन्यसेत्।
ध्रुवानुरूपं तद् बिम्बं यदि दोषविवर्जितम्।।

तदेव कौतुकं कुर्यात् नानुरूपं तु लौकिकम्।
संस्थाप्य लौकिकादीनां स्थानादन्यत्र पूजयेत्।।

सदोषं बिम्बमम्भोधौ नद्यां वा विधिना त्यजेत्।
भूपरीक्षादिकर्मार्थमन्यस्थानस्थलौकिकम्।।

याचितं चेत् प्रदातव्यं कर्मान्ते तद्यथा पुरा।
स्थापयेद्धाम्नि पूर्वस्मिन् उत्सवार्थमथापि वा।।

बालालयप्रतिष्ठार्थं याचयेदिति केचन।
अन्यालयध्रुवस्यैतदनुरूपं भवेद्यदि।।

कौतुकं चौत्सवं वापि स्थापयेदिति केचन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स. ३१. ७२ - ७७

तद्बिम्बं स्फुटिताद्यैश्च दोषैरुक्तैर्विवर्जितम् ।
लक्षणैरपि सर्वैश्च तथा युक्तं यथोदितैः ।।

विमानं ध्रुवबेरस्य चानुरूपं भवेद्यदि।
मूलालयप्रतिष्ठार्थं बिम्बं कौतुकमाहरेत्।।
लक्षणैरपि हीनं च दोषैरुक्तैश्च संयुतम् ।
विमानस्य ध्रुवस्यापि नानुरूपं च यद्भवेत्।।

अब्धौ समुद्रगायां तु नद्यां वा विधिना त्यजेत्।
लक्षणैश्च समायुक्तं बिम्बमन्यत्समाहरेत्।।

द्वयोश्च नानुरूपं च लक्षणैश्च युतं यदि।
न त्याज्यं कौतुकस्यापि स्नपनस्योत्सवस्य वा।।

स्थानादन्यत्र देशे तु तद्बिम्बं च यथोचितम्।
स्थापयेदर्चनं चास्य यथालाभं यथोचितम्।।

ज्ञा. ६४ . १११, ११२

तरुणालयेऽर्च्यमानं बिम्बमानीय मूलालये प्रतिष्ठा चेत् देवस्य विशेषपूजां कृत्वा अभिमुखे कुम्भपूजनमेवं कृत्वा तद्बिम्बाद्देवमावाहयेत्। तदर्चितं बिम्बं ध्रुवबेरस्यानुरूपं लक्षणयुक्तं दोषहीनञ्चेत् तदेव मूलालये प्रतिष्ठापयेत्। नाननुरूपम् । लक्षणहीनं खण्डस्फुटितादिदोषैर्युक्तं दारूपलकृतञ्च यद्भवति तत् त्यक्त्वान्यदादाय प्रतिष्ठापयेत्। अननुरूपमपि लक्षणयुतं दोषविहीनं लौकिकं तत्कौतुकौत्सवार्चाबिम्बानां स्थानादन्यत्र तदालये प्रतिष्ठाप्य यथालाभमर्चयेत्। पूर्वार्चितं बिम्बं दोषविहीनं यस्त्यजेत् स पापीयान्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति। प्रथमे तरुणालये सद्यः अर्चितुमिच्छन् अलब्धे यथोक्ते कौतुके बिम्बे यथोक्तं तद्यावत्पुनः लभेत तावत् ध्रुवबेरस्योक्तवृक्षैरश्वत्थेन वा यथालाभमानेन कृतं बिम्बं प्रतिष्ठाप्यार्चयति। परिवारदेवानाञ्च तत्तद्बिम्बं सन्न्यस्य तत्तद्रूपाणि यथोक्तं ध्यात्वा आवाहयेत्।

अ. २० ; य. २७ . ३६ - ४२

वा. १३

बालालयस्य बिम्बं तु दारुणा च कृतं यदि।।

तच्च बेरं समादाय अग्निना दाहयेत् बुधः।
अथवा खानयेद्विद्वान् जले चैव विशेषतः।।

कैश्चिदुक्तं विशेषेण जलेनैव विनिक्षिपेत्।
सौवर्णं मणिरत्नं च राजतं ताम्रमेव वा।।

एतद्द्रव्यकृतं बेरं यदि तत्र विशेषतः।
तस्य शक्तिं समादाय उक्तकुम्भेषु सन्न्यसेत्।।

तद्बेरं च समादाय लक्षणं तत्समीक्ष्यते।
कौतुकाद्यादिना कल्प्य विधिनास्थाप्य चार्चयेत्।।

५.१८.२३ प्रतिष्ठानन्तरार्चनक्रमः

य. २९ . ६५ - ६९

पादौ प्रक्षाल्य चाचम्य गर्भगेहं प्रविश्य च ।।

समीक्ष्य देवदेवेशं प्रणामं कारयेत्तथा।
पुण्याहं कारयित्वान्ते पूजयेदर्चनोक्तवत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेदान् सूत्रपुराणाद्यान् क्रमादध्यापयेत्पुनः।
पायसान्नं निवेद्यैव होमं हुत्वा बलिं ददेत्।।

बलिबिम्बं समभ्यर्च्य आलयं तत्प्रदक्षिणम्।
स्तुत्वा देवं प्रणम्यैव गुरुं पश्चात्सुपूजयेत्।।

स्नपनोक्तक्रमेणैव तद्रात्रौ स्नपनं चरेत्।
प्रतिष्ठान्तोत्सवं पश्चात्तद्दिनस्यापराह्णतः।।

स. ३५ . ५८ , ५९

ज्ञा. ६८ . १२१

[अत्र कृसरगौल्ययावकानि हवींषि इति निवेदनद्रव्याणां बाहुल्यं वर्तते।]

खि. १७ . ३२६ - ३२९

[अत्र सप्तविंशतिभेदेन देवतार्चनमित्यधिकम्।]

वि. ३३ . २४०

[अत्र ब्राह्मणभोजनं वैष्णवपूजनं चेत्यधिकम्।]

५.१८.२४ प्रतिष्ठान्ते उत्सवः

खि. १७. ३३० - ३३२

तद्दिने चापराह्णे तु घोषणादिर्विधीयते।
नवाहं वाथ सप्ताहं पञ्चाहं त्रियहन्तु वा।।

उत्सवोक्तविधानेन चोत्सवं सम्यगाचरेत्।
एकाहिकं तु कुर्याच्चेन्न ध्वजारोहणं चरेत्।।

स्नपनं वा प्रकुर्वीत तद्रात्रौ तु विचक्षणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्सवान्तदिने रात्रौ स्नपनं सम्यगाचरेत्।।

स. ३५. ५८ - ६१

ज्ञा. ६८. १२१

[अत्र यथाशक्ति स्नपनाभावे शुद्धोदकस्नानम् इत्यधिकम्।]

अ. २२

[अत्र नित्यार्चनम् नैमित्तिकबलिश्चेत्यधिकम्।]

य. २९. ६९

वि. ३३ . २४०

[अशक्तविषये रात्रौ ग्रामप्रदक्षिणं वा आलयप्रदक्षिणं वा कारयेत् इति विशेषः]

क्रि. ८. ६१, ६२

बलौ बल्युत्सवं कुर्यात् स्नापने स्नापनं चरेत्।।

तद्दिने सायमारभ्य चौत्सवे चौत्सवं चरेत्।

घोषणं सद्य एवात्र कुर्यादित्याह पूर्वजः।।

५.१८.२५ यागोपयुक्तद्रव्यविनियोगः

खि. १७ . ३३८ - ३४२

प्रतिष्ठायामुत्सवेषु स्नपनादौ च वस्तु यत्।।

उपयुक्तं तत् क्रियासु पूजनार्थाहृतञ्च तत्।

वस्त्रधान्यादिकं सर्वं पात्राणि विविधानि च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आचार्यायैव सन्दद्यात् न कुर्यात् अन्यथा क्वचित्।
अनर्हमुपयोगाय द्रव्यं दर्भादिकं तथा।।

काष्ठादिकं तु यच्छिष्टं दाहयेदप्सु वा क्षिपेत्।
स्रुवं जुहूं च दर्वीं च दर्भमालादिकं तथा।।

एवमादीनि देवार्थं तत्रैव परिरक्षयेत्।

स.३५. ७, ८; ज्ञा. ६८. १२१ ; वा. १६

क्रि. ८. ६६; य. २९. ६९, ७०

क्रि. ८ . ६७ - ६९

स्रुक् स्रुवादीनि पात्राणि त्वरणी मङ्गलाष्टकम्।
पुनश्च कर्मयोग्यानि यानमासनमेव च।।

वितानं च ध्वजं छत्रं चामरव्यजनादिकम्।
ग्राह्यं पुनश्च कर्मार्थं हविरर्घ्यादिपात्रकम्।।

अन्यान्यनुपयोज्यानि दाह्यान्याहुर्मनीषिणः।

५.१८.२६ कुम्भस्थजलस्नानादेः फलम्

स. ३५. ५६, ५७

तत्कुम्भस्थजलेनैव यः स्नायाद् भक्तिमान् नरः।
आत्मानं प्रोक्षयेद्यो वा सर्वपापैः प्रमुच्यते।।

सर्वदोषप्रशमनं सर्वकामाभिवृद्धिदम्।
एतस्माद्वै समं तीर्थं न भूतं न भविष्यति।।

वि. ३३ . २४०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५.१८.२७ प्रतिष्ठाफलश्रुतिः

खि. १७. ३४२ - ३५४

एवं यः कुरुते भक्त्या विष्णोः स्थापनमुत्तमम्।।

ब्राह्मणः श्रद्दधानस्तु यतवाक्कायमानसः।
तस्य कायकृतं पापं तत्क्षणादेव नश्यति।।

सर्वयज्ञफलं लब्ध्वा सर्वान् कामानवाप्य च।
एकविंशतिपूर्वांश्च परानप्येकविंशतिम्।।

प्रापयित्वाऽत्मनाऽन्ते तु विष्णुलोकं स गच्छति।
विष्णुलोकं समासाद्य तद्विष्णोः परमं पदम्।।

प्राप्नोति तत्रोक्तफलमिति पूर्वजशासनम्।
क्षत्रियो विजयं कीर्तिं लब्ध्वाऽन्यूनपरिग्रहः।।

सर्वक्षत्राभिवन्द्याश्च सागरान्तां लभेत गाम्।
स भुक्त्वा चैहिकान् भोगान् विष्णोस्सारूप्यमाप्नुयात्।।

वैश्योऽतिधनसम्पन्नस्तेजस्वी पुत्रपौत्रवान्।
सर्वान् मनोरथान् भुक्त्वा विष्णोस्सामीप्यमाप्नुयात्।।

शूद्रस्तु धनसम्पन्नस्तेजस्वी कुलवर्धनः।
कामं भुक्त्वैहिकान् भोगान् विष्णुसालोक्यमृच्छति।।

अनुमन्ता च यस्तत्र तस्य पापं प्रणश्यति।
पूर्वजन्मकृतं पापमिह जन्मनि वा कृतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वं गता ये पितरः पितामहततामहाः।
मातृवंशे च ये पूर्वं गता मातामहादयः।।

पत्नीवंशप्रजाताश्च मित्राणां चैव वंशजाः।
भृत्यवर्गाश्च सम्बन्धिजातास्सर्वविधाः स्थिताः।।

पूर्वे परे चैकविंशाः यजमानेन संयुताः।
इह लोके सुखं भुक्त्वा स्वर्गे लोके च वै चिरम्।।

विष्णुलोके वसेयुश्च पुनरावृत्तिवर्जिताः।

स. ३५. ६६ - ७८; ज्ञा. ६८. १२१, १२२
अ. २२; य. २९. ७१
प्र.१२.१२७ - १३६; वा. १६; वि. ३३. २४१, २४२

५.१८.२८ प्रतिष्ठाविध्युल्लङ्घने दोषः

खि. १७. ३३३ - ३३५

अत्रोक्तं यत्तु तत्सर्वं विधिनैवं समाचरेत्।
द्रव्यहीने द्रव्यहानिः क्रियाहीने च कर्मणः।।

मन्त्रहीने च सर्वार्थान् नाशयेच्च फलं क्रतोः।
तस्माच्छास्त्रोक्तमार्गेण यजमानस्समाहितः।।

सर्वं समाचरेद्भक्त्या न भूयान्नास्तिकः क्वचित्।

५.१८.२९ मूर्तिभेदेन प्रतिष्ठामन्त्रभेदः

स. ३५. ६४, ६५

सर्वेषामपि देवानां प्रतिष्ठाविधिरेष वै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्पः साधारणः प्रोक्तो मन्त्र एव विशिष्यते।।

मूर्तिमन्त्रप्रभेदैश्च मन्त्रैस्तद्दैवतैरपि।
अर्हानर्हौ विचिन्त्यैव योजयेत् सर्वकर्मसु।।

५.१८.३० प्रतिष्ठादिने यजमानकृत्यम्

खि. १७ . ३०१ - ३०४

गुरुं सम्पूज्य तत्काले यजमानो मुदान्वितः।।

तथा पदार्थिनस्सर्वान् नमस्कुर्यात्स्वदैववत्।
देवमानम्य च ब्रूयादिमं मन्त्रं स्मरन् हरिम्।।

'क्षमस्व पुण्डरीकाक्ष भक्तस्य मम शक्तितः।
यद्यदिष्टमनिष्टं वा भगवंश्चरितं मया'।।

इत्युक्त्वा देवदेवेशं प्रणमेच्च पुनः पुनः।

५.१८.३१ प्रतिष्ठा अशक्तविषयिका

क्रि.८. ६९ - ७६

एवं कर्तुमशक्तश्चेत् वर्णहीनं शिलामयम्।।

ब्रह्मस्थाने प्रतिष्ठाप्य पूजयेदिति केचन।
वक्ष्यामि तत्क्रमं बेरं चित्रं सर्वाङ्गसुन्दरम्।।

कृत्वाक्षिमोचनं पश्चात् अमन्त्रकमतः परम्।
तत्तत्पदे प्रतिष्ठाप्य शिलास्थापनमार्गतः।।

पर्यग्निपञ्चगव्याभ्यां शुद्धिं कृत्वा तु तत्र वै।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समन्त्रकाक्षिमोक्षान्ते पञ्चगव्यादिपूरितान्।।

कुम्भान् त्रियष्टियोगेन सरन्ध्रान् बेरमूर्धनि।
पतेद्धारा यथा तस्मात् तथा सन्न्यस्य तान् क्रमात्।

अधिवासक्रियां कुर्यात् अभिषेकान्वितं पृथक्।।

अथवाऽभिमुखे कृत्वा पञ्चगव्यादिपूरितान्।
अष्टोत्तरशतं जप्त्वा तत्तन्मन्त्रान्यथाक्रमात्।।

अभ्युक्ष्य स्नापयेद्देवं प्रत्येकं भावयेज्जलैः।
महाप्रतिष्ठामार्गेण प्रतिष्ठां पुनराचरेत्।।

औत्सवे बलिबेरे च तस्मादावाहनं स्मृतम्।

अ.२२

५.१८.३२ प्रतिष्ठानन्तरम् अविच्छेदेन नित्यार्चनविधिः

स.३५, ६१ - ६३

प्रतिष्ठान्तं प्रभृत्यैव नित्यं सम्यग्विधानतः।।

नित्यार्चनमविच्छिन्नं हविषां च निवेदनम्।
भक्त्या प्रयत्नतः शक्त्या श्रद्धायुक्तश्च कारयेत्।।

अन्यथा यजमानश्च ग्रामश्चापि विनश्यति।
अर्चनाच्च हविर्दानाद् गच्छेद्विष्णोः परं परम्।।

५.१८.३३ आलयपूजाया अविच्छित्तिसम्पादनम्

ज्ञा. ६८. १२१, १२२

प्रतिष्ठान्तप्रभृति नित्यमहीनमविच्छिन्नं समग्रं चिरकालार्चनं यथा गच्छेत्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथा दीर्घस्थितिमविरोधात् समवेक्ष्य नानाविधभूमिभोगानत्यन्तपुष्कलान् यत्नेन भगवत्पूजनार्थं तत्पूजकादीनामाचार्यादीनां नित्यदक्षिणार्थं च कल्पयित्वा देवस्य परिच्छदांश्च दत्वा तथैव चिरकालं नित्यार्चनं कारयेत्। चिरकालार्चनेन अभीष्टान् सेर्वान् चिरमवाप्नोति। तथा भोगम्। अज्ञानादर्थलोभान्मोहाद्वा न कुर्याच्चेति महादोषो भवेत्। देवार्थं कल्पितं सुवर्णपशुभूम्यादि सर्वमन्यत् द्रव्यं च 'विष्णोरिद' मिति सञ्चिन्त्य आचार्यहस्ते अर्चकहस्ते वा जलेनैव दद्यात्। तत्सर्वं विष्णोर्दत्तमेव भवेत्। येन यन्नैव पतेत् तस्य तत्पात्रमित्याहुः।

ज्ञा.२१ . ४०

[1] तत्र बहुशः तूष्णीं कर्षयित्वा बीजानुप्त्वा पुरतः तत्क्रममार्गेण भोगैश्वर्यवशादर्चनस्नपनोत्सवबल्यर्थमेतावत् हविषामर्थमेतावत् पुष्पगन्धानुलेपनदीपार्थमेतावत् विष्णुपञ्चदिनपूजार्थमर्चनादक्षिणार्थमेतावत्। शुश्रूषाकारिणामेतावत् वादित्रजीविनां भक्तानामतिथीनामेतावत् शिष्याणामध्येतॄणाम् एतावत् अप्सरसां गायकनर्तकवादकानां विपञ्चीरववादिनां मर्दलकानामेतावत् खण्डस्फुटितनिवृत्त्यर्थं नवकर्मक्रियां प्रत्युपकारिणां दानार्थमेतावदिति निश्चित्य तत् सर्वं पूर्ववत्ताम्रपत्रे अर्पयित्वा सीमाविनिर्णयं कृत्वा आचार्यमर्चकं वा वस्त्राङ्गुलीयककुण्डलादिभिः अलङ्कृत्य तद्धस्ते सोदकं दद्यात् एतत्सर्वेषामेव भवति। एवं कर्तुमशक्तश्चेत् विमानदेशमात्रं दद्यात्। पश्चात् सर्वसमृद्धिरपि तस्यैव भवेत्।

स.४. ३८ - ४९

यजमानः प्रसन्नात्मा नवभेदविधानतः।

---

1. शोधितभूमौ इत्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋत्विगुक्तगुणैर्युक्तान् अर्चकान् परिचारकान्।।

प्रधानाचार्यपूर्वं तान् वरयित्वा च तैः क्रमात्।
प्रतिष्ठान्तप्रभृत्येव भक्त्या यत्नात् स्वशक्तितः।।

नित्यार्चनमविच्छिन्नं कारयेत्तु विधानतः।
नित्यार्चने तु विच्छिन्ने यजमानो विनश्यति।।

आचार्यस्थापकादीनामर्चाहीने महद्भयम्।
आद्योऽर्चकोऽथ पुत्रादिः तन्नियुक्तोऽथवार्चयेत्।।

ग्रामाङ्गविहिता पूजा विच्छिन्ना चेत्प्रमादतः।
तद्ग्रामस्य विनाशः स्यात् तस्मान्नित्यं समर्चयेत्।।

अविच्छिन्नार्चनार्थं च भूमिभोगं च कल्पयेत्।
हविषश्चोपदंशाज्यदध्नं च मुखवासयोः।।

धूपदीपार्घ्यद्रव्याणां पुष्पगन्धाक्षतान् प्रति।
नवभेदेष्वथैकैकं निश्चित्य परिकल्प्य च।।

आचार्यस्यार्चकानां च परिचारकसंयुतम्।
भूमिभोगैः सुसम्पन्नां दक्षिणां परिकल्पयेत्।।

सङ्क्रान्त्यां श्रवणे चैव द्वादश्योः पर्वणोरपि।
अन्यस्मिन् पुण्यनक्षत्रे विशेषेणार्चनाय च।।

हविषां स्नपनादीनामुत्सवस्य तथैव च।
नवकर्मक्रियार्थं च प्रायश्चित्तक्रियां प्रति।।

वाद्यघोषणकर्तॄणां भूमिभोगांश्च शक्तितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुश्रूषकाणां भक्तानां भोजनार्थं च कल्पयेत्।।

सर्वमाचार्यहस्ते तु जलेनैव ददेत्ततः।
देवदेवस्य हस्ते तु दत्तमेव न संशयः।।

वि.१४ . ६७

नित्यनैमित्तिकार्थमाचार्यार्चकादीनां जीवनार्थम् अन्यद्दिव्यविभावार्थं चात्यन्तफलपुष्कलान् भूमिभोगान् आचार्यहस्ते देवसन्निधौ यजमानस्सोदकं दद्यात्। सर्वमाचार्यनियोगेन कारयेत्। आचार्यार्चकादयः क्लेशयुक्ताश्चेज्जनास्सर्वे सर्वदा क्लेशयुक्ता भवेयुः, राज्ञो राष्ट्रस्य च महद्भयं ग्रामयजमानयोर्नाशश्च भवेत्। तस्मात्सर्वप्रयत्नेन आचार्यार्चकादीनां जीवनार्थं भूमिभोगं सुसम्पन्नं कल्पयेत्। आचार्यार्चकपरिचारकादीनामभावे तत्पुत्रादीन्, तदभावे तन्नियुक्तांश्च (न्वा) कारयेत्। अन्यथा महत्तरो दोषो भवति इति विज्ञायते।

प्र.१२, १०७ - १२६

नवधा मार्गमालोक्य यथेष्टं कर्तुरिच्छया।।

अविच्छिन्नार्चनं नित्यं विधिनैव प्रकल्पयेत्।
अशक्तश्चेत्तथा कर्तुं प्रतिष्ठां नैव कारयेत्।।

आढ्यस्सर्वसमस्त्यागी चिकीर्षुर्विष्णुमन्दिरम्।
स्वार्थं कृत्वा त्रिधैकांशं कुटुम्बार्थे विधाय च।।

अंशाभ्यामवशिष्टाभ्यां विमानार्चनमारभेत्।
आपद्यपि च कष्टायां न द्रुह्येदात्मने बुधः।।

अविच्छिन्ना यथा पूजा विधिना सम्प्रवर्तते।
तथा प्रकल्पयेद्विदान् भूमिभोगेन वै स्थितिम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्चकस्यार्चनार्थं च कुटुम्बार्थं च यत्नतः।
अत्यन्तपुष्कलां भूमिं बहुसस्योचितां तथा।।

करग्रहादिरहिताम् अर्चकाय समर्पयेत्।
ततश्च ताम्रपट्टादौ लेख्य सीमाविनिश्चयम्।।

देवनाम्नैव तां भूमिं दद्यादर्चकजीविकाम्।
इदमग्रे प्रकुर्वीत तदधीना स्थितिर्हरेः।।

पिता हरिस्तु भगवानर्चकः पुत्र उच्यते।
पुत्रस्य न लिखेन्नाम सन्निधाने पितुः क्रमात्।।

अर्चकस्सुप्रसन्नात्मा हरिरेव हि केवलम्।
अथवा विलिखेद्विद्वान् नाम्ना वा पूजकस्य च।।

तथार्चकस्य चावासमालयस्य समीपतः।
शिलाभिः सुदृढं कृत्वा वासायास्य प्रशस्यते।

अक्लेशेन यथा जीवेदर्चकस्सुसमाहितः।
यावच्चन्द्रदिवानाथं तथा कुर्यात् प्रयत्नतः।।

अर्चके क्लेशयुक्ते तु क्लिश्यते भगवान् हरिः।
अर्चके तु सुसन्तुष्टे तदा तुष्टो जनार्दनः।।

रूपद्वयं हरेः प्रोक्तं बिम्बमर्चक एव च।
बिम्बे त्वावाहनादर्वाक् सदा सन्निहितोर्चके।।

पुनर्विचिन्त्य धर्मात्मा यजमानो मुदान्वितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शक्तिलोभमकृत्वैव करोति विभवान्तरम्।।

पञ्चपर्वसु सङ्क्रान्तौ पुण्याहेष्वितरेषु च।
विशेषपूजनार्थं च हविरर्थं च यत्नतः।।

स्नपनार्थं चोत्सवार्थं प्रायश्चित्तार्थमेव च।
नटनर्तकदासीनां गायकानां च शक्तितः।।

विद्यार्थिनां च भक्तानामन्यस्य विभवस्य च।
वृत्तिं तु परिकल्प्यैव भूरूपां पुरतो हरेः।।

ददात्याचार्यहस्ते तु मन्त्रोदकपुरस्सरम्।
अन्येषां विभवानां च तथैवान्यपदार्थिनाम्।।

तत्तन्नाम्नैव भूम्यादिं दापयेद्देशिकोत्तमः।
आचार्यस्यापि तन्नाम्ना कल्पयेद्वृत्तिमुत्तमाम्।।

५.१८.३४ दत्तग्रामादेः अपहारस्य निषेधः

ज्ञा.१७ . ३३

सुरविप्रक्षेत्रं गोष्पदं वापि यो हन्यात् त्रिसप्तनरकान् घोरान् गत्वा भूयस्तिरश्चां गतिसहस्रमवाप्नुयात्। तस्मात् सर्वप्रयत्नेन विषवह्निसमं राजा सुरब्राह्मणदत्तं परिहरेदिति विज्ञायते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi







STUDENTS OFFSET, TIRUPATI. Ph:2260253

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.